नमो नमो निम्मल दंसणस्स



आगमसुत्ताणि
(सटीकं)

भागः - ११

: संशोधक सम्पादकश्च :

मुनि दीपरत्नसागर

Jain Education International   For Private & Personal Use Only   www.jainelibrary.org

बालब्रह्मचारी श्री नेमिनाथाय नमः
नमो नमो निम्मल दंसणस्स
श्री आनंद-क्षमा-ललित-सुशील-सुधर्मसागर गुरूभ्योनमः

आगम सुत्ताणि (सटीकं)

भागः-११ प्रज्ञापनाउपाङ्गसूत्रम्-२

-: संशोधकः सम्पादकश्चः :-

मुनि दीपरत्नसागर

ता. १४/४/२००० रविवार २०५६ चैत्र सुद ११

४५- आगम सुत्ताणि-सटीकं
मूल्य रू.११०००/-

卐 आगम श्रुत प्रकाशन 卐

-: संपर्क स्थल :-
"आगम आराधना केन्द्र" शीतलनाथ सोसायटी विभाग-१,
फ्लेट नं-१३, ४-थी मंझिल, व्हायसेन्टर, खानपुर,
अहमदाबाद (गुजरात)

Jain Education International For Private & Personal Use Only www.jainelibrary.org

२ प्रज्ञापनाउपाङ्गसूत्रस्य विषयानुक्रमः

[भागः-१० प्रज्ञापनाउपाङ्गसूत्रं-१ - पदानि-१.....१४ गतानि]

भागः-११ प्रज्ञापनाउपाङ्गसूत्रं-२ - पदानि-१५.....३६

मूलाङ्कः	विषयः	पृष्ठाङ्कः	मूलाङ्कः	विषयः	पृष्ठाङ्कः
४१९-४३७	**पद-१५ इन्द्रियं**	५		द्वारं-३ इन्द्रियं	
	उद्देशकः-१			द्वारं-४ कायः	
	इन्द्रियस्यनामादि			द्वारं-५ योगः	
	उद्देशकः-२			द्वारं-६ वेदं	
	इन्द्रियस्यउपचयआदि-			द्वारं-७ कषायः	
	द्वादशाधिकारः			द्वारं-८ लेश्या	
-४४१	**पदं-१६ प्रयोगः**	२९		द्वारं-९ सम्यक्तव	
	प्रयोगस्य पञ्चदशभेदाः			द्वारं-१० ज्ञानं	
-४७०	**पदं-१७ लेश्या**	४३		द्वारं-११ दर्शनं	
	उद्देशकः-१			द्वारं-१२ संयतः	
	समाहारादि सप्ताधिकारः			द्वारं-१३ उपयोगः	
	उद्देशकः-२			द्वारं-१४ आहारः	
	लेश्यानाम् षड्विधत्वम्			द्वारं-१५ भाषकः	
	उद्देशकः-३			द्वारं-१६ परितः	
	लेश्यापेक्षया उपपात-			द्वारं-१७ पर्याप्तः	
	उद्वर्तन-ज्ञानं			द्वारं-१८ सूक्ष्मं	
	उद्देशकः-४			द्वारं-१९ संज्ञी	
	परिणामादि पञ्चदश-			द्वारं-२० भवसिद्धिकं	
	अधिकाराः, लेश्यायाः			द्वारं-२१ अस्तिकायः	
	वर्ण-गन्ध आदि वर्णनम्			द्वारं-२२ चरिमः	
	उद्देशकः-५		-४९५	**पदं-१९ सम्यक्त्वं**	१०७
	लेश्यायाः वर्णादि		-५०८	**पदं-२० अन्तक्रिया**	१०८
	उद्देशकः-६			चतुर्विंशतिदण्डकापेक्षया	
	मनुष्यापेक्षयालेश्या			अन्तक्रियाकथन	
-४९४	**पदं-१८ कायस्थितिः**	८५	-५२४	**पदं-२१ अवगाहनासंस्थानं**	११९
	द्वारं-१ जीवः			शरीराणाम् पञ्चविधत्वम्,	
	द्वारं-२ गति			तेषामवगाहना एवं संस्थानं	

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मूलाङ्कः	विषयः	पृष्ठाङ्कः
-५३३	**पदं-२२ क्रिया**	१४७
-५४५	**पदं-२३ कर्मप्रकृत्तिः**	१६५
	उद्देशकः-१ अष्टविधाकर्मप्रकृत्ति **उद्देशकः-२** कर्मप्रकृत्तेः अष्टविधत्वम् एवम् तेषाम् भेदाः	
-५४६	**पदं-२४ कर्मबन्धं**	२०२
-५४७	**पदं-२५ कर्मवेदनं**	२०५
-५४८	**पदं-२६ कर्मवेदबन्धं**	२०६
-५४९	**पदं-२७ कर्मवेदवेदनं**	२०८
-५७१	**पदं-२८ आहारः**	२०९
	उद्देशकः-१ सचित्त-अचित्त मिश्राहारः चतुर्विंशतिदण्डकापेक्षया- आहारस्यकथन, अर्थीत्वम्, इच्छपरिणमन आदि **उद्देशकः-२** द्वारं-१ आहारकत्वम् द्वारं-२ भवसिद्धिकं द्वारं-३ संज्ञी द्वारं-४ लेश्या द्वारं-५ दृष्टि द्वारं-६ संयतः द्वारं-७ कषायः द्वारं-८ ज्ञानं द्वारं-९ योगः द्वारं-१० उपयोग द्वारं-११ वेदः द्वारं-१२ शरीरं	
	द्वारं-१३ पर्याप्तिः	
-५७२	**पदं-२९ उपयोगः**	२३६
-५७४	**पदं-३० पश्यता**	२४०
	साकार-अनाकार पश्यता	
-५७६	**पदं-३१ संज्ञी**	२४४
	चतुर्विंशतिदण्डकापेक्षया- संज्ञी-असंज्ञीत्वम्	
-५७८	**पदं-३२ संयतः**	२४५
	चतुर्विंशतिदण्डकापेक्षया- संयत असंयतत्वम्	
-५८३	**पदं-३३ अवधिः**	२४७
	भेद-विषय-संस्थान- अभ्यन्तर बाह्य- देश-क्षय-वृध्धिः- प्रतिपाति-अप्रतिपाति एते दशाधिकाराः	
-५९४	**पदं-३४ प्रविचारणा**	२५३
	अनन्तराहार, आहार, भोजन, पुद्गल, अध्यवसाय, सम्यकृत्व, अभिगम इत्यादि अधिकारः, चतुर्विंशति- दण्डकापेक्षयाप्रविचारः	
-५९८	**पदं-३५ वेदना**	२६३
	वेदनायाः स्वरूपम् एवं चतुर्विंशति दण्डकापेक्षयावेदना	
-६२२	**पदं-३६ समुद्घातः**	२६९
	समुद्घातानाम् सप्त भेदाः, चतुर्विंशतिदण्डकापेक्षया समुद्घातः	

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भागः-१० प्रज्ञापनाउपाङ्गसूत्रः-१

पदानि-१.....१४ गतानि

भागः-११

प्रज्ञापनाउपाङ्गसूत्रम्-२

पदानि-१५.....३६

Jain Education International For Private & Personal Use Only www.jainelibrary.org

આર્થિક અનુદાતા

-પ.પૂ. માલવભુષણ તપસ્વી આચાર્યદેવ શ્રી નવરત્નસાગર સૂરીશ્વરજી મ.સા.ની પ્રેરણાથી શ્રી લાલભાઈ દેવચંદ શાહ તરફથી - નકલ એક.

-પ.પૂ. સરળ સ્વભાવી-શ્રીમદ્ ભગવતીસૂત્ર વ્યાખ્યાન પટુ આચાર્યદેવ શ્રી નરદેવસાગરસૂરીશ્વરજી મ.સા. તથા પૂજ્યશ્રીના શિષ્યરત્ન તપસ્વી ગણિવર્યશ્રી ચંદ્રકીર્તિસાગરજી મ.સા.ની પ્રેરણાથી શ્રી પુરુષાદાનીય પાર્શ્વનાથ શ્વે. મૂર્તિ. જૈન સંઘ, દેવકીનંદન સોસાયટી, અમદાવાદ તરફથી નકલ એક.

-પ.પૂ. શાસન પ્રભાવક-ક્રિયારાગી આચાર્યદેવશ્રી વિજય ઋચકચંદ્ર સૂરીશ્વરજી મ.સા.ની પ્રેરણાથી એક સદ્ગૃહસ્થ તરફથી નકલ એક.

-પ.પૂ. સાહિત્યપ્રેમી મુનિરાજ શ્રી સર્વોદય સાગરજી મ.સા.ની પ્રેરણાથી-"અચલગચ્છાધિપતિ પ.પૂ.આ.ભ.શ્રી ગુણસાગરસૂરીશ્વરજી મ.સા.ના શિષ્યરત્ન પ.પૂ. મુનિરાજ શ્રી ચારિત્રરત્નસાગરજી મ. ની ૧૯મી અઠ્ઠાઇ નિમિત્તે-શ્રી ચારિત્રરત્ન ફા.ચે.ટ્રસ્ટ તરફથી નકલ એક.

-પ.પૂ. વૈયાવૃત્ત્યકારિકા સાધ્વી શ્રી મલયાશ્રીજી મ.સા.ના શિષ્યા વ્યવહાર વિચક્ષણા પૂ. સાધ્વી શ્રી હિતજ્ઞાશ્રીજી મ.ની પ્રેરણાથી જૈન આરાધના મંદિર-"જ્ઞાનખાતા" તરફથી નકલ એક.

-પ.પૂ. સૌમ્યમૂર્તિ સાધ્વીશ્રી સૌમ્યગુણાશ્રીજી મ.ની પ્રેરણાથી પ.પૂ. ગુરુમાતા-વાત્સલ્યમૂર્તિ સા.શ્રી રત્નત્રયાશ્રીજી મ.ની પંચમી પુન્યતિથિ નિમિત્તે શ્રીમતી લીલમબેન પ્રાણલાલ પી. દામાણી તરફથી નકલ એક.

-પ.પૂ. સ્વનામધન્યા સા. શ્રી સૌમ્યગુણાશ્રીજી તથા તેઓના શિષ્યા સા.શ્રી સમજ્ઞાશ્રીજીની પ્રેરણાથી-૨૦૫૩ના યશસ્વી ચાતુર્માસ નિમિત્તે શ્રી પાર્શ્વપદ્માવતી જૈન સંઘ, પારૂલનગર, અમદાવાદ તરફથી નકલ બે.

-પ.પૂ. રત્નત્રયારાધકા સાધ્વીશ્રી સૌમ્યગુણાશ્રીજી તથા તેઓશ્રીના શિષ્યા સા. શ્રી સમજ્ઞાશ્રીજીની પ્રેરણાથી સંવત ૨૦૫૪ના નિર્મળ આરાધનામય ચાતુર્માસની સ્મૃતિમાં-ઘાટલોડિયા (પાવાપુરી) જૈન શ્વે. મૂર્તિ. સંઘ, અમદાવાદ તરફથી નકલ એક.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

-પ.પૂ. સાધ્વી શ્રી રત્નત્રયાશ્રીજી મ.ના પરમ વિનેયા સા.શ્રી સૌમ્યગુણાશ્રીજીની પ્રેરણાથી તેઓના સંસારીભાઈશ્રી ઇન્દ્રવદનભાઈ દામાણીના અનુમોદનીય પુરુષાર્થથી "આગમ દીપ-સંપુટ"ના બદલામાં પ્રાપ્ત રકમમાંથી-નકલ ચાર.

-પ.પૂ. પ્રશમરસનિમગ્ના સાધ્વીશ્રી પ્રશમશીલાશ્રીજી મ.ની પ્રેરણાથી-સમ્મેતશિખર તિર્થોદ્ધારિકા પ.પૂ. સાધ્વીશ્રી રંજનશ્રીજી મ.સા.ના શિષ્યા અપ્રતિમ વૈયાવૃત્ત્યકારિકા સા.શ્રી મલયાશ્રીજી તત્ શિષ્યા સા. શ્રી નરેન્દ્રશ્રીજી-તત્ શિષ્યા સા. શ્રી પ્રગુણાશ્રીજી મ.ના. આત્મશ્રેયાર્થે-અરિહંત ટાવર, જૈન સંઘ, મુંબઇ તરફથી નકલ એક.

-પ.પૂ. આગમોદ્ધારક આચાર્યદેવશ્રી ના સમુદાયવર્તી પ.પૂજ્ય વૈયાવૃત્ત્યકારિકા સા.શ્રી મલયાશ્રીજી મ.ના શિષ્યા પૂ.સા. શ્રી કૈવલ્યશ્રીજી મ.ના શિષ્યા પૂ.સા.શ્રી ભવ્યાનંદશ્રીજી મ.સા.ના સુશિષ્યા મિષ્ટભાષી સાધ્વીશ્રી પૂર્ણપ્રજ્ઞાશ્રીજી મ.સા. તથા તેમના વિનિત શિષ્યા સા. શ્રી પૂર્ણદર્શિતાશ્રીજી તથા સા. પૂર્ણનંદીતાશ્રીજીની પ્રેરણાથી-સર્વોદય પાર્શ્વનાથ ચેરીટેબલ ટ્રસ્ટ, મુલુન્ડ મુંબઈ તરફથી નકલ એક.

-પ.પૂ. વૈયાવૃત્ત્યકારિકા સાધ્વીશ્રી મલયાશ્રીજી મ.ના પ્રશિષ્યા સા. શ્રી ભવ્યાનંદશ્રીજીમ.ના સુવિનિતા સા.શ્રી કલ્પપ્રજ્ઞાશ્રીજી તથા કોકીલકંઠી સા. શ્રી કૈરવપ્રજ્ઞાશ્રજી ની પ્રેરણાથી -મેહુલ સોસાયટી, આરાધનાભવન, સુભાષનગર, વડોદરાની બહેનો તરફથી નકલ એક

-શ્રી વિશાશ્રીમાળી તપગચ્છજ્ઞાતિ-જ્ઞાનખાતું, જૈન પાઠશાળા, જામનગર તરફથી નકલ બે.

-શ્રી મંગળ પારેખનો ખાંચો-જૈન શ્વે. મૂર્તિ. સંઘ, અમદાવાદ. તરફથી ૨૦૫૪ના ચાતુર્માસ નિમિત્તે નકલ બે.

- શ્રી આકોટા જૈન સંઘ, વડોદરાની બહેનો તરફથી નકલ એક.

-શ્રીમતી નયનાબેન રમેશચંદ્ર શાહ, વડોદરાની પ્રેરણાથી આગમોના સેટના બદલામાં પ્રાપ્ત રકમમાંથી નકલ પાંચ.

શેષ સર્વે રકમ "અમારા"આજ પર્યન્ત પ્રકાશનોના બદલામાં પ્રાપ્ત થયેલી છે.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नमो नमो निम्मल दंसणस्स

पञ्चम गणधर श्री सुधर्मास्वामिने नमः

१५ प्रज्ञापनाउपाङ्गसूत्रम्-२

(सटीकं)

चतुर्थम् उपाङ्गम्-२

(श्यामाचार्य संकलितं मूलसूत्रम् + मलयगिरिआचार्य विरचिता वृत्तिः)

पदं – १५ – "इन्द्रियं"

वृ. तदेवं व्याख्यातं चतुर्दशं, सम्प्रति पञ्चदशमारभ्यते–इहानन्तरपदे प्रधानबन्धहेतुत्वात् विशेषतः कषायपरिणाम उक्तः, तदनन्तरमिन्द्रियवतामेव लेश्यादिसद्भाव इति विशेषत इन्द्रिय-परिणामनिरूपणार्थमिदमारभ्यते, अत्र च द्वावुद्देशकौ, तत्र च प्रथमोद्देशके येऽर्थाधिकारास्त-त्संग्राहकमिदं गाथाद्वयं–

मू. (४१९) *संठाण बाहल्लं पोहत्तं कतिपदेस ओगाढे।*
अप्पाबहु पुट्ठ पविट्ठ विसय अनगार आहारे॥

वृ. 'संठाणं बाहल्लं' इत्यादि, प्रथममिन्द्रियाणां संस्थानं, संस्थानं नाम आकारविशेषः, ततो बाहल्यं वक्तव्यं, बाहल्यं नाम बहलता पिण्डत्वमिति भावः, तदनन्तरं पृथुत्वं वक्तव्यं, पृथुत्वं–विस्तारः, तदनन्तरं 'कतिपदेस' त्ति कतिप्रदेशमिन्द्रियमिति वक्तव्यं, तत ओगाढमिति–कतिप्रदेशावगाढमिन्द्रियमिति वाच्यं, तदनन्तरमवगाहनाविषयं कर्कशादिगुणविषयं चाल्पबहुत्वं, ततः 'पुट्ठ' त्ति स्पृष्टग्रहणमुपलक्षणं तेन स्पृष्टास्पृष्टविषयं सूत्रं वक्तव्यं तदनन्तरं 'पविट्ठ' त्ति प्रविष्टा-प्रविष्टविषयचिन्ताविषयं ततो विषयपरिमाणं ततोऽनगाराविषयं सूत्रं तदनन्तरमाहारविषयं ततो लोकविषयं।

मू. (४२०) *अद्दाय असी य मणी दुद्ध पाणे तेल्ल फाणिय वसा य।*
कंबल थूणा थिग्गल दीवोदहि लोगऽलोगे य॥

वृ. तत 'अद्दाय' त्ति आदर्शविषयं तदनन्तरमसिविषयं ततो मणिविषयं ततो दुग्धोपलक्षितं ततः पानकविषयं ततस्तैलविषयं ततः फाणितविषयं तदनन्तरं वसाविषयं ततः कम्बलविषयं ततः स्थूणाविषयं तदनन्तरं 'थिग्गल' त्ति आकाशथिग्गलविषयं ततो द्वीपोदधिविषयं ततो लोकविषयं तदनननतरमलोकविषयं इति।

तत्र संस्थानादिकमिन्द्रियाणां वक्तव्यमिति प्रथमत इन्द्रियविषयसूत्रमाह–

–: पदं – १५ – उद्देशकः – १ :–

मू. (४२१) *कति णं भंते! इंदिया पं० ?, गो०! पंच इंदिया पं०, तं०–सोतिंदिए*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चक्खिदिए घाणिंदिए जिब्भिंदिए फासिंदिए, सोतिंदिए णं भंते ! किंसंठिए पं० ?, गो० ! कलंबुयापुप्फसंठाणसंठिते पं०, चक्खिदिए णं भंतो ! किसंठिते पं० ?, गो० ! मसूरचंदसंठाणसंठिते पं०, घाणिंदिए णं भंते ! पुच्छा, गो० ! अइमुत्तगतचंदिसंठाणसंठिते, जिब्भिदिए णं पुच्छा, गो० खुरप्पसंठाणसंठिते पं०, पासिंदिए णं पुच्छा गो० ! नानासंठाणसंठिते पं० १ ।

सोइंदिए णं भंते १ केवइयं बाहल्लेणं पं० !, गो० ! अंगुलस्स असंखेज्जइभागे बाहल्लेणं पं० २, स एवं जाव फासिंदिए सोतिंदिए णं भंते ! केवइतं पोहत्तेणं पन्नत्ते !, गो० ! अंगुलस्स असंखेज्जइभागं पोहत्तेणं पं०, एवं चक्खिदिएवि घाणिंदिएवि, जिब्भिंदिए णं पुच्छा गो० ! अंगुलपुहुत्तेणं पं०, फासिंदिए णं पुच्छा गो० ! पसरीरप्पमाणमेत्ते पोहत्तेणं पं० ३ ।

सोतिंदिए णं भंते ! कतिपदेसिते पं० ? गो० ! अनंतपदेसिते पं०, एवं जाव फासिंदिए

वृ. 'कइ णं भंते ! इंदिया पन्नत्ता' इत्यादि, कति–कियत्सङ्ख्याकानि, णमिति वाक्यालङ्कारे, भदन्त ! इन्द्रियाणि प्राग्निरूपितशब्दार्थानि प्रज्ञप्तानि !, भगवानाह–गौतम ! पञ्चेन्द्रियाणि प्रज्ञप्तानि, तान्येव नामत आह–'सोइंदिए' इत्यादि, एतानि च पञ्चापीन्द्रियाणि द्विधा, तद्यथा–द्रव्यतो भावतश्च, तत्र द्रव्यतो निर्वृत्युपकरणरूपाणि भावतो लब्ध्युपयोगात्मकानि, आह च तत्त्वार्थसूत्रकृत– 'निर्वृत्युपकरणे द्रव्येन्द्रियं, लब्ध्युपयोगौ भावेन्द्रियमिति,

तत्र निर्वृतिर्नाम प्रतिविशिष्टः संस्थानविशेषः, सापि द्विधा–बाह्या अभ्यन्तरा च, तत्र बाह्या पर्प्पटिकादिरूपा, सा च विचित्रा,, न प्रतिनियतरूपतयोपदेष्टुं शक्यते, तथाहि–मनुष्यस्य श्रोत्रे नेत्रयोरुभयपार्श्वतो भाविनी, भ्रुवौ चोपरितनश्रवणबन्धापेक्षया समे, वाजिनो नेत्रयोरुपरि तीक्ष्णे चाग्रभागे इत्यादि, जातिभोदान्नानाविधा, अभ्यन्तरा तु निर्वृतिः सर्वेषामपि जन्तूनां समाना, तामेव चाधिकृत्य वक्ष्यमाणानि संस्थानादिविषयाणि सूत्राणि, केवलं स्पर्शेन्द्रियस्य निर्वृतेर्बाह्याभ्यन्तरभेदो न प्रतिपत्तव्यः, पूर्वसूरिभिर्निषेधाद्, अत एव च बाह्यसंस्थानविषयमेव तत्सूत्रं वक्ष्यति–

'फासिंदिए णं भंते ! किंसंठाणसंठिए पन्नत्ते' इति, उपकरणं खङ्गस्थानीयाया बाह्यनिर्वृतेर्या खङ्गधारासमाना स्वच्छतरपुद्‌गलसमूहात्मिका, अभ्यन्तरा निर्वृतिस्तस्याः शक्तिविशेषः, इदं चोपकरणरूपं द्रव्येन्द्रियमान्तरनिर्वृतेः कथञ्चिदर्थान्तरं, शक्तिशक्तिमतोः कथञ्चिद्‌भेदात्, कथञ्चिद्‌भेदश्च सत्यामपि तस्यामान्तरनिर्वृतौ द्रव्यादिनोपकरणस्य विधातसम्भवात्, तथाहिसत्यामपि कदम्बपुष्पाद्याकृतिरूपायामान्तरनिर्वृतावतिकठोरतरघनगर्जितादिना शक्त्ययुपघाते सति न परिच्छेत्तुमीशते जन्तवः शब्दादिकमिति, भावेन्द्रियमपि द्विधालब्धिः उपयोगश्च, तत्र लब्धिः–श्रोत्रेन्द्रियादिविषयः सर्वात्मप्रदेशानां तदावरणक्षयोपशमः, उपयोगः–स्वस्वविषये लब्ध्यनुसारेणात्मनो व्यापारःप्रणिधानमाह ।

साम्प्रतमाभ्यन्तरां निर्वतिमधिकृत्य संस्थानादि विचिन्तयिषुः प्रथमतः संस्थानं चिन्तयति– 'सोइंदिए णं भंते ! किंसंठिए पन्नत्ते' इत्यादि पाठसिद्धं, अधुना बाहल्यं चिन्तयति–'सोइंदिए णं भंते ! केवइयं बाहल्लेणं पन्नत्ते' इत्यादि, इदमपि पाठसिद्धम्, उक्तश्चायमर्थोऽन्यत्रापि– "बाहलल्लतो य सव्वाइं अंगुलअसंखभाग"मिति । अत्राह–यद्यङ्गुलस्यासङ्ख्येयभागो बाहल्यं स्पर्शनेन्द्रियस्य ततः कथं खङ्गक्षुरिकाद्यभिघाते अन्तः शरीरस्य वेदनानुभवः ?, तदेतदसमीचीनं, सम्यग्वस्तुतत्त्वा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

परिज्ञानात्, त्वगिन्द्रियस्य विषयः शीतादयः स्पर्शा यथा चक्षुषो रूपं गन्धो घ्राणस्य, न च खड्गक्षुरिकाद्यभिधते अन्तः शरीरस्य शीतादिस्पर्शवेदनमस्ति, किन्तु केवलं दुःखवेदनं, तच्च दुःखरूपवेदनमात्मा सकलेनापि शरीरेणानुभवति न केवलेन त्वगिन्द्रियेणं ज्वरादिवेदनवत् ततो नकश्चिद्दोषः, अथ शीतलपानकादिपाने अन्तः शीतस्पर्शवेदनाप्यनुभूयते ततः कथं सा घटामटाट्यते इति ?, उच्यते, इह त्वगिन्द्रियं सर्वत्रापि प्रदेशपर्यन्तवर्त्ति विद्यते, तथा पूर्वसूरिभिव्याख्यानात्, तथा चाह मूलटीकाकारः-''सर्वप्रदेशपर्यन्तवर्त्तित्वात् त्वचोऽभ्यन्तरेऽपि शुषिरस्योपरित्वगि - न्द्रियस्य भावादुपपद्यतेऽन्तः शीतस्पर्शवेदनानुभवः'' ।

अधुना पृथकत्वविषयं सूत्रमाह-'सोइंदिए णं भंते ! केवइयं पोहत्तेणं पन्नत्ते'' इत्यादि, इह पृथुत्वं स्पर्शनेन्द्रियव्यतिरेकेण शेषाणां चतुर्णामिन्द्रियाणामात्माङ्गुलेन प्रतिपत्तव्यं, स्पर्शनेन्द्रियस्य उच्छ्रयाङ्गुलेन, ननु देहाश्रितानीन्द्रियाणि देहश्चोच्छ्रयाङ्गुलेन प्रमीयते 'उस्सेहमाणतो मिणसु देह'मिति वचनात् तत इन्द्रियाण्यप्युच्छ्रयाङ्गुलेन मातुं युज्यन्ते नात्माङ्गुलेनेति, तदयुक्तम्, जिह्वादीनामुच्छ्र-याङ्गुलेन पृथुत्वप्रमित्यभ्युपगमे त्रिगव्यूतादीनां मनुष्यादीनां रसाभ्यवहारोच्छेदप्रसक्तेः,तथाहि- त्रिगव्यूतानां मनुष्याणां षड्गव्यूतानां च हस्त्यादीनां स्वस्वशरीरानुसारितया अतिविशालानि मुखानि जिह्वाश्च, ततो यद्युच्छ्रयाङ्गुलेन तेषा क्षुरप्राकारतयोक्तस्याभ्यन्तरनिर्वृत्यात्मकस्य जिह्वेन्द्रियस्याङ्गुलपृथकत्वलक्षणो विस्तारः परिगृह्यते तदाऽल्पतया न तत्सर्वां जिह्वां व्याप्नुयात्, सर्वव्यापित्वाभावे च योऽसौ बाहल्येन सर्वात्मना जिह्वाया रसवेदनलक्षणः प्रतिप्राणि प्रसिद्धो व्यवहारःस व्यवच्छेदमाप्नुयाद्, एवं घ्राणादिविषयेऽपि यथायोगं गन्धादिव्यवहारोच्छेदो भावनीयः, तस्मादात्माङ्गुलेन जिह्वादीनां पृथुत्वमवसेयं नोच्छ्रयाङ्गुलेनेति, आह च भाष्यकृत्-

॥ १ ॥ ''इंदियमाणेवि तयं भयणिज्जं जं तिगाउयाईणं ।
जिब्भिंदियाइमाणं संववहारे विरुज्झेज्झा ॥''

अस्या अक्षरगमनिका-'तत्' उच्छ्रयाङ्गुलमिन्द्रियमानेऽपि आस्ताभिन्द्रियविषयपरिमाण-चिन्तायामित्यपिशब्दार्थः, 'भजनीयं' विकल्पनीयं, क्वापि न गृह्यते इत्यर्थः, किमुक्तं भवति स्पर्सनेन्द्रियपृथुत्वपरिमाणचिन्तायां ग्राह्यमन्येन्द्रियपृथुत्वंपरिमाणचिन्तायां न ग्राह्यं, तेषामात्माङ्गुलेन परिमाणकरणात् इति, कथमेतदवसेयं इति चेत् ? अतआह-'यत्' यस्मात् सर्वेषामपि इन्द्रियाणां उच्छ्रयाङ्गुलेन परिमाणकणे त्रिगव्यूतादीनामादिशब्दात् द्विगव्यूतादिपरिग्रहो जिह्वेन्द्रियादिमानं सूत्रोक्तं संव्यवहारे विरुध्येत, यथा च विरुध्यते तथाऽनन्तरमेव भावितमिति

सम्प्रति कतिप्रदेशावगाहनाद्वारं प्रतिपादयति-

मू. (४२२) सोइंदिए णं भंते ! कतिपदेसोगाढे पं० ?, गो० ! असंखेज्जपएसोगाढे पं०, एवं जाव फासिंदिए ।

एएसि णं भंते ! सोतिंदियचक्खिंदियधाणिंदियजिब्भिंदियफासिंदियाणं ओगाहणट्ठयाए पएसट्ठयाए ओगाहणपएसट्ठयाए कतरे२ हिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गो० ! सव्वत्थोवे चक्खिंदिते ओगाहणट्ठयाते सोतिंदिए ओगाहणट्ठयाते संखेज्जगुणे घाणिंदिए ओगाहणट्ठयाते संखेज्जगुणे जिब्भिंदिए ओगाहणट्ठयाए असंखेज्जगुणे फासिंदिए ओगाहणट्ठयाए संखेज्जगुणे पदेसट्ठयाते सव्वत्थोवे चक्खिंदिए पदेसट्ठयाए सोतिंदिए पएसट्ठयाए संखेज्जगुणे घाणिंदिए

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पएसट्ठयाए संखिज्जगुणे जिब्भिंदिए पएसट्ठयाए असंखज्जगुणे फासिंदिए पएसट्ठयाए संखेज्जगुणे ओगाहणपदेसट्ठयाए सव्वत्थोवे चक्खिंदिए ओगाहणट्ठयाए सोतिंदिए ओगाहणट्ठयाए असंखेज्जगुणे घाणिंदिए ओगाहणट्ठयाए संखिज्जगुणे जिब्बिंदिए ओगाहणट्ठयाए असंखेज्जगुणे फासिंदिए ओगाहणट्ठयाए संखिज्जगुणे फासिंदियस्स ओगाहणट्ठयाहिंतो चक्खिंदिए पएसट्ठयाए अनंतगुणे सोतिंदिए पएसट्ठयाए संखेज्जगुणे घाणिंदिए पएसट्ठयाए संखिज्जगुणे जिब्भिंदिए पएसट्ठयाए असंखेज्जगुणे फासिंदिए पदेसट्ठयाते संखेज्जगुणे,

सोतिंदियस्स णं भंते! केवइया कक्खडगुरुयगुणा पं० ?, गो० ! अनंता कक्खडगुरुयगुणा पं०, एवं जाव फासिंदियस्स, सोतिंदियस्स णं भंते ! केवइया मउयलहुयगुणा पं० ?, गो० !, अनंता मउयलहुयगुणा पं०, एवं जाव फासिंदियस्स। एतेसि णं भंते! सोइंदियचक्खिंदियघाणिंदिया-जिब्भिंदियफासिंदियाणं कक्खडगुरुयगुणाणं मउयलहुयगुणाण य कयरे२ हिंतो अप्पा वा ४ ?,

गो० सव्वत्थोवा चक्खिंदियस्स कक्खडगरुयगुणा सोतिंदियस्स कक्खडगरुयगुणा अनंतगुणा घाणिंदियस्स कक्खडगरुयगुणा अणंतगुणा जिब्भिंदियस्स कक्खडगरुयगुणा अनंतगुणा फासिंदि- यस्स कक्खडगरुयगुणा अनंतगुणा, मउयलहुयगुणाणं सव्वत्थोवा फासिंदियस्स मउयलहुयगुणा जिब्भिंदियस्स मउयलहुयगुणा अनंतगुणा घाणिंदियस्स मउयलहुयगुणा अनतगुणा सोतिंदियस्स मउयलहुयगुणा अनंतगुणा चक्खिंदियस्स मउयलहुयगुणा अनंतगुणा, कक्खडगरुयगुणाणं मउयलहुयगुणाण य सव्वत्थोवा चक्खिंदियस्स कक्खडगुरुयगुणा सोतिंदियस्स कक्खडगरुयगुणा अनंतगुणा घाणिंदियस्स कक्खडगरुयगुणा अणंतगुणा जिब्भिंदियस्स कक्खडगुरुयगुणा अनंतगुणा फासिंदियस्स कक्खडगरुयगुणा अनंतगुणा फासिंदियस्स कक्खडगुरुयगुणेहिंतो तस्स चेव मउयलहुयगुणा अनंतगुणा जिब्भिंदियस्स मउयलहुयगुणा अनंतगुणा घाणिंदियस्स मउयलहुयगुणा अनंतगुणा सोतिंदियस्स मउयलहुयगुणा अनंतगुणा चक्खिंदियस्स मउयलहुयगुणा अनतगुणा

वृ. 'सोइंदिए णं भंते !' इत्यादि निगदसिद्धं, अल्पबहुत्वद्वारमाह–'एएसि णं भंते !' इत्यादि, सर्वस्तोकं चक्षुरिन्द्रियमवगाहनार्थतया, किमुक्तं भवति ?–सर्वस्तोकप्रदेशावगाढंचक्षुरिन्द्रियं, ततः श्रोत्रेन्द्रियमवगाहनार्थतया संख्येयगुणमतिप्रभूतेषु प्रदेशेषु तस्यावगाहनाभावात्, ततोऽपि घ्राणेन्द्रियमवगाहनारअथतया सङ्ख्येयगुणामतिप्रभूतेषु प्रदेशेषु तस्यावगाहनोपपत्तेः, ततोऽपि जिह्वेन्द्रियमवगाहनार्थतया असङ्ख्येयगुणां, तस्याङ्गुलपृथकत्वपरिमाणविस्तारात्मकत्वात्, यस्तु दृश्यते पुस्तकेषु पाठः सङ्ख्येयगुणं इति सोऽपपाठो, युक्तत्यनुपपन्नत्वात्, तथाहि–

चक्षुरादीनि त्रीण्यपीन्द्रियाणि प्रत्येकमङ्गुलासङ्ख्येयभागविस्तारात्मकानि, जिह्वेन्द्रियं अङ्गुलपृथकत्वविस्तारमतोऽसङ्ख्येयगुणमेव तदुपपद्यते न तु सङ्ख्येयगुणमिति, ततः स्पर्शनेन्द्रियं सङ्ख्येयगुणं, तथाहि–अङ्गुलपृथकत्वप्रमाणविस्तारं जिह्वेन्द्रियं, पृथकत्वं द्विप्रभृत्यानवभ्यः स्पर्शनेन्द्रियं तु शरीरप्रमाणमिति सुमहदपि तदुपपद्यते सङ्ख्येयगुणमिति, यस्तु बहुषु पुस्तकेषु दृश्यते पाठोऽसङ्ख्येयगुणमिति सोऽपपाठो, युक्तिविकलत्वात्, तथाहि–

आत्माङ्गुलपृथकत्वपरिमाणं जिह्वेन्द्रियं शरीरपरिमाणं तु स्पर्शनेन्द्रियं शरीरं तूत्कर्षतोऽपि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

लक्षयोजनप्रमाणं ततः कथमसङ्ख्येयगुणमुपपद्यते इति ?, जनेनैव च क्रमेण प्रदेशार्थतयाऽपि सूत्रं भावनीयं, उक्तप्रकारेणैव चोभयसूत्रमपि, यानि कर्कशगुरुगुणादिसूत्राणि तानि पाठसिद्धानि, नवरमल्बहुत्वसूत्रे चक्षुःश्रोत्रघ्राणजिह्वास्पर्शनेन्द्रियाणां यथोत्तरं कर्कशगुरुगुणा अमीषामेव पश्चानुपूर्व्या यथापूर्वं मृदुलघुगुणा अनन्तगुणास्तथैवो (वयथो)त्तरं कर्कशतया यथापूर्वं चातिकोमलतयोपलभ्यमानत्वात्, युगपदुभयाल्पबहुत्वसूत्रे फासिंदियकक्खडगुरुयगुणेहिंतो तस्स चेव मउयलहुयगुणा अनंतगुणा' इति, शरीरे हि कतिपया एव प्रदेशा उपरिवर्त्तिनः शीतातपादिसम्पर्कतः कर्कशा वर्त्तन्ते अन्ये तु बहवस्तदन्तर्गता अपि मृदव इति घटन्ते स्पर्शनेन्द्रियस्य कर्कशगुरुगुणेभ्यो मृदुलघुगुणा अनन्तगुणा इति ।

अमून्येव संस्थानादीन्यल्पबहुत्वपर्यन्तानि द्वाराणि नैरयिकेषु चिन्तयति—

मू. (४२३) *नेरइयाणं भंते ! कइ इंदिया पं० ?, गो० ! पंच, तं०—सोतिंदिए जाव फासिंदिए, नेरइयाणं भंते ! सोतिंदिए किंसंठिए पं० ?, गो० ! कलंबुयासंठाणसंठिते पं० ?, एवं जहा ओहियाणं वत्तव्वया भणिता तहेव नेरइयाणंपि जाव अप्पाबहुयाणि दोन्नि, नवरं नेरइयाणं भंते ! फासिंदिए किंसठिए पं० ?, गो० ! दुविधे पं०, तं०—भवधारणिज्जे य उत्तरवेउव्विते य, तत्थ णं जे से भवधारणिज्जे से णं हुंडसंठाणसंठिते पं०, तत्थ णं जे से उत्तरवेइउव्विते सेवि तहेव, सेसं तं चेव ॥*

असुरकुमाराणं भंते ! कइ इंदिया पं० ?, गो० ! पंच, जहा ओहियाणि जाव अप्पाबहुगाणि दोन्निवि, नवरं फासिंदिए दुविधे पन्नत्ते, तं०—भवधारणिज्जे य उत्तरवेउव्विते य, तत्थ णं जे से भवधारणिज्जे से णं समचउरसंसंठाणसंठिते पं०, तत्थ णं जे से उत्तरवेउव्विते से णं नानासंठाणसंठिते, सेसं तं चेव एवं जाव थणियकुमाराणं ॥

पुढविकाइयाणं भंते ! कति इंदिया पं० ?, गो० ! एगे फासिंदिए पं०, पुढविकाइयाणं भंतो ! फासिंदिते किंसंठाणसंठिते पं० ?, गो० ! मसूरचंदसंठाणसंठिते पण्णत्ते, पुढविकाइयाणं भंते ! फासिंदिते केवइयं बाहल्लेणं पं० ?, गो० ! अंगुलस्स असंखेज्जइभागं बाहल्लेणं पं०, पुढविकाइयाणं भंते ! फासिंदिए केवतितं पोहत्तेणं पं० ?, गो० ! सरीरप्पमाणमेत्ते पोहत्तेणं, पुढविकाइयाणं भंते ! फासिंदिए कतिपदेसिते पं० ?, गो० ! अनंतपदेसिते पं०, पुढविकाइयाणं भंते ! फासिंदिते कतिपदेसोगाढे पं० ?, गो० ! असंखेज्जपएसोगाढे पं० ।

एतेसि णं भंते ! पुढविकाइयाणं फासिंदियस्स ओगाहणट्ठयाए पएसट्ठयाए ओगाहणपएसट्ठाए कयरे२हिंतो अप्पा वा ४ ?, गो० ! सव्वत्थोवे पुढविकाइयाणं फासिंदिए ओगाहणट्ठयाते ते चेव पदेसट्ठयाते अनंतगुणे, पुढविकाइयाणं भंते ! फासिंदियस्सं केवइया कक्खडगरुयगुणा पं० ?, गो० ! अनंता, एवं मउयलहुयगुणावि, एतेसि णं भंते ! पुढविकाइयाणं फासिंदियस्स कक्खडगरुयगुणाणं मउयलहुयगुणाण य कयरे२हिंतो अ० ४ ?, गो० ! सव्वत्थोवा पुढविकाइयाणं फासिंदियस्स कक्खडगरुयगुणा तस्स चेव मउयलहुयगुणा अनंतगुणा ।

एवं आउकाइयाणवि जाव वणप्फइकाइयाणं, नवरं संठाणे इमो विसेसो दट्ठव्वो— आउकाइयाणं थिबुगबिंदुसंठाणसंठिते पं०, तेउकाइयाणं सूइकलावसंठाणसंठिते पं०, वाउकाइयाणं पडागासंठाणसंठिते पं०, वणप्फइकाइयाणं नानासेठामसंठिते पं० ।

Jain Education International	For Private & Personal Use Only	www.jainelibrary.org

बेइंदियाणं भंते! कति इंदिया पं० ?, गो० ! दो इंदिया पं०, तं०–जिब्भिदिए फासिंदिए, दोण्हंपि इंदियाणं संठाणं बाहल्लं पोहत्तं पदेसं ओगाहणा य जहा ओहियाणं भणिता तहा भाणियव्वा, नवरं फासिंदिए हुंडसंठाणसंठिते पन्नत्तेत्ति इमो विसेसो,

एतेसि णं भंते! बेइंदियाणं जिब्भिंदियफासिंदियाणं ओगाहणट्ठयाते पदेसट्ठयाते ओगाहण-पदेसट्ठयाते कयरे२हिंतो अ० ४ ?, गो० ! सव्वत्थोव बेइंदियाणं जिब्भिदिए ओगाहणट्ठयाते फासिंदिए ओगाहणट्ठयाते संखेज्जगुणे पदेसट्ठयाते सव्वत्थोवे बेइंदियाणं जिब्भिदिते पएसट्ठयाए फासिंदिए संखेज्जगुणे ओगाहणपएसट्ठयाते सव्वत्थोवे बेइंदियास्स जिंब्भिदिए ओगाहणट्ठयाते फासिंदिए ओगाहणट्ठयाते संखेज्जगुणे फासिंदियस्स ओगाहणट्ठयातेहिंतो जिब्भिदिए पएसट्ठयाते अनंतगुणा फासिंदिए पएसट्ठयाए संखेज्जगुणा, बेइंदियाणं भंते ! जिब्भिंदियस्स केवइया कक्खडगरुयगुणा पं० ? गो० ! अनंता, एवं फासिंदियस्सवि, एवं मउयलहुयगुणावि,

एतेसि णं भंते! बेइंदियाणं जिब्भिंदियफासिंदियाणं कक्खडगरुयगुणाणं मउयलहुयगुणाण कक्खडगुरुयगुणमउयलहुयगुणाण य कतरे२हिंतो अ० ४ ?, गो० ! सव्वत्थोवा बेइंदियाणं जिब्भिंदियस्स कक्खडगरुयगुणा फासिंदियस्स कक्खडगरुयगुणा अनंतगुणा, फासिंदियस्स कक्खडगरुयगुणेहिंतो तस्स चेव मउयलहुय० अनंतगुणा जिब्भिंदियस्स मउयलहुयगुणा अनंतगुणा, एवं जाव चउरिंदियत्ति, नवरं इंदियपरिवुड्ढी कातव्वा, तेइंदियाणं घाणिंदिए थोवे चउरिंदियाणं चक्खिंदिए थोवे, सेसं तं चेव ॥

पंचिंदियतिरिक्खजोणियाणं मणूसाण य जहा नेरइयाणं, नवरं फासिंदिए छव्विहसंठाण-संठिते पं०, तं०–समचउरंसे निग्गोह परिमंडले सादी खुज्जे वामणे हुंडे ॥

वाणमंमतरजोइसियवेमाणियाणं जहा असुरकुमाराणं

वृ. 'नेरइयाणं भंते !' इत्यादि सुगमं, नवरं 'नेरइयाणं भंते ! फासिंदिए किंसंठिए पन्नत्ते' इत्यादि, द्विविधं हि नैरयिकाणां शरीरं–भवधारणीयमुत्तरवैक्रियं च, तत्र भवधारणीयं तेषां भवस्वभावत एव निर्मूलविलुप्तपक्षोत्पाटितसकलग्रीवादिरोमपक्षिशरीरवत् अतिबीभत्ससंस्थानोपेतं, यदप्युत्तरवैक्रियं तदपि हुंडसंस्थानमेव, तथाहि–

यद्यपि ते वयमतिसुन्दरं शरीरं विकुर्विष्याम इत्यभिसन्धिना शरीरमारभन्ते तथापि तेषमत्यन्ताशुभतथाविधनामकर्मोदयादतीवाशुभतरमेवोपजायते इति। असुरकुमारसूत्रे भवधार-णीयं समचतुरस्रसंस्थानं तथाभवस्वाभाव्यात्, उत्तरवैक्रियं तु नानासंस्थितं, स्वेच्छया तस्य निष्पत्तिभावात्। पृथिव्यादिविषयाणि तु सूत्राणि सुप्रतीतान्येव। सम्प्रति स्पृष्टद्वारमाह–

मू. (४२४) *पुट्ठाइं भंते ! सद्दाइं सुणेति अपुट्ठाइं सद्दाइं सुणेति ?, गो० ! पुट्ठाइं सद्दाइं सुणेति नो अपुट्ठाइं सद्दाइं सुणेति, पुट्ठाइं भंते ! रूवाइं पासति अपुट्ठाइं पासति ?, गो० ! नो पुट्ठाइं रूवाइं पासति, अपुट्ठाइं रूवाइं पासति,*

पुट्ठाइं भंते ! गंधाइं अग्घाइ अपुट्ठाइं गंधाइं अग्घाइ ?, गो० ! पुट्ठाइं गंधाई अग्घाइ नो अपुट्ठाइं अग्घाइ, एवं रसाणवि फासाणवि, नवरं रसाइं अस्साएति फासाइं पडिसंवेदेतित्ति अभिलावो कायव्वो । पविट्ठाइं भंते ! सद्दाइं सुणेति अपविट्ठाइं सद्दाइं सुणेति ?, गो० ! पविट्ठाइं सद्दाइं सुणेति नो अपविट्ठाइं सद्दाइं सुणेति, एवं जहा पुट्ठाणि तहा पविट्ठाणिवि ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ. 'पुट्ठाइं भंते ! सद्दाइं सुणेति' इत्यादि, प्राकृतत्वात् सूत्रे शब्दस्य नपुंसकत्वं, अन्यथा पुंस्त्वं प्रतिपत्तव्यं, स्पृष्टन् भदन्त ! श्रोत्रेन्द्रियमिति कर्तृपदं सामर्थ्याल्लभ्यते शब्दान् श्रृणोति, तत्र स्पृश्यन्ते इति स्पृष्टास्तान् तनौ रेणुमिवालिङ्गिकतमात्रानित्यर्थः, 'पुट्ठं रेणुं व तणुंमि' इति वचनात्, शब्द्यन्ते–प्रतिपाद्यन्ते अर्था एभिरिति शब्दाः तान् श्रृणोति–गृह्णति उपलभते इतियावत्, किमुक्तं भवति ? –

स्पृष्टमात्राण्येव शब्दद्रव्याणि श्रोत्रेन्द्रियमुपलभते न तु घ्राणेन्द्रियादिवत् बद्धस्पृष्टानीति, कस्मादिति चेत्, उच्यते, इह शब्दद्रव्याणि घ्राणेन्द्रियादिविषयभूतेभ्यो द्रव्येभ्यः सूक्ष्माणि तथा बहूनि तथा तत्क्षेत्रभाविशब्दयोग्यद्रव्यवासकानि च, ततः सूक्ष्मत्वादतिप्रभूतत्वात्तदन्यद्रव्यवासकत्वाच्चात्मप्रदेशैः स्पृष्टमात्राण्यपि निर्वृतीन्द्रियमध्ये प्रविश्य झटित्युपकरणेन्द्रियमभिव्यञ्जयन्ति, श्रोत्रेन्द्रियं च घ्राणेन्द्रियाद्यपेक्षया स्वविषयपरिच्छेदे पटुतरं, ततः स्पृष्टमात्राण्यपि तानि श्रोत्रेन्द्रियमुपलभते, नास्पृष्टान्–सर्वथाऽऽत्मप्रदेशैः सम्बन्धमप्राप्तान्, श्रोत्रेन्द्रियस्य प्राप्तविषयपरिचछेदस्वभावत्वात्, यथा च श्रोत्रेन्द्रियस्य प्राप्तकारिता तथा नन्द्यध्ययनीकादौ चर्चितमिति ततोऽवधार्यं,

'पुट्ठाइं भंते ! रूवाइं' इत्यादि सुगमं, निर्वचनमाह–गौतम ! न स्पृष्टानि रूपाणि पश्यति चक्षुः किन्त्वस्पृष्टानि, चक्षुषोऽप्राप्ताकारित्वात्, तच्चाप्राप्तकारित्वं तत्त्वार्थटीकादौ सविस्तरेण प्रसाधिततमिति ततोऽवधारणीयं, गन्धादिविषयाणि सूत्राणि सुप्रसिद्धानि, नवरं स्पृष्टान् गन्धान् आजिघ्रति इत्यादि यद्यप्युक्तं तथापि बद्धस्पृष्टानिति द्रष्टव्यम्, यत उक्तमावश्यकनिर्युक्तौ–

॥१॥ "पुट्ठं सुणेइ सद्दं रूवं पुण पासई अपुट्ठं तु ।
गंधं रसं च फासं च बद्धपुट्ठं वियागरे ॥" इति,

तत्र स्पृष्टानिति पूर्ववत् बद्धानिति आत्मप्रदेशैरात्मीकृतान् 'बद्धमप्पीकयं पएसेहिं' इति वचनात्, विशेषणसमासश्च, बद्धाश्च ते स्पृष्टाश्च बद्धस्पृष्टास्तान्, इह स्पृष्टाः स्पर्शमात्रेणापि भवन्ति यथा शब्दस्ततः स्पर्शमात्रव्यवच्छेदेन स्पर्शविशेषप्रतिपत्तिरव्याहता स्यादिति बद्धग्रहणं, बद्धरूपा ये स्पृष्टास्तान् परिच्छिनत्ति, नान्यानि, कस्मादेवमिति चेत् ?, उच्यते,

गन्धादिद्रव्याणां बादरत्वात् अल्पत्वादभावुकत्वाच्च घ्राणादीन्द्रियाणामपि च श्रोत्रेन्द्रियापेक्षया मन्दशक्तिकत्वादिति । सम्प्रति प्रविष्टाप्रविष्टविषयचिन्तां कुर्वन्नाह–'पविट्ठाइं भंते ! सद्दाइं' इत्यादि पाठसिद्धं, नवरं स्पर्शस्तनौ रेणुरिवापि भवति प्रवेशो मुखे कवलस्येवेति शब्दार्थस्य भिन्नत्वात् भिन्नविषयता स्पृष्टप्रविष्टसूत्राणामिति । सम्प्रति विषयपरिमाणनिरूपणार्थमाह–

***मू. (४२५)** सोतिंदियस्स णं भंते ! केवतिए विसए पन्नत्ते ?, गो० ! जहन्नेणं अंगुलस्स असंखेज्ञतिभागो उक्कोसणं बारसहिं जोअणेहिं तो अच्छिण्णे पोग्गले पुट्ठे पविट्ठातिं सद्दातिं सुणेति,*

चकिखंदियस्स णं भंते ! केवतिए विसए पं० ?, गो० ! जहन्नेणं अंगुलस्स संखेज्ञतिभागो उक्कोसेणं सातिरेगाओ जोयणसतसहस्साओ अच्छिन्ने पोग्गले अपुट्ठे अपविट्ठातिं रूवाइं पासइ,

घाणिंदियस्स पुच्छा, गो० ! जहण्णेणं अंगुलसंखेज्ञतिभागो उक्कोसेणं नवहिं जोयणेहिंतो अच्छिन्ने पोग्गले पुट्ठे पविट्ठातिं गंधातिं अग्घाइ, एवं जिब्भिंदियस्सवि फासिंदियस्सवि ।

वृ. 'सोइंदियस्स णं भंते ! केवइए विसए पं०' इत्यादि, इह श्रोत्रादीनि प्राप्तविषयपरिच्छेदकत्वात् अङ्गुलासङ्घयेयभागादप्यागतं शब्दादिद्रव्यं परिच्छिन्दन्ति, नयनं चाप्राप्तकारीति तत्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जघन्यतोऽङ्गुलसङ्खयेयभागादव्यवहितं परिच्छिनत्ति, किमुक्तं भवति ?-जघन्यतोऽ-ङ्गुलसङ्ख्येयभागमात्रे व्यवस्थितं पश्यति न तु ततोऽप्यर्वाक्तरमिति, प्रतिप्राणि प्रसिद्धश्चायमर्थः, तथा च नातिसन्निकृष्टमञ्जनरजोमलादिकं चक्षुः पश्यतीति, उक्तं च-

"अवरमसंखेज्जंगुलभागातो नयणवज्जाणं ।। संखेज्जंगुलभागो नयणस्स" इति, उत्कर्ष-तस्तु श्रोत्रेन्द्रियं द्वादशभ्यो योजनेभ्यः आगतान् अच्छिन्नान्-अव्यवहितान् नान्यैः शब्दान्तरैर्वा-तादिकैर्वा प्रतिहतशक्तिकानित्यर्थःपुद्गलान्, अनेन पौद्गलिकः शब्दो नाम्बरगुण इति प्रतिपादितं, यथा च शब्दस्य पौद्गलिकता तथा तत्वार्थटीकायां प्रपञ्चितमिति न भूयः प्रपञ्च्यते, स्पृष्टान्-स्पृष्टमात्रान् शब्दान् प्रविष्टान्-निर्वृतीन्द्रियमध्यप्रविष्टान् श्र णोति न परतोऽप्यागतान्, कस्मादिति चेत् ?, उच्यते, परत आगतानां तेषां मन्दरपरिणामत्वभावात्,,

तथाहि- परत आगताः खलु ते शब्दपुद्गलास्तथास्वाभाव्यान्मन्दपररिणामास्तथोपजायन्ते येन स्वविषयं श्रोत्रज्ञानं नोत्पादयितुमीश्वराः, श्रोत्रेन्द्रियस्यापि च तथाविधं अद्भुततरं बलं न विद्यते येन परतोऽपि आगतान् शब्दान् श्रृणुयादिति, चक्षुरिन्द्रियमुत्कर्षतः सातिरेकात् योजन-शतसहस्रादारभ्याच्छिन्नान कटकुट्यादिभिरव्यवहितान् पुद्गलान् अस्पृष्टान् दूरस्थितान् अत एवाप्रविष्टान् 'रूवाइं'ति रूपात्मकान् पश्यति, परतोऽव्यवहितस्यापि परिच्छेदे चक्षुषः शक्यत्वभावात्, तत्त्वङ्गुलमिह त्रिधा, तद्यथा- आत्मङ्गुलमुच्छ्र्याङ्गुलं प्रमाणाङ्गुलं च, तत्र

॥ १ ॥ "जे णं जया मणूसा तेसिं जं होइ माणरूवं तु ।
तं भणियमिहायंगुलमणियमाणं पुण इमं तु ।।"

-इत्येवंरूपमात्माङ्गुलं-

॥ १ ॥ "परमाणू तसरेणु रहरेणु अग्गयं च वालस्स ।
लिक्खा जूया य जवा, अट्ठगुणविवड्ढिया कमसो ।।"

-इत्यादिरूपमुच्छ्र्याङ्गुलं

॥ १ ॥ तृतीयं- 'उस्सेहंगुलमेगं हवइ पमाणंगुलं सहस्सगुणं ।
तं चेवल दुगुणियं खलु वीरस्सायंगुलं भणियं ।।'

इत्येवं प्रमाणाङ्गुलं, तत्रात्माङ्गुलेन मीयते तत्काले वापीकूपादिकं वस्तु उच्छ्रायङ्गुलेन नरतिर्यग्देवनैरयिकशरीराणि प्रमाणाङ्गुलेन पृथिवीविमानानि, उक्तं च-

॥ १ ॥ "आयंगुलेण वत्थुं उस्सेहपमाणतो मिणसु देहं ।
नगपुढविविमाणाइं मिणसु पमाणंगुलेणं तु ।।"

तत्रेदमिन्द्रियविषयपरिमाणं किमात्माङ्गुलेनाहोश्वित् उच्छ्र्याङ्गुलेन उत प्रमाणाङ्गुलेन ?, उच्यते, आत्माङ्गुलेन, तथा चाह चक्षुरिन्द्रियविषयपरिमाणचिन्तायां भाष्यकृत्-

॥ १ ॥ "अप्पत्तकारि नयणं मनो य नयनस्स विसयपरिमाणं ।
आयंगुलेण लक्खं अइरित्तं जोअणाणं तु ।।"

ननु देहप्रमाणमुच्छ्र्याङ्गुलेन तु क्रियते देहाश्रितानि चेन्द्रियाणि ततस्तेषां विषयपरिमाणमपि उच्छ्रायङ्गुलेन कर्तुमुचितं, कथमुच्यते आत्माङ्गुलेनेति ?, नैष दोषः, यद्यपि हि नाम देहाश्रिता-नीन्द्रियाणि तथापि तेषां विषयपरिमाणमात्माङ्गुलेनैव देहादन्यत्वाद्विषयपरिमाणस्य, तथा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चामुमेवार्थमाक्षेपपुरस्सरं भाष्यकृदप्यायह–

॥१॥ "नणु भणियमुस्सयंगुलपमाणतो जाव देहमाणाइ ।
देहपमाणं तं चिय नउ इंदियविसयपरिमाणं ॥"

अत्र 'देहपमाणं तं चिय' इति यत्तत्र उच्छ्रयाङ्गुलमेयत्वेनोक्तं तद् देहप्रमाणमात्रमेव, नत्विन्द्रियविषयपरिमाणं, तस्यात्माङ्गुलप्रमेयत्वादिति, अथ यदि विषयपरिमाणमिन्द्रियाणामुच्छ्रयङ्गुलेन स्यात्ततः को दोष आपद्येत ?, उच्यते, पञ्चधनुःशतादिमनुष्याणां विषयव्यवहारव्यवच्छेदः, तथाहि–यद्भरतस्यात्माङ्गुलं तत्किलप्रमाणाङ्गुलं, तच्च प्रमाणाङ्गुलमुच्छ्रयाङ्गुलसहस्रेण भवति "उस्सेहंगुलमेगं हवइ पमाणंगुलं सहस्सगुण"मिति वचनात् ततो भरतसगरादिचक्रवर्त्तिनां या अयोध्यादयो नगर्यो ये तु स्कन्धावारा आत्माङ्गुलेन द्वादशयोजनायामतया सिद्धान्ते प्रसिद्धास्ते उच्छ्रयाङ्गुलप्रमिता अनेकानि योजनसहस्राणि स्युः,

तथा च सति तत्रायुधशालादिषु ताडितभेर्यादिशब्दश्रवणं न सर्वेषामापद्येत, "बारसहिं जोयणेहिं सोयं अभिगेण्हए सद्द"मिति वचनात् अथ समग्रनगरव्यापी समस्तस्कन्धावारव्यापी च विजयढक्कादिशब्द आगमे प्रतिपाद्यते तथैव च जनव्यवहारः, तत एवमागमप्रसिद्धः पञ्चधनुःशतादिमनुष्याणां विषयव्यवहारोच्छेदो मा प्रापदित्यात्माङ्गुलेनेद्रियाणां विषयपरिमाणमवसातव्यं नोच्छ्रयाङ्गुलेन, तथा चाह भाष्यकृत्–

॥१॥ "जं तेणं पंच धनुसयनरादिविसयववहारवोच्छेओ ।
पावइ सहस्सगुणियं जेण पमाणंगुलं तत्तो ॥"

अत्र तस्मादात्माङ्गुलेनैवेन्द्रियाणां विषयपरिमाणं नोत्सेधाङ्गुलेनेति उपसंहारवाक्यं स्वतः परिभावनीयं, यदप्युक्तं प्राक् 'देहाश्रितानीन्द्रियाणीति तेषां विषयपरिमाणमुच्छ्रयाङ्गुलेने'ति, तदप्ययुक्तं, इन्द्रियाणामपि केषाञ्चित् पृथुत्वस्य आत्माङ्गुलेन मीयमानत्वाभ्युपगमात्, भावितं चैतत्प्रागपि इन्द्रियप्रतमाणचिन्तायां 'भयणिज्ज'मित्यादिभाष्यकारवचनावष्टम्भनेनेति, तस्मात् सर्वमिन्द्रियविषयपरिमाणमात्माङ्गुलेनैवेति स्थितं, ननु भवत्वात्माङ्गुलेन विषयपरिमाणं तथाप्यधिकृतसूत्रोक्तं चक्षुरिन्द्रियविषयपरिमाणं न घटते, अधिकस्यापि तद्विषयपरिमाणस्यागमान्तरे प्रतिपादनात्, तथाहि–पुष्करवरद्वीपारर्द्धे मानुषोत्तरपर्वतसमीपवर्त्तिनो मनुष्याः कर्कसङ्क्रान्तौ प्रमाणाङ्गुलनिष्पन्नैःसातिरेकैरेकविंशतियोजनलक्षैर्व्यवस्थितमादित्यमवलोकमानाः प्रतिपाद्यन्ते शास्त्रान्तरे, तथा च तद्ग्रन्थः–

॥१॥ "इगवीसं खलु लक्खा चउतीसं चेव तह सहस्साइं ।
तह पंचसया भणिया सत्तत्तीसाए अतिरित्ता ॥

॥२॥ इय नयनविसयमाणं पुक्खरदीवद्धवासिमणुयाणं ।
पुव्वेण य अवरेण य पिहं पिहं होइ मणुयाणं ॥" इत्यादि

ततः कथमधिकृतसूत्रमात्माङ्गुलेनापि घटते ?, प्रमाणाङ्गुलेनापिव्यभिचारभावात्, उक्तं च–

॥१॥ "लक्खेहिं एक्कवीसाए साइरेगेहिं पुक्खरद्धंमि ।
उदये पेच्छंति नरा सूरं उक्कोसए दिवसे ॥

॥२॥ नयनिंदियस्स तम्हा विसयपमाणं जहा सुए भणियं ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आउस्सेहपमाणंगुलाण एक्केणवि न जुत्तं ।।"

सत्यमेतत्, केवलमिदं सूत्रं प्रकाश्यविषय द्रष्टव्यं, न तु प्रकाशकविषयं, ततः प्रकाशकेऽधिकतरमपि विषयपरिमाणं न विरुध्यते इति न कश्चिद्दोषः, कथमेवंविधोऽर्थोऽवसीयते इति चेत् ?, उच्यते पूर्वसूरिकृतव्याख्यानात्, सकलमपि हि कालिकश्रुतं पूर्वसूरिकृतव्याख्यानानुसारेणैव व्याख्यानयन्ति महाधियो, न यथाऽक्षरमात्रसन्निवेशं, पूर्वगतसूत्रार्थसङ्ग्रहपरतया कालिकश्रुतस्य क्वचित्सङ्क्षिप्तस्याप्यर्थस्य महता विस्तरेण क्वचिद्विस्तरवतोप्यतिसङ्क्षेपेणाभिधाने अर्वाक्तनैः स्वमतियथावस्थितार्थतया ज्ञातुमशक्यत्वादत एवोक्तमिदमन्यत्र–

॥१॥ "जं जह भणियं सुत्ते तहेव जइ तं वियालणा नत्थि।
किं कालियानुओगो दिट्ठो दिट्ठिप्पहाणेहिं ? ।।"

तस्मात् पूर्वसूरिकृतव्याख्यानान्नाधिकृतग्रन्थविरोधः, आह च भाष्यकृत–

॥१॥ "सुत्ताभिप्पाओऽयं पयसणिज्झे तयं नउ पयासे ।
वक्खाणाउ विसेसो नहि संदेहादलक्खणया ।।" इति

तथा घ्राणेन्द्रियजिह्वेन्द्रियस्पर्शनेन्द्रियाणि गन्धादीनुत्कर्षतो नवयोजनेभ्य आगतान् अच्छिन्नान्–द्रव्यान्तरैरप्रतिहतशक्तिकान् परिच्छिन्दन्ति न परत आगतान्, परत आगतानां मन्दपरिणा भत्वभावात्, घ्राणेन्द्रियादीनां च तथारूपाणामपि दूरागतानां गन्धादिरूपाणामपितेषां परिच्छेदं कर्त्तुमशक्यत्वात्, आह च भाष्यकृत–

॥१॥ "बारसहिंतो सोत्तं सेसाणं नवहि जोयणेहिंतो ।
गिण्हंति पत्तमत्थं एत्तो परतो न गिण्हंति ॥
दव्वाण मंदपरिणामियाए परतो न इंदयबलंपि" इति

–इन्द्रियविषयाधिकारे इदमपि सूत्रम्–

मू. (४२६) अनगारस्स णं भंते ! भावियप्पणो मारणंतियसमुग्घाएणं समोहयस्स जे चरमा निज्जरापोग्गला सुहुमा णं ते पोग्गला पन्नत्ता समणाउसो ! सव्वं लोगंपि य णं ते ओगाहित्ता णं चिट्ठंति ?, हंता ! गो० ! अनगारस्स भावियप्पणो मारणां तियसमुग्घाएणं समोहयस्स जे चरमा निज्जरापोग्गला सुहुमा णं ते पोग्गला पन्नत्ता समणाउसो ! सव्वं लोगंपि य णं ओगाहित्ता णं चिट्ठंति ।

छउमत्थे णं भंते ! मणूसे तेसिं निज्जरापोग्गलाणं किं आणत्तं वा नाणत्तं वा ओमत्तं वा तुच्छत्तं वा गरुयत्तं वा लहुयत्तं वा जाणति पासति ?, ग० ! नो इणट्ठे समट्ठे, से केणट्ठेणं भंते ! एवं वुच्चइ–छउमत्थे णं मणूसे तेसिं निज्जरापोग्गलाणं णो किंचि आणत्तं वा णाणत्तं वा ओमत्तं वा तुच्छत्तं वा गरुयत्तं वा लहुयत्तं वा जाणइ पासइ ?, देवेवि य णं अत्थेगतिए जे णं तेसिं निज्जरापोग्गलाणं नो किंचि आणत्तं वा ओमत्तं वा तुच्छत्तं वा गरुयत्तं वा लहुयत्तं वा जाणति पासति, से तेणट्ठेणं गो० ! एवं वुच्चति–छउमत्थे णं मणूसे तेसिं निज्जरापोग्गलाणं नो किंचि आणत्तं वा जाव जाणति पासति, एवं सुहुमा णं ते पोग्गला पन्नत्ता समणाउसो !, सव्वलोगंपि य णं ते ओगाहित्ताणं चिट्ठंति । नेरइया णं भंते ! निज्जरापोग्गले किं जाणंति पासंति आहारेंति उदाहु न याणंति न पासंति आहारेंति ?, गो० ! नेरइया निज्जरापोग्गले न जाणंति न पासंति आहारेंति, एवं जाव

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पंचिंदिय- तिरिक्खजोणियाणं,

मणूसा णं भंते ! ते निज्जरापोग्गले किं जाणंति पासंति आहारंति उदाहु न याणंति न पासंति आहारंति ?, गो० ! अत्थेगतिया जाणंति पासंति आहारेंति, अत्थेगतिया न याणंति न पासंति आहारेंति, से केणट्ठेणं भंते ! एवं वुच्चति—अत्थेगतिया जाणंति पासंति आहारेंति अत्थेगतिया न जाणंति न पासंति आहारेंति ?, गो० ! मणूसा दुविहा पन्नत्ता तंजहा—सण्णिभूया य असण्णिभूया य, तत्थ णं जे ते असण्णिभूया ते णं न याणंति न पासंति आहारेंति, तत्थ णं जे ते सण्णिभूया ते दुविहा पं०, तं०—उवउत्ता य अनुवउत्ता य, तत्थ णं जे ते अनुवउत्ता ते णं न याणंति न पासंति आहारेंति, तत्थ णं जे ते उवउत्ता ते णं जाणंति पासंति आहारेंति, से एएणट्ठेणं गो० ! एवं वुच्चइ—अत्थेगतिया न याणंति न पासंति आहारेंति, अत्थगतिया जाणंति पासंति आहारेंति ।

वाणमंतरजोइसिया जहा नेरइया । वेमाणिया णं भंते ! ते निज्जरापोग्गले कं जाणंति पासंति आहारेंति ?, जहा मणूसा, नवरं वेमाणिया दुविहा पं०, तं९०—माइमिच्छद्दिट्ठीउववन्नगा य अमायिसम्मद्दिट्ठीउववन्नगा य, तत्थ णं जे ते माइमिच्छद्दिट्ठीउववन्नगा ते णं न याणंति न पासंति न आहारेंति, तत्थ णं जे ते अमायिसम्मद्दिट्ठिउववन्नगा ते दुविहा पं०, तं०—अनंतरोववण्णगा य परंपरोववण्णगा य, तत्थ णं जे ते अनंतरोववण्णगा ते णं न याणंति न पासंति आहारेंति, तत्थ णं जे ते परंपरोववण्णगा ते दुविहा पं०, तं०—पज्जत्तगा य अपज्जत्तगा य, तत्थ णं जे ते अपज्जत्तगा ते णं न जाणंति न पासंति आहारेंति, तत्थ णं जे ते पज्जत्तगा ते दुविहा पं०, तं०—उवउत्ता य अनुवउत्ता य, तत्थ णं जे ते अनुवउत्ता ते णं न याणंति न पासंति आहारेंति, तत्थ णं जे ते उवउत्ता ते णं जाणंति पासंति आहारेंति, से एतेणट्ठेणं गो० ! एवं वुच्चति—अत्थेगतिया याणंति जाव अत्थेगतिता आहारेंति

वृ. 'अनगारस्स णं भंते !' इत्यादि, न विद्यते अगारं—गृहं द्रव्यतो भावतश्च यस्यासावनगारः—संयतस्ततस्तस्य, णमिति वाक्यालङ्कारे भदन्त ! 'भावियप्पणो' इति भावितो—वासित आत्मा ज्ञानदर्शनचारित्रैस्तपोविशेषैश्च येन स भावितात्मा तस्य मारणान्तिकसमुद्घातेन समवहतस्य ये चरमाः—शैलेशीकालान्त्यसमयभाविनो निर्जरपुद्गलाः—अपगतकर्मभावाः परमाणवः 'सुहुमा णं ते पोग्गला' इति णमिति निश्चये निपातानामनेकार्थत्वात् निश्चितमेत्त 'सूक्ष्माः' चक्षुरादीन्द्रियपथमतिक्रान्तास्ते पुद्गलाः प्रज्ञप्ता भगवद्भिः हे श्रमण! आयुष्मन्, गौतमकृतं भगवतः सम्बोधनमेतत्, तथा निश्चितमेत्त सर्वलोकेऽपि पुद्गलाः स्पृष्टा णं वाक्यालङ्कृ तौ तिष्ठन्ति ?, एवं गौतमेन प्रश्ने कृते भगवानाह— 'हंता ! गोयमा !' हन्तेति प्रत्यवधारणे एवमेवैतत् गौतम : 'अणगारस्स णं भावियप्पणो' इत्यादि तदेवं पुनरपि प्रश्नः, 'छउमत्थे णं भंते' इत्यादि । अथ कोऽस्य प्रश्नस्यावकाशः ?,

उच्यते, इह प्रागुक्तं स्पृष्टानि प्रविष्टानि च शब्दाद्रव्याणि श्रृणोतीत्यादि, निर्ज्जरापुद्गला अपि सर्वलोकस्पर्शिन इति तेषामपि श्रोत्रादिषु स्पर्शनप्रवेशौ न स्तः ? इति संशयस्तत्र प्रश्नः—छद्मस्थो भदन्त ! मनुष्यः, छद्मस्थग्रहणं केवलिव्युदासार्थं, केवली हि सर्वैरप्यात्मशरीरप्रदेशैः सर्वं जानाति पश्यति च, यथोक्तम्—"सव्वतो जाणइ केवली सव्वतो पासइ केवली" स्तुतिकारोऽप्याह— "समन्ततः सर्वगुणं निरक्ष" मिति, छद्मस्थस्त्वङ्गोपाङ्गनामकर्मविशेषसंस्कृतैरेवेन्द्रियद्वारैर्जानाति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पश्यति चेति छद्मस्थग्रहणं, अत एवेह छद्मस्थो विशिष्टावधिज्ञानविकलः परिगृह्यते, तेषां निर्जरापुद्गलानां 'आणत्त'मिति अन्यत्वं, द्वयोरनगारयोः सम्बन्धिनोर्ये निर्जरापुद्गलाः तेषां परस्परं भिन्नत्वमिति भावः 'नानात्वं'परनिरपेक्षमेकस्यैव वर्णादिकृतं वैचित्र्यं 'ओमत्वं' अवमता हीनत्वमितियावत् 'तुच्छत्वं' निःसारता 'गुरुलघुत्वे'प्रतीते, भगवानाह–

नायमर्थः समर्थः, नायमर्थो युक्त्युपपन्नः, छद्मस्थमनुष्यस्तेषां निर्जरापुद्गलानामन्यत्वादिकं जानाति पश्यति, अत्रैवार्थे प्रश्नमाह–'से केणट्ठेणं भंते' इत्यादि, सुगमं, भगवानाह–'देवेवि य ण'मित्यादि, देवोऽप्यस्तेयकः कश्चित्कर्मपुद्गलविषयावधिज्ञानविकलो यस्तेषां निर्ज्ञरापुद्गलानां न किञ्चिदप्यन्यत्वादिकं जानाति पश्यति वा, किमुक्तं भवति ? –देवानां किल मनुष्येभ्यः पटुतराणि इन्द्रियाणि विद्यन्ते, तत्र देवोऽपि तावन्न जानाति न पश्यति वा किमुत मनुष्य इति ?,

'से एएण'मित्याद्युपसंहारवाक्यं सुगमं, 'सुहुमा णं ते'इत्यादि, एतावन्मानेन सूक्ष्मास्ते पुद्गलाः निर्जरापुद्गलाः प्रज्ञप्ताः हे श्रमण ! हे आयुष्मन् !, गौतमस्य भगवत्कृतं सम्बोधनमेतत्, सर्वलोकमपि ते एवंरूपाः अत्यन्तसूक्ष्माः पुद्गलाः अवगाह्य तिष्ठन्ति पुद्गलाः न तु बादररूपाः, अन्यथा सांव्यवहारिकप्रत्यक्षविरोधप्रसक्तेः, सर्वलोकस्पर्शिनस्ते पुद्लास्ततोऽयमपि प्रश्नः– 'नेरइया णं भंते !' इत्यादि, नैरयिकास्तावत्तान् निर्जरापुद्गलानाहारयन्तीति सिद्धं, पुद्गलानां तत्तत्सामग्रीवशतो विचित्रपरिणमनस्वभावतया आहाररूपतयाऽपि तेषां परिणमनसम्भवात्, केवलमेतद् प्रष्टव्यं– ते नैरयिका जानन्तीत्यादि, प्राकृतत्वात् क्रियाहेतुत्वेऽपि वर्त्तमाना, ततोऽयमर्थः–जानन्तः पश्यन्त आहारयन्ति उताजानन्तोऽपश्यन्त इति ?,भगवानाह– अजानन्तोऽपश्यन्त इति, कस्मादिति चेत् ?, उच्यते, तेषामतिसूक्ष्मतया चक्षुरादिपथातीतत्वात् नैरयिकाणां च कार्मणशरीर-पुद्गलालम्बनावधिज्ञानविकलत्वात् । एवमसुरकुमारादिविशयाण्यपि सूत्राणि तावत् वाच्यानि यावत्तिर्यक्पञ्चेन्द्रियसूत्रं ।

मनुष्यसूत्रे 'सन्निभूया य' इति संज्ञिनो भूताः संज्ञिभूताः संज्ञित्वं प्राप्ता इत्यर्थः, तद्व्यतिरिक्ताः असंज्ञिभूताः, संज्ञी चेह विशिष्टावधिज्ञानी परिगृह्यते यस्य ते कार्मणशरीरपुद्गला विषयभावं बिभ्रति, शेषं सुगमं । वैमानिकसूत्रे 'मायीमिच्छद्दिट्ठी' इत्या, माया–तृतीयः कषायः साऽन्येषामपि कषायाणामुपलक्षणं माया विद्यते येषां ते मायिन उत्कटरागद्वेषा इत्यर्थः ते च ते मिथ्यादृष्टयश्च मायिमिथ्यादृष्ट्यस्तथारूपा उपपन्नका–उपपन्ना मायिमिथ्यादृष्टयुपपन्नकास्तद्विपरीता अमायि-सम्यग्दृष्टयुपपन्नकाः, इह मायिमिथ्यादृष्टर्युपपन्नकग्रहणेन नवमग्रैवेयकपर्यन्ताः परिगृह्यन्ते, यद्यप्यारातीयेष्वपि कल्पेषु ग्रैवेयकेषु च सम्यग्दृष्टयो देवाः सन्ति तथापि तेषामवधिर्न कार्मण-शरीरपुद्गलविषय इति तेऽपि मायिमिथ्यादृष्टयुपपन्नका इव मायिमिथ्यादृष्टयुपपन्नका इत्युप-मानतो मायिमिथ्यादृष्टयुपपन्नकशब्देनोच्यन्ते, ये त्वमायिसम्यग्दृष्टयुपपन्नकास्तेऽनुत्तरसुराः ।

तेऽपि द्विविधा–तद्यथा–अनन्तरोपपन्नकाः परम्परोपपन्नकाश्च, अनन्तरम्–अव्यवधा-नेनोपपन्नकाः अनन्तरोपपन्नकाः उपपत्तिप्रथमसमयवर्तिन इत्यर्थः,परम्परया उपपन्नकाः परम्परोपपन्नकाः, उत्पत्त्यनन्तरं द्वित्रादिसमयवर्त्तिन इत्यर्थः, तत्रानन्तरोपपन्नका न जानन्ति न पश्यन्ति, तेषां एकसामयिकोपयोगासम्भवादपर्याप्तित्वाच्च, परम्परोपपन्नका अपि द्विधा–पर्याप्तका अपर्याप्तकाश्च, तत्रापर्याप्ता न जानन्ति न पश्यन्त्यपर्याप्तत्वेन सम्यगुपरयोगासम्भवात्, पर्याप्ता

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अपि द्विधा–उपयुक्ताः अनुपयुक्ताश्च, तत्रानुपयुक्ता न जानन्ति न पश्यन्तसामान्यरूपतया विशेषरूपतया वा परिच्छेदस्य प्रणिधानमन्तरेण कर्तुमशक्यत्वात्, ये तूपयुक्तास्ते जानन्ति पश्यन्ति च, कथमिति चेत्?, उच्यते–इहावश्यके अवधिज्ञानविषयचिन्तायामिदमुक्तं–

"संखेज्ञ कम्मदव्वे लोगे थोवूणगं पलियं' अस्यायमर्थः–कर्मद्रव्याणि–कर्मशरीरद्रव्याणि पश्यन् क्षेत्रतो लोकस्य सङ्ख्येयान् भागान् पश्यति, अनुत्तरसुराश्च सम्पूर्णां लोकनाडीं पश्यन्ति, "सम्भिन्नलोगनालिं पासंति अणुत्तरा देवा" इति वचनात्, ततस्ते उपयुक्ता जानन्ति पश्यन्ति चावधिज्ञानेन तान्निर्जरापुद्गलानिति, आहारयन्तीति च सर्वत्रापि लोमाहारेणेति प्रतिपत्तव्यं।

इन्द्रियाधिकारादयमपि प्रश्नः–

मू. (४२७) *अद्दायं पेहमाणे मणूसे अद्दायं पेहति अत्ताणं पेहइ पलिभागं पेहति?, गो० अद्दायं पेहति नो अप्पाणं पेहति पलिभागं पेहति, एवं एतेणं अभिलावेणं असिं मणिं दुद्धं पाणं तेल्लं फाणियं वसं।*

वृ. 'अद्दायं पेहमाणे' इत्यादि, 'अद्दाय'मिति आदर्शं 'पेहमाणे' इति प्रेक्षमाणो मनुष्यः किमादर्शं प्रेक्षते आहोश्विदात्मानं?, अत्रात्मशब्देन शरीरमभिगृह्यते, उत 'पलिभाग'मिति प्रतिभागं प्रतिबिम्बं?, भगवानाह–आदर्शं तावत् प्रेक्षत एव, तस्य स्फुटरूपस्य यथावस्थिततया तेनोपलम्भात्, आत्मानं–आत्मशरीरं पुनर्न पश्यति, तस्य तत्राभावात्,

स्वशरीरं हि स्वात्मनि व्यवस्थितं नादर्शे ततः कथमात्मशरीरं च तत्र पश्येदिति?, प्रतिभागं–स्वशरीरस्य प्रतिबिम्बं पश्यति, अथ किमात्मकं प्रतिबिम्बं?, उच्यते, छायापुद्गलात्मकं, तथाहि–सर्वमैन्द्रियकं वस्तु स्थूलं चयापचयधर्मकं रश्मिवच्च, रश्मय इति छायापुद्गलाः, व्यवह्रियन्ते च छायापुद्गलाः प्रत्यक्षत एव सिद्धाः, सर्वस्यापि स्थूलवस्तुनः छाया, अध्यक्षतः प्रतिप्राणि प्रतीतेः, अन्यच्च यदि स्थूलवस्तु व्यवहिततया दूरस्थिततया वा नादर्शादिष्ववगाढरश्मिर्भवति ततो न तत्र तद्दृश्यते तस्मादवसीयते सन्ति छायापुद्गला इति, ते च छायापुद्गलास्तत्तत्साम-ग्रीवशाद्विचित्रपरपरिणमनस्वभावास्तथाहि–

ते छायापुद्गला दिवा वस्तुन्यभास्वरे प्रतिगताः सन्तः स्वसंबंधिद्रव्याकारमाबिभ्राणाः श्यामरूपतया परिणमन्ते निशि तु कृष्णाभाः, एतच्च प्रसरति दिवसे सूर्यकरनिकरे निशि तु चन्द्रोद्योते प्रत्यक्षत एव सिद्धं, त एव छायापरमाणवः आदर्सादिभास्वद्रव्यप्रतिगताः सन्तः स्वसंबंधिद्रव्याकार-मादधानाः यादृग् वर्णःस्वसम्बन्धिनि द्रव्ये कृष्णो नीलः शितः पीतो वा तदाभाः परिणमन्ते, एतदप्यादर्शनादिष्वध्यक्षतः सिद्धं, ततोऽधिकृतसूतरेऽपि ये मनुष्यस्य छायापरमाणव आदर्शमुप-संक्रम्य स्वदेहवर्णतया स्वदेहाकारतया च परिणमन्ते तेषां तत्रोपलब्धिर्न शरीरस्य, ते च प्रतिबिम्बशब्दा वाच्या अत उक्तं–न शरीरं पश्यति किन्तु प्रतिभागमिति, नैवैतत् स्वमनीषिका-विजृम्भितं, यत उक्तमागमे–

॥१॥ "सामा उ दिया छाया अभासुरगता निसिं तु कालाभा।
सा चेव भासुरगया सदेहवण्णा मुणेयव्वा॥

॥२॥ जे आदरिसस्सन्तो देहावयवा हवंति संकंता।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तेसिं तत्थुवलंभो पगासजोगा न इयरेसिं ॥"

मूलटीकाकारोऽप्याह–"यस्मात् सर्वमेव हि ऐन्द्रियकं स्थूलं द्रव्यं चयापचयधर्मिकं रश्मिवच्च भवति, यतश्चादर्शादिषु छाया स्थूलस्य दृश्यते अवगाढरश्मिनः ततः स्थूलद्रव्यस्य कस्यचिद्दर्शनं भवति, न चान्तरितं दृश्यते किञ्चित् अतिदूरस्थं वा अतः 'पलिभागं' प्रतिभागं 'पेहति' पश्यतीति एवमसिमण्यादिविषयाण्यपि षट् सूत्राणि भावनीयानि, सूत्रपाठोऽप्येवम्– "असिं देहमाणे मणूसे किं असिं देहइ अत्ताणं देहइ पलिभागं देहइ ?" इत्यादि, गोयमा ! असिं देहइ नो अत्ताणे देहइ पलिभागं देहइ"इत्यादि ॥ इह निर्जरापुद्गलाः छद्मस्थानामिन्द्रियविषये न भवन्ति तेषामतीन्द्रियत्वादित्युक्तम- तोऽतीन्द्रियप्रस्तावादिदमप्यतीन्द्रियविषयं प्रश्नमाह–

मू. (४२८) कंबलसाडे णं भंते ! आवेढितपरिवेढिते समाणे जावतियं उवासंतरं फुसित्ता णं चिट्ठति विरल्लिएवि समाणे तावइयं चेव उवसंतरे फुस्त्ता णं चिट्ठति ?, हंता गो० ! कंबलसाडए णं आवेढियपरिवेढिते समाणे जावतियं तं चेव ।

थूणा णं भंतो ! उड्ढं ऊसिया समाणी जावइयं खेत्तं ओगाहइत्ता णं चिट्ठति, तिरियंपिअ णं आयता समाणी तावइयं चेव खेत्तं ओगाहइ त्ता णं चिट्ठंति तिरियंपिअ णं आयता समाणी तावइयं चेव खेत्तं ओगाहित्ता चिट्ठंति, हंता गो० ! थूणा णं उड्ढं ऊसिया तं चेव चिट्ठति ।

आगासथिग्गले णं भंते ! किंणा फुडे कइहिं वा काएहिं फुडे–किं धम्मत्थिकाएणं फुडे धम्मत्थिकायस्स देसेणं फुडे धम्मत्थिकायस्स पदेसेहं फुडे, एवं अधम्मत्थिकाएणं आगासत्थिकाएणं, एएणं भेदेणं जाव पुढविकाएणं फुडे जाव तसकाएणं अद्धासमएणं फुडे ?, गो० ! धम्मत्थिकाएणं फुडे नो धम्मत्थिकायस्स देसेणं फुडे धम्मत्थिकायस्स पदेसेहिं फुडे, एवं अधम्मत्थिकाएणवि, नो आगासत्थिकाएणं फुडे आगासत्थिकायस्स देसेणं फुडे आगासत्थिकायस्स पदेसेहिं जाव वणस्सइकाएणं फुडे तसकाएणं सिय फुडे अद्धासमएणं देसे फुडे देसे नो फुडे ।

जंबुद्दीवे णं भंते ! दीवे किंणा फुडे कइहिं वा काएहिं पुडे, किं धम्मत्थिकाएणं जाव आगासत्थिकाएणं फुडे ?, गो० ! नो धम्मत्थिकाएणं फुडे धम्मत्थिकायस्स देसेणं फुडे धम्मत्थिकायस्स पदेसेहिं फुडे, एवं अधम्मत्थिकायस्सवि आगासत्थिकायस्सवि, पुढविकाइएणं फुडे, जाव वणस्सइकाएणं फुडे, तसकाइएणं फुडे सिय णो फुडे, अद्धासमएणं फुडे, एवं लवणसमुद्दे धायतिसंडे दीवे कालोए समुद्दे अब्भिंतरपुक्खरद्धे, बाहिरपुक्खरद्धे एवं चेव, नवरं अद्धासमएणं नो फुडे, एवं जाव सयंभूरमणसमुद्दे, एसा परिवाडी इमाहिं गाहाहिं अनुतंगव्वा तं०–

मू. (४२९) "जंबुद्दीवे लवणे धायति कालोय पुक्खरे वरुणो ।
खीरघयखोयणंदिय अरुणवरे कुंडले रुयते ॥

मू. (४३०) आभरणवत्थगंधे उप्पलतिलए य पउमनिहिरयणे ।
वासहरदहनईओ विजया वक्खारकप्पिंदा ॥

मू. (४३१) कुरुं मंदर आवासा कूडा नक्खत्तचंदसूरा य ।
देवे नागे जक्खे भूए य सयंभुरमणे य ॥

मू. (४३२) एवं जहा बाहिरपुक्खरद्धे भणिए तहा जाव संयभूरमणसमुद्दे जाव अद्धासमएणं नो फुडे लोगे णं भंते ! किंणा फुडे कइहिं वा काएहिं जहा आगासथिग्गले । अलोए णं भंते !

Jain Education International For Private & Personal Use Only www.jainelibrary.org

किंणा फुडे कतिहिं वा काएहिं पुच्छा, गो० ! नो धम्मत्थिकाएणं फुडे जाव नो आगासत्थिकाएण फुडे आगासत्थिकायस्स देसेणं फुडे, नो पुढविकाइएणं फुडे, जाव नो अद्धासमएणं फुडे, एगे अजीवदव्वदेसे अगुरुलहुए अनंतेहिं अगुरुलहुयगुणेहिं संजुत्ते सव्वागासअनंतभागूणे ॥

वृ. 'कंबलसाडए णं भंते !' इत्यादि, कम्बलशाटकः—कम्बलरूपः शाटकः कम्बलशाटक इति व्युत्पत्तेः आवेष्टितपरिवेष्टितः—गाढतरं संवेल्लितः, एवंभूतः सन् यावदवकाशान्तरं, यावत आकाशप्रदेशानित्यर्थः, 'स्पृष्ट्वा' अवगाह्य तिष्ठति 'विरल्लिएवी'ति विरल्लितोऽपि विरलीकृतोऽपि तावदेवावकाशान्तरं—तावत एवाकाशप्रदेशान् स्पृष्ट्वा तिष्ठति ?, भगवानाह—'हंता गोयमा !' इत्यादि, हंतेति प्रत्यवधारणं, एवमेतत् गौतम ! यत् 'कम्बलसाडए णं' इत्यादि, तदेवं एषोऽत्र सङ्क्षेपार्थः—यावत एवाकाशप्रदेशान् संवेल्लितः सन् कम्बलशाटकोऽवगाह्यावतिष्ठते तावत एवाकाशप्रदेशान् ततोऽप्यवगाह्यावतिष्ठते, केवलं घनप्रतरमात्रकृतो विशेषः, प्रदेशसङ्ख्या तूभयत्रापि तुल्या, उक्तश्चायमर्थोऽन्यत्रापि नेत्रपटमधिकृत्य—

"जह खलु महप्पमाणो नेत्तपडो कोडिओ म(न)हग्गंमि ।
तंभिवि तावइए च्चिय फुसइ पएसे (विरलिएवि)" इति ।

एवं स्थूणासूत्रमपि भावनीयं । 'आगासथिग्गले णं भंते !' इत्यादि, आकाशथिग्गलं लोकः, स हि महतो बहिराकाशस्य विततपटस्य थिग्गलमिव प्रतिभाति, भदन्त ! केन 'स्पृष्टो' व्याप्तः, एतत्सामस्त्येन पृष्टमेतदेव विशेषतः प्रश्नयति—'कतिभिः' कियत्सङ्ख्याकैः कायैः स्पृष्टः, वाशब्दः पक्षान्तारद्योतनार्थः, प्रकारान्तरं च सामान्याद्विशेषतः, तान् कायान् प्रत्येकं पृच्छति—'किं धम्मत्थिकाएणं फुडे !' इत्यादि सुगमं, भगवानाह—गौतम ! धर्मास्तिकायेन स्पृष्टः, धर्म्मास्तिकायस्य सर्वात्मना तत्रावगाढत्वात्, अत एव नो धर्मास्तिकायस्य देशेन स्पृष्टो, यो हि येन सर्वात्मना व्याप्तो नासौ तस्यैव देशेन व्याप्तो भवति, विरोधात्, प्रदेशैस्तु व्याप्तः, सर्वेषामपि धर्म्मास्तिकायप्रदेशानां तत्रावगाढत्वात्, एवमधर्मास्तिकायविषयेऽपि निर्वचनं वाच्यं, तथा नो आकाशास्तिकायेन सकलेन द्रव्येण स्पृष्टः, आकाशास्तिकायदेशमात्रत्वाल्लोकस्य, किन्तु देशेन व्याप्तः, प्रदेशैश्च पृथिव्यादयोऽपि सूक्ष्माः सकललोकापन्ना वर्त्तन्ते ततस्तैरपि सर्वात्मना व्याप्तः, 'तसकाएणं सिय फुडे' इति, यदा केवलीसमुद्घातं गतः सन् चतुर्थे समये वर्त्तते तदा तेन स्वप्रदेशैः सकललोकपूरणात् त्रसकायेन स्पृष्टः, केवलिनस्त्रसकायत्वात्, सेषकालं तु न स्पृष्टः, सर्वत्र त्रसकायाना म भावात्,

एवं जम्बूद्वीपादिविषयाण्यपि सूत्राणि भावनीयानि, नवरं बहिः पुष्करार्द्धचिन्तायां 'अद्धासमएणं न फुडे' इति, अद्धासमयो ह्यर्द्धतृतीयद्वीपसमुद्रान्तर्वर्त्ती न बहिः, एतच्च धर्म्मसङ्ग्रहणिटीकायां भावितं, ततो बहिर्द्वीपसमुद्राणामद्धासमयस्पर्शनप्रतिषेधः, 'जंबुद्दीवे लवणे' गाहा, सर्वद्वीपसमुद्राणामभ्यन्तरवर्त्ती जम्बूद्वीपस्तत्परिक्षेपी लवणसमुद्रस्तदनन्तरं धातकीखण्डाभिधानो द्वीपस्ततः कालोदः समुद्रः तदनन्तरं पुष्करवरो द्वीपः, अत ऊर्ध्वं द्वीपसदृशनामानः समुद्राः, ततः पुष्करवरसमुद्रः तदनन्तरं वरुणवरो द्वीपो वरुणवरः समुद्रः क्षीरवरो द्वीपः क्षीरोदः समुद्रः, धृतवरो द्वीपो धृतोदः समुद्रः, इक्षुवरो द्वीपो इक्षुवरः समुद्रः, नन्दीश्वरो द्वीपो नन्दीश्वरः समुद्रः, एतेऽष्टावपि च समुद्रा एकप्रत्यवताराः, एकैकरूपा इति भावः,

अत ऊर्ध्वं द्वीपाः समुद्राश्च त्रिप्रत्यवताराः, तद्यथा—अरुण इति अरुणोऽरुणवरो अरुण-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वरावभासः कुण्डलः कुण्डलवरः कुण्डलवरावभासः रुचको रुचकवरो रुचकवरावभास इत्यादि, चात्र क्रमः–नन्दीश्वरसमुद्रानन्तरं अरुणो द्वीपोऽरुणः समुद्रः, ततोऽरुणवरो द्वीपोऽरुणवरः समुद्र इत्यादि, एष चात्र क्रमः–नन्दीश्वरसमुद्रानन्तरं अरुणो द्वीपोऽरुणः समुद्रः, ततोऽरुणवरो द्वीपो।ऽरुणवरः समुद्र इत्यादि, कियन्तः खलु नामग्राहं द्वीपसमुद्राः वक्तुं शक्यन्ते ? ततस्तन्नाम-सङ्ग्रहमाह–'आभरणवत्थे'त्यादिगाथाद्वयं, यानि कानिचिदाभरणनामानि–हारार्द्धहाररत्नाव लिक-नकावलिप्रभृतीनि यानि च वस्तरनामानि–चीनांशुकप्रभृतीनि यानि च गन्ध-नामानि–कोष्ठपुटादीनि यानि चोत्पलानामानि–जलरुहचन्द्रोद्योतप्रमुखानि यानि च तिलकप्रभृतीनि वृश्रनामानि यानि च पद्मनामानि–शतपत्रसहस्रपत्रप्रभृतीनि

यानि च पृथिवीनामानि–पृथिवीरत्नशर्करावालुकेत्यादीनि यानि च नवानां निधीनां चतुर्दशानां चक्रवर्त्तिरत्नानां चुल्लहिमवदादिकानां वर्षधरपर्वतादीनां पद्मादीनां हृदानां गङ्गासिन्धुप्रभृतीनां नदीनां कच्छादीनां विजयानां माल्यवदादीनां वक्षस्कारपर्वतानां सौधर्म्मादीनां कल्पानां शक्रादीनामिन्द्राणां देवकुरुउत्तरकुरुमन्दराणामावासानां–शक्रादिसम्बन्धिनां मेरुप्रत्यासन्नदीनां कूटानां क्षुल्लहिमवदादिसम्बन्धिनां नक्षत्राणां कृत्तिकादीनां चन्द्राणां सूर्याणां च नामानि तानि सर्वाण्यपि द्वीपसमुद्राणां त्रिप्रत्यवताराणि वक्तव्यानि, तद्यथा–

हारो द्वीपो हारः समुद्रः हारवरो द्वीपो हारवरः समुद्रः हारवरावभासो द्वीपो हारवरावभासः समुद्र इत्यादिना प्रकारेण त्रिप्रत्यवतारास्तावद् वक्तव्याः यावत् सूर्यो द्वीपः सूर्यस्समुद्रः सूर्यवरो द्वीपः सूर्यवरस्समुद्रः सूर्यवरावभासो द्वीपः सूर्यवरावभासः समुद्रः, उक्तं च जीवाभिगमचूर्णो– "अरुणाई दीवसमुद्दा तिपडोयारा यावत् सूर्यवरावभासः समुद्रः" ततः सूर्यवरावभासपरिक्षेपी देवो द्वीपस्ततो देवः समुद्रः, तदनन्तरं नागो द्वीपो नागः समुद्रः, ततो यक्षो द्वीपो यक्षः समुद्रः, ततो भूतो द्वीपो भूतः समुद्रः, स्वयम्भूरमणो द्वीपः स्वयम्भूरमणः समुद्रः, एते पञ्च देवादयो द्वीपाः पञ्च देवादयः समुद्राः एकरूपाः, न पुनरेषां प्रत्यवतारः, उक्तं च जीवाभिगमचूर्णो – 'एते पञ्च द्वीपाः पञ्च समुद्रा एकप्रकारा' इति, जीवाभिगमसूत्रेऽप्युक्तम्–"देवे नागे जक्खेभूए संयभूरमणे य एक्केको चेव भाणियव्वो, तिपडोयारं नत्थित्ति" इति। पूर्वमाकाशथिग्गलशब्देन लोकः पृष्टोऽधुना लोकशब्देनैव तं पिपृच्छिषुराह–

'लोए णं भंते ! किंणा फुडे'इत्यादि, पाठसिद्धं, अलोकसूत्रमपि पाठसिद्धं, नवरं 'एगे अजीवदव्वदेसे' इति अलोक एकोऽजीवद्रव्यदेशः, आकाशास्तिकायस्य देश इत्यर्थः, परिपूर्णस्त्वाकाशास्तिकायो न भवति, लोकाकाशेन हीनत्वात्, अत एवागुरुलघुकोऽमूर्त्तत्वात्, अनन्तैरगुरुलघुकगुणैः संयुक्तः, प्रतिप्रदेशं स्वपरबेदभिन्नानामनन्तानामगुरुलघुपर्यायाणां भावात्, किंप्रमाणाः सोऽलोक इति चेत्, अत आह–सर्वाकाशमनन्त भागेनं–लोकाकाशमात्रखण्डहीनं सकलाकाशप्रमाणं इति भावः ॥

पदं – १५, उद्देशकः– १ – समाप्तः

–: पदं – १५, उद्देशकः– २ :–

वृ. व्याख्यातः प्रथमः उद्देशकः, सम्प्रति द्वितीय आरभ्यते–तत्रेदमादावर्थाधिकारसङ्ग्राहकं गाथाद्वयं–

Jain Education International For Private & Personal Use Only www.jainelibrary.org

से किं तं पोग्गलनोभवोववायगती ?, २ जण्णं परमाणुपोग्गले लोगस्स पुरत्थिमिल्लाओ चरमंताओ पच्चत्थिमिल्लं चरमंतं एगसमएणं गच्छकति पच्चत्थिमिल्लाओ वा चरमंताओ पुरत्थिमिल्लं चरमंतं एगसमएणं गच्छति दाहिणिल्लाओ वा चरमंता उत्तरिल्लं चरमंतं एगसमएणं गच्छति एवं उत्तरिल्लाओ दाहिणिल्लं उवरिल्लातो हेट्ठिल्लं हिट्ठिल्लाओ उवरिल्लं, से तं पोग्गलणोभवोववायगती,

से किं तं सिद्धनोभवोववायगती ?, २ दुविहा पं०, तं०-अनंतरसिद्धणोभवोववाय० परंपरसिद्धनोभवोववयागती य, से कं तं अनंतरसिद्धनोभवोववयागती ?, २ पन्नरसविहा पं०, तं०-तित्थसिद्धअनंतरसिद्धनोभवोववायगती य जाव अनेगसिद्धनोभवोववायगती य, से किं तं परंपरसिद्धनोभवोववयागती ?, २ पन्नरसविहा पं०, तं०-तित्थसिद्धअनंतर-सिद्धनोभवोवव-यातीय जाव अनेगसिद्धनोभवोववायगतीय, से किं तं परंपरसिद्धनोभवोवयागती ?, २ अनेगविहा पं०, तं०-अपढमसमयसिद्धनोभवोववायगती एवं दुसमयसिद्धनोभवोव- वायगती जाव अनंतसमयसिद्धनोभवोववायगती, सेत्तं सिद्धनोभवोववायगती, से तं नोभवोववायगती, से तं उववायगती ४। से किं तं विहायगती ?, २ सत्तरसविहा पन्नत्ता, तं०-फुसमाणगती १ अफुसमाणगती २ उवसंपज्जमाणगती ३ अनुवसंपज्जमाणगती ४ पोग्गलगती ५ मंडूयगती ६

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नावागती ७ नयगई ८ छायागती ९ छायानुवातगती १० लेसागई ११ लेसाणुवातगती १२ उद्दिस्सपविभत्तगती १३ चउपुरिसपविभत्तगती १४ वंकगती १५ पंकगती १६ बंधणविमोयणगती १७, से किं तं फुसमाणगती ?, २ जण्णं परमाणुपोग्गले दुपएसिए जाव अनंतपएसियाणं खंधाणं अन्नमन्नं फुसंताण गती पवत्तइ सेत्तं फुसमाणगती १,

से किं तं अफुसमाणगती ?, २ जन्नं एतेसिं चेव अफुसंताणं गती पवत्तति से तं अफुसमाणगती २, से किं तं उवसंपज्ञमाणगती ?, २ जण्णं रायं वा जुवरायं वा ईसरं वा तलवरं वा माडंबितं वा कुडुंबितं वा इब्भं वा सिट्ठिं वा सेनावतिं वा सत्थवाहं वा उवसंपज्ञित्ता णं गच्छति, से तं उवसंपज्ञमानगती ३, से तं अनुवसंपज्ञमानगती ? २ जण्णं एतेसिं चेव अन्नमन्नं अनुवसंपज्ञित्ता णं गच्छति, से तं अनुवसंपज्ञमाणगती ४, से किं तं पोग्गलगती ?, २ जं णं परमाणुपोग्गलाणं जाव अनंतपएसियाणं खंधाणं गती पवत्तति सले तं पोग्गलगती ५, से किं तं मंडूयगती ?, २ जण्णं मंडूओ पिडित्ता गच्छति, से तं मंडूयगती ६, से किं तं नावागती ?, जण्णं नावा पुव्ववेतालीओ दाहिणवेयालिं जलपहेणं गच्छति, दाहिणवेतालिओ वा उवरवेतालिं जलपहेणं गच्छति, से तं नावागती ७, से किं तं नयगती ?, २ जण्णं नेगमसंगहववहारउज्ञुसुयसद्दसमभिरूढएवंभूयाणं नयाणं जा गती अहवा सव्वनयावि जं इच्छंति, से तं नयगती ८,

से किं तं छायागती ?, २ जं णं हयछायं वा गयछायं वा नरछायं वा किन्नरछयं वा महोरगछायं वा गंधव्वछायं वा उसहछायं वा रहछायं वा छत्तछायं वा उवसंपज्ञित्ताणं गच्छति, से तं छायागती ९, से किं तंछायानुवायगती ?, २ जेणं पुरिसं छाया अनुगच्छति नो पुरिसे छायं अनुगच्छति, से तं छायाअनुवायगती १०। से किं तं लेस्सागती ?, २ जण्णं किण्हलेसा नीललेसं पप्प तारूवत्ताए तावन्नत्ताए तागंधत्ताए तारसत्ताए ताफासत्ताते भुज्ञो २ परिणमति, एवं नीललेसा काउलवेसं पप्प तारूवत्ताए जाव ता फासत्ताए परिणमति, एवं काउलेसावि तेउलेसं तेउलेसावि पम्हलेसं पम्हलेसावि सुक्कलेसं पप्प तारूवत्ताते जाव परिणमति, से तं लेसागती ११, से किं तं लेसानुवायगती ?, २ जल्लेसाइं दव्वाइं परियाइत्ता कालं करेइ तल्लेसेसु उववज्ञति, तं०-किण्हलेसेसु वा जाव सुक्कलेसेसु वा, से तं लेसानुवायगती १२,

से किं तं उद्दिस्सपविभत्तगती ?, २ जण्णं आयरियं वा उवज्झायं वा थेरं वा पवत्तिं वा गणिं वा गणहरं वा गणावच्छेदं वा उद्दिसिया २ गच्छति, से तं उद्दिस्सियपविभत्तगती १३, से किं तं चउपुरिसपविभत्तगती ?, से जहानामए चत्तारि पुरिसा समगं पज्ञवट्ठिया समगं पट्ठिता १ समगं पज्ञवट्ठिया विसमगं पट्ठिया २ विसमं पज्ञवट्ठिया विसमं पट्ठिया ३ विसमं पज्ञवट्ठिया समगं पट्ठिया ४, से तं चउपुरिसपविभत्तगती १४, से किं तं वंकगती ?, २ चउव्विहा पं०, तं०-घट्टनया थंभणया लेसणया पवडणया, से तं वंकगती १५, से किं तं पंकगती ?, २ से जहानामते केइ पुरिसे पंकंसि वा उदयंसि वा कायं उव्विहिया गच्छति, से तं पंकगती १६

से किं तं बंधनविमोयणगती ?, २ जण्णं अंबाण वा अंबाडगाण वा माउलुंगाण वा बिल्लाण वा कविट्ठाण वा [भव्वाण वा] फणसाण वा दालिमाण वा पारेवताण वा अक्खोलाण वा चाराण वा वोराण वा तिंडुयाण वा पक्काणं परियागयाणं बंधणातो विप्पमुक्काणं निव्वाघातेणं अधे वीससाए गती पवत्तइ, से तं बधनविमोयणगती पन्नवणाए भगवईए पओगपदं समत्तं ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ. 'कइविहे णं भंते ! गइप्पवाए' इत्यादि, गमनं गतिः प्राप्तिरित्यर्थः, प्राप्तिश्च देशान्तरविषया पर्यायान्तरविषया च, उभयत्रापि धात्वर्थोपपत्तेः गतिशब्दप्रयोदर्शनाच्च, तथाहि—क्व गतो देवदत्तः ?, पत्तनं गतः, तथा वचनमात्रेणा प्यसौ गतः कोपमित्, लोकोत्तरेऽप्युभयथा प्रयोगः—परमाणुरेकसमयेन एकस्माल्लोकान्तादपरं लोकान्तं गच्छति, तथा तानि तान्यध्यवसायान्तराणि गच्छन्तीति, गतेः प्रपातो गतिप्रपातः,

स कतिविधः प्रज्ञप्तः ?, कुत्र कुत्र गतिशब्दप्रवृत्तिरुपनिपततीत्यर्थः, भगवानाह—पञ्चविधः प्रज्ञप्तः तदेव पञ्चविधत्वं दर्शयति—'प्रयोगगति'रित्यादि, प्रयोगः प्रागुक्त; पञ्चदशविधः स एव गतिः प्रयोगगतिः, इयं देशान्तरप्राप्तिलक्षणा द्रष्टव्या, सत्यमनःप्रभृतिपुद्गलानां जीवेन व्यापार्यमाणानां यथायोगमल्पबहुदेशान्तरगमनात् १। 'ततगई' इति तता—विस्तीर्णा सा चासौ गतिश्च ततगतिः, तथाहि—यं ग्रामं सन्निवेशं वा प्रति प्रतिष्ठितो देवदत्तादिस्तं ग्रामादिकं यावदद्यापि न प्राप्नोति तावदन्तरा पथि एकैकस्मिन्न पदन्यासे तत्तद्देशान्तरप्राप्तिलक्षणा गतिरस्तीति ततगतिः, इयं विस्तीर्णत्वविशेषणात् पृथगुपात्ता, अन्यथा प्रयोगगतावत्रेयमन्तर्भवति, पादन्याससस्य शरीरप्रयोगात्मकत्वात्, एवमुत्तरत्रापि यथायोगं परिभावनीयं २।

तथा 'बंधणछेयणगई' इति, बन्धनस्य छेदनं बन्धनच्छेदनं तस्मात् गतिर्बन्धनच्छेदनगतिः, सा च जीवेन विमुक्तस्य शरीरस्य शरीराद्वा विच्युतस्य जीवास्यावसातव्या, न तु कोशसम्बन्धविच्छेदादेरण्डबीजादेः, तस्या विहायोगतिभेदत्वेन वक्ष्यमाणत्वात् ३।

'उववायगई' इति, उपपातः—प्रादुर्भावः, सच क्षेत्रभवनोभवभेदात् त्रिविधः, तद्यथा—क्षेत्रोपपातो भवोपपातो नोभवोपपातश्च, तत्र क्षेत्रं—आकाशं यत्र नारकादयो जन्तवः सिद्धाः पुद्गला वा अवतिष्ठन्ते, भवः—कर्मसम्पर्कजनितो नैरयिकत्वादिकः पर्यायः, भवन्ति कर्मवशवर्त्तिनः प्राणिनोऽस्मिन्निति भव इति व्युत्पत्तेः, नोभवः—भवव्यतिरिक्तः कर्मसम्पर्कसम्पाद्यनैरयिकत्वादिपर्यायरहित इति भावः, स च पुद्गलः सिद्धो वा, उभयस्यापि यथोक्तलक्षणभवातीतत्वात्, उपपात एव गतिरूपपातगतिरिति ४।

विहायसा—आकाशेन गतिर्विहायोगतिः, सा चोपाधिभेदात् सप्तदशविधा, तद्यथा—स्पृशद्गतिरित्यादि, तत्र परमाण्वादिकं यदन्येन परमाण्वादिकेन परस्परं संस्पृश्य संस्पृश्य—सम्बन्धनमनुभूयानुभूयेत्यर्थः इति भावः गच्छति सा स्पृशद्गतिः, स्पृशतो गतिरिति व्युत्पत्तेः तद्विपरीता अस्पृशद्गतिः, यत्परमाण्वादिकमन्येन परमाण्वादिना सह परस्परसम्बन्धमननुभूय गच्छति यथा परमाणुरेकेन समयेन एकस्माल्लोकान्तादपरं लोकान्तमिति, उपसंपद्यमानगतिर्यदन्यमुपसम्पद्य—आश्रित्य तदवष्टम्भेन गमनं यथा धनसार्थवाहावष्टम्भेन धर्मघोषसूरीणां, अनुपसम्पद्यमानगतिर्यत् परस्परमुपष्टम्भरहितानां पथि गमनं, मण्डूकगतिर्यत् मण्डूकस्येवोत्प्लुत्य गमनं, नावागतिर्यन्नावा महानद्यादौ गमनं, नयगतिर्यन्नायानां नैगमादीनां स्वस्वमतपोषणं अथवा यन्नयानां सर्वेषां परस्परसापेक्षाणां प्रमाणाबाधितवस्तुव्यवस्थापनं सा नयगतिः,

छायागतिः—छायामनुसृत्य तदुपष्टम्भेन वा समाश्रयितुं गतिः छायागतिः, छायानुपातगतिरिति छायायाः स्वनिमित्तपुरुषादेरनुपातेन—अनुसरणेन गतिः छायानुपातगतिः, तथाहि—छाया

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पुरुषमनुसरति न तु पुरुषः छायामतश्चछायाया अनुपातगतिः, लेश्यागतिर्यत्तिर्यङ्गमनुष्याणां कृष्णादिलेश्याद्रव्याणि नीलादिलेश्याद्रव्याणि सम्प्राप्य तद्रूपपादितया परिणमन्ति सा लेश्यागतिरिति, लेश्यानुपातगतिरिति लेश्याया अनुपातः–अनुसरणं तेन गतिर्लेश्यानुपातगतिः, लेश्याया इत्यत्र विग्रहवेलायां कर्मणि षष्ठी, यतो वक्ष्यति–'यानि लेश्याद्रव्याणि पर्यादाय जीवः कालं करोति तल्लेश्येषूपजायते न शेषलेश्येषु' ततो जीवो लेश्याद्रव्याण्यनुसरति, न तु तानि जीवमनुसरन्तीति, 'उद्दिश्यप्रविभक्तगति'रिति प्रविभक्तं–प्रतिनियतमाचार्यादिकमुद्दिश्य यत्तत्पार्श्वे गच्छति सा उद्दिश्यप्रविभक्तगतिः, 'चतुःपुरुषप्रविभक्तगति'रिति चतुर्द्धा पुरुषाणां प्रविभक्तगतिः चतुःपुरुषप्रविभक्तगतिः, तच्चतुर्द्धात्वं 'समगं पञ्जवट्ठिया' इत्यादिना ग्रन्थेन स्वयमेव वक्ष्यति, तथा वंका–वक्रा सा चासौ गतिश्च वंकगतिः, सा च चतुर्द्धा, तद्यथा–घट्टनता स्तम्भनता श्लेषणता पतनता, तत्र घट्टनशब्दस्य भावः–प्रवृत्तिनिमित्तं घट्टनमेव वेति, एवं शेषपदशब्दार्थोऽपि भावनीयः, तत्र घट्टनं–खञ्जा गतिः स्तम्भनं–ग्रीवायां धमण्यादीनां तिष्ठतो वाऽऽत्मनोऽङ्गप्रदेशानां श्लेषणं–ऊर्वादीनां जानुप्रभृतिभिः सम्बन्धः पतनं–तिष्ठत एव गच्छतो वा यल्लुठनं, एतानि च घट्टनादीनि जीवस्यानीप्सितत्वादप्रशस्यत्वाच्च वंकगतिशब्दावाच्यानि, तथा पङ्के गतिः पङ्कगतिः, पङ्कग्रहणमुदकस्याप्युपलक्षणं, तेन पङ्के उदके वाऽतिदुस्तरं यदात्मीयं कायं केनापि सहोद्‌बध्य तद्‌बलेन गच्छति सा पङ्कगतिः,

बन्धनविमोचनगतिरिति बन्धनाद्विमोचनं बन्धनविमोचनं तेन गतिर्बन्धनविमोचनगतिः–यदाम्रादिफलानामतिपरिपाकगतानामत एव बन्धनाद्विच्युतानां यधो विश्रसया–निर्व्याधातेन गमनं सा बन्धनविमोचनगतिरिति भावः, एतदेव सूत्रकृदुपदर्शयति–'से किं तं पयोगगई'इत्यादि सुगमसमापदपरिसमाप्तेः, नवरं 'जंबुद्दीवे दीवे भरहेरवयवासस्स सपक्खं सपडिदिसिं सिद्धिखेत्तोववायगई' इति जंबूद्वीपे द्वीपे यत् भरतवर्षं ऐरावतवर्षं च तयोरुपरि सिद्धिक्षेत्रोपपातगतिर्भवति, कथमित्याह–'सपक्षं सप्रतिदिक् च'तत्र सह पक्षाः–पार्श्वाः-पूर्वापरदक्षिणोत्तररूपाः यस्मिन् सिद्धिक्षेत्रोपपातगतिभवने तत् सपक्षं प्रतिदिशो–विदिश आग्नेय्यादयो यस्मिन् तत्सप्रतिदिक्, क्रियाविशेषणमेतत्, एषोऽत्र भावार्थः–जंबूद्वीपे द्वीपे भरतैरावतवर्षयोरुपरि सर्वासु दिश्रु विदिक्षु च सर्वत्र सिद्धिक्षत्रोपपातगतिर्भवतीति, एवं शेषसूत्रेष्वपि भावनीयं, उपसंपद्यमानगतिसूत्रे 'जण्णं रायं वा' इत्यादि, राजा–पृथिवीपतिः युवराजो–राज्यचिन्ताकारी राजप्रतिशरीरं ईश्वरः–अणिमाद्यैश्वर्ययुक्तस्तलवरः–परितुशष्टनरपतिप्रदत्तपट्टबन्धविभूषितो राजस्थानीयः माडम्बिकः–छिन्नमडम्बाधिपः कौटुम्बिकः–कतिपयकुटुम्बस्वामी इभमर्हतीतीभ्यो–धनवान् श्रेष्ठी–श्रीदेवताध्यासतसौवर्णपट्टभूषितोत्तमाङ्गः सेनापतिः–नृपतिनिरुपितचतुरङ्गसैन्यनायकः सार्थवाहः–सार्थनायकः, नौगतिसूत्रे 'पुव्ववेतालिओ' इत्यादि वैतालीशब्दौऽत्र देशीवचनत्वाद्वेतालावतटवाची ॥

पदं – १६ – समाप्तम्

मुनि दीपरत्नसागरेण संशोधिता सम्पादिता प्रज्ञापनाउपाङ्गसूत्रे षोडशस्य पदस्य मलयगिरिआचार्येण विरचिता टीका परिसमाप्ता ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पदं – १७ – "लेश्या"

वृ. तदेवमुक्तं षोडशं प्रयोगपदं, सम्प्रति सप्तदशमारभ्यते, अस्य चायमभिसम्बन्धः– इहानन्तरपदे प्रयोगपरिणाम उक्तः, सम्प्रति परिणामसाम्याल्लेश्यापरिणाम उच्यते–अथ लेश्येति कः शब्दार्थः ?, उच्यते, लिष्यते–श्लिष्यते आत्मा कर्मणा सहानयेति लेश्या, कृष्णादिद्रव्य-साचिव्यादात्मनः परिणामविशेषः, उक्तं च–

॥१॥ "कृष्णादिद्रव्यसाचिव्यात्, परिणामो य आत्मनः ।
स्फटिकस्येव तत्रायं, लेश्याशब्दः प्रवर्त्तते ॥"

अथ कानि कृष्णादीनि द्रव्याणि ?, उच्यते, इह योगे सति लेश्या भवति, योगाभावे च न भवति, ततो योगेन सहान्यवव्यतिरिकदर्शनात् योगनिमित्ता लेश्येति निश्चीयते, सर्वत्रापि तन्निमित्तत्वनिश्चयस्यान्वयव्यतिरेकदर्शनमूलत्वात्, योगनमित्ततायामिप विकल्पद्वयमवतरति–किं योगान्तर्गतद्रव्यरूपा योगनिमित्तकर्म्मद्रव्यरूपा वा ?, तत्र न तावद्योगनिमित्तकर्म्म द्रव्यरूपा, विकल्पद्वयानतिक्रमात्,

तथाहि–योगनिमित्तकर्म्मद्रव्यरूपा सती घातिकर्म्मद्रव्यरूपा अघातिकर्म्मद्रव्यरूपा वा न तावद् घातिकर्म्मद्रव्यरूपा, तेषामभावेऽपि सयोगिकेवलिनि लेश्यायाः सद्भावात्, नापि अधाति-कर्म्मरूपा, तत्सद्भावेऽपि अयोगिकेवलिनि लेश्याया अभावात्, ततः पारिशेष्यात् योगान्तर्गत-द्रव्यरूपा प्रत्येया, तानि च योगान्तर्गतानि द्रव्याणि यावत्कषायास्तावत्तेषा- मप्युदयोपबृंहकाणि भवन्ति, दष्टं च योगान्तर्गतानां द्रव्याणां कषायोदयोपबृंहणसामर्थ्यं, यथा पित्तद्रव्यस्य, तथाहि–

पित्तप्रकोपविशेषादुपलक्ष्यते महान् प्रवर्द्धमानः कोपः, अन्यच्च बाह्यान्यपि द्रव्याणि कर्म्मणामुदयक्षयोपशमादिहेतव उपलभ्यन्ते, यथा–ब्राह्मयौषधिर्ज्ञानावरण[स्य] क्षयोपशमस्य सुरापानं ज्ञानावरणोदयस्य, कथमन्यथा युक्तायुक्तविवेकविकलतोपजायते, दधिभोजनं निद्रारूपदर्शना- वरणोदयस्य, तत्किं योगद्रव्याणि न भवन्ति ?, तेन यः स्थितिपाकविशेषो लेश्यावशादुपगीयते शास्त्रान्तरे स सम्यगुपपन्नः, यः स्थितिपाको नामानुभाग उच्यते, तस्य निमित्तं कषायोदयान्त-गतकृष्णादिलेश्यापरिणामाः, ते च परमार्थतः कषायस्वरूपा एव, तदन्तर्गतत्वात्, केवलं योगा- न्तर्गतद्रव्यसहकारिकारणभैदवैचित्र्यभ्यां ते कृष्णादिभेदैर्भिन्नाः तारतम्यभेदेन विचित्राश्चोपजायन्ते, तेन यद् भगवता कर्मप्रकृतिकृता शिवशर्म्माचार्येण शतकाख्ये ग्रन्थेऽभिहितं "ठिइअनुभागं कसायओ कुणइ" इति तदपि समीचीनमेव, कृष्णादिलेश्यापरिणामानामपि कषायोदयान्तर्गतानां कषायरूपत्वात्, तेन यदुच्यते कैश्चिद्–

योगपरिणामत्वे लेश्यानां "जोगा पयडिपएसं ठिइअनुभागं कसायओ कुणइ" इति वचनात् प्रकृतिप्रदेशबन्धहेतुत्वमेव स्यान्न कर्म्मस्थितिहेतुत्वमिति, तदपि न समीचीनं, यथोक्तभा-वार्थपरिज्ञानात्, अपि च–न लेश्याः स्थितिहेतवः, किंतु कषायाः, लेश्यास्तु कषायोदयान्तर्गताः अनुभागहेतवः, अत एव च 'स्थितिपाकविशेशषस्तस्य भवति लेश्याविशेषेण' इत्यत्रानुभागप्रति-पत्त्यर्थं पाकग्रहणं, एतच्च सुनिश्चितं कर्म्मप्रकृतिटीकादिषु, ततः सिद्धान्तपरिज्ञानपि न सम्यक् तेषामस्ति, यदप्युक्तम्–'कर्म्मनिष्यन्दो लेश्या, निष्यन्दरुपत्वे हि यावत् कषायोदयः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तावन्निष्यन्दस्यापि सद्भावात् कर्म्मस्थितिहेतुत्वमपि युज्यते एवे'त्यादि, तदप्यश्लीलं, लेश्यानामनुभागबन्धहेतुतया स्थिति- बन्धहेतुतवायोगात्,

अन्यच्च–कर्म्मनिष्यन्दः किं कर्म्मकल्क उत कर्म्मसारः ?, न तावत्कर्म्मकल्कः, तस्यासारतयोत्कृष्टानुभागबन्धहेतुत्वानुपपत्तिप्रसक्तेः, कल्को हि असारो भवति असारश्च कथमुत्कृष्टानुभागबन्धहेतुः ?, अथ चोत्कृष्टनुभागबन्धहेतवोऽपि लेश्या भवन्ति,

अथ कर्म्मसार इति पक्षस्तर्हि कस्य कर्म्मणः सार इति वाच्यं ?, यथायोगमष्टानामपीति चेत् अष्टानामपि कर्म्मणां शास्त्रे विपाका वर्ण्यन्ते, न च कस्यापि कर्म्मणो लेश्यारूपो विपाक उपदर्शितः, ततः कथं कर्म्मसापक्षमङ्गीकुर्म्महि ?, तस्मात्, पूर्वोक्त एव पक्षः श्रेयानित्यङ्गीकर्त्तव्यः, तस्य हरिभद्रसूरिप्रभृतिभिरपि तत्र (तत्र) प्रदेशे अङ्गीकृतत्वादिति। अस्मिंश्च लेश्यापदे षट् उद्देशकाः, तत्रेयं प्रथमोद्देशकार्थसङ्ग्रहगाथा–

–: पदं – १७ – उद्देशकः – १ :–

मू. (४४२) *आहार समसरीरा उस्सासे कम्मवन्न लेलासु।*
समवेदन समकिरिया समाउया चेव बोद्धव्वा।

वृ. समशब्दः पूर्वार्ध्धो प्रत्येकमपि सम्बध्यते, उत्तरार्द्धे प्रतिपदं साक्षात्सम्बन्धित एवास्ति, ततोऽयमर्थः–प्रथमोऽधिकारः सर्व्वे समाहाराः सर्व्वे समशरीराः सर्व्वे समोच्छ्वासा इति प्रश्नोपलक्षितः,द्वितीयः समकर्म्माण इति, तृतीयः समवर्ण्णा इति, चतुर्थःसमेवेश्याका इति, पञ्चमः समवेदनाका इति, षष्ठः समक्रिया इति, सप्तमः समायुष इति।

अथ लेश्यापरिणामविशेषाधिकारे कथममीषामर्थानामुपन्यासोपपत्तिः ?, उच्यते, अनन्तरप्रयोगपदे उक्तं–'कतिविहे णं भंते ! गइप्पवाए इति (पं०) ?, गोयमा ! पंचविहे०, पयोगगई ततगई बंधनछेदनगई उववायगई विहायोगई, तत्थ जा सा उववायगई सा तिविहा–खित्तोववायई भवोववयागई नोभवोववायगई, तत्थ भवोवायगई चउविहा–नेरइयभवोववायगई देवभवो० तिरिक्खजोणियभवो० मणुस्सभवोववायगई' इति, तत्र नारकत्वादिभवत्वेनोत्पन्नानां जीवानामुपपातसमयादारभ्य आहारद्यर्थसम्भवोऽवश्यंभावी ततो लेश्याप्रक्रमेऽपि तेषामुपन्याससूत्रं।

मू. (४४३) *नेरइया णं भंते ! सव्वे समाहारा सव्वे समसरीरा सव्वे समुस्सासनिस्सासास गो० ! नो इणट्ठे समट्ठे, से केणट्ठेणं भंते ! एवं वुच्चइ–नेरइया नो सव्वे समाहारा जाव नो सव्वे समुस्सासनिस्सासास ?, गोयमा ! नेरइया दुविहा पन्नत्ता, तंजहा–महासरीरा य अप्पसरीरा य, तत्थ णं जे ते महासरीरा ते णं बहुतराएपोग्गले आहारेंति बहुतराए पोग्गले परिणामेंति बहुतराए पोग्गलेउस्संति बहुतराए पोग्गलसे नीससंति अभिक्खणं आहारेंति अभि० परिणामेंति अभि० ऊससंति अभि० नीससंति, तत्थ णं जे ते अप्पसरीरा ते णं अप्पतराए पो० आहा० अप्प० पो० परि० अप्प० पो० ऊससंति अप्प० पो० नीससंति आहच्च आहारेंति आहच्च परिणामेंति आहच्च ऊससंति आहच्च नीससंति, से एएणट्ठेणं गो० ! एवं वुच्चइ–नेरइया नो सव्वे समाहारा नो सव्वे समसरीरा नो सव्वे समुस्सासनिस्सासा।*

वृ. 'यथोद्देशं निर्देश' इति न्यायात् प्रथमं समाहारा इत्यादिप्रश्नोपलक्षितमर्थाधिकारमाह–'नेरइया णं भंते' इत्यादि प्रश्नसूत्रं सुगमं, भगवानाह–'गोयमा' इत्यादि, नायमर्थः

समर्थः–नायमर्थो युक्त्युपपन्न इति भावः, पुनः प्रश्नयति–'से केणट्ठेणं'मित्यादि, सेशब्दोऽथशब्दार्थः, अथ केनार्थेन-केन प्रयोजनेन केन प्रकारेणेति भावः भदन्त ! एवमुच्यते नैरयिकाः सर्व्वे समाहारा इत्यादि ?, भगवानाह–'गोयमे'त्यादि, इहाल्पत्वं महत्त्वं चापेक्षिकं, तत्र जघन्यमल्पत्वं अङ्गुलसङ्ख्येयभागमात्रत्वं उत्कृष्टं महत्त्वं पञ्चधनुःशतमानत्वं, एतच्च भवधारणीयशरीरापेक्षया, उत्तरवैक्रियापेक्षया तु जघन्यमल्पत्वं अङ्गुलसङ्ख्यातभागमात्रत्वं इतरद्धनुःसहस्रमानत्वं, एतावता च किं समशरीरा इत्यस्य प्रश्नसस्योत्तरमुक्तं।

अथ शरीरप्रश्नो द्वितीयस्थानोक्तः तत्कथमस्य प्रथमत एव निर्वचनमुक्तं ?, उच्यते, शरीरविषमताभिधाने सति आहारोच्छ्वासयोर्वैषम्यं सुप्रतिपादितं भवतीति द्वितीयस्थानोक्तस्यापि शरीरप्रश्नस्य प्रथमं निर्वचनमुक्तं। इदानीं आहारोच्छासयोर्निर्वचनमाह–'तत्थ ण'मित्यादि, 'तत्र' अल्पशरीरमहाशरीररूपराशिद्वयमध्ये 'ण'मिति वाक्यालङ्कारे ये यतो महाशरीरास्ते तदपेक्षया बहुतरान् पुद्गलानाहारयन्ति महाशरीरत्वादेव, दृश्यते हि लोके बृहच्छरीरो बह्वाशी यथा हस्ती, अल्पशरीरोऽल्पभोजी शशकवत्, बाहुल्यापेक्षं चेतमुदाहरणमुपन्यस्ते, अन्यथा कोऽपि बृहच्छरीरोऽप्यल्बमश्नाति कश्चिदल्पशरीरोऽपि भूरि भुङ्क्ते, तथाविधमनुष्यवत्, नारकाः पुनरुपपातादिसद्वेद्यानुभावादन्यत्रासद्वेद्योदयवर्त्तित्वादेकान्तेन यथा महाशरीराः दुःखितास्तीव्राहाराभिलाषाश्च भवन्ति तथा नियमाद् बहुतरान्पुद्गलानाहारयन्ति तथा बहुतरान् पुद्गलान् परिणामयन्ति, आहारपुद्गलानुसारित्वात् परिणामस्य, परिणामश्चापृष्टोऽप्याहारकार्यमित्युक्तः, तथा 'बहुतराए पुग्गले उस्ससंति' इति बहुतरान् पुद्गलान् उच्छ्वासतया गृह्णन्ति 'नीससंति' इति निःश्वासतया मुञ्चन्ति, महाशरीरत्वादेव, दृश्यन्ते हि बृहच्छरीरास्तज्ञातीयेतरापेक्षया बहुच्छ्वासनिःश्वासा इति, दुःखिता अपि तथैव, दुःखिताश्च नारका इति।

आहारस्यैव कालकृतं वैषम्यमाह–'अभिक्खण'मित्यादि, अभीक्ष्णं–पौनःपुन्येनाहारयन्ति, ये यतो महाशरीरास्ते तदपेक्षया शीघ्रशीघ्रतराहारग्रहणस्वभावा इत्यर्थः, अभीक्ष्णं उच्छ्वसन्ति अक्षीक्ष्णं निःश्वसन्ति, महाशरीरत्वेन दुःखिततरत्वादनवरतमुच्छ्वासादि कुर्व्वन्तीति भावः, 'तत्थ णं जे ते' इत्यादि, 'जे ते' इति इह ये इत्येतावतैवार्थसिद्धौ ये ते इति (यद्) उच्यते तद्भाषामात्रामेव, अल्पशरीरास्ते अल्पतरान् पुद्गलानाहारयन्ति, ये यतोऽल्पशरीररास्ते तदाहरणीयपुद्गलापेक्षया अल्पतरान् पुद्गलानाहारयन्ति, अल्पशरीररत्वादेवेति भावार्थः, 'आहच्च आहारयन्ति' इति कदाचिदाहारयन्ति कदाचिन्नहारयन्ति, महाशरीराहारग्रहणान्तरालोपेक्षया बहुतरकालान्तरतयेत्यर्थः 'आहच्च ऊससंति आहच्च नीससंति' एते हि अल्पशरीरत्वेनैव महाशसीरापेक्षया अल्पतरदुःखत्वादाहच्च–कदाचित् सान्तरमित्यर्थः, उच्छ्वासादि कुर्व्वन्तीति भावः, अथवा अपर्याप्तिकाले अल्पशरीराः सन्तो लोमाहारापेक्षया नाहारयन्ति उच्छ्वासापर्याप्तकत्वेन च नोच्छ्वसन्ति, अन्यदा त्वाहारयन्ति उच्छ्वसन्ति चेत्यत[आह]– 'आहच्च आहारयन्ति आहच्च ऊससंति'त्युक्तं। 'से एएणट्ठेणं'मित्यादि निगमनवाकयं सुगमं।

संप्रति समकर्मत्वाधिकारमाह–'नेरइयाण'मित्यादि 'पुव्वोववन्ना य पच्छोववन्ना य' इति पूर्व्व–प्रथमं उपपन्नाः पूर्व्वोत्पन्नाः त एव 'स्वार्थिकः क' इति कप्रत्ययविधानात् पूर्व्वोत्पन्नकाः, एवं पश्चादुत्पन्नकाः, तत्र पूर्व्वोत्पन्नपश्चादुत्पन्नानां मध्ये ये पूर्वोत्पन्नास्तैर्नकायुर्नकगत्यसातवेदनी-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यादिकं प्रभूतं निर्जीर्णमल्पं विद्यत इति अल्पकर्म्मतरकाः, इतरे तद्विपर्ययात् महाकर्म्मतरकाः, एतच्च समानस्थितिका ये नारकास्तानधिकृत्य प्रणीतमवसेयं, अन्यथा हि रत्नप्रभायां उत्कृष्टस्थितेर्नारकस्य बहुन्यायुषि क्षयनमिते पल्योपमावशेषे च तिष्ठति तस्यामेव रत्नप्रभायां दशवर्षसहस्रस्थितिर्नारकोऽन्यः कश्चिदुत्पन्नः स किं प्रागुत्पन्नं पल्योपमावशेषायुषं नारकमपेक्ष्य वक्तुं शक्यो यथा महाकर्म्मेति ?,

वर्णसूत्रे 'विशुद्धवर्णतरका' इति विशुद्धतरवर्णा इत्यर्थः कथमिति तचेद्, उच्यते, इह यस्मान्नैरयिकाणामप्रशस्तवर्णनामकर्म्मणोऽशुभस्तीव्रोऽनुभागोदयो भवापेक्षः, तथा चोक्तम्– "कालभवखेत्तवेक्खो उदओ सविवागअविवागो" नन्वायूंषि तत्र भवविपाकानि उक्तानि तत्कथमप्रशस्तवर्णनामकर्मण उदयो भवापेक्षो वर्ण्यते ?, सत्यमेतत्, तथाप्यसौ वर्णनामकर्मणोऽप्रशस्तस्योदयस्तीव्रानुभागो ध्रुवश्च भवापेक्षः पूर्व्वाचार्यैव्यवहतः, स पूर्वोत्पन्नैः प्रभूतो निर्जीर्णः स्तोकः शेषोऽवतिष्ठते, पुद्गलविपाकि च वर्णनाम, तेन पूर्व्वोत्पन्ना विशुद्धतरवर्णाः, पश्चादुत्पन्नैस्तु नाद्यापि प्रभूतो निर्जीर्ण इति ते अविशुद्धतरवर्णा;, एतदपि समानस्थितिरनैरयिकविषयमवसेयं, अन्यथा पूर्वोक्तरीत्या व्यभिचारसंभवात्, 'एवं जहेव वन्ने भणिया' इत्यादि, एवम्–उक्तेन प्रकारेण यथैव वर्णे भणितास्तथैव लेश्यास्वपि वक्तव्याच,

मू. (४४४) *नेरइया णं भंते ! सव्वे समकम्मा ?, गो० ! नो इणट्ठे समट्ठे, से केणट्ठेणं भंते एवं वुच्चइ ?–नेरइया नो सव्वे समकम्मा, गो० ! नेरइया दुविहा पन्नत्ता, तंजहा–पुव्वोववन्नगा य पच्छोववन्नगा य, तत्थ णं जे ते पुव्वोववन्नगा ते णं अप्पकम्मतरागा, तत्थ णं जे ते पच्छोववन्नगा ते णं महाकम्मतरागा, से तेणट्ठेणं गो० ! एवं वुच्चइ–नेरइया नो सव्वे समकम्मा ।*

नेरइया णं भंते ! सव्वे समवन्ना ?, गो० ! नो इणट्ठे समट्ठे, से केणट्ठेणं भंते ! नेरइया नो सव्वे समवन्ना ?, गो० ! नेरइया दुविहा पन्नत्ता, तंजहा–पुव्वोववन्नगा य पच्छोववन्नगा य, तत्थ णं जे ते पुव्वोववन्नगा ते णं विसुद्धवन्नतरागा, तत्थ णं जे ते पच्छोववन्नगा ते णं अविसुद्धवन्नतरागा, से एएणट्ठेणं गो० ! एवं वुच्चइ–नेरइया नो सव्वे समवन्ना ।

एवं जहेव वन्नेण भणिया तहेव लेसासु विसुद्धलेसतरागा अविसुद्धलेसतरागा य भाणियव्वा नेरइया णं भंते ! सव्वे समवेदणा ?, गो० ! नो इणट्ठे समट्ठे, से केण० एवं वुच्चति नेरइया नो सव्वे समवेयणा ?, गो० ! नेरइया दुविहा पन्नत्ता, तंजहा–सन्निभूया असन्निभूया य, तत्थ णं जे ते सन्निभूता ते णं महावेदणतरागा, तत्थ णं जे ते असन्निभूता ते णं अप्पवेदणतरागा, से तेणट्ठेणं गो० ! एवं वुच्चइ–नेरइया नो सव्वे समवेयणा

वृ. तद्यथा–'नेरइया णं भंते ! सव्वे समलेस्सा ?, गोयमा ! नो इणट्ठे समट्ठे' इत्यादि, सुगमं चैतत्, नवरं पूर्वोत्पन्ना विशुद्धलेश्याः यस्मात्पूर्व्वोत्पन्नैः प्रभूतान्यप्रशस्तलेश्याद्रव्याणि अनुभूय अनुभूय क्षयं नीतानि तस्मात्ते विशुद्धलेश्याः, इतरे पश्चादुत्पन्नतया विपर्यादाविशुद्धलेश्याः, एतदपि लेश्यासूत्रं समानस्थितिकनैरयिकापेक्षमवसेयं । समवेदनपदोपलक्षितार्थाधिकारप्रतिपादनार्थमाह–'नेरइया णं भंते !' इत्यादि, समवेदनाः–समानपीडाः 'सन्निभूया य' इति संज्ञिनः–संज्ञिपञ्चेन्द्रियाः सन्तो भूता–नारकत्वं गताः संज्ञि भूताः ते महावेदनाः, तीव्राशुभाध्यवसायेनाशुभतरकर्म्मबन्धनेन महानरकेषूत्पादात्, असंज्ञिनः–असंज्ञिपञ्चेन्द्रियाःसन्तो भूता

Jain Education International For Private & Personal Use Only www.jainelibrary.org

असंज्ञिभूताः, असंज्ञिनो हि चतसृष्वपि गतिषूत्पद्यन्ते, तद्योग्यायुर्बन्धसंभवात्, तथा चोक्तम्–

"कइविहे णं भंते ! असन्निआउए पन्नत्ते ?, गोयमा ! चउव्विहे असन्निआउए पन्नत्ते, तंजहा–नेरइयअसन्निआउए तिरिक्खजोणियअसन्निआउ मणुस्सजोणियअसन्निआउए देवअसन्निआउए" इति, तत्र देवेषु नैरयिकेषु च असंज्ञ्यायुषो जघन्यतः स्थितिर्दश वर्षसहस्राणि उत्कर्षतः "पल्योपमासङ्ख्येयभागः, तिर्यक्षु मनुष्येषु च जघन्यतोऽन्तर्मुहूर्त्त उत्कर्षतः पल्योपमासङ्ख्येयभागः, एवं चासंज्ञिनः सन्तो ये नरकेषूत्पद्यन्ते तेऽतितीव्राशुभाध्यवसायाभावात् रत्नप्रभायामनतितीव्रवेदनेषु नरकेषूत्पद्यन्ते अल्पस्थितिकाश्चेत्यल्पवेदनाः, अथवा संज्ञिभूताः– पर्याप्तकीभूतास्ते महावेदनाः, पर्याप्तत्वादेव, असंज्ञीनस्तु अल्पवेदनाः, अपर्याप्तया प्रायो वेदनाया असंभवात्,

यदिवा 'सन्निभूय' त्ति संज्ञा–सम्यग्दर्शनं सा एषामस्तीति संज्ञिनः संज्ञिनो भूताः–याता संज्ञिभूताः संज्ञित्वं प्राप्ता इत्यर्थः ते महावेदनाः, तेषां हि यथावस्थितं पूर्वकृतकर्म्मविपाकमनुस्मरतामहो महदुःखसंकटमिदमस्माकमापतितं न कृतो भगवदर्हत्प्रणीतः सकललदुःखक्षयंकरातिविषमविषयविषपरिभोगविप्रलुब्धचेतोभिर्धर्म्म इत्येवं महदुःखं मनस्युपजायते ततो महावेदनाः, असंज्ञिनस्तु मिथ्यादृष्टयः, ते तु स्वकृतकर्म्मफलमिदमित्येवं न जानते, अजानानाश्चानुपतप्तमानसा अल्पवेदना इति । अधुना 'समकिरिया' इत्यधिकारं विभावयिषुराह–

मू. (४४५) *नेरइया णं भंते ! सव्वे समकिरिया ? गो० ! नो इणट्ठे समट्ठे, से केणट्ठेणं भंते ! एवं वुच्चति ? नेरइया नो सव्वे समकिरिया, गो० ! नेरइया तिविहा पन्नत्ता, तंजहा–सम्मद्दिट्ठी मिच्छदिट्ठी सम्ममिच्छद्दिट्ठी, तत्थ णं जे ते सम्मद्दिट्ठी तेसि णं चत्तारि किरियाओ कज्जंति तंजहा–आरंभिया परिग्गहिया मायावत्तिया अपच्चक्खाणकिरिया, तत्थ णं जे ते मिच्छद्दिट्ठी जे सम्मामिच्छद्दिट्ठी तेसि णं नियताओ पञ्च किरियाओ कज्जंति, तंजहा–आरंभिया परिग्गहिया मायावत्तिया अपच्चक्खाणकिरिया मिच्छादंसणवत्तिया, से तेणट्ठेणं गो० ! एवं वुच्चइ–नेरइया नो सव्वे समकिरिया ।*

नेरइया णं भंते ! सव्वे समाउआ ? गो० ! नो इणट्ठे समट्ठे, से केणट्ठेणं भंते ! एवं वुच्चइ ?, गो० ! नेरइया चउव्विहा पन्नत्ता, तंजहा–अत्थेगतिया समाउआ समोववन्नगा अत्थेगतिया समाउया विसमोववन्नगा अत्थेगतिया विसमाउया समोववन्नगा अत्थेगतिया विसमाउया विसमोववन्नगा, से तेणट्ठेणं गो० ! एवं वुच्चइ–नेरइया नो सव्वे समाउया नो सव्वे समोववन्नगा

वृ. 'नेरइया णं भंते ! सव्वे समकिरिया' इत्यादि, समाः–तुल्याः क्रियाः–कर्म्मनिबन्धनभूता आरम्भिक्यादिका येषां ते समक्रियाः 'चत्तारि किरियाओ कज्जंति' इति क्रियन्ते इति कर्म्मकर्त्तरिप्रयोगः तेन भवन्तीत्यर्थः, आरम्भः–पृथिव्याद्युपमर्दनं स प्रयोजनं–कारणं यस्याः सा आरभिकी 'परिग्गहिय' त्ति परिग्रहो–धर्म्मोपकरणवर्जवस्तुस्वीकारः धर्म्मोपरकरणमूर्च्छा स च प्रयोजनं यस्याः सा पारिग्रहिकी 'मायावत्तिया' इति माया–अनार्जवमुपलक्षणत्वात्, क्रोधादिरपि स च प्रत्ययः–कारणं यस्याः सा मायाप्रत्यया,

'अपच्चक्खाणकिरिया' इति अप्रत्याख्यानेन निवृत्त्यभावेन क्रिया–कर्मबन्धकारणं अप्रत्याख्यानक्रियेति, 'नियइयाओ' इति नैयतिक्यो नियता इत्यर्थः अवश्यं भावित्वात्, सम्यगदृष्टीनां त्वनियताः, संयतादिषु व्यभिचारात्, 'मिच्छादंसणवत्तिय' त्ति मिथ्यादर्शनं प्रत्ययः–कारणं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यस्याः सा मिथ्यादर्शनप्रत्यया, ननु मिथ्यात्वाविरतिकषाययोगाः कर्म्मबन्धहेतव इति प्रसिद्धिः, इह तु आरम्भिक्यादयस्तेऽभिहता इति कथं न विरोधः ?, उच्यते, इहारम्भपरिग्रहशब्दाभ्यां योगः परिगृहीतो, योगानां तद्रूपत्वात्, शेषपदैस्तु शेषा बन्धहेतव इत्यदोषः,

'सव्वे समाउआ' इत्यादेः प्रश्नस्य या निर्वचनचतुर्भङ्गी तद्भावना क्रियते–निबद्धदशवर्षसहस्रप्रमाणायुषो युगपच्चोत्पन्ना इति प्रथमो भङ्गः, तेषु एव दशवर्षसहस्रस्थितिषु नरकेषु एके प्रथमतरमुत्पन्नाः अपरे पश्चादिति द्वितीयः,अन्यैर्विषममायुर्निबद्धं कैश्चिद्दशवर्षसहस्रस्थितिषु कैश्चिच्च पञ्चदशवर्षसहस्रस्थितिषु उत्पत्तिः पुनर्युगपदिति तृतीयः, केचित् सागरोपमस्थितयः केचित्तु दशवर्षसहस्रस्थितय इत्येवं विषमायुषो विषममेव चोत्पन्ना इति चतुर्थः ॥

सम्प्रति असुरकुमारादिषु आहारादिपदनवकं विभावयिषुरिदमाह–

मू. (४४६) *असुरकुमारा णं भंते ! सव्वे समाहारा एवं सव्वेवि पुच्छा ?, गो० ! नो इणट्ठे समट्ठे, से केणट्ठेणं भंते ! एवं वुच्चइ–जहा नेरइया । असुरकुमारा णं भंते ! सव्वे समकम्मा ?, गो० ! नो इणट्ठे समट्ठे, से केण० एवं वुच्चइ ?, गो० ! असुरकुमारा दुविहा पन्नत्ता, तंजहा–पुव्वोववन्नगाय पच्छोववन्नगा य, तत्थ णं जे ते पुव्वो० ते णं महाकम्म० तत्थ णं जे ते पच्छोववन्नगा ते णं अप्पक०, से तेणट्ठेणं गो० ! एवं वुच्चति–*

असुरकुमारा नो सव्वे समकम्मा एवं वन्नलेस्साए पुच्छा, तत्थ णं जे ते पुव्वोववन्ना ते णं अविसुद्धवन्नतरागा तत्थ णं जे ते पच्छोववन्नगा ते णं विसुद्धवन्नतरागा से तेणट्ठेणं गो० ! एवं वुच्चइ–असुरकुमारा णं सव्वे नो समवन्ना, एवं लेस्साएवि, वेयणाए जहा नेरइया, अवसेसं जहा नेरइयाणं, एवं जाव थणियकुमारा ॥

वृ. 'असुरकुमारा णं भंते ! सव्वे समाहार' इत्यादि, तत्रास्मिन् सूत्रे नारकसूत्रसमानेऽपि भावना विशेषेण लिख्यते असुरकुमाराणमल्पशरीरत्वं भवधारणीयशरीरापेक्षया जघन्यतोऽङ्गुलासङ्ख्येयबागमानत्वं महाशरीरत्वं उत्कर्षतः सप्तहस्तप्रमाणत्वं, उत्तरवैक्रियापेक्षया तुं अल्पशरीरत्वं जघन्यतोऽङ्गुलसङ्ख्येयभागमानत्वं उत्कर्षतो महाशरीरत्वं योजनलक्षमानत्वमिति, तत्रैते महाशरीरा बहुतरान् पुद्गलानाहारयन्ति, मनोभक्षणलक्षणाहारापेक्षया, तेषां हि असौ संभवति प्रधानश्च, प्रधानापेक्षया च शास्त्रे निर्द्देशो वस्तूनां, ततोऽल्पशरीरग्राह्याहारपुद्गलापेक्षया ये पुद्गला बहुतरास्ते तानाहारयन्ति, बहुतरान्परिणामयन्तीत्यादिपदत्रयव्याख्यानं प्राग्वत्, तथाऽभीक्ष्णमाहारयन्ति अभीक्ष्णमुच्छ्वसन्ति, अत्रने चतुर्थादिरुपर्याहारयन्ति स्तोकसप्तकादेश्चोपर्युच्छ्वसन्ति तानाश्रित्याभीक्ष्णमुच्यते, ये सातिरेकवर्षसहस्रस्योपर्याहारयन्ति सातिरेकपक्षस्य चोपर्युच्छ्वसन्ति तानङ्गीकृत्यैतेषामल्पकालीनाहारोच्छ्वसत्वेन पुनः पुनराहारयन्तीत्यादिव्यपदेशविषयत्वात्, तथाऽल्पशरीरा अल्पतरान्पुद्गलानाहारयन्ति उच्छ्वसन्ति च अल्पशरीरत्वादेव,

यत्पुनस्तेषां कादाचित्कत्वामाहारोच्छ्वासयोस्तन्महाशरीराहारोच्छ्वासान्तरालापेक्षया बहुतरमान्तरालत्वात्, तत्र हि अन्तराले ते आहारादि न कुर्वन्ति तदन्यत्र ते कुर्व्वन्तीत्येवंविवक्षणान्महाशरीराणमप्याहारोच्छ्वासयोरन्तरामस्तिकिं तु तदल्पमित्यविवक्षितत्वादभीक्ष्णमित्युक्तं, सिद्धं च महाशरीराणां तेषामाहारोच्छ्वासयोरल्पान्तरत्वं, अल्पशरीराणां तु महान्तरत्वं, यथा सौधर्मादि-देवानां सप्तहस्तमानतया महाशरीराणां तयोरन्तरं वर्षसहस्रद्वयं पक्षद्वयं च अनुत्तरसुराणां

Jain Education International For Private & Personal Use Only www.jainelibrary.org

च हस्तमानतयाऽल्पशरीराणां त्रयस्त्रिंशद्वर्षसहस्राणि त्रस्त्रिंशदेव च पक्षा इति, एषां च महाशरीराणामभीक्ष्णाहारोच्छ्वासभिधानेनाल्पस्थितिकत्वमवसीयते इतरेषां तु विपर्ययः वैमानिकवदेवेति, अथवा लोमाहारापेक्षयाऽभीक्ष्णम्-अनुसमयमाहारयन्ति महाशरीराः पर्याप्तकावस्थायां उच्छ्वासस्तु यथोक्तमनानेनापि भवन् परिपूर्णभवापेक्षया पुनः पुनरित्युच्यते, अपर्याप्तकावस्थायां त्वल्पशरीरा लोमाहारतो नाहारयन्ति ओजाहारत एवाहरणात् ततस्ते कदाचिदाहारयन्तीत्युच्यते, अपर्याप्तकावस्थायां च नोच्छ्वसन्ति अन्यथा तूच्छ्वसन्ति तत उच्यते आहच्चोच्छ्व सन्तीति ॥

कर्म्मसूत्रमाह-'असुरकुमारा णं भंते! सव्वे समकम्मा' इत्यादि, अत्र नैरयिकसूत्रापेक्षया विपर्यासः नैरयिका हि पूर्व्वोत्पन्ना अल्पकर्म्माण उक्ता इतरे तु महाकर्म्माणः असुरकुमारास्तु ये पूर्व्वोत्पन्नास्ते महाकर्म्माणः इतरेऽल्पकर्म्मणः, कथमिति चेद्, उच्यते, इहासुरकुमाराः स्वभवादुध्धृतास्तिर्यक्षूत्पद्यन्ते मनुष्येषु च, तिर्यक्षूत्पद्यमानाः केचिदेकेन्द्रियेषु पृथिव्यब्वनस्पतिषूत्पद्यन्ते केचित् पञ्चेन्द्रियेषु, मनुष्येष्वपि चोत्पद्यमानाः कर्म्मभूमिकगर्भव्युत्क्रान्तिकमनुष्येषूत्पद्यन्ते न शेषेषु षण्मासावशषायुषश्च सन्तः पारभविकमायुर्बध्नन्ति, पारभविकायुर्बन्धकाले च या एकान्ततिर्यग्योनिकयोग्या एकान्तमनुष्ययोग्या वा प्रकृतयस्ता उपचिन्वन्ति, ततः पूर्व्वोत्पन्नामहाकर्म्मतराः, ये तु पश्चादुत्पन्नास्ते नाद्यापि पारभविकमायुर्बनध्नन्ति नापि तिर्यग्मनुष्ययोग्याः प्रकृतीरुपचिन्वन्ति ततस्तेऽल्पकर्म्मतराः, एतदपि सूत्रं समानस्थितिकसमानभवपरिमितासुरकुमारविषयमवसेयं, पूर्व्वोत्पन्नका अपि बद्धपारभविकायु,ः पश्चादुत्पन्ना अपि अबद्धपारभविकायुषः स्तोककालन्तरिता ग्राह्याः, अन्यथा तिर्यग्मनुष्ययोग्यप्रकृतिबन्धेऽपि पूर्व्वोत्पन्नकात् पश्चादुत्पन्न उत्कृष्टस्थितिकोऽभिनवोत्पन्नोऽनन्तसंसारिकश्च महाकर्ममतर एव भवति ।

'वर्णसूत्रे ये ते पूर्वोत्पन्नकास्ते अविशुद्धवर्णतराः, कथमिति चेदुच्यते-एतेषां हि भवापेक्षः प्रशस्तवर्णनाम्नः शुभस्तीव्रानुभाग उदयः, स च पूर्व्वोत्पन्नानां प्रभूतः क्षयमुपगत इति ते अविशुद्धतरवर्णाः, इतरे तु पश्चादुत्पन्नतया नाद्यापि प्रभूतो निर्जीर्ण इति विशुद्धवर्णाः, एतच्च समानस्थितिकासुरकुमारविषयं सूत्रं, 'एवं लेस्साएऽवी' ति एवं वर्णसूत्रवत् लेश्यासूत्रमपि वक्तव्यं, पूर्व्वोत्पन्नाः अविशुद्धलेश्या वक्तव्याः पश्चादुत्पन्ना विशुद्धलेश्या इति भावः, काऽत्र भावनेति चेदुच्यते-इह देवानां नैरयिकाणां च तथाभवस्वाभाव्यात् लेश्यापरिणाम उपपातसमयात्, प्रभृत्याभवक्षयाद् भवति, यतो वक्ष्यति तृतीये लेश्योद्देशके-'से नूनं भंते! कण्हलेसे नेरइए कण्हलेसेसु नेरइएसु उववज्जइ कण्हलेसे उवट्टइ ?, जल्लेसे उववज्झइ तल्लेसे उवट्टइ ?' इति, अस्यायं बावार्थः-पञ्चेन्द्रियतिर्यग्योनिको मनुष्यो वा नरकेषूत्पद्यमानो यथाक्रमं तिर्यगायुषि मनुष्यायुषि वा क्षीणे नैरयिकाषुः संवेदयमान ऋजुसूत्रनयदर्शनिन विग्रहेऽपि वर्तमानो नारक एव लक्ष्यते तस्य च कृष्णादिलेश्योदयः पूर्वभवायुषि अन्तर्मुहूर्त्तावशेषशायुष्के एव वर्त्तमानस्य भवति, तथा चोक्तम्-

॥१॥ "अन्तमुहुत्तम्मि गए अन्तमुहुत्तम्मि सेसए चेव ।
लेस्साहि परिणयाहिं जीवा वच्चंति परलोयं ॥"

एवं देवेष्वपि भावनीयं, तथा लेश्याध्ययने नेरयिकादिषु कृष्णादिलेश्यानां जघन्योत्कृष्टा च स्थितिरियमुक्ता-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

॥ १ ॥ "दस वाससहस्साइं काऊए ठिई जहन्निया होइ।
उक्कोसा तिन्नुदही पलियस्स असंखभागं च ॥
॥ २ ॥ नीलाए जहन्नठिई तिन्नुदहि असंखभाग पलियं च
दस उदही उक्कोसा पलियस्स असंखभागं च ॥
॥ ३ ॥ कण्हाए जहन्नठिई दस उदही असंखभाग पलियं च।
तित्तीससागराइं मुहुत्तअहियाइं उक्कोसा ॥
॥ ४ ॥ एसा नेरइयाणं लेसाण ठिई उ वन्निया इणमो।
तेण परं वोच्छामि तिरियाण मणुस्सदेवाणं ॥
॥ ५ ॥ अंतोमुहुत्तमद्धा लेसाण ठिई जहिं जहिं जा उ।
तिरियाण नराणं वा वज्जित्ता केवलं लेसं ॥"

अस्या अक्षरगमनिका–अन्तर्मुहूर्त्तं कालं यावत् लेश्यानां स्थितिर्जघन्योत्कृष्टा च भवति, कासामित्याह–'जहिं जहिं जा उ' यस्मिनन् यस्मिन्–पृथिवीकायिकादौ संमूर्च्छिममनुष्यादौ च याः–कृष्णाद्या लेश्यास्तासां, एता हि क्वचित् काश्चिद् भवन्ति, पृथिव्यब्वनस्पतीनां कृष्णनीलकापोततेजोरूपाश्चतस्र लेश्याः, तेजोवायुद्वित्रिचतुरिन्द्रियसंमूर्चअछिमतिर्यक्पञ्चे-न्द्रियमनुष्याणां कृष्णनीलकापोतरूपास्तिस्रः, गर्भजतिर्यक्पञ्चेन्द्रियाणां गर्भजमनुष्याणां च षडपीति, नन्वेवं शुक्ललेश्याया अपि अन्तर्मुहूर्तमेव स्थितिः प्राप्नोतीत्याशङ्कायामुक्तं–वर्जयित्वा केवलां शुद्धलेश्यां–शुक्ललेश्यामिति भावः, तस्या इयं स्थितिः

॥ १ ॥ "मुहुत्तद्धं तु जहन्ना उक्कोसा होइ पुव्वोडी उ।
नवहिं वरिसेहिं ऊणा नायव्वा सुक्कलेस्साए ॥
॥ २ ॥ एसा तिरियनराणं लेसाणं ठिई उ वन्निया होइ।
तेण परं वोच्छामि लेसाण ठिई उ देवाणं ॥
॥ ३ ॥ दस वाससहस्साइं कण्हाइ ठिई जहन्निया होइ।
पल्लासंखियभागो उक्कोसा होइ नायव्वा ॥
॥ ४ ॥ जा कण्हाइ ठिई खलु उक्कोसा चेव समयमब्भहिया।
नीलाइ जहन्नेणं पलियासंखं च उक्कोसा ॥
॥ ५ ॥ जा नीलाइ ठिई खलु उक्कोसा चेव समयमब्भहिया।
काऊइ जहन्नेणं पलियासंखं च उक्कोसा ॥
॥ ६ ॥ तेण परं वोच्छामि तेउल्लेससं जहा सुरगणाणं।
भवणवइवाणमंतरजोइसवेमाणियाणं च ॥
॥ ७ ॥ दस वाससहस्साइं तेऊए ठिई जहन्निया होइ।
उक्कोसा दो उदही पलियस्स असंखभागं च ॥
॥ ८ ॥ जा तेऊइ ठिई खलु उक्कोसा चेव समयमब्भहिया।
पम्हाइ जहन्नेणं दसमुहुत्तहियाइं उक्कोसा ॥"

दश सागरोपमाण्यन्तर्मुहूर्त्ताभ्यधिकान्युत्कृष्टेतिभावः, अन्तर्मुहूर्त्तं चाभ्यधिकं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यत्प्राग्भवभाव्यन्तर्मुहूर्तं यच्चोत्तरभवभावि तद्द्वयमप्येकं विवक्षित्वोक्तं, देवनैरयिकाणां हि स्वस्वलेश्या प्रागुत्तरभावन्तर्मुहूर्तद्वयनिजायुःकालप्रमाणावस्थाना भवति, तथा।

॥१॥ "जा पम्हाइ ठिई खलु उक्कोसा चेव समयमब्भहिया।
सुक्काए जहन्नेणं तेत्तीसुक्कोस[मुहुत्त] मब्भहिया॥" इति

ततोऽस्माल्लेश्यास्थितिपरिमाणात् प्रागुक्ताच्च तृतीयेलेश्योद्देशवक्ष्यमाणसूत्राद-वसीयते–देवानां नैरयिकाणां च लेश्याद्रव्यपरिणाम उपपातसमयादारभ्याभवक्षयात् भवति इति पूर्व्वोत्पन्नैश्चासुरकुमारैः प्रभूतानि तीव्रानुभागानि लेश्याद्रव्याणि अनुभूयानुभूय क्षयं नीतानि स्तोकानि मन्दानुभावान्यवतिष्ठन्ते ततस्ते पूर्व्वत्पन्ना अविशुद्धलेश्याः पश्चादुत्पन्नास्तु तद्विपर्ययाद्विशुद्धलेश्याः

'वेयणाए जहा नेरइया' इति वेदनायां यथा नैरयिका उक्तास्तथा वक्तव्याः, तत्राप्य-संज्ञीनोऽपि लभ्यमानत्वात्, तत्र यद्यपि वेदनासूत्रं पाठतो नारकाणामिवासुरकुमाराणमपि तथापि भावनायां विशेषः, स चायं–ये संज्ञीभूतास्ते सम्यग्दृष्टित्वात् महावेदनाः चारित्रविराधनाजन्यचित्त-सन्तापात्, इतरे तु असंज्ञीभूता मिथ्यादृष्टित्वादल्पवेदना इति, 'अवसेसं जहा नेरइयाणं'ति अवशेषं क्रियासूत्रमायुः सूत्रं च यथा नैरयिकाणां तथा वक्तव्यं, एतच्च सुगमत्वात् स्वयं परिभावनीयं 'एव'मित्यादि, एवमसुरकुमारोक्तेन प्रमाणेन नागकुमारादयोऽपि तावद्वक्तव्याः यावत्स्तनि-तकुमाराः॥

मू. (४४७) *पुढविकाइया आहारकम्मवन्नलेस्साहिं जहा नेरइया, पुढविकाइया सव्वे समवेयणा [प०] ?, हंता गो० ! सव्वे समवेदणा, से केणट्ठेणं ?, गो० ! पुढविकाइया सव्वे असन्नी असन्निभूयं अनिययं वेयणं वेयंति, से तेणट्ठेणं गो० ! पुढविकाइया सव्वे समवेदणा।*

पुढविकाइया णं भंते ! सव्वे समकिरिया ?, हंता गो० ! पुढविकाइया सव्वे समकिरिया, से केणट्ठेणं ?, गो० ! पुढविकाइया सव्वे माइमिच्छादिट्ठी तेसिं नियइयाओ पंच किरियाओ कज्जंति, तं०–आरंभिया परिग्गहिया मायावत्तिया अप्पच्चक्खाणकिरिया मिच्छादंसणवत्तिया य, से तेणट्ठेणं गो० १ एवं०, जाव चउरिंदिया, पंचेंदियतिरिक्खजोणिया जहा नेरइया नवरं किरियाहिं सम्मद्दिट्ठी मिच्छद्दिट्ठी सम्मामिच्छद्दिट्ठी,

तत्थ णं जे ते सम्मद्दिट्ठी ते दुविहा पन्नता, तंजहा– असंजता य संजयासंजता य, तत्थ णं जे ते संजयासंजया तेसिं णं तिन्नि किरियाओ कज्जंति, तं०–पआरं० परि० माया०, तत्थ णं जे अस्संजता तेसि णं चत्तारि किरिया कज्जंति, तं०–आरं० परि० माया० अपच्च०, तत्थ णं जे ते मिच्छादिट्ठी जे य सम्मामिच्छदिट्ठी तेसि णं नियइयाओ पंच किरि० कज्जंति, तं०–आरंभि० परि० माया० अपच्च० मिच्छा०, सेसं तं चेव।

वृ. 'पुढविकाइया' इत्यादि, पृथिवीकायिका आहारकर्मवर्णलेश्याभिर्यथा नैरयिका उक्तास्तथा वाच्याः, पृथिवीकायिकानामाहारादिविषयाणि चत्वारि सूत्राणि नैरयिकसूत्राणीव पृथिवीकायिकाभिलापेनाभिधातव्यानीति भावः, केवलमाहारसूत्रे भावनैवं–पृथिवीकायिका-नामङ्गुलासङ्ख्येयभागमात्रशरीरत्वेऽप्यल्पशरीरत्वमहाशरीरत्वे आगमवचनादवसेये, स चायमागमः– "पुढविकाइए पुढविकाइयस्स ओगाहणट्ठयाए चउट्ठाणवडिए" इत्यादि, तत्र महाश-रीरा लोमाहारतो बहुतरान् पुद्गलानाहारयनत्युच्छ्वसन्ति च अभीक्ष्णमाहारयन्त्यभीक्ष्णं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चोच्छ्वसन्ति, महाशरीरत्वादेव, अल्पशरीराणामल्पाहारोच्छ्वसत्वं अल्पशरीरत्वादेव, कादाचित्कत्वं चाहारोच्छ्वासयोः पर्याप्तेतरावस्थापेक्षमिति । वेदनासूत्रमाह–

'पुढविकाइया णं भंते ! सव्वे समवेयणा' इत्यादि, असन्नीति–मिथ्यादृष्टयोऽमनस्का वा 'असन्निभूयं'ति असंज्ञीभूता असंज्ञीनां वा जायते तामित्यर्थः, एतदेव व्यनक्ति–'अनिययं'ति अनियताम्–अनिर्धारितां वेदयन्ते, वेदनामनुभवन्तोऽपि न पूर्व्वोपात्ताशुभकर्मण- परिणतिरियमित्यवगच्छन्ति, मिथ्यादृष्टित्वादमनस्कत्वाद्वा मत्तमूर्च्छितादिवदितिभावः, क्रियासूत्रे 'माइमिच्छद्दिट्ठि'त्ति मायावन्तो हि तेषु प्रायेणोत्पद्यन्ते, यदाह शिवशर्म्माचार्यः–

॥ १ ॥ "उम्मग्गदेसओ मग्गनासवो गूढहियय माइल्लो ।
सढसीलो य ससल्लो तिरियाउं बंधई जीवो ॥"

ततस्ते मायिन उच्यन्ते, अथवा माया इह समस्तानन्तानुबन्धिकषायोपलक्षणं ततो मायिन इति किमुक्तं भवति ? –अनन्तानुबन्धिकषायोदयवन्तः अत एव मिथ्यादृष्टयः, 'ताणं नियइयाओ' इति तेषां–पृथिवीकायिकानां नैयतिक्यो–नियताः पञ्चैव न तु त्रिप्रभृतय इत्यर्थः 'से एएणट्ठेण'मित्यादि, निगमनं 'जाव चउरिंदिया' इति इह महाशरीरत्वाल्पशरीरत्वे स्वस्वावगाहनानुसारेणावसेये, आहारश्तच द्वीन्द्रियादीनां प्रक्षेपलक्षणोऽपीति,

'पंचिंदियतिरिक्खजोणिया जहा नेरइया' इति प्रतीतं, नवरमिह महाशरीरा अभीक्ष्णमाहारयन्ति अभीक्ष्णमुच्छ्वसन्तीति यदुच्यते तत्सङ्ख्यातवर्षायुषोऽपेक्ष्य तथैव दर्शात्, नासङ्ख्यातवर्षायुषः, तेषां प्रक्षेपाहारस्य षष्ठस्योपरि प्रतिपादितत्वात्, अल्पशरीराणां त्वाहारोच्छ्वासयोर्यत् कादाचित्कत्वं तदपर्याप्तावस्थायां लोमाहारोच्छ्वासयोरभवनेन पर्याप्तावस्थायां तद्भवनेन चावसेयं, कर्म्मसूत्रे यत्पूर्व्वोत्पन्नानामल्पकर्म्मत्वं इतरेषां तु महाकर्म्मत्वं तदायुष्कादितद्भवेवद्यकर्म्मापेक्षं, वर्णलेश्यासूत्रयोरपि यत्पूर्व्वोत्पन्नानां शुभवर्णाद्युक्तं तत्तारुणन्यात् पश्चादुत्पन्नानां चाशुद्धवर्णादि बाल्यादवसेयं, लोके तथादर्शनादिति, तथा 'संजयासंजया' इति देशविरताः स्थूलात् प्राणातिपातादेर्निवृत्तत्वात् इतरस्मादनिवृत्तत्वात् ॥

मनुष्यविषयं सूत्रमाह–

मू. (४४८) मणुस्सा णं भंते ! सव्वे समाहारा ?, गो० ! नो इणट्ठे समट्ठे, से केण० ?, गो० ! मणुस्सा दुविहा पं०, तं०–महासरीरा य अप्पसरीरा य, तत्थ णं जे ते महासरीरा ते णं बहुतराए पोग्गले आहारेंति जाव बहुतराए पोग्गले नीससंति आहच्च आहारेंति आहच्च नीससंति तत्थ णं जे ते अप्पसरीरा ते णं अप्पतराए पोग्गले आहारेंति जाव अप्पतराए पोग्गले नीससंति अभिक्खणं आहारेतिं जाव अभिक्खणं नीससंति, से तेणट्ठेणं गो० ! एवं वुच्चति–मणुस्सा सव्वे नो समाहारा,

सेसं जहा नेरइयाणं, नवरं किरियाहिं मणूसा तिविहा पन्नत्ता, तंजहा–सम्मदिट्ठी मिच्छादिट्ठी सम्मामिच्छद्दिट्ठी, तत्थ णं जे ते सममदिट्ठी ते तिविहा पन्नत्ता, तंजहा–संयता असंयता संयतासंयता,

तत्थ णं जे ते संयता ते दु० पं०, तं–सरागसंयता वीयरागसंयता य, तत्थ णं जे ते वीयरागसंयता ते णं अकिरिया, तत्थ णं जे ते सरागसंयता ते दु० पं०, तं०–पमत्तसंयता य अपमत्तसंयता य, तत्थ णं जे ते अपमत्तसंजया तेसिं एगा मायावत्तिया किरिया कज्जति, तत्थ णं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जे ते पमत्तसंजया तेसिं दो किरियाओ कज्रंति–आरंभिया मायावत्तिया य,

तत्थ णं जे ते संजयासंजया तेसिं तिन्नि किरियाओ कज्रंति तं–आरंभिया परिग्गहिया मायावत्तिया, तत्थ णं जे ते अस्संजया तेसिं चत्तारि किरियाओ कज्रंति, तंजहा–आरंभिया परिग्गहिया मायावत्तिया अपच्चक्खाणकिरिया, तत्थ णं जे ते मिच्छदिट्ठी जे सम्मामिच्छदिट्ठी तेसिं नियइयाओ पंच किरियाओ कज्रंति, तंजहा–आरंभिया परिग्गहिया मायावत्तिया अपच्चक्खाणकिरिया मिच्छादंसणवत्तिया, सेसं जहा नेरइयाणं ।।

वृ. 'मणुस्सा णं भंते ! सव्वे समाहारा' इत्यादि, सुगमं नवरं 'आहच्च आहारेंति आहच्च ऊससंति आहच्च नीससंति' इति, महाशरीरा हि मनुष्या देवकुर्व्वादिमिथुनकास्ते च कदाचिदेवाहारयन्ति कावलिकाहारेण "अट्ठमभत्तस्स आहारो" इति वचनात् उच्छवासनिःश्वासावपि तेषां शेषमनुष्यापेक्षया अतिसुखत्वात् कादाचित्कौ, अल्पशरीरास्त्वभीक्ष्णमलपं चाहारयन्ति, बालानां तथादर्शनात्, संमूर्चछिममनुष्याणामल्पशरीराणामनवरतमाहारसंभवाच्चा, उच्छ्वासनिःश्वासावप्यल्पशरीराणामभीक्ष्णं प्रायो दुःखबहुलत्वात्,

'सेसं जहा नेरइयाण'मिति शेषं–कर्मवर्णादिविषयं सूत्रं यथा नैरयिकाणां तथाऽवसेयं, नवरमिह पूर्व्वोत्पन्नानां शुद्धवर्णादित्वं तारुण्याद् भावनीयं, क्रियासूत्रे विशेषमाह–नवरं 'किरियाहिं मणुया तिविहा' इत्यादि, तत्र सरागसंयता–अक्षीणानुपशान्तकषायावीतरागसंयता–उपशान्तकषायाः क्षीणकषायाश्च 'अकिरिया' इति वातरागत्वेनारम्भादीनां क्रियाणामभावात्

'एगा मायावत्तिया' इति अप्रमत्तसंयतानामेकैव मायाप्रत्यया क्रिया 'कज्रइ'त्ति क्रियते भवति, कदाचिदुड्डाहरक्षणप्रवृत्तानाम्, अक्षीणकषायत्वात्, 'आरंभिया मायावत्तिया' इति प्रमत्तसंयतानां हि सर्वः प्रमत्तयोग आरम्भ इति भवत्यारम्भिकी क्रिया अक्षीणकषायत्वाच्च मायाप्रत्ययेति,

'सेसं जहा नेरइयाण'मिति शेषमायुर्विषयं सूत्रं यथा नैरयिकाणां तथा वक्तव्यं, तच्च सुगमत्वात् स्वयं भावनीयं ।

मू. (४४९) *वाणमंतराणं जहा असुरकुमाराणं, एवं जोइसियवेमाणियाणवि, नवरं ते वेदनाए दु० पं० तं०–माइमिच्छदिट्ठीउववन्नगा य अमाइसम्मदिट्ठीउववन्नगा य,*

तत्थ णं जे ते माईमिच्छदिट्ठीउववन्नगा ते णं अप्पवेदनतरागा तत्थ णं जे ते अमाईसम्मदिट्ठीउववन्नगा ते णं महावेदनतरागा, से तेण० गो० ! एवं वु०, सेसं तहेव ।

वृ. 'वाणमन्तराणं जहा असुरकुमाराण'मित्यादि, यथा असुरकुमारा 'सन्निभूया य असन्निभूया य, तत्थ णं जे सन्निभूया ते महावेयणा असन्निभूया अप्पवेयणा' इत्येवमधीता व्यन्तरा अपि तथैवाध्येतव्याः, यतोऽसुरादिषु व्यन्तरान्तेषु देवेष्वसंज्ञीन उत्पद्यन्ते, तथा चोक्तं व्याख्याप्रज्ञप्तौ प्रथमशतै द्वितीयोद्देशके–"असन्नी णं जहन्नेणं भवणवासीसु उक्कोसेणं वाणमंतरेसु" इति

ते चासुरकुमारप्रकरणोक्तयुक्तेरल्पवेदना भवन्तीत्यवसेयं, यत्तु प्राग् व्याख्यानं कृतं संज्ञीनः सम्यग्दष्टयोऽसंज्ञीनस्त्वितरे इति, तदेवमपि घटते इति वृद्धव्याख्यानुसरणतः कृतमित्यदोषः 'एव' मित्यादि, एवमसुरकुमारोक्तप्रकारेण ज्योतिष्कवैमानिकानामपि वक्तव्यं, नवरं ते वेदनायामेनवमध्येतव्या–

'दुविहा जोइसिया पन्नत्ता, तंजहा–मायिमिच्छदिट्ठीउववन्नगा य' इत्यादि, अथ

Jain Education International   For Private & Personal Use Only   www.jainelibrary.org

कस्मादेवमधीयते यावता असुरकुमारवत् 'असन्निभूया य' इति किन्नाधीयते ?, उच्यते, तेष्वसंज्ञीन उत्पादाभावात्, एतदपि कथमवसेयं इति चेत् ?, उच्यते, युक्तिवशात्, तथाहि-

असंज्ञ्यायुष उत्कृष्टा स्थितिः पल्योपमासङ्ख्येयभागः ज्योतिष्काणां च जघन्यापि स्थितिः पल्योपमसङ्ख्येयभागः, वैमानिकानां पल्योपमं, ततोऽवसीयते नास्ति तेष्वसंज्ञी, तदभावाच्चोपदर्शितप्रकारेणैवाध्येतव्या नासुरकुमारोक्तप्रकारेणेति, तत्र मायिमिथ्यादृष्टयोऽल्पवेद- ना इतरे महावेदनाः शुवेदनामाश्रित्येति ।

अथ चतुर्विंशतिदण्डकमेव सलेश्यपदविशेषितमाहारादिपदैर्निरूपयति-

मू. (४५०) सलेसा णं भंते ! नेरइया सव्वे समाहारा समसरीरा समुस्सासनिस्सासा सव्वेवि पुच्छा, गो० ! एवं जहा ओहिगमओ तहा सलेसागमओवि निरवसेसो भाणियव्वो जाव वेमाणिया

कण्हलेसा णं भंते ! नेरइया सव्वे समाहारा पुच्छा, गो० जहा ओहिया, नवरं नेरइया वेयणाए माइमिच्छदिट्ठीउववन्नगा य अमाइसम्मदिट्ठीउववन्नगा य भाणियव्वा, सेसं तहेव जहा ओहियाणं, असुरकुमारा जाव वाणमंतरा, एते जहा ओहिया, नवरं मणुस्साणं किरियाहिं विसेसो जाव तत्थ णं जे ते सम्मदिट्ठी ते तिविहा पन्नत्ता, तंजहा-संजया अस्संजया संजयासंजया य, जहा ओहियाणं, जोइसियवेमाणिया आइल्लियासु तिसु लेसासु ण पुच्छज्जंति, एवं जहा किण्हलेसा विचारिया तहा नीललेस्सा विचारेयव्वा, काउलेसा नेरइएहिंतो आरब्भ जाव वाणमंतरा, नवरं काउलेस्सा नेरइया वेदणाए जहा ओहिया ।

तेउलेसा णं भंते ! असुरकुमाराणं ताओ चेव पुच्छाओ, गो० ! जहेव ओहिया तहेव नवरं वेयणाए जहा जोइसिया, पुढविआउवणस्सइपंचेंदियतिरिक्खमणुस्सा जहा ओहिया तहेव भाणियव्वा, नवरं मणूसा किरियाहिं जे संजता ते पमत्ता य अपमत्ता य भाणियव्वा सरागवीयरागा नत्थि, वाणमंतरा तेउलेसाए जहा असुरकुमारा एवं जोइसियवेमाणियावि, सेसं तं चेव,

एवं पम्हलेसावि भाणियव्वा, नवरं जेसिं अत्थि, सुक्कलेस्सावि तहेव जेसिं अत्थि, सव्वं तहेव जहा ओहियाणं गमओ, नवरं पम्हलेस्ससुक्कलेस्साओ पंचेंदियतिरिक्खजोणियमणूसवेमाणियाणं चेव, न सेसाणंति । पन्नवणाए भगवईए लेस्साए पढमो उद्देसओ समत्तो ।

वृ. 'सलेसा णं भंते ! नेरइया' इत्यादि, यथा अनन्तरमौधिको-विशेषणरहितः प्राक् गम उक्तस्तथा सलेश्यगमोऽपि निरवशेषो वक्तव्यः यावद्वैमानिकाः-वैमानिकविषयं सूत्रं, सलेश्यपदरूपविशेषणमन्तरेणान्यस्य विशेषणस्य क्वचिदप्यभावात् ।।

अधुना लेश्याभेदकृष्णादिविशेषितान् षड् दण्डाकानाहारादिपदैर्बिभणिषुराह-'कण्हलेसा णं भंते ! नेरइया' इत्यादि, यथा औघिका-विशेषणरहिताः आहारशरीरोच्छ्वासकर्म्मवर्णलेश्या-वेदनाक्रियोपपाताख्यैर्नवभिः पदैः प्राग्नैरयिका उक्तास्तथा कृष्णलेश्याविशेषिता अपि वक्तव्याः, नवरं वेदनापदे नैरयिका एवं वक्तव्याः-'माइमिच्छदिट्ठी उववन्नगा य अमायिसम्मदिट्ठीउववन्नगा य' इति, न चौधिकसूत्रे इव 'सन्निभूया य' इति, कस्मादिति चेद्, उच्यते, इहासंज्ञीनः प्रथमपृथिव्यामेवोत्पद्यन्ते

"अस्सन्नी खलु पढम" मिति वचनात्, प्रथमायां च पृथिव्यां न कृष्णलेश्या यत्र च पञ्चम्यादिषु पृथिवीषु कृष्णलेश्या न तत्रासंज्ञीन इति, तत्र मायिनो मिथ्यादृष्टयश्च महावेदना भवन्ति, यतः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रकर्षपर्यन्तवर्त्तिनीं स्थितिमशुभां ते निर्वर्त्तयन्ति, प्रकृष्टायां च तस्यां महती वेदना इतरेषु विपरीतेति

असुरकुमारादयो यावत् व्यन्तरास्तावद्यथा ओधिका उक्तास्तथा वक्तव्याः, नवरं मनुष्याणां क्रियाभिर्विशेषः, तमेव विशेषं दर्शयति-'तत्थ णं जे ते' इत्यादि, तत्र-तेषु सम्यग्दृष्ट्यादिषु मध्ये ये ते सम्यग्दृष्टयस्ते त्रिविधाः प्रज्ञप्ताः, तद्यथा-संयता असंयताः संयतासंयताश्च, 'जहा ओहियाण' मिति एतेषां यथौधिकानामुक्तं तथा कृष्णलेश्यापदविशेषितानामपि वक्तव्यं, तद्यथा-संयतानां द्वे क्रिये आरम्भिकी मायाप्रत्यया च, कृष्णलेश्या हि प्रमत्तसंयतानां भवति नाप्रमत्तसंयतानां, तेषां तु यथोक्तरूपे एव द्वे क्रिये, संयतासंयतानां तिस्रः-आरम्भिकी पारिग्रहिकी मायाप्रत्यया च, असंयतानां चतस्रः-आरम्भिकी पारिग्रहिकी मायाप्रत्यया अप्रत्याख्यानक्रिया चेति।

ज्योतिष्कवैमानिकास्तु आद्यासु तिसृषु लेश्यासु न पृच्छयन्ते, किमुक्तं भवति? -तद्विषयं सूत्रं न वक्तव्यं, तासां तेष्वभावात्, यथा च कृष्णलेश्याविषयं सूत्रमुक्तं तथा नीललेश्याविषयमपि वक्तव्यं, नानात्वाभावाद्, एतदेवाह-'एवं जहा किण्हलेसा विचारिया तहा नीललेस्सा विचारेयव्वा' नीललेश्याविषयोऽपि सूत्रदण्डकएवमेव, केवलं कृष्णलेश्यापदस्थाने नीललेश्यापदमुच्चरितव्यमिति भावः, 'कापोतलेस्सा' इत्यादि, कापोतलेश्या हि सूत्रतो नीललेश्येव नैरयिकेभ्य आरभ्य यावद्व्यन्तरास्तावद्वक्तव्या, नवरं कापोतलेश्यायां नैरयिका वेदनासूत्रे यथौधिकास्तथा वक्तव्याः-'नेरइया दुविहा पन्नत्ता-सन्निभूया य असन्निभूया य' इत्येवं वक्तव्या इति भावः, असंज्ञीनामपि प्रथमपृथिव्यामुत्पादात् तत्र च कापोतलेश्याभावात्,

तेजोलेश्याविषयं सूत्रमाह-'तेउलेस्सा णं भंते! असुरकुमारा' इत्यादि, इह नारकतेजोवायुविकलेन्द्रियाणां तेजोलेश्या न संभवति ततः प्रथमत वासुरकुमारविषयं सूत्रमुक्तं, अत एव तेजोवायुविकलेन्द्रियसूत्रमपि न वक्तवयं, असुरकुमारा अपि यथा प्रागोघत उक्तास्तथा वक्तव्याः, नवरं वेदनापदे यथा ज्योतिष्कास्थाथा वक्तव्याः, 'सन्निभूया य असन्निभूया य' इति न वक्तव्याः, किंतु 'माइमिच्छदिट्ठिउववन्नगा अमाइसम्मदिट्ठिउववन्नगा' इति वक्तव्या इति भावः, असंज्ञीना तेजोलेश्यावत्सूत्पादाभावात्, पृथिव्यब्वनस्पतयः तिर्यक्पञ्चेन्द्रिया मनुष्याश्च यथा प्रागोधिकास्तता वक्तव्याः, नवरं मनुष्याः क्रियाभिर्ये संयतास्ते पमरत्ताश्चप्रमत्ताश्च भणनीयाः, उभयेषामपि तेजोलेश्यायाः संभवात्, 'सरागा वीयरागा य नत्थि' त्ति सरागसंजया वीअरागसंजया य इति न वक्तव्या इत्यर्थः, वीतरागाणां तेजोलश्याया असंभवेन वीतरागपदोपन्यासस्यतेजोलेश्यायाः सरागत्वाव्यभिचारात् सरागपदोपन्यासस्य चायोगात्,

'वाणमंतरा तेउलेसाए जहा असुरकुमारा' इति, तेऽपि 'माइमिच्छदिट्ठिउववन्नगा अमाइसम्मद्दिट्ठिउववन्नगा य' इत्येवं वक्तव्याः न तु 'सन्निभूया य असन्निभूया य' इति, तेष्वपि तेजोलेश्यावसत्सु मध्येऽसंज्ञीनामुत्पादाभावात् 'एवं पम्हलेसावि भाणियव्वा' इति, एवं-

पदं - १७, उद्देशकः - १ - समाप्तः

-: पदं - १७ - उद्देशकः - २ :-

वृ. उक्तः षड्द्वाराद्यर्थाभ्भियायी प्रथम उद्देशकः, अधुना द्वितीय उद्देशक उच्यते, तत्र चेदमादिसूत्रम्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मू. (४५१) *कइ णं भंते ! लेसाओ पन्नत्ताओ ?, गोयमा ! छल्लेसाओ पन्नत्ताओ, तंजहा–कण्हलेसा नीललेसा काउलेसा तेउलेसा पम्हलेसा सुक्कलेस्सा ।*

वृ. 'कइ णं भंते ! लेसाओ' इत्यादि, कः पुनरस्य सूत्रस्य सम्बन्ध इति चेद् ?, उच्यते, उक्तं प्रथमोद्देशके 'सलेसा णं भंते ! नेरइया' इत्यादि इह तु ता एव लेश्याश्चिन्त्यन्ते 'कइ लेसा' इति, तत्र लेश्याः प्राग्निरूपतिशब्दार्थाः 'कइ' त्ति किंपरिमाणाः प्रज्ञप्ताः ?, भगवानाह–गौतम ! षड्, ता एव नामतः कथयति–'कण्हलेसा' इत्यादि, कृष्णद्रव्यात्मिका कृष्णद्रव्यजनिता वा लेश्या कृष्णलेश्या एवं नीललेश्येत्यादिपदेष्वपि भावनीयं ।

मू. (४५२) *नेरइयाणं भंते ! कइ लेसाओ पन्नत्ताओ ?, गो० !तिन्नि, तं–०किण्ह– नील० काउलेसा । तिरिक्खजोणियाणं भंते ! कइ लेस्साओ पन्नत्ताओ ?, गो० ! छल्लेसाओ पं०, तं०–कण्हलेस्सा जाव सुक्कलेसा ।*

एगिंदियाणं भंते ! कइ लेसाओ पं० ?, गो० चत्तारि लेसाओ पं०, तं०–कण्ह– जाव तेउलेसा । पुढविकाइयाणं भंते ! कइ लेसाओ पं० गो० ! एवं चेव, आउवणस्सइकाइयाणवि एवं चेव, तेउवाउबेइंदियतेइंदियचउरिंदियाणं जहा नेरइयाणं । पंचेंदियतिरिक्खजोणियाणं पुच्छा, गो० ! छल्लेस्सा–कण्ह० जाव सुक्कलेसा, संमुच्छि- मपंचेंदियतिरिक्खजोणियाणं पुच्छा, गो० ! जह नेरइयाणं, गब्भवक्कंतियपंचेंदियतिरिक्खजोणियाणं पुच्छा, गो० ! छल्लेस, कण्ह० जाव सुक्कलेसा, तिरिक्खजोणियाणं पुच्छा, गो० ! छल्लेसा एयाओ चेव ।

मणूसाणं पुच्छा, गो० ! छल्लेसा एयाओ चेव, संमुच्छिममणुस्साणं पुच्छा, गो० ! जहा नेरइयाणं, गब्भवक्कंतियमणुस्साणं पुच्छा, गो० ! छल्लेसाओ तं० कण्ह० जाव सुक्कलेसा, मणुस्सीणं पुच्छा, गो० ! एवं चेव । देवाणं पुच्छा, गो० ! छ एयाओ चेव, देवीणं पुच्छा, गो० ! चत्तारि कण्ह० जाव तेउलेस्सा, भवणावासीणं भंते ! देवाणं पुच्छा, गो० ! एवं चेव, एवं भवणवासिणीणवि, वाणमंतरदेवाणं पुच्छा, गो० ! एवं चेव, वाणमंतरणवि, जोइसियाण पुच्छा, गो० ! एगा तेउलेसा, एवं जोइसिणीणवि । वेमाणियाणं पुच्छा, गो० ! तिन्नि, तं० तेउ० पम्ह० सुक्कलेस्सा, वेमाणिणीणं पुच्छा, गो० ! एगा तेउलेस्सा ।

वृ. 'नेरइयाणं भंते !' इत्यादि, सूत्रमल्पबहुत्ववक्तव्यतायाः प्राक् सकलमपि सुगमं, नवरं वैमानिकसूत्रे यद्वैमानिकानामेका तेजोलेश्योक्ता तत्रेदं कारणं–वैमानिक्यो हि देव्यः सौधर्म्मेशानयोरेव, तत्र च कवला तेजोलेश्येति, सामान्यतः सङ्ग्रहणिगाथा अत्रेमाः–

॥१॥ "किण्हा नीला काऊ तेऊलेसा य भवणवंतरिया ।
जोइससोहम्मीसाण तेउलेसा मुणेयव्वा ॥

॥२॥ कप्पे सणंकुमारे माहिंदे चेव बंभलोए य ।
–एएसु पम्हलेसा तेणं परं सुक्कलेसा उ ॥

॥३॥ पुढवी आउ वणस्सइ बायर पत्तेय लेस चत्तारि ।
गब्भयतिरियनरेसुं छल्लेसा तिन्नि सेसाणं ॥"

सम्प्रति लेश्यादीनामष्ठानामल्पबहुत्वमाह–'एएसि णं भंते ! जीवाणं सलेस्साण' मित्यादि, अमीषामष्ठानां मध्ये कतरे कतरेभ्योऽल्पाः कतरे कतरेभ्यो बहवः कतरे कतरैः सह तुल्याः, इह

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्राकृतत्वात् तृतीयायामपि कतरेहिंतो निर्देशोऽयं भवतीत्येवं व्याख्यायामदोषः, तथा कतरे कतरेभ्यो विशेषाधिकाः ?, एवं गौतमेन प्रश्ने कृते भगवानाह–

गौतम ! सर्वस्तोकाः शुक्ललेश्याः, शुक्ला शुक्लद्रव्यजनिती वा लेश्या येषां ते शुक्ललेश्याः, एवं शेषपदेष्वपि विग्रहभावना कार्या, सर्वस्तोकाः, कतिपयेषु पञ्चेन्द्रियतिर्यक्षु मनुष्येषु च लान्तकादिदेवेषु च तस्याः सद्भावात्, तेभ्यः पद्मलेश्याः सङ्ख्येयगुणाः, सङ्ख्येयगुणेषु तिर्यक्पञ्चेन्द्रियेषु मनुष्येषु सनत्कुमारमाहेन्द्रब्रह्मलोककल्पवासिषु च देवेषु पद्मलेश्याभावात्, अथ लान्तकादिदेवेभ्यः सनत्कुमारादिकल्पत्रयवासिनो देवा असङ्ख्यातगुणाः ततः शुक्ललेश्येभ्यः पद्मलेश्याः असङ्ख्येयगुणाः प्राप्नुवन्ति कथं सङ्ख्येयगुणा उक्ताः ?, उच्यते,

इह जघन्यपदेऽप्यसङ्ख्यातानां सनत्कुमारादिकल्पत्रयवासिदेवेभ्योऽसङ्ख्येयगुणानां पञ्चेन्द्रियतिरश्चां शुक्ललेश्या ततः पद्मलेश्याचिन्तायां सनत्कुमारादिदेवप्रक्षेपेऽप्यसङ्ख्येयगुणत्वं न भवति किं तु यदेव तिर्यक्पञ्चेन्द्रियापेक्षयैव सङ्ख्येयगुणत्वं तदेवास्तीति ।

मू. (४५३) *एतेसि णं भंते ! जीवाणं सलेस्साणं कण्हलेसाणं जाव सुक्कलेसाणं अलेस्साण य कयरे २ अप्पा वा ४ ?, गो० ! सव्वत्थोवा जीवा सुक्कलेस्सा पम्हलेस्सा संखेज्जगु० तेउलेस्सा संखेज्जगु० अलेस्सा अनंतगु० काउलेसा अनंतगु० नीललेसा विसेसाहिया कण्हलेसा विसेसाहिया लेस्सा विसेसाहिया ।*

वृ. सङ्ख्येयगुणाः शुक्ललेश्यभ्यः पद्मलेश्याः, तेभ्योऽपि सङ्ख्येयगुणाः तेजोलेश्या, बादर-पृथिव्यप्प्रत्येकवनस्पतिकायिकेषु सङ्ख्येयगुणेषु तिर्यक्पञ्चन्द्रियमनुष्येषु भवनपतिव्यन्तरज्योतिष्क-तसौधर्म्मेशानदेवेषु च तेजोलेश्याभावात्, भावना सङ्ख्येयगुणत्वे प्राग्वदत्रापि कर्त्तव्या, तेभ्योऽप्य-नन्तगुणा अलेश्याः, सिद्धानामलेश्यानां प्राक्तनेभ्योऽनन्तगुणत्वात्, तेभ्योऽपि कापोतलेश्या अनन्तगुणाः, सिद्धेभ्योऽप्यनन्तगुणानां वनस्पतिकायिकानां कापोतलेश्यावतां सद्भावात्, तेभ्योऽपि नीललेश्या विशेषाधिकाः, तेभ्योऽपि कृष्णलेश्या विशेषाधिकाः, क्लिष्टक्लिष्टत-राध्यवसायानां प्रभूततराणां सद्भावात्, कृष्णलेश्येभ्योऽपि सलेश्या विशेषाधिकाः नीललेश्यादीनामपि तत्र प्रक्षेपात् तदेवं सामान्यतोऽल्पबहुत्वं चिन्तितं,

सम्प्रति नैरयिकेषु तदल्पबहुत्वं चिन्तयन्नाह–

मू. (४५४) *एएसि णं भंते ! नेरइयाणं कण्हलेसाणं नीललेस्साणं काउलेस्साण य कयरे २ हिंतो अप्पा वा ४ ?, गो० ! सव्वथोवा नेरइया कण्हलेसा नीललेसा असं० काउले० असं० ।*

वृ. 'एएसि णं भंते ! नेरइयाण' मित्यादि, नैयरिकाणां हि तिस्रो लेश्याः, तद्यथा–कृष्णलेश्या नीललेश्या कापोतलेश्या, उक्तं च-

॥१॥ "काउय दोसु तईयाए मीसिया नीलिया चउत्थीए ।
पंचमियाए मिस्सा कण्हा तत्तो परमकण्हा ॥"

ततोऽत्र त्रयाणामेव पदानां परस्परमल्पबहुत्वचिन्ता, तत्र सर्वस्तोकाः कृष्णलेश्यानैरयिकाः, कतिपयपञ्चमपृथिवीगतनरकावासेषु षष्ठ्यां सप्तम्यां च पृथिव्यां नैरयिकाणां कृष्णलेश्यासद्भावात्, ततोऽसङ्ख्येयगुणा नीललेश्याः, कतिपयेषु तृतीयपृथिवीगतनरकावासेषु चतुर्थ्यां समस्तायां पृथिव्यां कतिपयेषु च पञ्चमपृथिवीगतनरकावासेषु नैरयिकाणां पूर्वोक्तेभ्योऽसङ्ख्येयगुणानां

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नीललेश्याभावात्, तेभ्योऽप्यसङ्ख्येयगुणाः कापोतलेश्याः, प्रथमद्वितीयपृथिव्योस्तृतीयपृथिवी गतेषु च कतिपयेषु नरकावासेषु नारकाणमनन्तरोक्तेभ्योऽसङ्ख्येयगुणानां कापोतलेश्यासद्भावात

मू. (४५५) *एतेसि णं भंते! तिरिक्खजोणियाणं कण्हलेस्साणं जाव सुक्कलेसाण य कयरे २ ?, अप्पा वा ४ गो० ! सव्व० तिरिक्खजोणिया सुक्कलेसा एवं जहा ओहिया नवरं अलेस वज्ञा, एएसिं एगिंदियाणं कण्ह० नील० काउ० तेउलेस्साण य कयरे कयरेहिंतो अप्पा वा ४ ?, गो० ! सव्वत्थोवा एगिंदिया तेउलेस्सा, काउ० अनं० नीलले० विसेसा कण्हलेसा०*

एएसि णं भंते! पुढविकाइयाणं कण्हलेसाणं जाव तेउलेस्साण य कयरे कयरेहिंतो अप्पा वा ४ ?, गो० ! जहा ओहिया एगिंदिया नवरं कउलेस्सा असंखेज्ञगुणा, एवं आउकाइयाणवि,

एतेसि णं भंते! तेउकाइयाणं कण्हलेस्साणं नीललेस्साणं काउलेस्साण य कयरे कयरेहिंतो अप्पा वा ४ ?, गो० ! सव्वत्थोवा तेउकाइया काउलेस्सा नीललेस्सा विसेसाहिया कण्हलेस्सा विसेसाहिया, एवं वाउकाइयाणवि,

एतेसि णं भंते! वणस्सइकाइयाणं कण्हलेस्साणं जाव तेउलेस्साण य जहा एगिंदिय० ओहियाणं, बेइंदियाणं तेइंदियाणं चउरिंदियाणं जहा तेउकाइयाणं,

एएसि णं भंते! पंचेंदियतिरिक्खजोणियाणं कण्हलेसाणं एवं जाव सुक्कलेसाण य कयरे कयरेहिंतो अप्पा वा ४ ?, गो० ! जहा ओहियाणं तिरिक्खजोणियाणं नवरं काउलेस्सा असंखेज्ञगुणा, संमुच्छिमपंचेंदियतिरिक्खजोणियाणं जहा तेउकाइयाणं, गब्भवक्कंतियपंचेंदियतिरिक्खजोणियाणं जहा ओहियाणं तिरिक्खजोणियाणं नवरं काउलेस्सा संखेज्ञगुणा, एवं तिरिक्खजोणियाणवि,

एएसि णं भंते! संमुच्छिमपंचेंदियतिरिक्खजोणियाणं गब्भवक्कंतियपंचेंदियतिरिक्खजोणियाण य कण्ह० जाव सुक्कलेसाण य कयरे कयरेहिंतो अप्पा वा ४ ?, गो० ! सव्वत्थोवा गब्भवक्कंतियपंचेंदियतिरि० सुक्क० पम्ह० संखेज्ञगुणा तेउले० संखे० काउ० संखे० नीललेस्सा विसेसा० कण्हलेसा विसेसा० काउलेसा संमुच्छिमपंचेंदियतिरिक्खजोणिया असंखेज्ञ० नीललेसा विसेसा० कण्हलेसा विसेसा०,

एएसि णं भंते! संमुच्छिमपेंचेदियतिरिक्खजोणियाणं तिरिक्खजोणिणीण य कण्हले० जाव सुक्कलेसाण य कयरे कयरेहिंतो अप्पा वा ४ ?, गो० ! जहेव पंचमं तहा इमं छट्ठं भाणियव्वं,

एएसि णं भंते! गब्भवक्कंतियपंचंदियतिरिक्खजोणियाणं तिरिक्खजोणिणीण य कण्हलेसाणं जाव सुक्कलेसाण य कयरे कयरेहिंतो अप्पा वा ४ ?, गो० ! सव्वत्थोवा गब्भवक्कंतियपंचेंदियतिरिक्खजोणियाण सुक्कलेसा सुक्कलेसाओ तिरिक्खजोणिणीओ संखेज्ञगुणाओ पम्हलेसा गब्भवक्कंतियपंचेंदियतिरिक्खजोणिया संखे० पम्हलेसाओ तिरिक्खजोणिणीओ संखेज्ञ० तेउले० तिरिक्खजोणिया संखे० तेउलेसा तिरिक्खजोणिणीओ सं० काउले–० सं० नीलले० विसेसा० कण्हले० विसेसा० काउलेसाओ सं० नीललेसाओ विसेसाहियाओ कण्हलेसाओ विसेसाहियाओ,

एएसि णं भंते! संमुच्छिमपंचे० तिरिक्खजोणि० गब्भवक्कंतियपंचे० तिरिक्खजोणिणीण य कण्हलेसाणं जाव सुक्कलेस्साण य कयेर कयरेहिंतो अप्पा वा ४ ?, गो० ! सव्वत्थोवा गब्भ० तिरिक्खजोणिया सुक्कलेसा सुक्कलेसाओ संखेज्ञगुणाओ पम्हलेसा गब्भव० संखेज्ञ– पम्हलेसाओ तिरिक्खज० संखेज्ञगुणाओ तेउलेसा गब्भव० तिरिक्ख० संखेज्ञगु० तेउलेसाओ तिरि०

Jain Education International For Private & Personal Use Only www.jainelibrary.org

संखेज्ञगुणाओ काउलेसाओ सं० निललेसा विसे० कण्हले० विसे० काउलेसा वि० कण्हलेसाओ विसेसाहियाओ कण्हले० संमु० पंचेंदि० तिरिअ० सं० नीलले० विसे० कण्हले० विसेसाहिया

एएसि णं भंते ! पंचेंदियतिरिक्खजोणियाणं तिरिक्खजोणिणीण य कण्हलेस्साणं जाव सुक्कलेसाणं कयरे कयरेहिंतो अप्पा वा ४ ?, गो० ! सव्वत्थोवा पंचेंदियतिरि० सुक्कलेस्सा सुक्कलेसाओ संखि० पम्हलेसा सं० पम्हलेसाओ संखेज्ञगुणाओ तेउलेसा सं० तेउलेस्साओ संखिज्ञगुणाओ काउले० संखे० नीललेसाओ विसेसाहियाओ कण्हलेसाओ विसेसा० काउले० असंखेज्ञगुणा नीलले० विसे० कण्हले० विसेसाहियाओ, एएसि णं भंते ! तिरि० तिरिक्खजोणिणीण य कण्हले० जाव सुक्क० कयरे कयरेहिंतो अप्पा वा ४ ?, गो० ! जहेव नवमं अप्पाबहुगं तहा इमंपि, नवरं काउले० तिरि० अनं०, एवं एते दस अप्पाबहुगा तिरिक्खजोणियाणं ।

वृ. अधुना तिर्यक्पञ्चेन्द्रियष्वल्पबहुत्वमाह– 'एएसि णं भंते !' इत्यादि, 'एवं जहा ओहिया' इति एवम्–उपदर्शितेन प्रकारेण यथा प्रागोधिकास्तथा वक्तव्याः, नवरमलेश्यावर्जाः, तिरश्चामलेश्यानामसंभवात्, ते चैवं–सर्वस्तोकाः तियंगोनिकाः शुक्ललेश्याः, ते च जघन्यपदेऽप्य-सङ्ख्याता द्रष्टव्याः, तेभ्य सङ्ख्येयगुणाः पद्मलेश्याः, तेभ्योऽपि सङ्ख्येयगुणास्तेजोलेश्याः, तेभ्योऽप्य-नन्तगुणाः कापोतलेश्याः, तेभ्योऽपि नीललेश्या विशेषाधिकाः, तेभ्योऽपि कृष्णलेश्या विशेषाधिकाः, तेभ्योऽपि सलेश्या विशेषाधिकाः । साम्प्रतममेकेन्द्रियेष्वल्पबहुत्वमाह–

'एएसि णं भंते ! एगिंदियाण' मित्यादि, सर्वस्तोका एकेन्द्रियास्तेजोलेश्याः, कतिपयेषु बादरपृथिव्यब्वनस्पतिकायिकेष्वपर्याप्तावस्थायां तस्याः सद्भावात्, तेभ्यः कापोतलेश्या अनन्तगुणाः, अनन्तानां सूक्ष्मबादरनिगोदजीवानां कापोतलेश्यास-द्भावात्, तेभ्योऽपि नीललेश्या विशेषाधिकाः, तेभ्योऽपि कृष्णलेश्या विशेषाधिकाः, अत्र भावना प्रागेवोक्ता ।

सम्प्रति पृथिवीकायिकादिविषयमल्पबहुत्वं वक्तव्यं, तत्र पृथिव्यब्वनस्पतिकायानां चतस्रो लेश्याः तेजोवायूनां तिस्र इति तथैव सूत्रमाह– 'एएसि णं भंते ! पुढविकाइयाण' मित्यादि, सुगमं, द्वित्रिचतुरिन्द्रियविषयमपि, पञ्चेन्द्रियतिर्यग्योन्द्रियतिरश्चां यथा तेजस्कायिकानामुक्तं तथा वक्तव्यं, तेजस्कायिकानामिव तेषामप्याद्यलेश्यात्रयमात्रसद्भावात्, गर्भव्युत्क्रान्तिकपञ्चेन्द्रियति-र्यग्योनिकसूत्रे तेजोलेश्याभ्यः कापोतलेश्या असङ्ख्येयगुणा वक्तव्याः, तावतामेव तेषां केवलवेद-सोपलब्धतवात्, शेषमौघिकसूत्रवद् वक्तव्यं, एवं तिर्यग्योनिकानामपि सूत्रं वक्तव्यं, तथा चाह–'एवं तिरिक्खजोणिणीणवि' ।

अधुना संमूर्च्छिमगर्भव्युत्क्रान्तिकतिर्यक्पञ्चेन्द्रियतिर्यक्स्त्रीविषयं सूत्रमाह–'एएसि णं भंते !' इत्यादि सुगमं, एतच्च प्रागवद् भावनीयं, इदं किल पञ्चेन्द्रियतिर्यग्योनिकाधिकारे षष्ठं सूत्रमनन्तरोक्तं च पञ्चममत उक्तं 'जहेव पंचमं तहा इमं छट्ठं भाणियव्वं', अधुना गर्भव्युत्क्रान्तिक-तिर्यक्पञ्चेन्द्रियतिर्यक्स्त्रीविषयं सप्तमं सूत्रमाह–

'एएसि णं भंते !' इत्यादि सुगमं, नवरं सर्वास्वपि लेश्यासु स्त्रियः प्रचुराः, सर्वसङ्ख्ययापि च तिर्यक्पुरुषेभ्यस्तिर्यक्स्त्रियस्त्रिगुणाः ''तिगुणा तिरूवअहिया तिरियाणं इत्थिया मुणेयव्वा'' इति वचनात्, ततः सङ्ख्यायतगुणा उक्ताः, नपुसकास्तु गर्भव्युत्क्रान्तिकाः कतिपय इति न ते यथोक्तमल्पबहुत्वं व्याप्नुवन्ति, सम्प्रति समूर्च्छिमपञ्चेन्द्रियतिर्यग्योनिकगर्भव्युत्क्रान्तिक-

Jain Education International   For Private & Personal Use Only   www.jainelibrary.org

पञ्चेन्द्रियतिर्यग्योनिकतिर्यक्स्त्रीविषयमष्टमं सामान्यतः पञ्चेन्द्रियतिर्यग्योनिकतिर्यक्स्त्रीविषयं नवमं सामान्यतस्तिर्यग्योनिकतिर्यक्स्त्रीविषयं दशमं सूत्रमाह–

मू. *(४५६) एवं मणुस्साणवि अप्पाबहुगा भाणियव्वा, नवरं पच्छिमगं अप्पाबहुगं नत्थि*

वृ. 'एएसि णं भंते !' इत्यादि भावना प्रागुक्तानुसारेण कर्त्तव्या, तिर्यग्योनिकविषयसूत्र-संकलनामाह–'एवमेए दस अप्पाबहुगा तिरिक्खजोणियाण'मिति सुगमं, नवरमिहेमे पूर्वाचार्यप्रदर्शिते सङ्ग्रहणिगाथे–

॥१॥ "ओहिय पणिंदि १ संमुच्छिमा २ य गब्भे ३ तिरिक्खिइत्थीओ ४ ।
संमुच्छगब्भतिरिया ५ मुच्छतिरिक्खी य ६ गब्भंमि ७ ॥

॥२॥ सम्मुच्छिमगब्भ इत्थी ८ पणिंदितिरिगित्थीया ९ य ओहित्थी १० ।
दस अप्पबहुगभेया तिरियाणं होंति नायव्वा ॥"

यथा तिरश्चामल्पबहुत्वान्युक्तानि तथा मनुष्याणामपि वक्तव्यानि, नवरं पश्चिमं दशम-मल्पबहुत्वं नास्ति, मनुष्याणामनन्तत्वाभावात्, तदभावे काउलेसा अनंतगुणा इति पदासम्भवात्,

मू. *(४५७) एएसि णं भंते ! देवाणं कण्हलेसा जाव सुक्कलेसाण य कयरे कयरेहिंतो ?, अप्पा वा ४ गो० ! सव्वत्थोवा देवा सुक्कले० पम्हलेस्सा असं० काउले० असं० नीललेस्सा विसेसा० कण्ह० विसेसा० तेउलेसा संखेज्जगुणा, एएसि णं भंते ! देवीणं कण्हले० जाव तेउलेसाण य कयरे कयरेहिंतो अप्पा वा ४ ?, गो० ! सव्वत्थोवा देवीओ काउले० नीललेसाओ विसे० कण्हले० विसेसा० तेउले० संखे एव,*

एएसि णं भंते ! देवाणं देवीण य कण्हले० जाव सु० कयरे २ अप्पा वा ४ ?, गो० ! सव्वत्थोवा देवा सुक्कले० पम्हले० असं० काउले० असं० नीलले० विसे० कण्हले० विसे० काउले० देवीओ संखे० नीलले० विसे० कण्हले० विसे० तेउले० देवा संखे० तेउ० देवीओ संखे०, एएसि णं भंते ! भवणवासीणं देवाणं कण्हेल० जाव तेउलेस्साण य कयेर २ अप्पा वा ४, गो० ! सव्व० भवणवासी देवा तेउले० काउलेसा० असं० नीललेसा विसे० कण्हलेसा विसेसा

एतेसि णं भंते ! भवणवासिणीणं देवीणं कण्हले० जाव तेउले० कतरे कतरेहिंतो अप्पा वा ४ ?, गो० ! एवं चेव, एएसि णं भंते ! भवणवासीणं देवाणं देवीण य कण्हलेसाणं जाव तेउलेसाण य कयरे २ ? अप्पा वा ४ ?, गो० ! सव्वत्थोवा० भवणवासी देवा तेउलेसा भवणसिणीओ तेउलेसाओ संखे० काउले० भवणवासीओ असंखे० नीललेसा विसे० कण्हलेसा विसे० काउलेसाभवणवासिणीओ देवीओ संखेज्जगु० नीलले० भवणवासीओ असंखे० नीललेसा विसे० कण्हलेसा विसे० काउलेसाभवणवासिणीओ देवीओ संखेज्जगु० नीलले० विसे० कण्हलेसाओ विसेसाहियाओ, एवं वाणमंत० तिन्नेव अप्पाबहुया जहेव भवणवासिणं तहेव भा० ।

एतेसि णं भंते ! जोइसि० देवाणं देवीण य तेउलेसाणं कयरे २ ? अप्पा वा ४ ?, गो० ! सव्वत्थो० जोइसिया देवा तेउले० जोइसिणीओ देवीओ० देवीओ० तेउले० संखेज्जाओ । एएसि णं भंते ! वेमाणियाणं देवाणं तेउले० पम्हलेसाणं सुक्कलेसाण य कयरे २ ? अप्पा वा ४ ? गो० ! सव्वत्थो० वेमाणिया देवा सुक्कलेस्सा पम्हलेसा असं० तेउलेसा० असं०,

एतेसि णं भंते ! वेमाणियाणं देवाणं देवीण य तेउलेसा० पम्हसुक्कलेस्साण य कयरे २

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अप्पा वा ४ ?, गो० ! सव्वत्थोवा वेमाणिया देवा सुक्कलेस्सा पम्हलेस्सा असंखेज्जगुणा तेउलेस्सा असंखेज्जगुणा तेउलेसाओ वेमाणिणीओ देवीओ संखेज्जगुणाओ,

एएसि णं भंते ! भवणवासीदेवाणं वाणमंतराणं जोइसियाणं वेमाणियाण य देवाण य कण्हलेसाणं जाव सुक्कलेसाणं कयरे २ अप्पा वा ४ ?, गो० !, सव्वत्थोवा वेमाणिया देवा सुक्कलेस्सा पम्हलेस्सा असंखेज्जगुणा तेउलेस्सा असंखेज्जगुणा तेउलेसा भवणवासीदेवा असं० काउलेस्सा असं० नीलले० विसेसा० कण्हले० विसेसा० तेउलेसा वाणमंतरा देवा असं० काउले० असं० नीलले० विसेसा कण्हले० विसेसा तेउलेसा जोइसिया देवा संखे०,

एएसि णं भंते ! भवणवासिणीणं वाणंतरीणं जोइसिणीणं वेमाणिणीण य कण्हलेसाणं जाव तेउलेस्साण य कयरे २ ?, गो० ! सव्वत्थोवाओ देवीओ वेमाणिणीओ तेउलेसाओ भवणवासिणीओ तेउलेसाओ असं० काउलेसाओ असं० नीललेसाओ विसेसा० कण्हले० विसेसा० तेउलेसाओ वाणमंतरीओ देवीओ असं० काउले० असं० नीललेसाओ विसेसा० कण्हलेसाओ विसेसा० तेउलेसाओ जोइसिणीओ देवीओ संखेज्जगुणाओ ॥

एएसि णं भंते ! भवणवासीणं जाव वेमाणयाणं देवाण य देवीण य कण्हलेसाणं जाव सुक्कलेसाण य कयरे २ अप्पा वा ४ ?, गो० ! सव्वत्थोवा वेमाणिया देवा सुक्कलेसा पम्हलेसा असंखे० तेउलेसा असंखे० तेउलेसाओ वेमाणियदेवीओ संखे० तेउले० भवणवासीदेवा असं० तेउलेसाओ भवणवासीदेवीओ संखे० काउलेसा भवणवासी असं० नीलले० विसेसा० कण्हले० विसेसा० काउलेसाओ भवणवासिणिओ संखे० निलले० विसेसाहियाओ कण्हलेसाओ विसे० तेउलेसा वाणमंतरा सं० तेउलेसाओ वाणमंतरीओ संखे० काउले० वाणमंतरा असं० नीलले० विसेसा० कण्हले० विसेसा० काउले० वाणमं० संखे० नीललेसाओ विसे० कण्हलेसा विसेसा० तेउले० जोइसिया संखे० तेउले० जोइसिणीओ संखिज्जुणाओ ।

वृ. अधुना देवविषयमल्पबहुत्वमाह—'एएसि णं भंते ! देवाण'मित्यादि, सर्वस्तोका देवाः शुक्ललेश्याः, लान्तकादिदेवलोकेष्वेव तेषां सद्भावात्, तेभ्यः पद्मलेश्याः असङ्ख्येयगुणाः, सनत्कुमारमाहेन्द्रब्रह्मलोककल्पदेवेषु पद्मलेश्याभावात्, तेषां च लान्तकादिदेवेभ्योऽसङ्ख्यातगुणत्वात्, तेभ्यः कापोतलेश्याः असङ्ख्येयगुणाः, भवनपतिव्यन्तरदेवेषु सन्तकुमारादिदेवेभ्योऽसङ्ख्येयगुणेषु कापोतलेश्यासद्भावात्, तेभ्योऽपि नीललेश्या विशेषाधिकाः, प्रभूततराणां भवनपतिव्यन्तराणां तस्याः सम्भवात्, तेभ्योऽपि कृष्णलेश्या विशेषाधिकाः प्रभूततमानां तेषां कृष्णलेश्याकत्वात्, तेभ्योऽपि तेजोलेश्याः सङ्ख्येयगुणाः, कतिपयानां भवनपतिव्यन्तराणां समस्तानां ज्योतिष्कसौधर्म्मेशानदेवानां तेजोलेश्याभावात् ॥

अधुना देवीविषयं सूत्रमाह—'एएसि णं भंते ! देवीण'मित्यादि देव्यश्च सौधर्म्मेशानान्ता एव न परत इति तासां चतस्र एव लेश्यास्ततस्तद्विषयमेवाल्पबहुत्वमभिधित्सुना 'जाव तेउलेस्साण य' इत्युक्तं सर्वस्तोका देव्यः कापोतलेश्याः कतिपयानां भवनपतिव्यन्तरदेवीनां कापोतलेश्याभावात् तेभ्यो विशेषाधिका नीललेश्याः प्रभूतानां भवनपतिव्यन्तरदेवीनां तस्याः संभवात् तेभ्योऽपि कृष्णलेश्या विशेषाधिकाः प्रभूतानां तासां कृष्णलेश्याकत्वात्, ताभ्यस्तेजोलेश्याः सङ्ख्येयगुणाः, ज्योतिष्कसौधर्म्मेशानदेवीनामपि समस्तानां तेजोलेश्याकत्वात् ।

Jain Education International   For Private & Personal Use Only   www.jainelibrary.org

सम्प्रति देवदेवीविषयं सूत्रमाह-'एएसि ण'मित्यादि, सर्वस्तोका देवाः शुक्ललेश्याः, तेभ्योऽसङ्ख्येयगुणाः पद्मलेश्याः, तेभ्योऽप्यसङ्ख्येयगुणाः कापोतलेश्याः, तेभ्यो नीललेश्या विशेषाधिकाः, तेभ्योऽपि कृष्णलेश्या विशेषाधिकाः, एतावत्प्रागेव भावितं, तेभ्योऽपि कापोतलेश्याका देव्यः सङ्ख्येयगुणाः, ताश्च भवनपतिव्यन्तरनिकायान्तर्गता वेदितव्याः,अन्यत्र देवीनां कापोतलेश्याया असंभवात्, देव्यश्च देवेभ्यः सामान्यतःप्रतिनिकायं द्वात्रिंशद्गुणाःततः कृशणलेश्येभ्यो देवेभ्यः कापोतलेश्या देव्यः सङ्ख्येयगुणा अपि घटन्ते, ताभ्यो नीललेश्या विशेषाधिकाः, ताभ्यः कृष्णलेश्या विशेषाधिकाः, अत्रापि प्राग्वद् भावना, ताभ्योऽपि तेजोलेश्या देवाः सङ्ख्येयगुणाः, कतिपयानां भवनपतिव्यन्तराणां समस्तानां ज्योतिष्कसौधर्म्मेशानदेवानां तेजोलेश्याकत्वात्, तेभ्योऽपि तेजोलेश्याका देव्यः सङ्ख्येयगुणाः द्वात्रिंशद्गुणत्वात् ।

सम्प्रति भवनवासिदेवविषयं सूत्रमाह-'एएसि णं भंते!' इत्यादि, सर्वस्तोकास्तेजोलेश्या महर्द्धयो हि तेजोलेश्याका भवन्ति महर्द्धयश्चाल्पे इति ते सर्वस्तोकाः, तेभ्योऽसङ्ख्येयगुणाः कापोतलेश्याः, अतिशयेन प्रभूतानां कापोतलेश्यासंभवात्, तेभ्यो नीललेश्या विशेषाधिकाः, अतिप्रभूततमानां कृष्णलेश्याभावात् । एवं भवनपतिदेवीविषयमपि सूत्रं भावनीयं ।

अधुना भवनपतिदेवदेवीविषयं सूत्रमाह-'एएसि ण'मित्यादि, सर्वस्तोका भवनवासिनो देवाः तेजोलेश्याकाः, युक्तिरत्र प्रागेवोक्त, तेभ्योस्तेजोलेश्याका भवनवासिन्यो देव्यः सङ्ख्येयगुणाः देवेभ्यो हि देव्यः सामान्यतः प्रतिनिकायं द्वात्रिंशद्गुणास्तत उपपद्यते सङ्ख्येयगुणत्वमिति, तेभ्यः कापोतलेश्या भवनवासिनो देवा असङ्ख्येयगुणाः, तेभ्यो नीललेश्या विशेषाधिकाः, तेभ्योऽपि कृष्णलेश्या विशेषाधिकाः, युक्तिरत्र प्रागुक्ताऽनुसरणीया, तेभ्यः कापोतलेश्या भवनवासिन्यो देव्यः सङ्ख्येयगुणाः, भावना प्रागुक्तभावनानसारेण भावनीया, ताभ्यो नीललेश्या विशेषाधिकाः, ताभ्यः कृष्णलेश्या विशेषाधिकाः, एवं वानमन्तरविषयमपि सूत्रत्रयं भावनीयं, ज्योतिष्कविषयमेकमेव सूत्रं, तन्निकाये तेजोलेश्याव्यतिरेकेण लेश्यान्तरासम्भवतः पृथग् देवदेवीविषयसूत्रद्वयासम्भवात्,

वैमानिकदेवविषयं सूत्रमाह-'एएसि णं भंते! वेमाणियाण'मित्यादि, सर्वस्तोका वैमानिका देवाः शुक्ललेश्याः, लान्तकादिदेवानामेव शुक्ललेश्यासम्भवात्, तेषां चोत्कर्षतोऽपि श्रेण्यसङ्ख्येयभागगतप्रदेशराशिमानत्वात्, तेभ्यः पद्मलेश्या असङ्ख्येयगुणाः, सनत्कुमारमाहेन्द्रब्रह्मलोककल्पवासिनां सर्वेषामपि देवानां पद्मलेश्यासम्भवात्, तेषां चातिबृहत्तमश्रेण्यसङ्ख्येयभागवर्त्तिनभःप्रदेशराशिप्रमाणत्वात्, लान्तकादिदेवपरिमाणहेतुश्रेण्यसङ्ख्येयभागापेक्षया ह्यमीषां परिमाणहेतुः श्रेण्यसङ्ख्येयभागोऽसङ्ख्येयगुणः, तेभ्योऽपि तेजोलेश्या असङ्ख्येयगुणाः तेजोलेश्या हि सौधर्म्मशानदेवानां, ईशानदेवाश्चाङ्गुलमात्रक्षेत्रप्रदेशराशेः सम्बन्धिनि द्वितीयवर्गमूलेतृतीयेन वर्गमूलेन गुणिते यावात् प्रदेशराशिर्भवति तावत्प्रमाणासु धनीकृतस्य लोकस्य एकप्रादेशिकीषु श्रेणिषु यावन्तो नभःप्रदेशाः तावत्प्रमाण ईशानकल्पगतदेवदेवीसमुदायः, तद्गतकिञ्चिदूनद्वात्रिंशत्तमभागकल्पा देवाः, तेभ्योऽपि च सौधर्म्मकल्पदेवाः सङ्ख्येयगुणाः, ततो भवन्ति पद्मलेश्येभ्यस्तेजोलेश्या असङ्ख्येयगुणाः,देव्यश्च सौधर्म्मेशानकल्पयोरेव, तत्र च केवला तेजोलेश्या, ततो लेश्यान्तरासम्भवान्न तद्विषयं पृथग्सूत्रं अतः । सम्प्रति देवदेवीविषयं सूत्रमाह-'एएसि णं भंते!

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वेमाणियाणं देवाणं देवीण य' इत्यादि सुगमं, नवरं 'तेउलेसाओ वेमाणिणीओ देवीओ संखेज्जगुणाओ' इति, देवेभ्यो देवीनां द्वात्रिंश- द्गुणत्वात् ॥

अधुना भवनपतिव्यन्तरज्योतिष्कवैमानिकविषयं सूत्रमाह-'एएसि णं भंते ! भवणवासीण'मित्यादि, तत्र सर्वस्तोका वैमानिका देवाः शुक्ललेश्याः पद्मलेश्या असङ्ख्येयगुणाः, तेजोलेश्या असङ्ख्येयगुणा इत्यत्र भावनाऽनन्तरमेव कृता, तेभ्योऽपि भवनवासिनो देवास्तेजोलेश्याका असङ्ख्येयगुणाः,कथमिति चेद् ?, उच्यते, अङ्गुलमात्रक्षेत्रपदेशराशेः सम्बन्धिनि प्रथमवर्गमूले तृतीयवर्गमूलेन गुणिते यावान् प्रदेशराशिर्भवति तावत्प्रमाणासु घनीकृतस्य लोकस्यैकप्रादेशिकीषु श्रेणिषु यावान् प्रदेशराशिस्तावत्प्रमाणो भवनपतिदेवदेवीसमुदायः, तद्गतकिंचिदूनद्वात्रिंशत्तमभागकल्पा भवनपतयो देवाः, तत इमे प्रभूताइति घटन्ते सौधर्म्मेशानदेवेभ्यस्तेजोलेश्याका असङ्ख्येयगुणाः, तेभ्यः कातोपलेश्या भवनपतय एवासङ्ख्येयगुणाः, अल्पर्द्धिकानामप्यतिप्रभूतानां कापोतलेश्यासम्भवात्,

तेभ्योऽपि भवनवासिन एव नीललेश्या विशेषाधिकाः, युक्तिरत्र प्रागेवोक्ता, तेभ्योऽपि वानमन्तरास्तेजोलेश्याका असङ्ख्येयगुणाः, कथमिति चेद्, उच्यते, इह सङ्ख्येययोजनकोटीकोटीप्रमाणानि सूचिरूपाणि खण्डानि यावन्त्येकस्मिन्प्रन्तरे भवन्ति तावान् व्यन्तरदेवदेवीसमुदायः, तद्गतकिंचिदूनद्वात्रिंशत्तमभागकल्पा व्यन्तरदेवाः, तत इमे भवनपतिभ्योऽतिप्रभूततमा इत्युपपद्यते, कृष्णलेश्येभ्यो भवनपतिभ्यो वानमन्तरास्तेजोलेश्याका असङ्ख्येयगुणाः, तेभ्योऽपि वानमन्तरा एव कापोतलेश्येका असङ्ख्येयगुणाः, अल्पर्द्धिकानामपि कापोतलेश्याभावात्, तेभ्योऽपि वानमन्तरा नीललेश्या विशेषाधिकाः, तेभ्योऽपि कृष्णलश्या विशेषाधिकाः, अत्रापि युक्तिः प्रागुक्ताऽनुसरणीया, तेभ्योस्तेजोलेश्या ज्योतिष्का देवाः सङ्ख्येयगुणाः, यतः षट्पञ्चाशदधिकाङ्गुलशतद्वयप्रमाणानि सूचिरूपाणि यावन्ति खण्डान्येकस्मिन् प्रतरे भवन्ति तावत्प्रमाणो ज्योतिष्कदेवदेवीसमुदायः,तद्गतकिञ्चिदूनद्वात्रिंशत्तमभागकल्पा ज्योतिष्कदेवाः, ततः कृष्णलेश्येभ्यो वानमन्तरेभ्यः सङ्ख्येयगुणा एव घटन्ते ज्योतिष्कदेवा न त्वसङ्ख्येयगुणाः, सूचिरूपखण्डप्रमाणहेतोः सङ्ख्येयोजनकोटीकोट्यपेक्षया षट्पञ्चाशदधिकाङ्गुलशतद्वयस्य सङ्ख्येयभागमात्रवर्त्तित्वात् ॥

सम्प्रति भवनवास्यादिदेवदेवीविषयं तदनन्तरं भवनवास्यादिदेवदेवीसमुदायविषयं सूत्रमाह-एतच्च सूत्रद्वयमपि प्रागुक्तभावनानुसारेण भावनीयं ।

मू. (४५८) *एएसि णं भंते ! कण्हलेसाणं जाव सुक्कलेसाण य कयरे २ अप्पड्डिया वा महड्डिया वा ?, गो० ! कण्हलेसेहिंतो नीललेसा महड्डिया नीललेसेहिंतो काउलेसा महड्डिया एवं काउलेस्सेहिंतो तेउलेसा महड्डिया तेउलेसेहिंतो पम्हलेसा महड्डिया पम्हलेसेहिंतो सुक्कलेसा महड्डिया, सव्वप्पड्डिया जीवा कण्हले० सव्वमहड्डिया सुक्कलेसा ॥*

एएसि णं भंते ! नेरइयाणं कण्हलेसाणं नीललेसाणं काउलेसाण य कयरे २ अप्पड्डिया वा महड्डिया वा ?, गो० ! कण्हलेसेहिंतो नीलले० महड्डिया नीललेसेहिंतो काउलेसा महड्डिया, सव्वप्पड्डिया नेरइया कण्हले०, सव्वमहड्डिया नेरइया काउले० ॥

एएसि णं भंते १ तिरिक्खजोणियाणं कण्हलेसाणं जाव सुक्कलेसाण य कयरे कयरेहिंतो अप्प० मह० ?, गो० !, जहा जीवाणं ।

Jain Education International	For Private & Personal Use Only	www.jainelibrary.org

एएसि णं भंते! एगिंदियतिरिक्खजोणि० कण्हले० जाव तेउलेसाण य कयरे कयरेहिंतो अप्पड्ढिया वा महड्ढिया वा?, गो०!, कण्हलेसेहिंतो एगिंदियतिरिक्खजो- नीलले० महड्ढिया नीलले० तिरि० काउले० मह० काउले० तेउले० महड्ढिया, सव्वप्पड्ढिया एगोंदियतिरिक्खजोणिया कण्हले० सव्वमड्ढिया तेउले० एवं पुढविकाइयाणवि, एवं एएणं अभिलावेणं जहेव लेस्साओ भावियाओ तहेव नेयव्वं जाव चउरिंदिया। पंचेंदियतिरिक्खजोणि० तिरिक्खजोणिणीणं संमुच्छिमाणं गब्भवक्कंतियाण य सव्वेंसि भाणि० जाव अप्पड्ढिया वेमाणिया देवा तेउले० सव्वमह० वेमा० सुक्कलेसा। केई भणंति-चउवीसं दंडएणं इड्ढी भाणि० ॥

वृ सम्प्रति लेश्याविशिष्टानामल्पर्द्धिकत्वमहर्द्धिकतवे प्रतिपिपादयिषुरिदमाह-'एएसि णं भंते! जीवाणं कण्हलेसाण' मित्यादि, सुगमं, नवरं लेश्याक्रमेण यथोत्तरं महर्द्धिकत्वं यथाऽर्वाक् अल्पर्द्धिकत्वं भावनीयं, एवं नैरयिकतिर्यग्योनिकमनुष्यवैमानिकविषयाण्यपि सूत्राणि येषांयावत्यो लेश्यास्तेषां तावतीः परिभाव्य भावनीयानि ॥

पदं - १७, उद्देशकः- २ - समाप्तः

-: पदं - १७, उद्देशकः- ३ :-

वृ. उक्तो द्वितीय उद्देशकः, सम्प्रति तृतीय आरभ्यते, तस्य चेदमादिसूत्रम्-

मू. *(४५९) नेरइए णं भंते! नेरइएसु उववज्जइ अनेरइए नेरइएसु उववज्जइ?, गो०! नेरइए नेरइएसु उववज्जइ नो अनेरइए नेरइएसु उववज्जइ, एवं जाव वेमाणियाणं।*

नेरइए णं भंते! नेरइएहिंतो उववट्टइ अनेरइए नेरइएहिंतो उववट्टति?, गो०! अनेरइए नेरइएहिंतो उववट्टंति नो नेरइए नेरइएहिंतो उववट्टइ, एवंजाव वेमाणिए, नवरं जोइसियवेमाणिएसु चयणंति अभिलावो कायव्वो।

से नूनं भंते! कण्हलेसे नेरइए कण्हलेसेसु नेरइएसु उववज्जति कण्हलेसे उववट्टइ, जल्लेसे उववज्जइ तल्लेसे उववट्टइ?, हंता गो०!, कण्हलेसे नेरइए कण्हलेसेसु नेरइएसु उववज्जति कण्हलेसे उववट्टइ, जल्लेसे उववज्जइ तल्लेसे उववट्टइ, एवं नीललेस्सवि, एवं काउलेस्सेवि।

एवं असुरकुमाराणवि जाव थणियकुमारा, नवरं लेस्सा अब्भहिया, से नूनं भंते! कण्हलेसे पुढविकाइए कण्हलेसेसु पुढविकाइएसु उववज्जति कण्हलेसे उववट्टइ जल्लेसे उववज्जति तल्लेसे उववट्टति?, हंता गो!, कण्हलेसे पुढविकाइए कण्हलेसेसु पुढविकाइएसु उववज्जति, सिय कण्हलेसे उववट्टइ सिय नीललेसे उववट्टइ सिय काउलेसे उववट्टइ सिय जल्लेसे उववज्जति सिय तल्लेसे उववट्टइ, एवं नीलकाउलेस्सासुवि,

से नूनं भते! (तेउल्लेसे पुढवीकाइए) तेउलेस्सेसु पुढविकाइएसु उववज्जइ पुच्छा, हंता गो०! तेउलेस्सेसु पुढविकाइएसु उववज्जइ, सिय कण्हलेसे उववट्टइ सिय नीललेसे उववट्टइ सिय काउलेसे उववट्टइ तेउलेसे उववज्जइ नो चेव णं तेउलेसे उववट्टइ, वं आउकाइया वणस्सइकाइयावि, तेऊवाआ एवं चेव, नवरं एतेसिं तेउलेस्सा नत्थि, बितियचउरिंदिया एवं चेव तिसु लेसासु, पेंचेंदियतिरिक्खजोणया मणुस्सा य जहा पुढविकाइया आदिल्लिया तिसु लेसासु भणिया तहा छसुवि लेसासु भा०, नवरं छप्पि लेस्साओ चारेयव्वाओ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वाणमं० जहा असुरकु०, से नूनं भंते! तेउलेस्से जोइसिए तेउलेस्सेसु जोइसिएसु उवव० जहेव असुरकु०, एवं वेमाणियावि, नवरं दोण्हंपि चयंतीति अभिलावो।

से नूनं भंते! कण्हलेसे नीललेसे काउलेसे नेरइए कण्हलेसेसु नीललेसेसु काउलेसेसु नेरइएसु उवव० कण्ह० नील० काउले० उववट्टइ जल्लेसे उवव० तल्लेसे उववट्टइ?, हंता गो०!, कण्हनीलकाउलेसे उववज्जइ तल्लेसे उववट्टइ, से नूनं भंते! कण्हलेसे जाव तेउलेस्से असुरकुमारे कण्हलेसेसु जाव तेउलेसेसु असुरकुमारेषु उववज्जइ, एवं जहेव नेरइए तहा असुरकुमारावि जाव थणियकुमारावि, से नूनं भंते! कण्हलेसे जाव तेउलेसे पुढविकाइए कण्हलेसेसु जाव तेउलेसेसु पुढविकाइएसु उववज्झइ?, एवं पुच्छा जहा असुरकुमाराणं, हंता गो०!, कण्हलेसे जाव तेउलेसे पुढविकाइए कण्हलेसेसु जाव तेउलेसेसु पुढविकाइएसु सिय कण्हलेसे उववट्टइ सिय नीललेसे सिय काउलेसे उव्वट्टइ सिय जल्लेसे उववज्जइ तल्लेसे उववट्टइ, तेउलेसे उववज्जइ नो चेव णं तेउलेसे उव्वट्टइ, एवं आउकाइया वणस्सइकाइयावि भाणियव्वा,

से नूनं भंते! कण्हलेसे नीललेसे काउलेसे तेउकाइए कण्हलेसेसु नीललेसेसु काउलेसेसु तेउकाइएसु उववज्झइ कण्हलेसे नीललेसे काउलेसे उववट्टइ जल्लेसे उववज्जइ तल्लेसे उववट्टइ हंता गो०! कण्ह० नील० काउलेसे तेउकाइए कण्ह० नील० काउलेसेसु तेउकाइएसु उववज्जइ सिय कण्हलेसे उववट्टइ सिय नीललेसे उववट्टति सिय काउलेसे उववचट्टइ सिय जल्लेसे उववज्जइ तल्लेसे उववट्टइ, एवं वाउकाइयबेंदियतेइंदियचउरिंदियावि भाणियव्वा।

से नूनं भंते! कण्हलेसे जाव सुक्क लेसे पंचेंदियतिरिक्खजोणिया कण्हलेसेसु जाव सुक्कलेसेसु पंचेंदियतिरिक्खजोणिएसु उववज्जइ?, पुच्छा, हंता गोयमा!, कण्हलेसे जाव सुक्कलेस्से पंचेंदियतिरिक्खजोणए कण्हलेसेसु जाव सुक्कलेसेसु पंचेंदियतिरि० उवव० सिय कण्हलेसे उववट्टइ जाव सिय सुक्कलेसे उववट्टइ सिय जल्लेसे उववज्जइ तल्लेसे उववट्टइ।

एवं मणूसेवि। वाणमंतरा जहा असुरकुमारा जोइसियवेमाणियावि एवं चेव, नवरं जस्स जल्लेसा, दोण्हवि चयणंति भाणियव्वं।

वृ. 'नेरइए णं भंते! नेरइएसु उववज्जइ' इत्यादि, अस्य चायमभिसम्बन्धः–द्वितीयोद्देशके नारकादीनां लेश्यापरिसङ्ख्यानं अल्पबहुत्वं महर्द्धिकत्वं चोक्तं, इह तु तेषामेव नारकादिजीवानां तास्ता लेश्याः किमुपपातक्षेत्रोपपन्नानामेव भवन्ति उत विग्रहेऽपि इत्यस्यार्थस्य प्रतिपादनार्थं प्राक् नयान्तरमाश्रित्य नारकादिव्यपदेशं पृच्छति

'नेरइए णं भंते! नेरइएसु उववज्जइ अनेरइए नेरइएसु उववज्जइ' इति, इदं च प्रश्नसूत्रं सुगमं, भगवानाह–गौतम! नैरयिको नैरयिकेषूत्पद्यते नो अनैरयिकः, कथमिति चेद?, उच्यते, इह यस्मान्नारकादिभवोपग्राहकमायुरेव न शेषं, तथाहि–नारकायुषि उदयमागते नारकभवो भवति मनुष्यायुषि मानुषभव इत्यादि, ततो नारकाद्यायुर्वेदनप्रथमसमये एव नारकादिव्यपदेशं लभते, एतच्च ऋजुसूत्रनयदर्शनं, तथा च नयविद्भिः ऋजुसूत्रनयस्वरूपनिरूपणं कुर्वद्भिरिदमुक्तं–

॥१॥ "पलालं न दहत्यग्निर्भिद्यते न घटः क्वचित्।
नाशून्ये निष्क्रमोऽस्तीह, न च शून्यं प्रविश्यते॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

॥२॥ नारकव्यतिरिक्तश्च, नरके नोपपद्यते।
नरकान्नारकश्चास्य, न कश्चिद्विप्रमुच्यते ॥" इत्यादि,

'एवं जाव वेमाणिए' एवं-नैरयिकोक्तप्रकारेण तावद्वक्तव्यं यावद्वैमानिको-वैमानिकविषयं सूत्रं, तच्च सुगमत्वात् स्वयं परिभावनीयं ॥

अधुना उद्वर्त्तनाविषयं नैरयिकेषु सूत्रमाह- 'नेरइए णं भंते!' इत्यादि, एतदपि ऋजुसूत्रन-यदर्शनेन वेदितव्यं, तथाहि-परभवायुषि उदयमागते तत उद्वर्त्तते यद्भवायुश्चोदयमागतं तेन भवेन व्यपदेशः, यथा नारकायुषि उदयमागते नारकभवेन नारक इति, ततो नैरयिकेभ्योऽनैरयिक एवोद्वर्त्तते न नैरयिक इति। एवं चतुर्विंशतिदण्डकक्रमेण तावत्सूत्रं वक्तव्यं यावद्वैमानिकविषयं, नवरं ज्योतिष्कवैमानिकविषये च्यवनं इत्यभिलापः वक्तव्यः, तेभ्य उद्वर्त्तनस्य च्यवनमिति प्रसिद्धेः, तथा चाह-'एवं जाव वेमाणिए नवर'मित्यादि ॥

अधुना कृष्णलेश्याविषयमुत्पत्तौ सूत्रमाह-'से नूनं भंते!' इत्यादि, सेशब्दोऽथशब्दार्थः स चेह प्रश्ने नूनं-निश्चितमेतत् भदन्त ! कृष्णलेश्यो नैरयिकः कृष्णलेश्येषु नैरयिकेषु मध्ये उत्पद्यते तेभ्यश्च कृष्णवलेश्येभ्यो नैरयिकेभ्य उद्वर्त्तमानः कृष्णलेश्य एवोद्वर्त्तते, एतदेव निश्चयदाढ्योत्पादनार्थं प्रकारान्तरेणाह-यल्लेश्य उत्पद्यते तल्लेश्य उद्वर्त्तते न लेश्यान्तरगत इति भगवानाह-'हंता गोयमा!' इत्यादि, हन्तेत्यनुमतौ अनुमतमेतत् मम गौतम !

'कण्हलेसेसु नेरइए' इत्यादि, अथ कथं कृष्णलेश्यःसन् कृष्णलेश्यषु नैरयिकेषूत्पद्यते न लेश्यान्तरोपेतः?, उच्यते, इह तिर्यक्पश्चेन्द्रियो मनुष्यो वा बद्धायुष्कतया नरकेषूत्पत्ति (तितु)कामो यथाक्रमं तिर्यगायुषि मनुष्यायुषि च साकल्येनाक्षीणेऽन्तर्मुहूर्त्तशषे यल्लेश्येषु नरकेषूत्पत्स्यते तद्गतलेश्यया परिणमति, ततस्तेनैवाप्रतिपतितेन परिणामेन नरकायुः प्रतिसंवेदयते, तत उच्यते कृष्णलेश्यः कृष्णलेश्येषु नैरयिकेषूत्पद्यते न लेश्यान्तरयुक्तः, अथ कथं कृष्णलेश्याक एवोद्वर्त्तते उच्यते, देवनैरयिकाणां हि लेश्यापरिणाम आभवक्षयाद् भवति, एतच्च प्रागेव प्रपञ्चत उपपादितं, एवं नीललेश्याविषयं कापोतलेश्याविषयं च सूत्रं वक्तव्यं, एवं असुरकुमारादीनामपि सनत्कुमारपर्यवसानानां वक्तव्यं, नवरं तेजोलेश्यासूत्रं तत्राभ्यधिकमभिधेयं, तेजोलेश्याया अपि तेषां भावात् ॥

अधुना पृथिवीकायिकेषु कृष्णलेश्याविषयं सूत्रमाह- 'से नूनं भंते!' इत्यादि, इह तिरश्चां मनुष्याणां च लेश्यापरिणाम आन्तर्मुहूर्त्तिकस्ततः कदाचित् यल्लेश्य उद्वर्त्ततते कदाचिल्लेश्यान्तर-परिणतोऽपि उद्वर्त्तते, एष पुनर्नियमो यो यल्लेश्येषूत्पद्यते स नियमतस्तल्लेश्य एवोत्पद्यते,

॥१॥ "अंतमुहुत्तम्मि गए अंतमुहुत्तम्मि सेसए आउं (चेव)।
लेसाहिं परिणयाहिं जीवा वच्चंति परलोयं ॥"

इति वचनात्, तत उक्तं 'गोयमा! कण्हलेसे पुढविकाइए कण्हलेसेसु पुढविकाइएसु उववज्जइ सिय कण्हलेसे उव्वट्टइ' इत्यादि, एवं नीललेश्याविषयं कापोतलेश्याविषयं च सूत्रं वक्तव्यं, तथा यदा भवनपतिव्यन्तरज्योतिष्कसौधर्म्मेशानदेवाः तेजोलेश्यावन्तः स्वभवाच्च्युत्वा पृथिवीकायिकेषूत्पद्यन्ते तदा कियत्कालमपर्याप्तावस्थायां तेषु तेदजोलेश्याऽपि लभ्यते तत ऊद्धर्वं पुन भवति, तथा भवस्वभावतया तेजोलेश्यायोग्यद्रव्यग्रहणशक्त्यसम्भवात्, ततस्तेजोलेश्यासूत्रे

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उक्तं 'तेउल्लेसे उववज्जइ नो चेव णं तेउलेसे उववट्टइ' इति, यथा च पृथिवीकायिकानां चत्वारि सूत्राण्युक्तानि तथाऽप्कायिकवनस्पतिकायिकानामपि वक्तव्यानि, तेषामप्यपर्याप्तावस्थायां तेजोलेश्यासंभवात्, तेजोवायुद्वित्रिचतुरिन्द्रियविषयाणि प्रत्येकं त्रीणि सूत्राणि वक्तव्यानि, तेषां तेजोलेश्याया असम्भवात् ।।

पञ्चेन्द्रियतिर्यग्योनिका मनुष्याश्च यथाऽऽद्यासु तिसृषु लेश्यासु पृथिवीकायिका उक्ताः तथा षट्स्वपि लेश्यासु वक्तव्याः, षण्णामप्यन्यतमया लेश्यया तेषामुत्पत्तिसम्भवात्, उत्पत्तिगतैकैकलेश्याविषये चोद्वर्त्तनायां षण्णां विकल्पनां सम्भवात् सूत्रपाठश्चैवं–'से नूनं भंते कण्हलेसे पंचिंदियतिरिक्खजोणए कण्हलेसेसु पंचिंदियतिरिक्खजोणिएसु उववज्जइ कण्हलेसेसु उववट्टइ जल्लेसे उववज्जइ तल्लेसे उववट्टइ ?, हंता गोयमा !, कण्हलेसे पंचिंदियतिरिक्खजोणिए कण्हलेसेसु पंचिंदियतिपरिक्खजोणिएसु उववज्जइ सिय कण्हलेसे उववट्टइ सिय नीललेसे उववट्टइ सिय काउलेसे उवट्टइ सिय तेउलेसे उववट्टइ सिय पम्हलेसे उववट्टइ सिय सुक्कलेसे उववट्टइ सिय जल्लेसे उववज्जइ तल्लेसे उववट्टइ' एवं नीलकापोततेजःपद्मशुक्ललेश्याविषयाण्यपि सूत्राणि वक्तव्यानि 'वाणमंतरा जहा असुरकुमारा' इति 'जल्लेसे उववज्दजइ तल्लेसे उववट्टइ' इति वक्तव्या इति, सर्वदेवानां लेश्यापरिणामस्याऽऽभवक्षयाद् भावात्,

एवं लेश्यापरिसङ्ख्यानं परिभाव्य ज्योतिष्कवैमानिकविषयाण्यपि सूत्राणि वक्तव्यानि, नवरं तत्र 'चयन्ती'त्यभिलपनीयं, तदेवमेकैकलेश्याविषयाणि चतुर्विंशतिदण्डकक्रमेण नैरयिकादीनां सूत्राण्युक्तानि तत्र कश्चिदाशङ्केत–प्रवितरलैकैकनारकादिविषयमेतत् सूत्रकदम्बकं यदा तु बहवो भिन्नलेश्याकास्तस्यां गतावुत्पद्यन्ते तदाऽन्यथाऽपि वस्तुगतिर्भवेत, एकैकेगतधर्मापिक्षया समुदायधर्मस्य क्वचिदन्यथाऽपि दर्शनात्, ततस्तदाशङ्काऽपनोदाय येषां यावत्यो लेश्याः सम्भवन्ति तेषां युगपत्तावल्लेश्याविषयमेकैकं सूत्रमनन्तरोदितार्थमेव प्रतिपादयति– 'से नूनं भंते ! कण्हलेसे नीललेसे काउलेसे नेरइए कण्हलेसेसु नीललेसेसु काउलेसेसु नेरइएसु उववज्जइ' इत्यादि, समस्तं सुगमं ।

सम्प्रति कृष्णलेश्यादीनैरयिकसत्कावधिज्ञानदर्शनविषयक्षेत्रपरिमाणतारम्यमाह–

***मू. (४६०)** कण्हलेसे णं भंते ! नेरइए कण्हलेसं नेरइयं पणिहाए ओहिणा सव्वओ समंता समभिलोएमाणे केवतियं खेत्तं जाणइ केवइयं खेत्तं पासइ ?, गो० !, नो बहुयं खेत्तं जाणइ नो बहुयं खेत्तं पासइ नो दूरं खेत्तं जाणइ नो दूरं खेत्तं पाशइ इत्तरियमेव खित्तं जाणइ इत्तरियमेव खेत्तं पासइ, से केण० भंते ! एवं वुच्चइ कण्हलेसे णं नेरइए तं चेव जाव इत्तरियमेव खेत्तं पासइ ?, गो० !, से जहा नामए केइ पुरिसे बहुसमरमणिज्जंसि भूमिभागंसि ठिच्चा सव्वओ समंता समभिलोएज्ञा, तए णं से पुरिसे धरणितलगयं पुरिसं पणिहाए सव्वओ समंता समभिलोएमाणे णो बहुयं खेत्तं जाव पासइ जाव इत्तरियमेव खेत्तं पासइ, से तेणट्ठेणं गोयमा ! एवं वुच्चइ कण्हलेसे णं नेरइए जाव इत्तरियमेव खेत्तं पासइ,*

नीललेसे णं भंते ! नेरइए कण्हलेसं नेरइयं पणिहाय ओहिणा सव्वओ समंता समभिलोएमाणे २ केवतियं खेत्तं जाणइ केवतियं खेत्तं पासइ ?, गो० !, बहुतरागं खेत्तं जाणइ बहुतरागं खेत्तं पासइ दूरतरखेत्तं जाणइ दूरतरखेत्तं पासइ वितिमिरतरगं खेत्तं जाणइ वितिमिरतरगं खेत्तं पासइ

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विसुद्धतरागं खेत्तं जाणइ विसुद्धतरागं खेत्तं पासइ,

से केणट्ठेणं भंते! एवं वुच्चइ–नीललेसे णं नेरइए कण्हलेसं नेरइयं पणिहाय जाव विसुद्धतरागं खेत्तं जाणइ विसुद्धतरागं खेत्तं पासइ?, से जहा नामए केइ पुरिसे बहुसमरमणिज्ञाओ भूमिभागाओ पव्वयं दुरूहित्ता सव्वओ समंता समभिलोएज्ञा तए णं से पुरिसे घरणितलगयं पुरिसं पणिहाय सव्वओ समंता समभिलोएमाणे २ बहुतरागं खेत्तं जाणइ जाव विसुद्धतरागं खेत्तं पासइ, से तेणट्ठेणं गोयमा! एवं वुच्चइ–नीललेस्से नेरइए कण्हलेसं जाव विसुद्धतरागं खेत्तं पासइ,

काउलेस्से णं भंते! नेरइए नीललेस्सं नेरइयं पणिहाय ओहिणा सव्वओ समंता समभिलोएमाणे २ केवतियं खेत्तं जाणइ पासइ?, गो० ! बहुतरागं खेत्तं जाणइ पासइ जाव विसुद्धतरागं खेत्तं पासति, से केणट्ठेणं भंते! एवं वु०–काउलेस्से णं नेरइए जाव विसुद्धतरागं खेत्तं पासइ?, गो० से जहा नामए केइ पुरिसे बहुसमरमणिज्ञाओ भूमिभागाओ पव्वयं दुरुहइ २ दोवि पाए उच्चाविया (वइत्ता) सव्वओ समंता समभिलोएज्ञा तए णं से पुरिसे पव्वगयं धरणितलगयं च पुरिसं पणिहाय सव्वओ समंता समभिलोएमाणे बहुतरागं खेत्तं जाणइ बहुतरागं खेत्तं पासइ जाव वितिमिरतरागं पासइ, से तेणट्ठेणं गोयमा! एवं वुच्चइ–काउलेस्से णं नेरइए नीललेस्सं नेरइयं पणिहाय तं चेव जाव वितिमिरतरागं खेत्तं पासइ॥

वृ. 'कण्हलेसे णं भंते!' इत्यादि, कृष्णलेश्यो भदन्त कश्चिनैरयिकोऽपरं कृष्णलेश्याकं प्रणिधाय–अपेक्ष्यावधिनाअवधिज्ञानेन सर्वतः–सर्वासु दिक्षु समन्ततः–सर्वासु विदिक्षु समभिलोकमानो–निरीक्षणमाणः कियत्–किंपरिमाणं क्षेत्रं जानाति कियद्वा क्षेत्रमवधिदर्शनेन पश्यति भगवानाह–गौतम! न बहु क्षेत्रं जानाति नापि बहुक्षेत्रं पश्यति, किमुक्तं भवति?–अपरं कृष्णलेश्याकं नैरयिकमपेक्ष्य न विवक्षितः कृष्णवलेश्याको योग्यतानुसारेणातिविशुद्धोऽपि नैरयिकोऽतिप्रभूतं क्षेत्रमविधिना जानाति पश्यति, तदेवाह–न दूरम्–अतिविप्रकृष्टं क्षेत्रं जानाति नाप्यतिविप्रकृष्टं क्षेत्रं पश्यति, किं तु इत्वरमेव–स्वल्पमेवाधिकं क्षेत्रं जानाति इत्वरमेवाधिकं क्षेत्रं पश्यति, एतच्च सूत्रं समानपृथिवीककृष्णलेश्यनैरयिकविषयमवसेयमन्यथा व्यभिचारसम्भवात्, तथाहि–

सप्तमपृथिवीगतः कृष्णलेश्याको नैरयिको जघन्यतो गव्यूतार्द्धं जानाति उत्कर्षतो गव्यूतं, षष्ठपृथिवीगतः कृष्णलेश्याको जघनयतो गव्यूतमुत्कर्षतः सार्द्ध पञ्चमपृथिवीगतः कृष्णलेश्याको जघन्यतः सार्द्धं गव्यूतमुत्कर्षतः किञ्चिदूने द्वे गव्यूते, ततो द्विगुणत्रिगुणाधिकक्षेत्रमसंमवाद् भवत्यधिकृतसूत्रस्य व्यभिचारः, यथा समानपृथिवीकमपरं कृष्णलेश्याकं न२रयिकमपेक्ष्यातिविशुद्धोऽपि कृष्णलेश्याको नैरयिको मनागधिकं पश्यति नातिप्रभूतं तथा दृष्टान्तेनोपपिपदयिषुराह– 'से केणट्ठेणं भंते!' इत्यादि, इयमत्र भावना–यथा समभूभागव्यवस्थित एव कश्चित् विवक्षितः पुरुषः चक्षुर्नैर्मल्यवशात् मनागधिकं पश्यति न प्रभूततरं तथा विवक्षितोऽपि कश्चित् कृष्णलेश्याको नैरयिकः स्वभूमिकानुसारेणातिविशुद्धोऽपि समानपृथिवीकमपरं कृष्णलेश्याकं नैरयिकमपेक्ष्य यदि परमवधिना मनागधिकं पश्यति न तु प्रभूततरं, अत्र समभूभागस्थानीया समाना पृथिवी स्वभूमिकासमाना च कृष्णरूपा लेश्या चक्षश्रुः''स्थानीयमवधिज्ञानमेतावता चैतदपि ध्वनितं–यथा समभूभागव्यवस्थितः पुरुषः सर्वतः समन्तादभिलोकमानो गर्त्तागतं पुरुषमपेक्ष्यातिप्रभूततरं पश्यति तथा पञ्चमपृथिवीगतः स्वभूमिकानुसारेणातिविशुद्धः कृष्णलश्याको विवक्षितोऽपि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नैरयिकः सप्तमपृथिवीगतं कृष्णलेश्याकमतिमन्दानुभागावधिनैरयिकमपेक्ष्यातिप्रभूतं पश्यति, मागधिकत्रिगुणक्षेत्रसम्भवात् ॥

सम्प्रति नीललेश्याकविषयं सूत्रमाह– 'नीललेसे णं भंते! नेरइए कण्हलेसं नेरइयं पणिहाए' इत्यादि, अक्षरगमनिका सुगमा, नवरं 'वितिमिरतरागं खत्तं जाणइ' इति विगतं तिमिरं– तिमिरसम्पाद्यो भ्रमो यत्र तद्वितिमिरं, इदं वितिमिरमदं वितिमिरमनयोरतिशयेन वितिमिरं वितिमिरतरं 'द्वयोर्विभज्ये तरबि'ति तरप्रत्ययः, ततः प्राकृतलक्षणात् स्वार्थे कप्रत्ययः पूर्वस्य च दीर्घत्वं, अत एव विशुद्धतरं–निर्लमतरं अतीव स्फुटप्रतिभासमितियावत्, भावना त्वियं यथा धरणितलगतं पुरुषमपेक्ष्य पर्वतारूढः पुरुषो ऽतिदूरं क्षेत्रं पश्यति तदपि प्रायः स्फुटप्रतिभासं तथा विवक्षितोऽपि नीललेश्याको नैरयिको योग्यतानुसारेणातिविशुद्धावधिः कृष्णलेश्याकं नैरयिकमपेक्ष्यातिदूरं वितिमिरतरं स्फुटप्रतिभासं च क्षेत्रं जानातीति, अत्र पर्वतस्थानीया उपरितनी तृतीया पृथिवी अतिविशुद्धा च स्वभूमिकानुसारेण नीललेश्या धरणितलस्थानीया अधस्तनी कृष्णलश्या चक्षुःस्थानीयमवधिज्ञानमिति ॥ सम्प्रति नीललेश्याकमपेक्ष्य कापोतलेश्याविषयं सूत्रमाह– 'काउलेस्से णं भंते! नेरइए नीलसेस्सं नेरइयं पणिहाये'त्यादि, अक्षरगमनिका सुगमा, नवरं 'दोवि पाए उच्चावइत्ता' इति द्वावपि पादौ उच्चैः कृत्वा, द्वावपि पाष्णी उत्पाट्येत्यर्थः, भावना त्वियं-यथा पर्वतस्योपरि वृक्षमारूढः सर्वतः समन्तादवलोकमानो बहुतरं पश्यति स्पष्टतरं च तथा कापोतलेश्यो नैरयिकोऽपरं नीललेश्याकमपेक्ष्य प्रभूतं क्षेत्रमवधिना जानाति पश्यति च तदपि च स्पष्टतरमिति, इह वृक्षस्थानीया कापोतलेश्या उपरितनी च पृथिवी पर्वतस्थानीया नीललेश्या तृतीया च पृथिवी चक्षुःस्थानीयमवधिज्ञानमिति ॥

सम्प्रति का लेश्याः कतिषु ज्ञानेषु लभ्यन्ते इति निरूपयितुकाम आह–

मू. (४६१) *कण्हलेसे णं भंते! जीवे कइसु नाणेसु होज्ञा?, गो० ! दोसु वा तिसु वा चउसु वा नाणेसु होज्ञा, तिसु होमाणे आभिनिबोहियसुयनाणे होज्ञा, तिसु होमामे आभिनिबोहिय-सुयनाणओहिनाणेसु होज्ञा, अहवा तिसु होमाणे आभिनिबोहियसुयनाणमनपज्ञवनाणेसु होज्ञा, चउसु होमाणे आभिनिबोहियसुयओहिमनपज्ञवनाणेसु होज्ञा, एवं जाव पम्हलेसे,*

सुक्कलेसेणं भंते! जीवे कइसु नाणेसु होज्ञा?, गो० ! दोसु वा तिसु वा चउसु वा होज्ञा, दोसु होमाणे आभिनिबोहियनाण एवं जहेव कण्हलेसाणं तहेव भाणियव्वं जाव चउहिं, एगंमि नाणे होज्ञा, एगंमि केवलनाणे होज्ञा (पन्नवणाए भगवइए लेस्सापए तइओ उद्देसओ समत्तो ॥)

वृ. 'कण्हलेसे णं भंते! जीवे कइसु नाणेसु होज्ञा' इत्यादि प्रश्नसूत्रं सुगमं, भगवानाह–गौतम द्वयोस्त्रिषु चतुर्षु च ज्ञानेष। भवति, तत्र द्वयोराभिनिबोधिकश्रुतज्ञानयोः त्रिषु आभिनिबोधिक-श्रुतावधज्ञानेषु यदिवाऽऽभिनिबोधिकश्रुतमनःपर्यायज्ञानेषु, इहावधिरहितस्यापि मनः''पर्यव-ज्ञानमुपजायते, सिद्धप्राभृतादावनेकशस्तथा प्रतिपादनात्, अन्यच्च विचित्रा प्रतिज्ञानं तदावरण-क्षयोपशमसामग्री, तत्र कस्यापि चारित्रिणोऽप्परमत्तस्यामर्षौषध्याद्यन्यतमकतिपयलब्धि-समन्वितस्य मनःपर्यायज्ञानावरणक्षयोपशमनिमित्ता सामग्री तथारूपाध्यवसायादिलक्षणा सम्पद्यते न त्ववधित्रानावरणक्षयोपशमनिमित्ता ततस्तस्य मनःपर्यवज्ञानमेव भवति,

ननु मनःपर्यवत्रानमतिविशुद्धस्योपजायते कृष्णलेश्या च संक्लिष्टाध्यवसायरूपा ततः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कथं कृष्णलेश्याकस्य मनःपर्यायज्ञानसम्भवः ?, उच्यते, इह लेश्यानां प्रत्येकासङ्ख्येयलोकाकाशप्रदेशप्रमाणान्यध्यवसायस्थाना, तत्र कानिचित् मन्दानुभावान्यध्यवसायस्थानानि प्रमत्तासंयतस्यापि लभ्यन्ते, अत एव कृष्णनीलकापोतलेश्या अन्यत्र प्रमत्तसंयतान्ता गीयन्ते, मनःपर्यवज्ञानं च प्रथमकतोऽप्रमत्तसंयतस्योत्पद्यते ततः प्रमत्तसंयतस्यापि लभ्यते इति सम्भवति कृष्णलेश्याकस्यापि मनःपर्यवज्ञत्रानं, चतुर्ष्वाभिनिबोधिकश्रुतावधिमनःपर्यवज्ञानेषु,

'एवं जाव पम्हलेसे' इति एवं–कृष्णलेश्योक्तेन प्रकारेण तावद् वक्तव्यं यावत् पद्मलेश्या, किमुक्तं भवति ?–नीललेश्यः कापोतलेश्यः तेजोलेश्यः पद्मलेश्यश्च उक्तप्रकारेण द्वयोस्त्रिषु चतुर्षु वा ज्ञानेषु भणनीयः,स च एवं 'नीललेस्से णं भंते ! जीवे कइसु नाणेसु होज्जा ?, गोयमा ! दोसु वा तिसु वा चउसु वा नाणेसु होज्जा' इत्यादि, शुक्ललेश्येषु विशेष इति तं पृथक् वक्ति–'सुक्कलेसे णं भंते !' इत्यादि, इह शुक्ललेश्यायामेव केवलज्ञानं न लेश्यान्तरे ततः शेषलेश्याकेभ्योऽस्य शुक्ललेश्यस्य विशेषः ॥

<u>पदं – १७, उद्देशकः– ३ – समाप्तः</u>

–: पदं – १७, उद्देशकः– ४ :–

वृ. उक्तस्तृतीयोद्देशकः, सम्प्रति चतुर्थ आरभ्यते, तत्र चेयमादावधिकारगाथा–

मू. (४६२) *परिणामवन्नसगंधसुद्धअपसत्थसंकिलिट्ठुण्ह ।*
गतिपरिणामपदेसोगाढवग्गणठाणाणमप्पबहुं ॥

वृ. प्रथमं परिणामाधिकारः द्वितीयो वर्णाधिकारः तृतीयो रसाधिकारः चतुर्थो गन्धाधिकारः पञ्चमः शुद्धाशुद्धाधिकारः षष्ठः प्रशस्ताप्रशस्ताधिकाः सप्तमः संक्लिष्टासंक्लिष्टाधिकारः अष्टम उष्णशीताधिकारः नवमो गत्यधिकारः दशमः परिणामाधिकारः एकादशोऽप्रदेशः प्रदेशप्ररूपणाधिकारः द्वादशोऽवगाहाधिकारः त्रयोदशो वर्गणाधिकारः चतुर्दशः स्थानप्ररूपणाधिकारः पञ्चदशोऽल्पबहुत्वाधिकारः । तत्र प्रथमं परिणामलक्षणमभिधित्सुर्यासां परिणामो वक्तव्यः ता एव लेश्याः प्रतिपादयति–

मू. (४६३) *कइ णं भंते! लेसाओ पन्नत्ताओ ?, गो० ! छल्लेसाओ पन्नत्ताओ, तंजहा–कण्ह० जाव सुक्कलेसा, से नूनं भंते ! कण्हलेसा नीललेसं पप्प तारूवत्ताए तावण्णत्ताए तागंधत्ताए तारसत्ताए ताफासत्ताए भुज्जो २ परिणमति, हंता गो० ! कण्हलेस्सा नीललेस्सं पप्प तारूवत्ताए जाव भुज्जो २ परिणमति,*

से केणट्ठेणं भंते! एवं वुच्चइ–कण्हलेस्सा नीललेस्सं पप्प तारूवत्ताए जाव भुज्जो २ परिणइमति गो० ! से जहा नामए खीर दूसिं पप्प सुद्धे वा वत्थे रागं पप्प तारूवत्ताए जाव ताफासत्ताए भुज्जो २ परिणमइ, से तेणट्ठेणं गो० ! एवं वुच्चइ–कण्हलेसा नीललेसं पप्प तारूवत्ताए जाव भुज्जो २ परिणमइ, एवं एतेणं अभिलावेणं नीललेसा काउलेसं पप्प काउले० तेउलेसं पप्प तेउले० पम्हलेसं पप्प पम्हले० सुक्कलेसं पप्प जाव भुज्जो २ परिणमइ, से नूनं भंते ! कण्हलेसा नीललेसं काउलेसं तेउलेसं पम्हलेसं सुक्कलेसं पप्प तारूत्ताए तावण्णत्ताए तागंधत्ताए तारसत्ताए ताफासत्ताए भुज्जो २ परिणमइ ?, हंता गोयमा ! कण्हलेसा नीललेसं पप्प जाव सुक्कलेसं पप्प तारूव० तागंध०

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

ताफा० भुज्ञो २ परिणमइ,

से केणट्ठेणं भंते ! एवं वुच्चइ—कण्हले० नीलले० जाव सुक्कलेसं पप्प तारूवत्ताए जाव भुज्ञो २ परिणमइ ?, गोयमा ! से जहा नामए वेरुलियमणी सिया कण्हसुत्तए वा नीलसुत्तए वा लोहिय० हालिद्द० सुक्किल्ल० आइए समाणे तारूव० जाव भुज्ञो २ परिणमइ, से तेणट्ठेणं एवं वुच्चइ—कण्हलेसा नीललेसं जाव सुक्कलेसं पप्प तारूवत्ताए भुज्ञो २ परिणमति ।

से नूनं भंते ! नीललेसा किण्हलेसं जाव सुक्कलेसं पप्प तारूवत्ताए जाव भुज्ञो २ परिणमइ, हंता गोयमा ! एवं चेव, काउलेसा किण्हलेसं नील० तेउ० पम्ह० सुक्कलेसं, एवं तेउलेसा किण्ह० नील० काउ० पम्ह० सुक्कलेसं, एवं पम्हलेसा किण्ह० नील० काउ० तेउ० सुक्कलेसं पप्प जाव भुज्ञो २ परिणमइ ?, हंता गोयमा ! तं चेव, से नूनं भंते ! सुक्कलेसा किण्ह० नील० काउ० तेउ० पम्ह० लेसं पप्प जाव भुज्ञो २ परिणमइ ?, हंता गोयमा ! तं चेव ।

वृ. 'कइ णं भंते ! लेसाओ पन्नत्ताओ' इत्यादि, इदं सूत्रं प्रागप्युक्तं परं परिणामाद्यर्थप्रतिपादनार्थं भूय उपन्यस्तं 'से नूनं भंते' इत्यादि, अथ भदन्त कृष्णलेश्या—कृष्णलेश्यायोग्यानि द्रव्याणि नीललेश्यां—नीललेश्यायोग्यानि द्रव्याणि प्राप्य—अन्योऽन्यावयवसंस्पर्शमासाद्य तद्रूपतया—नीललेश्यारूपतया, रूपशब्दोऽत्र स्वभाववाची, नीललेश्यास्वभावतयेत्यर्थः भूयो भूयः परिणमतीति योगः, तत्स्वभावश्च तद्वर्गणा (द्वर्णा) दिरूपतया भवति तत आह०तद्वर्णतया तद्रसतया तद्गन्धतया तत्स्पर्शतया, सर्वत्रापि तच्छब्देन नीललेश्यायोग्यानि द्रव्याणि परामृशन्ति, भूयो भूयः—अनेकवारं तिर्यग्मनुष्याणां तत्तद्भवसङ्क्रान्तौ शेषकालं वा परिणमते, इदं हि तिर्यग्मनुष्यानधिकृत्य वेदितव्यं,

एवं गौतमेन प्रश्ने कृते भगवानाह—'हंता गो० !' इत्यादि, हन्तेत्यनुमतौ अनुमतमेतत् गौतम ! कृष्णलेश्या नीललेश्यां प्राप्येत्यादि प्रागवत्, इयमत्र भावना—यदा कृष्णलेश्यापरिणतो जन्तुस्तिर्यग्मनुष्यो वा भवान्तरसङ्क्रान्तिं चिकीर्षुर्नीललेश्यायोग्यानि द्रव्याणि गृह्णाति तदा नीललेश्यायोग्यद्रव्यसम्पर्कतस्तानि कृष्णलेश्यायोग्यानि द्रव्याणि तथारूपजीवपरिणामलक्षणं सहकारिकारणमासाद्य नीललेश्याद्रव्यरूपतया परिणमन्ते, पुद्गलानां तथातथापरिणमनस्वभावत्वात्, ततः स केवलनीललेश्यायोग्यद्रव्यसाचिव्यान्नीललेश्यापरिणतः सन् कालं कृत्वा भवान्तरे समुत्पद्यते, उक्तं च—'जल्लेसाइं दव्वाइं परियाइत्ता कालं करेइ तल्लेसे उववज्जइ' इति, तथा स एव तिर्यग्मनुष्यो वा तस्मिन्नेव भवे वर्त्तमानो यदा कृष्णलेश्यापरिणतो भूत्वा नीललेश्याभावेन परिणमते तदापि कृष्णलेश्यायोग्यानि द्रव्याणि तत्कालगृहीतनीललेश्यायोग्यद्रव्यसम्पर्कतो नीललेश्यायोग्यद्रव्यरूपतया परिणमन्ते, अमुमेवार्थं दृष्टान्तेन विभावयिषुः प्रथमं प्रश्नसूत्रमाह—

से केणट्ठेणं भंते !' इत्यादि, सुगमं भगवानाह—गौतम ! 'से जहानामए खीरे' इत्यादि, ततः लोकप्रसिद्धं यथानामकं गोक्षीरम् अजाक्षीरं महिषीक्षीरमित्यादिनामकं क्षीरं 'दूसि' मिति देशीवचनाद्दूष्यमेत्त मथितं तक्रं प्राप्यान्योऽन्यावयवसंस्पर्शेनाविभागं गत्वा यथा च शुद्धं—मलरहितं समले हि रागः सम्पद्यमानोऽपि न तथारूपो लगति तत उक्तं शुद्धं वस्त्रं—चेलं रज्यतेऽनेनेति रागः 'करणे धञ' तं – मञ्जिष्ठादिकं प्राप्य तद्रूपतया– मञ्जिष्ठादिरागद्रव्यस्वभावतया, एतदेव व्याचष्टे–'तद्वर्णतये' त्यादि, सुगमं,

तथा कृष्णलेश्यायोग्यानि द्रव्याणि नीललेश्यायोग्यानि द्रव्याणि प्राप्य तद्रूपतया परिणमन्ते,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इयमत्र भावना–यथा क्षीरलक्षणकारणगता रूपादयस्तक्ररूपादिभावं प्रतिपद्यन्ते यथा वा शुद्धवस्त्रकारणगता रूपदयो मञ्जिष्ठादिरागद्रव्यारूपादिभावं प्रतिपद्यन्ते तथा कृष्णलेश्यायोग्यद्रव्यरूपकारणगता रूपादयो नीललेश्यायोग्यद्रव्यरूपादिभावं प्रतिपद्यन्ते, 'से तेणट्ठेण' मित्याद्युपसंहारवाक्यं सुगमं, एवं नीललेश्या कापोतलेश्यां प्राप्येत्यादीन्यपि चत्वारि सूत्राणि भावनीयानि, तदेवं पूर्वस्याः पूर्वस्या लेश्याया उत्तरामुत्तरां लेश्यां प्रतीत्य तद्रूपतया परिणमनमुक्तं, इदानीमेकैकस्याः लेश्याया यथायोगं क्रमेण शेषसमस्तलेश्यापरिणमनमाह–'से नूनं भंते ! कण्हलेसा नीललेस्सं काउलेस्स' मित्यादि, वाशब्दोऽत्र सर्वत्राप्यनुक्तो द्रष्टव्यः, नीललेश्यां वा कापोतलेश्यां वा यावत् शुक्ललेश्यां वा, एकस्या लेश्यायाः परस्परविरुद्धतया युगपदनेकलश्यापरिणामसंभवात्, शेषाऽक्षरगमनिका प्रागवत्, अत्रैवार्थे दृष्टान्तमभिधित्सुरिदमाह–

'स केणट्ठेणं भंते !' इत्यादि सुगमं, नवरं यथा वैडूर्यमणिरेक एव तत्तदुपाधिद्रव्यसम्पर्कतस्तद्रूपतया परिणमते तथैवल तान्यपि कृष्णलेश्यायोग्यानि द्रव्याणि तत्तन्नीलादिलेश्यायोग्यद्रव्यसम्पर्कतस्तत्तद्रूपतया परिणमन्ते इति, एतावताऽंशेन दृष्टान्तो नतु पुनर्यथा वैडूर्यमणिः स्वस्वरूपमजहानस्तत्तदुपाधिद्रव्यसम्बन्धस्तत्तदाकारमात्रभाजितया तत्तद्रूपतया परिणमते तथैतान्यपि कृष्णलेश्यायोग्यानि स्वस्वरूपमजहानान्येव द्रव्याणि तत्तन्नीलादिलेश्यायोग्यद्रव्यसम्पर्कतस्तत्तदाकारमात्रधारितया तत्तद्रूपतया परिणमन्ते इत्यनेनांशेन, तिरश्चां मनुष्याणां च लेश्याद्रव्याणां सामस्त्येन तद्रूपतया परिणामाभ्युपगमात्, अन्यथा नैरयिकदेवसत्कलेश्याद्रव्याणामिव तिर्यग्मनुष्याणामपि लेश्याद्रव्याणां सर्वथा स्वरूपापरित्यागेन चिरकालमवस्थानसंभवात्, यत उत्कर्षशतोऽप्येषामन्तर्मुहूर्त्तलक्षणं स्थितिपरिमाणमन्यत्रोक्तं तद्विरुधयते, पल्योपमत्रयमपि यावत् उत्कर्षतः स्थितिसंभवात्, तदेवं तदन्यलेश्यापञ्चकपरिणाममधिकृत्य कृष्णलेश्याविषयं सूत्रमुक्तं,

एवं नीलादिलेश्याविषयाण्यपि प्रत्येकं तदन्यलेश्यापञ्चकपरिणाममधिकृत्य पञ्च सूत्राणि द स्तव्यानि, तदेवं तिर्यङ्मनुष्याणां भवसङ्क्रान्तौ शेषकालं च लेश्याद्रव्यपरिणाम उक्तः, देवनैरयिकसत्कानि तु लेश्याद्रव्याणि आभवक्षयमवस्थितानि यत्तदन्यलेश्याद्रव्यसंपर्कत आकारमात्रं तदत्रैव वक्ष्यते। तत उक्तः परिणामलक्षणाधिकारः।

अधुना वर्णाधिकारमभिधित्सुराह–

मू. (४६४) *कण्हलेसा णं भंते ! वन्नेणं केरिसिया पन्नत्ता ?, गो० ! से जहा नामए जीमूते इ वा अंजणे इ वा खंजणे इ वा कज्जले इ वा गवले इ वा गवलए इ वा जंबूफले इ वा अद्दारिट्ठपुप्फेइ वा परपुट्ठेइ वा भमरेइ वा भमरावली इ वा गयकलभे इ वा किण्हकेसरे इ वा आगासथिग्गले इ वा किण्हासोए इ वा कण्हकणवीरए इ वा कणहबंधुजीवए इ वा, भवे एतारूवे ?, गो० ! णो इणट्ठे समट्ठे, कण्हलेस्सा णं इत्तो अनिट्ठयरिया चेव अकंतयरिया चेव अप्पियतरिया चेव अमणुन्नतरिया चेव अमणामतरिया चेव वन्नेणं पन्नत्ता,*

नीललेस्सा णं भंते ! केरसिया वन्नेणं पन्नत्ता ?, गोयमा ! से जहा नामए भिंगए इ वा भिंगपत्ते इ वा चासे इ वा चासपिच्छए इ वा सुए इ वा सुयपिच्छे इ वा सामा इ वा वणराइ इ वा उच्चंतए इ वा पारेयवगीवा इ वा मोरगीवा इ वा हलहरवसणे इ वा अयसिकुसुमे इ वा वणकुसुमे इ वा अंजणकेसियि [इ वा] कुसुमे इ वा नीलुप्पले इ वा नीलासोए इ वा नीलकणवीरए इ वा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नील- बंधुजीवे इ वा, भवेयारूवे ?, गो० ! नो इणट्ठे समट्ठे, एत्तो जाव अमणामयरिया चेव वन्नेणं प०

काउलेस्सा णं भं० ! केरिसिया वन्नेणं पन्नत्ता ?, गोयमा ! से जहानामएखदिरसारए इ वा कइरसारए इ वा धमाससारे इ वा तंबे इ वा तंबकरोडे इ वा तेवच्छिवाडियाए इ वा वाइंगणिकुसुमे इ वा कोइलच्छदकुसुमे इ वा जवासाकुसुमे इ वा, भवेयारूवे ?, गोयमा ! नो इणट्ठे समट्ठे, काउलेस्सा णं एत्तो अनिट्ठयरिया चेव जाव अमणामयरिया चेव,

तेउलेस्सा णं भंते ! केरिसिया वन्नेणं पन्नत्ता ?, गोयमा ! से जहानामए ससरुहिरए इ वा उरब्भरुहिरे इ वा वराहरुहिरे इ वा संबररुहिरे इ वा मणुस्सरुहिरे इ वा इंदगोपे इ वा बालेंदगोपे इ वा बालदिवायरे इ वा संझारागे इ वा गुंजद्धरागे इ वा जातिहिंगुले इ वा पवालंकुरे इ वा लक्खारसे इ वा लोहियक्खमणी इ वा किमिरागकंबले इ वा गयतालुए इ वा चीणपिट्ठरासी इ वा परिजायकुसुमे इ वा जासुमणकुसुमे इ वा किंसुयपुप्फरासी इ वा रत्तुप्पले इ वा रत्तासोगे इ वा रत्तकणवीरए इ वा रत्तबंधुयजीवए इ वा, भवेयारूवे ?, गोयमा ! नो इणट्ठे समट्ठे, तेउलेसा णं एत्तो इट्ठतरिया चेव जाव मणामतरिया चेव वन्नेणं पन्नत्ता,

पम्हले० भंते ! केरिसिया वन्नेणं पन्नत्ता ?, गोयमा ! से जहनामए चंपे इ वा चंपयछल्ली इ वा चंपयभेदे इ वा हालिद्दा इ वा हालिद्दगुलिया इ वा हालिद्दभेदे इ वा हरियाले इ वा हरियालगुलिया इ वा हरियालभेदे इ वा चिउरे इ वा चिउररागे इ वा सुवन्नसिप्पी इ वा वरकणगणिहसे इ वा वरपुरिसवसणे इ वा अल्लइकुसुमे इ वा चंपयकुसुमे इ वा कण्णणियारकुसुमे इ वा कुहंडयकुसुमे इ वा सुवण्णजुहिया इ वा सुहिरन्नियाकुसुमे इ वा कोरिंटमल्लदामे इ वा पीतासोगे इ वा पीतकणवीरे इ वा पीतंबंधुजीवए इ वा, भवेयारूवे ?, गोयमा ! नो इणट्ठे समट्ठे, पम्हलेस्सा णं एत्तो इट्ठतरिया जाव मणामयरिया चेव वन्नेणं पन्नत्ता,

सुक्कलेस्सा णं भंते ! केरिसिया वन्नेणं पन्नत्ता ?, गोयमा ! से जहानामए अंके इ वा संखे इ वा चंदे इ वा कुंदे इ वा दगे इ वा दगरए इ वा दधी इ वा दहिघने इ वा खीरे इ वा खीरपूरए इ वा सुक्कच्छिवाडिया इ वा पेहुणइमिंजिया इ वा धंतधोयरुप्पपट्टे इ वा सारदबलाहए इ वा कुमुददले इ वा पोंडरीयदले इ वा सालिपिट्ठरासीति वा कुडगपुप्फरासीति वा सिंदुवारमल्लदामे इ वा सेयासोए इ वा सेयकणवीरे इ वा सेतबंधुजीवए इ वा, भवेयारूवे ?, गो० ! नो इणट्ठे समट्ठे, सुक्कलेसा णं एत्तो इट्ठतरिया चेव मणुण्णयरिया चेव वन्नेणं पन्नत्ता,

एयाओ णं भंते ! छल्लेसाओ कइसु वन्नेसु साहिज्जंति ?, गोयमा ! पंचसु वन्नेसु साहिज्जंति, तंजहा–कण्हलेसा कालए णं वन्नेणं साहिज्जति नीललेस्सा नीलवन्नेणं साहिज्जति काउलेस्सा काललोहिएणं वन्नेणं साहिज्जति तेउलेस्सा लोहिएणं वन्नेणं साहिज्जति पम्हलेस्सा हालिदएणं वन्नेणं सलाहिज्जइ सुक्कलेस्सा सुक्किल्लएणं वन्नेणं साहिज्जति ।

वृ. 'कण्हलेसा णं भंते ! वण्णेणं केरिसिया पन्नत्ता' इत्यादि, कृष्णद्रव्यात्मिका लेश्या कृष्णलेश्या, कृष्णलेश्यायोग्यानि द्रव्याणि इत्यर्थः, तेषामेव वर्णादिसंभवात् न तु कृष्णद्रव्यजनिता भावरूपा कृष्णलेश्या, तस्या वर्णाद्ययोगात्,

भदन्त ! कीदृशी वर्णेन प्रज्ञप्ता ?, भगवानाह–गौतम ! स लोकप्रसिद्धो यथानामको 'जीभूत इति वा' जीमूतो बलाहकः, स चेह प्रावृट्प्रारम्भसमयभावी जलभृतो वेदितव्यः,तस्यैव

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रायोऽतिकालिमसंभवात्, इतिशब्द उपमानभूतवस्तुनामपरिसमाप्तिद्योतकः वाशब्द उपमानान्तरापेक्षया समुच्चये, एवं सर्वत्र इतिवाशब्दौ द्रष्टव्यौ, अञ्जनं-सौवीराञ्जनं रत्नविशेषो वा स्वञ्जनं-दीपमल्लिकामलः स्नेहाभ्यक्तशकटाक्षघर्षणोद्भवमित्यपरे कज्जलं-प्रतीतं गवलं०माहिषं श्रृङ्गं तदपि च उपरितनत्वग्भागापसारणे द्रष्टव्यं, तत्रैव विशिष्टस्य कालिम्नः सम्भवात्, जम्बूफलं प्रतीतं, अरिष्ठकं-फलविशेषः परपुष्टः-कोकिलः भ्रमरः-चंचरिकःभ्रमरावलिः-भ्रमरपङ्क्तिः गजकलभः-करिपोतः कृष्णकेशरः-कृष्णबकुलः आकाशथिग्गलं-शरदि मेघापान्तरालवर्त्याकाशखण्डं, तदपि हि अतीव कृष्णं प्रतिभाति इत्युक्तं, कृष्णाशोककृष्णकणवीरकृष्णबन्धुजीवाः-अशोककणवीरबन्धुजीवाः वृक्षविशेषाः, अशोकादयो हि जातिभेदेन पञ्चवर्णा भवन्ति ततःशेषवर्णव्युदासार्थं कृष्णग्रहणं,

एतावत्युक्ते गौतम आह-'भवे एयारूवा ?' भगवन् ! भवेत् कृष्णलेश्या वर्णेन एतद्रूपा भगवानाह-गौतम ! नायमर्थः समर्थः-नायमर्थ उपपन्नः, एतद्रूपा कृष्णलेश्येति, किंतु ?, सा कृष्णलेश्या इतो जीमूतादेःकृष्णेन वर्णे अनिष्टतरिका चैव इयमनिष्टा २ इयमनयोर्मध्येऽतिशयेनानिष्टा अनिष्टतरा अनिष्टतरैवानिष्टतरिका अनिप्सिततरिका एवेति भावः, इह किञ्चिदनिष्टमपि स्वरूपतः कान्तं भवति ततः कान्तताव्युदासार्थमाह-अकान्ततरिकैव, किञ्चित्केषाञ्चिदनिष्टमपि स्वलरूपतोऽकान्तमपि अपरेषां प्रियं भवति ततः सर्वथा प्रियताव्युदासार्थमाह-अप्रियतरिकैव, अत एवामनोज्ञतरिकैव, वस्तुतः सम्यक् परिज्ञाने सति मनागप्युपादेशतया तत्र मनसः प्रवृत्त्यसंभवात्, अमनोज्ञतरमपि किञ्चिन्मध्यमं भवति ततः प्रकृष्टतरप्रकर्षविशेषप्रतिपादनार्थमाह-अमनआपतरिकैव, मनांसि आप्नोतिआत्मवशातां नयतीति मनआपा न मनआपा अमनआपा ततो द्वयोः प्रक्रषे तरप् एवंभूता वर्णेन प्रज्ञप्ता,

'नीललेस्सा णं भंते !' इत्यादि, अक्षरगमनिका प्राग्वत्, नवरं भृङ्गः-पक्षिविशेषः पक्ष्मलः भृङ्गपत्रं-तस्यैव पक्षिविशेषस्य पक्ष्म चासः-पक्षिविशेषः 'चासपिच्छं' चासस्य पतत्रं शुकः-कीरः 'शुकपिच्छं' शुकस्य पतत्रं श्यामा-प्रियङ्गुः वनराजी-प्रतीता उच्चन्तको-दन्तरागः आह च मूलटीकाकारः-"उच्चंतगो दन्तरागो भन्नइ" पारापतग्रीवा मयूरग्रीवा च सुप्रतीता, हलधरो-बलदेवः तस्य वसनं-वस्त्रं हलधरवसनं, तद्धि नीलं भवतीत्युपात्तं, अतसीकुसुमं वणवृक्षकुसुमं च प्रतीतं, अञ्जनकेसिका-वनस्पतिविशेषः तस्याः कुसुमं अञ्जनकेसिकाकुसुमं नीलोत्पलं-कुवलयं नीलशोकनीलकणवीरनीलबन्धुजीवा-अशोकादिवृक्षविशेषाः,

'काउलेस्सा णं भंते !' इत्यादि, अत्राप्यक्षरगमनिका प्राग्वत्, खदिरसारो धमासासारश्च लोकप्रतीतः 'तंबे इ वा तंबकरोडए इ वा तंबछेवाडिया इ वा' इति सम्प्रदायादवसेयं वृन्ताकीकुसुमं प्रतीतं कोइलच्छदकुसुमए वेति-कोकिलच्छदः-तैलकंटकः, तथा च मूलटीकाकृत्-'वन्नाहिगारे जो एत्थ कोइलच्छदो सो तिलकंटओ भन्नइ' इति, तस्य कुसुमं प्रतीतं

'तेउलेस्सा णं भंते !' इत्यादि, शशकोरभ्रवराहमनुष्यरुधिराणि शेषरुधिरभ्यो लोहितवर्णोत्कटानि भवन्ति तत एतेषामुपादानं, बालेन्द्रगोपकः-सद्योजातः इन्द्रगोपकः, स हि प्रवृद्धः सन् ईषत्पाण्डुरक्तो भवति ततो बालग्रहणं, इन्द्रगोपकः-प्रावृट्प्रथमसमयभावी कीटविशेषः, बालदिवाकारः-प्रथममुद्गच्छन् सूर्यः, गुञ्जा-लोकप्रतीता तस्या अर्धरागो गुञ्जार्धरागः, गुञ्जाया

Jain Education International For Private & Personal Use Only www.jainelibrary.org

हि अर्धमतिरक्तं भवति अर्धं चातिकृष्णमिति अर्धग्रहणं, जात्यः–प्रधानो हिङ्गुलको जात्यहिङ्गुलकः प्रवालः–शिलादलं तस्याङ्कुरः प्रवालाङ्कुरः, स हि प्रथममुद्गच्छन् अत्यन्तरक्तो भवति ततस्तदुपादानं, लाक्षारसः–प्रतीतः, लोहिताक्षमणिः–लोहिताश्रमाना रत्नविशेषः कृमिरागेण रक्तः कम्बलः कृमिरागकम्बलः, शाकपार्थिवादिदर्शनान्मध्यपमपदलोपी समासः, गजतालुचीनपिष्ठराशिपारिजातकुसुमजपाकुसुमकिंशुकपुष्पराशिरक्तोत्पलरक्ता शोकरक्तकण-वीररक्तबनअधुजीवा लोकप्रतीताः 'भवे एयारूवा' इति पदयोजना प्राग्वत्,

भगवानाह–'गौतम ! णो इणट्ठे समट्ठे' यतस्तेजोलेश्या इतः–शशकरुधिरादिभ्यो लोहितेन वर्णेनेष्टतरिकैव, तत्र किञ्चिदकान्तमपि केषांचिदिष्टतरं भवति ततः कान्ततरताप्रतिपाद-नार्थमाह–कान्ततरिकैव, केषाञ्चिदिष्टतरमपि स्वरूपतः कान्ततरमप्यपरेषामप्रियं भवति ततः प्रियतरताप्रतिपत्त्यर्थमाह–प्रियतरिकैव, अत एव मनोज्ञतरिका, मनोज्ञतरमपि किञ्चिन्मध्यमं संभवेदतः प्रकृष्टतरप्रकर्षविशेषप्रतिपादनार्थमाह–मनआपतरिकैव वर्णेन प्रज्ञप्ता,

'पम्हलेस्सा णं भंते !' इत्यादि, अक्षरगमनिका प्राग्वत्, नवरं चम्पकः–सामान्यतः सुवर्ण-चम्पको–वृक्षविशेषः 'चम्पकछल्ली इ वा' इति सुवर्णचमपकत्वक् 'चम्पकभेए इ वा' इति सुवर्णचम्प-कस्य भेदो द्विधाभावः,भिन्नस्य हि वर्णप्रकर्षो भवति ततो भेदग्रहणं, हरिद्रा इह पिण्डहरिद्रा हरिद्रागुटिका–हरिद्रानिर्वर्त्तिता गुटिता हरिद्राभेदो–हरिद्राया द्वैधीभावः हरितालो–धातुविशेषः हरितालगुटिका–हरितालमयी गुटिता हरितालभेदो–हरितालच्छेदः चिकुरः–पीतद्रव्यविशेषः-चिकुररागः–तन्निष्पादतो वस्त्रादौ रागः 'सुवन्नसिप्पी इ वा' इति सुवर्णमयी शुक्तिका, वरं–प्रधानं यत्कनकं तस्य निकषः–कषपट्टके रेखारूपः वरकनकनिकषः वरपुरूषः–वासुदेवस्तस्य वसनं–वस्त्रं वरपुरुषवनं तद्धि पीतं भवतीत्युपात्तं अल्लकीकुसुमं लोकतोऽवसेयं चम्पककुसुमं–सुवर्णचम्पक-वृक्षपुष्पं 'कन्नियारकुसुमेइ वा' इति काञ्चनारककुसुमं कूष्मैण्डिकाकुसुमं–पुष्पा (पुंस्क) लिकापुष्पं सुवर्णयूथिकाकुसुमं प्रतीतं सुहिरण्यिका–वनस्पतिविशेषस्तस्याः कुसुमं कोरण्टकमाल्यदामपीता-शोकपीतकणवीरपीतबन्धुजीवाः प्रतीता,

'सुक्कलेसा णं भंते' इत्यादि, अत्राप्यक्षरगमनिका प्राग्वत्, नवरमङ्करत्नविशेषः शङ्खचन्द्रौ प्रतीतौ कुन्दं–कुसुमंदकं–उदकं उदकरजः–उदककणाः,ते हि अतिशुभ्रा भवन्तीत्युपात्ताः, दधि–प्रतीतं दधिघनो–दधिपिण्डः क्षरं–प्रतीतं क्षीरपूरं–क्वथ्यमानं अतितापादूर्ध्वं गच्छत् क्षीरं 'सुक्कच्छिवाडियाइ वा' इति छइवाडिः–वल्लादिफलिकासा च शुष्का सति विलसातीव शुक्ला भवतीत्युपात्ता 'पेहुणमिंजिया इवे'ति पेहुणं–मयूरपिच्छं तन्मध्यवर्त्तिनी मिञ्जा पिहुणिञ्जा सा चातीव शुक्लेत्याभिहिता 'धंतधोयरुप्पपट्टे इ वा' इति ध्मातः–अग्निसम्पर्कतो निर्मलीकृतः धौतो–भीतिखरण्टितहस्तसम्मार्जनेनातिनिशितीकृतो यो रूप्यमयः पट्टः स ध्मातधौतरूप्यपट्टः, 'सारइयबलाहगे इ व' इति शारदिकः–शरत्कालभावी बलाहकः पुण्डरीकं–सिताम्बुजं तस्य दलं–पत्रं पुण्डरीकदलं शालिपिष्ठारशिकुटजपुष्पराशिसिन्दुवारमाल्यादामश्वेताशोकश्वेतकणवीर-श्वेतबन्धुजीवाः प्रतीताः ॥

इह वर्णाः पञ्चभवन्ति, तद्यथा–कृष्णो नीलो लोहितो हारिद्रः शुक्लश्च, लेश्याश्च षट्, तत उपमानतो वर्णनिर्देशे कृतेऽपि संशयः का लेश्या कस्मिन्वर्णे भवति ?, ततः पृच्छति–'एयाओ

Jain Education International For Private & Personal Use Only www.jainelibrary.org

णं भंते ?' इत्यादि, एता अनन्तरोदिता भदन्त ! षड् लेश्याः 'कइसु वन्नेसु 'त्ति प्राकृतत्वात् तृतीयार्थे सप्तमीयथा–"तिसु तेसु अलंकिया पुढवी [त्रिभिस्तैरलंकृता पृथ्वी] इत्यत्र, ततोऽयमर्थः– कतिभिर्वर्णैः 'साहिज्जंति' कथ्यंते प्ररूप्यंते इतियावत्, भगवानाह–गौतम ! 'पंचसु वन्नेसु' इति पञ्चभिर्वर्षैः शिष्यंते यथा शिष्यंते तथा यद्यथा इत्यादिना दर्शयति ।। उक्तो वर्णपरिणामः, सम्प्रति रसपरिणाममभिधित्सुराह–

मू. (४६५) *कण्हलेस्सा णं भंते ! केरिसिया आसाएणं पन्नत्ता ?, गोयमा ! से जहानामए निंबे इ वा निंबसारे इ वा निंबछल्ली इ वा निंबफाणिए इ वा कडए इ वा कुडगफलए इ वा कुडगछल्ली इ वा कुडगफाणिए इ वा कडुगतुंबीइ वा कडुगतुंबिफले इ वा खारतउसी इ वा खरतउसीफले इ वा देवदालीति वा देवदालीपुप्फे इ वा मिगवालुंकी इ वा मियवालुंकीफले इ वा घोसाडए इ वा घोसडिफले इ वा कण्हकंदए इ वा वज्रकंदए इ वा, स भवेयारूवे ?, गो० ! नो इणट्ठे समट्ठे, कण्हलेसा णं एत्तो अनिट्ठतम्मि चेव जाव अमणामयरिया चेव आसाएणं पन्नत्ता,*

नीललेसाए पुच्छा, गोयमा ! से जहनामए भंगीति वा भंगीरए इ वा पाढा इ वा [चविया इ वा] चित्तामूलए इ वा पिप्पली इ वा पिप्पलीमूलए इ वा पिप्पलीचुण्णे इ वा मिरिए इ वा मिरियचुण्णए इ वा सिंगबेरे इवा सिंगबेरचुण्णे इ वा, भवेयारूवे ?, गोयमा ! नो इणट्ठे समट्ठे, नीललेस्सा णं एत्तो जाव अमणामतरिया चेव आसाएणं पन्नत्ता,

काउलेस्साए पुच्छा, गोयमा ! से जहनामाए अंबाण वा अंबाडगण वा माउलिंगाण वा बिल्लाण वा कविट्ठाण वा [भज्ञाण वा] फणसाण वा दाडिमाण वा पारेवताण वा अक्खोडयाण वा बोराण वा तिंदुयाण वा अपक्काणं अपरिवागाणं वन्नेणं अनुववेयाणं गंधेणं अनुववेयणाणं फासेणं अनु०, भवेरूवे ?, गो० ! नो इणट्ठे समट्ठे, जाव एत्तो अमणामयरिया चेव काउलेस्सा अस्साएणं पन्नत्ता, तेउलेस्सा णं पुच्छा, गोयमा ! से जहानामए अंबाण वा पक्काणं परियावन्नेणं उववेयाणं पसत्थेणं जाव फासेण जाव एत्तो मणामयरिया चेव तेउलेस्सा आसाएणं पन्नत्ता,

पम्हलेस्साए पुच्छा, गोयमा ! से जहानामए चंदप्पाभा इ वा मनसिला इ वा वरसीधू इ वा वरवारुणी इ वा पत्तासवे इ वा पुप्फासवे इ वा फलासवे इ वा चोयासवे इ वा आसवे इ वा महूइ वा मेरएइ वा कविसाणए इ वा खज्जूरसारए इ वा मुद्दियासारए इ वा सुपक्कखोतरसे इ वा अट्ठपिट्ठनिट्ठिया इ वा जंबुफलकालिया इ वा वरप्पसन्ना इ वा आसला मंसला पेसला ईसं ओट्ठवलंबिणी इसं वोच्छेदकडुई ईसिं तंबच्छिकरणी उक्कोसमदपत्तावन्नेणं उववेया जाव फासेणं आसायणिज्जा वीसायणिज्जा पीणणिज्जा विंहणिज्जा दीवणिज्जा दप्पणिज्जा मदणिज्जा सव्वेंदियगायपल्हायणिज्जा, भवेयारूवा ?, गो० ! नो इणट्ठे समट्ठे पम्हलेस्सा एत्तो इट्ठतरिया चेव जाव मणामयरिया चेव आसाएणं पन्नत्ता,

सुक्कले० भंते ! केरिसिया आस्साएणं पन्नत्ता ?, गोयमा ! से जहानामए गुले इ वा खंडे इ वा सक्करा इ वा मच्छंडिया इ वा पप्पडमोदए वा भिसकंदए इ वा पुप्फुत्तरा इ वा पउमुत्तरा इ वा आदंसिया इ वा सिद्धित्थिया इ वा आगासफालितोवमा इ वा उवमा इ वा अनोवमा इ वा, भवेतारूवे ?, गोयमा ! नो इणट्ठे समट्ठे, सुक्कलेस्सा एत्तो इट्ठतरिया चेव पियतरिया चेव मणामयरिया चेव आसाएणं पन्नत्ता ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ. 'कण्हलेसा णं भंते !' इत्यादि प्रश्नसूत्रं सुगमं, भगवानाह–गौतम ! स लोकप्रतीतो यथानामको निम्बो वृक्षविशेषः निम्बसारो–निम्बमध्यवत्यवयवविशेषः 'निम्बछल्ली' निम्बत्वक् निम्बफाणितं–निम्बक्काथः कुटजोवृक्षविशेषः तस्यैव फलं कुटजफलं तस्यैव त्वक् कुटजछल्ली तस्यैव क्वाथं–कुटजफाणितं कुटुकतुम्बी प्रसिद्धा तस्या एव फलं कटुकटुम्बीफलं, खारतउसीति खारशब्दः कटुकवाची तथाऽऽगमे अनेकधा प्रसिद्धेः, ततः कटुका त्रपुषी क्षारत्रपुषी तस्या एव फलं क्षारत्रपुषीफलं देवदाली–रोहिणी तस्या एव पुष्पं देवदालीपुष्पं मृगवालुङ्की–लोकतोऽवसेया तस्या एव फलं मृगवालुङ्कीफलं घोषातकी प्रसिद्धा तस्या एव फलं घोषातकीफलं कृष्णकन्दो–वज्रकन्दश्चानन्तकायवनस्पतिविशेषौ लोकतः प्रत्येतव्यौ, एतावति उक्ते गौतमः पृच्छति–भगवन् भवेत् रसतः कृष्णलेश्या एतद्रूपा–निम्बादिरूपा ? भगवानाह–गौतम ! नायमर्थः समर्थः, यतः कृष्णलेश्या इतो–निम्बादिरसमधिकृत्यानिष्टतरिकैवेत्यादि प्राग्वत् ।

'नीललेसाए' इत्यादि, भङ्गी–वनस्पतिविशेषः तस्या एव रजो भङ्गीरजः पाठाचित्रमूलके लोकप्रतीते पिप्पलीपिप्पलीमूलपिप्पलीचूर्णमरिचमरिचचूर्णशृङ्गबेरशृङ्गबरचूर्णान्यपि प्रसिद्धानि 'काउलेस्साए' इत्यादि, आम्राणां फलानामेवं सर्वत्रापि भावनीयं 'अंबाडयाण वा' इति आम्राटकाः–फलविशेषाः मातुलिङ्गबिल्वकपित्थपनसदाडिमानि प्रतीतानि पारापताः–फलविशेषाः अक्षोडवृक्षफलानि अक्षोडानि बोरवृक्षफलानि बोराणि–बदराणि तिन्दुकानि च प्रतीतानि, एतेषां फलानामपक्वानां, तत्र सर्वथापि अपक्व फलमुच्यते तत आह–अपरिपाकानां न विद्यते परिपाकः–परिपूर्णः पाको येषां तान्यपरिपाकानि तेषामीषत्पक्कानामित्यर्थः, एतदेव वर्ण्णादिभिः कथयति–वर्ण्णेनातिविशिष्टेन गन्धेन घ्राणेन्द्रियनिर्वतिकरणे स्पर्शेन विशिष्टपरिपाकाविनाभाविना अनुपपेतानां–असम्प्राप्तानां यादृशो रसः, अत्र गौतमः पृच्छति–एतद्रूपा–एवंरूपरसोपेता भवेत् कापोतलेश्या ?, भगवानाह–गौतम ! नायमर्थः समर्थः, किं तु इतः–अपरिपक्वाम्रफलादेर-निष्टतरिकैवेत्यादि प्राग्वत् ।

'तेउलेस्सा णं भंते !' इत्यादि, तेषामेव आम्रफलादीनां पक्वानां तत्रेषद्यत् किमपि पक्वं लोके पक्वं व्यवह्यिते तत आह–पर्यायापन्नानां–परिपूर्णपाकपर्यायप्राप्तानां, एतदेवं वर्णादिभिर्नि-रूपयति–वर्ण्णेन प्रशस्तेन–एकान्ततः प्रशस्येन तथा प्रशस्तेन गन्धेन प्रशस्तेन स्पर्शेनोपेतानां यादग् रसः, एतावत्युक्ते गौतम आह–रसमधिकृत्य एतद्रूपा–पक्वाम्रादिफलरूपा तेजोलेश्या भवेत् ?, भगवानाह–नायमर्थः समर्थः, किंतु परिपक्वाम्रफलादेरिष्टतरिकैवेत्यादि प्राग्वत्,

'पम्हलेसाए पुच्छा' सूत्रपाठोऽक्षरगमनिका च प्राग्वत्, नवरं 'से जहानामए' इति सा–लोकप्रसिद्धा 'यथा' येन प्रकारेण नाम यस्याः सा यथानामिका पुंस्त्वं सूत्रे प्राकृतलक्षणवशात्, प्राकृते हि लिङ्गमनियतं, यदाह पाणिनिः स्वप्राकृतलक्षणे–'लिङ्गं व्यभिचार्यपी'तिचन्द्रप्रभा इति वे'ति चन्द्रस्येव प्रभा–आकारो यस्याः सा चन्द्रप्रभा मणिशिलाकेव मणिशिलाका वरं च तत् सीधु च वरसीधु वरा चासौ वारुणी च वरवारुणी पत्रैः–धातकीपत्रैर्निष्पाद्य आसवः पत्रासवः एवं पुष्पासवः फलासवश्च परिभावनीयः चोओ–गन्धद्रव्यं तन्निष्पाद्य आसवः चोयासवः, पत्रादिविशेषेण व्यतिरिक्तं आसव आसव इति गीयते, मधुमेरककापिशायनानि मद्यविशेषाः, मूलदलखर्जूरसा-रनिष्पन्न आसवः खर्जूरसारःमृद्वीका–द्राक्षा तत्सारनिष्पन्नो मृद्वीकासारः सुपक्वेक्षुरसमूलद-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

लनिष्परन्नः–सुपक्वेक्षुरसः अष्टभिः शास्त्रप्रसिद्धैः पिष्टैः निष्ठिता अष्टपिष्टनिष्ठिता जम्बूफलवत् कालेव कालिका जम्बूफलकालिकावरा चासौ प्रसन्ना च वरप्रसन्ना, एते सर्वेऽपि मद्यविशेषाःपूर्वकाले लोकप्रसिद्धा इदानीमपि शास्त्रान्तरतो लोकतो वा यथास्वरूपं वेदितव्याः,

वरप्रसन्नाविशेषणान्याह–मांसला–उपचितरसा पेशला–मनोज्ञा मनोज्ञत्वादेव ईषत्–मनाक् ततः परम्परमास्वादतया झटित्येवाग्रतो गच्छति ओष्ठेऽवलम्बते–लगतीत्येवंशीला ईषदोष्ठावलम्मिबिनी तथा ईषत्–मनाक् पानव्यवच्छेदे सति तत ऊर्ध्व कंटुका एलादिद्रव्यसम्पर्कतः उपलक्ष्यमाणतिक्तवीर्येतियावत् तथा ईषत्–मनाक् ताम्रे अक्षिणी क्रियेते अनयेति ईषत्ताम्राक्षिकरणी मद्यस्य प्रायः सर्वस्यापि तथास्वभावत्वात् 'उक्कोसमयपत्ता;' इति उत्कर्षतीति उत्कर्षः स चासौ मदश्च उत्कर्षमदः तं प्राप्ता उत्कर्षमदप्राप्ता, एतदेव वर्णादिभिः समर्थयते–वर्णेनोत्कृष्टमदाविनाभाविना प्रशस्येन गन्धेन घ्राणेन्द्रियनिर्वृतिकरणे रसेन परमसुखासिकाजकेन स्पर्शेन मदपरिपाकाव्यभिचारिणा अत एवास्वादनीया विशेषतः स्वादनीया विस्वादनीया प्रीणयतीतिप प्रीणनीया 'कृद् बहुल'मिति वचनात् कर्त्तर्यनीयप्रत्ययः, एवं दर्प्पयतीति दर्प्पणीया मदयतीति मदनीया सर्वाणीन्द्रियाणि सर्वं च गात्रं प्रहलादयति इति सर्वेन्द्रियागात्रप्रहलादनीया, एतावत्युक्ते भगवान् गौतम आह–'भवेयारूवा !' भगवन् ! एतद्रूपा–एवंरूपरसोपेता पद्मलेश्या भवेत् !, भगवानाह–'नो इणट्ठे समट्ठे' इत्यादि प्राग्वत् ।।

'सुक्कलेस्सा णं भंते !' इत्यादि, गुडखण्डे प्रसिद्धे शर्करा–काशादिप्रभवा मत्स्यण्डी–खण्डशर्करा पर्पटमोदकादयःसम्प्रदायादवसेयाः,शेषं सुगमं ।।

तदेवमुक्तो लेश्याद्रव्याणां रसः, सम्प्रति गन्धमभिधित्सुराह–

मू. (४६६) *कइ णं भंते ! लेस्साओ दुब्भिगंधाओ पन्नत्ताओ ?, गोयमा ! तओ लेस्साओ दुब्भिगंधाओ पं० ?, तं–कण्हलेस्सा नील० काउलेस्सा ।*

कइ णं भंते ! लेस्साओ सुब्भिगंधाओ पन्नत्ताओ ?, गोयमा ! तओ लेस्साओ सुब्भिगंधाओ पं०, तं०–तेउ० पम्ह० सुक्क०, एवं तओ अविसुद्धाओ तओ विसुद्धाओ तओ अप्पसत्थाओ तओ पसत्थाओ तओ संकिलिट्ठाओ तओ असंकिलिट्ठाओ तओ सीतलुक्खाओ तओ निद्धुण्हाओ तओ दुग्गतिगामियाओ तओ दुग्गतिगामियाओ तओ सुगतिगामियाओ ।

वृ. 'कइ णं भंते !' इत्यादि, सुगमं, नवरं कृष्णनीलकापोतलेश्या दुरभिगन्धाः मृतगवादिकडेवरेभ्योऽप्यनन्तगुणदुरभिगन्धोपेतत्वात् तेजःपद्मशुक्ललेश्याः सुरभिगन्धाः पिष्यमाणगन्धवाससुरभिकुसुमादिभ्योऽनन्तगुणपरमसुरभिगन्धोपेतत्वात्, उक्तं चोत्तराध्ययनेषु लेश्याध्ययने–

॥१॥ "जह सुरभिकुसुमगंधो गंध वासाण पिस्समाणाण ।
एत्तो उ अनंतगुणो पसतगुणो लेस्साणं अप्पसत्थाणं ।।
॥२॥ जह सुरभिकुसुमगंधो गंध वासाण पिस्समाणाण ।
एत्तो उ अनंतगुणो पसत्थलेसाण तिण्हंपि ।।"

उक्तो गन्धपरिणामः, अधुना शुद्धाशुद्धात्वप्रतिपादनार्थमाह–

'एवं तओ अविसुद्धाओ ततो विसुद्धाओ' इति, एवम्–उक्तेन प्रकारेण आद्यास्तिस्रो लेश्या अविशुद्धा वक्तव्याः, अप्रशस्तवर्णगन्ध रसोपेतत्वात्, उत्तरास्तिस्रो लेश्या विशुद्धाः, प्रशस्तवर्णगन्धरसोपेतत्वात्, ततश्चैवं वक्तव्याः–

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'कइ णं भंते ! लेस्साओ अविसुद्धाओ पं० ?, गोयमा ! तओ लेस्साओ अप्पसत्थाओ अविसुद्धाओ पं०, तंजहा–कण्हलेस्सा नीललेस्सा काउलेस्सा,

कइ णं भंते ! लेस्साओ विसुद्धाओ पं०, ?, गोयमा ! तओ लेस्साओ विसुद्धाओ पं०, तंजहा–तेउ० पउम० सुक्कलेसा' इति, उक्ते शुद्धत्वाशुद्धत्वे, सम्प्रति प्राशस्त्याप्राशस्त्ये प्रतिपादयति–'तओ अप्पसत्थाओ तओ पसत्थाओ' आद्यास्तिस्रो लेश्या अप्रशस्ता वक्तव्याः, अप्रशस्तद्रव्यत्वेनाप्रशस्ताध्यवसायहेतुत्वात्, उत्तरास्तिस्रो लेश्याः प्रशस्ताः प्रशस्तद्रव्यतया प्रशस्ताध्यवसायकारणत्वात्, सूत्रपाठः प्राग्वदवसेयः

'कइ णं भंते ! लेस्साओ अप्पसत्थाओ पन्नत्ताओ' इत्यादि, उक्ते प्राशस्त्याप्राशस्त्ये, अधुना संक्लिष्टासंक्लिष्टत्वे प्रतिपादयति–'तओ संकिलिट्ठाओ तओ असंकिलिट्ठाओ'इति, आद्यास्तिस्रो लेश्याः संक्लिष्टाः, संक्लिष्टार्त्तरौद्रध्याननुगताध्यवसायस्थानहेतुत्वात्, उत्तरास्तिस्रो लेश्या असंक्लिष्टाः, असंक्लिष्टधर्मशुक्लध्यानानुगताध्यवसायकारणत्वातच्, अत्रापि पाठः प्राग्वत्– 'कइ णं भंते ! लेस्साओ संकिलिट्ठाओ पन्नत्ताओ' इत्यादि, अधुना शीतोष्णस्पर्शप्रतिपादनार्थमाह–'तओ सीयलुक्खाओ तओ निद्धुण्हाओ'इति, आद्यास्तिस्रो लेश्याः शीतरूक्षाः– शीतरूक्षस्वर्शोपेताः, उत्तरास्तिस्रो लेश्याः स्निग्धोष्णस्पर्शाः, इहान्येऽपि लेश्याद्रव्याणां कर्कशादयः स्पर्शाः सन्ति, यत उक्तं लेश्याध्ययने–

॥१॥ "जह करवयस्स फासो गोजिब्भाए व सागपत्ताणं ।
एत्तोवि अनंतगुणो लेस्साणं अप्पसत्थाणं ॥
॥२॥ जह बूरस्स व फासो नवनीयस्स व सिरीसकुसुमाणं ।
एत्तोवि अनंतगुणो पसत्थलेस्साण तिण्हंपि ॥" इति

तथापि शीतरूक्षौ स्वर्शौ आद्यानां तिसृणां लेश्यानां चित्तास्वास्थ्यजनने स्निग्धोष्णस्पर्शौ उत्तरासां तिसृणां लेश्यानां परमसन्तोषोत्पादने साधकतमाविति तावेव पृथक् पृथक् साक्षादुक्ताविव्यदोषः, सूत्रपाठः प्राग्वत्, 'कइ णं भंते ! लेस्साओ सीयलुक्खाओ पन्नत्ताओ' इत्यादि ।

सम्प्रति गतिद्वारमभिधित्सुराह–'तओ दुग्गइगामिणीओ तओ सुगइगामिणिओ' इति, आद्यास्तिस्रो लेश्या दुर्गतिगामिन्यः–दुर्गतिं गमयन्तीत्येवंशीला दुर्गतिगामिन्यः, संक्लिष्टाध्यवसायहेतुत्वात्, उत्तरास्तिस्रो लेश्याः सुगतिं गमयन्तीत्येवंशीलाः सुगतिगामिन्यः, प्रशस्ताध्यवसायकारणत्वात्, उभयत्रापि गमेर्ण्यन्तादिन्प्रत्ययः, सूत्रपाठः प्राग्वत् 'कइ णं भंते ! लेस्साओ दुग्गइगामिणीओ पन्नत्ताओ' इत्यादि ॥ अधुना परिणामद्वारमिधित्सुराह–

मू. (४६७) कण्हलेस्सा णं भंते ! कतिविहं परिणामं परिणमति ?, गोयमा ! तिविहं वा नवविहं वा सत्तावीसविहं वा एक्कासीतिविहं वा बेतेयालीसतविहं वा बहुयं वा बहुविहं वा परिणामं परिणमइ, एवं जाव सुक्कलेसा ।

कण्हलेसा णं भंते ! कतिपदेसिया पन्नत्ता ?, गोयमा ! अनंतपदेसिया पन्नत्ता, एवं जाव सुक्कलेसा । कण्हलेस्सा णं भंते ! कइपएसोगाढा पन्नत्ता ?, गोयमा ! असंखेज्जपएसोगाढा पन्नत्ता, एवं जाव सुक्कलेस्सा । कण्हलेस्साए णं भंते ! केवतियाओ वग्गणाओ पन्नत्ताओ ?, गोयमा ! अनंताओ वग्गणाओ, एवं जाव सुक्कलेस्साए ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ. 'कण्हलेसा ण'मित्यादि, अत्र 'कइविहं परिणामं' इत्यत्र प्राकृतत्वात् तृतीयार्थे द्वितीया द्रष्टव्या यथाऽऽचाराङ्गे "अगणिं(च खलु)पुट्ठा" इत्यत्र, ततोऽयमर्थः-कृष्णलेश्या णमिति वाक्यालङ्कारे भदन्त ! कतिविधेन परिणामेन परिणमति ?, भगवानाह-'गोयमा ! तिविहं वा' इत्यादि, इह त्रिविधो-जघन्यमध्यमोत्कृष्टभेदेन नवविधो यदैषामपि जघन्यादीनां स्वस्थानतारतम्यचिन्तायां प्रत्येकं जघन्यादित्रयेण गुणना, एवं पुनः पुनस्त्रिकगुणनया सप्तविंशतिविधत्वं एकाशीतिविधत्वं त्रिचत्वारिंशदधिकशतद्वयविधत्वं बहुत्वं बहुविधत्वं भावनीयं, सर्वत्र च तृतीयार्थे द्वितीया, ततस्त्रिविधेन वा परिणामेन परिणमति नवविधेन वा इत्येवं पदानां योजना कर्त्तव्या, 'एवं जाव सुक्कलेसा' इति एवं-कृष्णलेश्यागतेन प्रकाकेण नीलादयोऽपि लेश्यास्तावद्वक्तव्याः यावत् शुक्ललेश्या, सूत्रपाठस्तु सुगमत्वात्स स्वयं परिभावनीयः ॥

सम्प्रति प्रदेशद्वाराभिधित्सया प्राह-'कण्हलेसा णं भंते ! कइपएसिया' इत्यादि सुगमं, नवरमनन्तप्रादेशिकेति-अनन्तानन्तसङ्ख्योपेताः प्रदेशाः-तद्योग्याः परमाणवो यस्याः कृष्णलेश्यायाः-कृष्णलेश्याद्रव्यसंघातस्य साऽनन्तप्रादेशिका, अन्यथा-अनन्तप्रदेशव्यतिरेकेण स्कन्धस्य जीवग्रहणयोग्यताया एवाभावात्, एवं नीलादयोऽपि लेश्या वक्तव्याः, तथा चाह-'एवं जाव सुक्कलेसा' इति ॥

अवगाहनाद्वारमाह-'कण्हलेस्सा णं भंते !' इत्यादि, इह प्रदेशाः-क्षेत्रप्रदेशाः प्रतिपत्तव्याः, तेष्वेवागाहप्रसिद्धेः, ते चानन्तानामपि वर्गणानामाधारभूता असङ्ख्येया एव द्रष्टव्याः, सकलस्यापि लोकस्य प्रदेशानामसङ्ख्यायतत्वात् ॥

वर्गणाद्वारमाह-'कण्हलेस्सा णं भंते ! केवइयाओ वग्गणाओ पन्नत्ताओ' इत्यादि, इह वर्गणा-औदारिकादिशरीरप्रायोग्यपरमाणुवर्दणावत् कृष्णलेश्यायोग्यद्रव्यपरमाणुवर्गणा गृह्यन्ते, ताश्च वर्णादिभेदेन समानजातीयानामेक(व)सद्भावात् अनन्ताः प्रत्येतव्याः, एवं नीललेश्यादीनामपि वर्गणाः प्रत्येकं वक्तव्याः, तथा चाह 'एवं जाव सुक्कलेस्साए' इति ॥

अधुना स्थानाद्वाराभिधित्सया आह-

मू. (४६८) केवतिया णं भंते ! कण्हलेस्साणं ठाणा पन्नत्ता ?, गोयमा ! असंखेज्जा कण्हलेस्साणं ठाणा पन्नत्ता, एवं जाव सुक्कलेस्सा ।

एएसि णं भंते ! कण्हलेस्साठाणाणं जाव सुक्कलेस्साठाणाण य जहन्नगाणं दव्वट्ठयाए पएसट्ठयाए दव्वट्ठपएसट्ठयाए कतरे २ हिंतो अप्पा वा ४ ?, गोयमा ! सव्वत्थोवा जहन्नगा काउलेस्साठाणा दव्वट्ठ० जहन्नगा नीललेसाठाणा दव्वट्ठयाए असंखेज्जगुणा जहन्नग्गा कण्हलेसाठाणा दव्वट्ठ० असं० जहन्नतेउलेसाठाणा दव्व० असं० जहन्नगा पम्हलेसाठाणा दव्व० असं० जहन्नगा० सुक्कलेसाठाणा दव्वट्ठ० असं० पएस० सव्वत्थो० जहन्नगा काउलेसाठाणा पएस० जहन्नगा पम्हलेसाठाणा पएसट्ठ० असं० जहन्नगा सुक्कलेसाठाणा पएस० असं० दव्वट्ठपएसट्ठयाए सव्वत्थोवा जहन्नगा काउलेसाठाणा दव्वट्ठ० जहन्नगा नीललेसाठाणा दव्व० असं० एवं कण्हलेस्सा० तेउ० पम्ह० जहन्नगा सुक्कलेसाठाणा दव्व० असं० जहन्नएहिंतो सुक्कलेस्साठाणेहिंतो दव्वट्ठ० जहन्नकाउलेसठाणा पएस० असं० जहन्नया नीललेसाठाणा पएस० असं० एवं जाव सुक्कलेस्साठाणा ।

Jain Education International	For Private & Personal Use Only	www.jainelibrary.org

एतेसि णं कण्हलेस्साठाणाणं जाव सुक्कलेसाठाणाण य उक्कोसगाणं दव्वट्ठ० पएस० दव्वट्ठपएसट्ठ० कयरे २ हिंतो अप्पा वा ४ ?, गोयमा ! सव्वत्थोवा उक्कोसगा काउलेस्साठाणा दव्वट्ठयाए उक्कोसगा नीललेसाठाणा दव्वट्ठयाए असंखेज्जगुणा एवं जहेव जहन्नगा तहेव उक्कोसगावि, नवरं उक्कोसत्ति अभिलावो, एतेसि णं भंते ! कण्हलेस्सठाणाणं जाव सुक्कलेस्सठाणाण य जहन्नउक्कोसगाणं दव्वट्ठयाए पएसट्ठयाए दव्वट्ठपएसट्ठयाए कतरे २हिंतो अप्पा वा ४ ? गोयमा ! सव्वत्थोवा जहन्नगा काउलेस- ठाणा दव्वट्ठयाए जहन्नया नीललेसठाणा दव्व० असं० एवं कण्हतेउपम्हलेस्स० जह० सुक्कलेसठाणा दव्व० असं० जहन्नएहिंतो सुक्कलेसठाणेहिंतो दव्व० उक्कोसा काउलेसठाणा दव्वट्ठयाए असं० उक्कोसा नीललेसाठाणा दव्व० असं०

एवं कण्हतेउपम्ह उक्कोसा सुक्कलेसाठाणा दव्व० असं० पएसट्ठयाए सव्वत्थोवा जहन्नगा काउलेसठाणा पएसट्ठयाए जहन्नगा नीललेसठाणा पएसट्ठयाए असंखेज्जगुणा एवं जहेव दव्वट्ठयाए तहेव पएसट्ठयाएवि भाणियव्वं, नवरं पएसट्ठयाएत्ति अभिलावविसेसो, दव्वट्ठपएसट्ठयाए सव्वत्थोवा जहन्नगा काउलेसठाणा दव्वट्ठयाए जहन्नगदा नीललेसठाणा दव्वट्ठयाए असं०

एवं कण्हतेउपम्ह० जहन्नया सुक्कलेसठाणा दव्वट्ठयाए असं०, जहन्नएहिंतो सुक्कलेसा-ठाणेहिंतो दव्वट्ठयाए उक्कोसा काउलेसठाणा दव्वट्ठयाए असं० उक्कोसा नीललेस्सठाणा दव्व० असं० एवं कण्हतेउपम्ह० उकोसगा सुक्कलेसठाणा दव्व० असं०, उक्कोसएहिंतचो सुक्कलेसठाणे० दव्वट्ठ० जहन्नगा काउलेसठाणा पएसट्ठयाए अनंतगुणा, जहन्नगा नीललेसठाणा पएस० असं०,

एवं कण्हतेउपम्ह० जहन्नगा सुक्कलेसठाणा असं०, जहन्नएहिंतो सुक्कलेसाठाणेहिंतो पएस० उक्को० काउलेसाठाणा पएस० असं० उक्कोसया नीललेसाठाणा पएस० असं०, एवं कण्हतेउपम्ह० उक्कोसया सुक्कलेसाठाणा पएसट्ठयाए असं० (पन्नवणाए भगवईए चउत्थओ उद्देसओ समत्तो)

वृ. 'केवइया णं भंते ! कण्हलेसा ठाणा पन्नत्ता' कियन्ति भदन्त ! कृष्णलेश्यास्थानानि–प्रकर्षापकर्षकृताः स्वरूपभेदाः प्रज्ञप्ति ?, सूत्रे च पुंस्त्वं प्राकृतत्वात्, इह यदा भावरूपाः कृष्णादयो लेश्याश्चिन्त्यन्ते तदा एकैकस्या लेश्यायाः प्रकर्षापकर्षकृतस्वरूपभेदरूपाणि स्थानानि कालतोऽसङ्ख्येयोत्सर्प्पिण्यवसर्प्पिणीसमयप्रमाणानि क्षेत्रतोऽसङ्ख्येयलोकाकाशप्रदेशप्रमाणानि, उक्तं च–

॥१॥ "असंखेज्जाणुस्साप्पिणीण अवसप्पिणीज जे समया ।
संखाईया लोगा लेस्साणं होंति ठाणाइं ॥"

नवरमशुभानां संक्लेशरूपाणि शुभानां च विशुद्धरूपाणि, एतेषां च भावलेश्यागतानां स्थानानां यानि कारणभूतानि कृष्णादिद्रव्यवृन्दानि तान्यपि स्थानान्युच्यन्ते तान्येव चेह ग्राह्याणि, कृष्णादिद्रव्याणामेवोहोद्देशके चिन्त्यमानत्वात्, तानि च प्रत्येकमसङ्ख्येयानि, तथाविधैकपरिणाम-निबन्धनानामनन्तानामपि द्रव्याणामेकाध्यवसायहेतुत्वेनैकत्वात्, तानि च प्रत्येकं द्विविधानि, तद्यथा–जघन्यान्युत्कृष्थानि च, जघन्यलेश्यास्थानपरिणामकारणानि जघन्यानि उत्कृष्टलेश्यास्थान-परिणामकारणान्युत्कृष्थानि, यानि तु मध्यमानि तानि जघन्यप्रत्यासन्नानि जघन्येष्वन्तर्भूतानि उत्कृष्थप्रत्यासन्नानि तूत्कृष्टेषु, एकैकानि च स्वस्थाने परिणामगुणभेदतोऽसङ्ख्येयानि, अत्र दृष्टान्तो–

यथा स्फटिकमणेरलक्तकवेशन रक्तता भवति, सा च जघन्यरक्ततागुणालक्तकवशेन

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जघन्यरक्तता एकगुणा (धिका) लक्तकवशेनैकगुणाधिकजन्ध्या, एवमेकैकगुणवृध्या जघन्यायामेव रक्ततायामसङ्ख्येयानि स्थानानि भवन्ति, तानि च व्यवहारतः स्तोकगुणत्वात् सर्वाण्यपि जघन्यान्योवोच्यन्ते, एवमात्मनोऽपि जघन्यैकगुणाधिकद्विगुणाधिकलेश्याद्रव्योपधानवशतो लेश्यापरिणामविशेषा असङ्ख्येया भवन्ति, ते च सर्वेऽपि व्यवहारतोऽल्पगुणत्वात् जघन्यव्यपदेशं लभन्ते, तत्कारणभूतानि च द्रव्याणामपि स्थानानि जघन्यानि, एवमुत्कृष्टान्यपि स्थानान्यसङ्ख्येयानि भावनीयानि ॥ सम्प्रत्यल्पबहुत्वमाह–

'एएसि णं भंते !' इत्यादि, इह त्रीणि अल्पबहुत्वानि, तद्यथाजघन्यस्थानविषयं उत्कृष्टस्थानविषयं उभयस्थानविषयं च, एकैकमपि त्रिविधं, तद्यथा–द्रव्यार्थतया प्रदेशार्थतया उभयार्थतया च, तत्र जघन्यस्थानविषये द्रव्यार्थतायां प्रदेशार्थतायां च प्रत्येकं कापोतनीलकृष्णतेजःपद्मशुक्ललेश्यास्थानानि क्रमेण यथोत्तरमसङ्ख्येयगुणानि वक्तव्यानि, उभयार्थतायां प्रथमतो द्रव्यार्थतया कापोतनीलकृष्णतेजःपद्मशुक्ललेश्यास्थानानि क्रमेण यथोत्तरमसङ्ख्येयगुणानि वक्तव्यानि, ततः शुक्ललेश्यास्थानान्तरं प्रदेशार्थतया कापोतलेश्यास्थानानि अनन्तगुणानि वक्तव्यानि तदनन्तरं नीलकृष्णतेजः पद्मशुक्ललेश्यास्थानानि क्रमेण प्रदेशार्थतया यथोत्तरमसङ्ख्येयगुणानि, एवमुत्कृष्टान्यपि स्थानानि द्रव्यार्थतया प्रदेशार्थतया उभयार्थतया च चिन्तयितव्यानि, तथा चाह–'एवं जहेव जहन्नगा तहेव उक्कोसगावि नवरमुक्कोसत्ति अभिलावो' इति ॥

जघन्योत्कृष्टस्थानसमुदायसङ्ख्येयगुणानि वक्तव्यानि, तदनन्तरं जघन्यशुक्ललेश्यास्थानेभ्य उत्कृष्टानि कापोतनीलकृष्णतेजः पद्मशुक्ललेश्यास्थाननानि क्रमेण द्रव्यार्थतयैव यथोत्तरमसङ्ख्येयगुणानि वाच्यानि, एवं प्रदेशार्थतयापि जघन्योत्कृष्टस्थानविषयमल्पबहुत्वं भावनीयं, तथा चाह– 'एवं जहेव दव्वट्ठयाए तहेव पएसट्ठयाएवि भाणियव्वं, नवरं पएसट्ठयाएत्ति अभिलावे विसेसो' इति, द्रव्यार्थप्रदेशार्थतायां प्रथमतो द्रव्यार्थतया जघन्यानि कापोतनीलकृष्णतेजः पद्मशुक्ललेश्यास्थानानि क्रमेण यथोत्तरमसङ्ख्येयगुणानि वक्तव्यानि ततो जघन्येभ्यः शुक्ललेश्यास्थानेभ्य उक्तक्रमेणैव चोत्कृष्टानि स्थानानि द्रव्यार्थतया यथोत्तरमसङ्ख्येयगुणानि वाच्यानि तत उत्कृष्टेभ्यः शुक्ललेश्यास्थानेभ्यो जघन्यानि कापोतलेश्यास्थानानि प्रदेशार्थतया अनन्तगुणानि वक्तव्यानि ततः प्रदेशार्थतयैव जघन्यानि नीलकृष्णतेजः पद्मशुक्ललेश्यास्थानानि यथोत्तरमसङ्ख्येयगुणानि एवमुत्कृष्टस्थानान्यपि उक्तक्रमेणैव यथोत्तरमसङ्ख्येयगुणानि वक्तव्यानीति ॥

पदं – १७, उद्देशकः– ४ समाप्तम्

–ः पदं – १७, उद्देशकः– ५ ः–

वृ. उक्तश्चतुर्थोद्देशकः सम्प्रति पञ्चम आरभ्यते, चेदमादिसूत्रम्–

मू. (४६९) कइ णं भंते ! लेस्साओ पन्नत्ताओ ?, गोयमा ! छ लेसाओ पन्नत्ताओ, तंजहा–कण्हलेसा जाव सुक्कलेसा,

से नूनं भंते ! कण्हलेस्सा नीललेसं पप्प तारूवत्ताए तावन्नत्ताए तागंधत्ताए तारसत्ताए ताफासत्ताए भुज्जो भुज्जो परिणमति, इत्तो आढत्तं जहा चउत्थओ उद्देशओ तहा भाणियव्वं जाव

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वेरुलियमणिदिट्ठंतोत्ति ।। से नूनं भंते ! कण्हलेसा नीललेसं पप्प नो तारूवत्ताए जाव नो ताफासत्ताए भुज्जो भुज्जो परिणमइ ?, हंता गोयमा ! कण्हलेसा नीललेस्सं पप्प नो तारूवत्ताए नो तावन्नत्ताए नो तागंधत्ताए नो तारसत्ताए नो ताफासत्ताए भुज्जो २ परिणमति,

से केणट्ठे० भंते ! एवं वुच्चइ ?, गोयमा ! आगारभावमायाए वा से सिया पलिभागभावमायाए वा से सिया कण्हलेस्सा णं सा नो खलु नीललेसा तत्थ गया ओसक्कइ उस्सक्कइ वा, से तेणट्ठे० गोयमा ! एवं वुच्चइ कण्हलेसा नीललेसं पप्प नो तारूवत्ताए जाव भुज्जो २ परिणमति,

से नूनं भंते ! नीललेसा काउलेसं पप्प णो तारूवत्ताए जाव भूज्जो २ परिणमति ?, हंता गोयमा ! नीललेसा काउलेसं पप्प नो तारूवत्ताए जाव भुज्जो २ परिणमति,

से केणट्ठे० भंते ! एवं वुच्चइ–नीललेसा काउलेसं पप्प णो तारूवत्ताए० जाव भुज्जो २ परिणमति, गोयमा ! आगारभावमायाए वा सिता पलिभागभावमायाए वा सिता नीललेस्सा णं सा नो खलु सा काउलेसा तत्थगया सक्कइ उस्सक्कति वा, से एएणट्ठे० ?, गोयमा ! एवं वुच्चइ– नीललेसा काउलेसं पप्प नो तारूवत्ताए जाव भुज्जो २ परिणमति,

एवं काउलेसा तेउलेसं पप्प तेउलेसा पम्हलेसं पप्प पम्हलेसा सुक्कलेसं पप्प, से नूनं भंते ! सुक्कलेसा जाव नो परिणमति ?, गो० ! आगारभावमायाए वा जाव सुक्कलेस्सा णं सा नो खलु सा पम्हलेसा तत्थगया ओसक्कइ, से तेणट्ठेणं गोयमा ! एवं वुच्चइ जावणो परिणमइ (पन्नवणाए भगवईए लेसापदे पंचमुद्देसो सम्मत्तो ।)

वृ. कइ णं भंते ! लेस्साओ पन्नत्ताओ' इत्यादि, चतुर्थोद्देशकवत् तावद्वक्तव्यं यावद्वैडूर्यमणिदृष्टान्तः, व्याख्या च प्राग्वदेव निरवशेषा कर्तव्या, प्रागुपन्यस्तस्याप्यस्य सूत्रस्य पुनरुपन्यासोऽग्रेतनसूत्रसम्बन्धार्थः, तदेव सूत्रमाह–

'से नूनं भंते !' इत्यादि, इह तिर्यङ्मनुष्यविषयं सूत्रमनन्तरमुक्तं, इदं तु देवनैरयिकविषयमवसेयं, देवनैरयिका हि पूर्वभगवतचरमान्तर्मुहूर्तादारभ्य यावत् परभवगतमाद्यमन्तर्मुहर्त्तं तावदवस्थितलेश्याकाः ततोऽमीषां कृष्णादिलेशष्याद्रव्याणां परस्परसम्पर्केऽपि न परिणम्यपरिणामकभावो घटते ततःसम्यगधिगमाय प्रश्नयति–

'से नूनं भंते !' इत्यादि, सेशब्दोऽथशब्दार्थः, स च प्रश्ने, अथ नूनं–निश्चितं भदन्त ! कृष्णलेश्या–कृष्णलेश्याद्रव्याणि नीललेश्यानीललेश्याद्रव्याणि प्राप्य, प्राप्तिरिह प्रत्यासन्नत्वमात्रं गृह्यते नतु परिणम्यपरिणामकभावेनान्योऽन्यसंश्लेषः, तद्रूपतया–तदेव–नीललेश्याद्रव्यगतं रूपं–स्वभावो यस्य कृष्णलेश्यास्वरूपस्य तत्तद्रूपं तद्भावस्तद्रूपता तया, एतदेव व्याचष्टे–न तद्वर्णतया न तद्गन्धतया न तद्रसतया न तत्स्पर्शतया भूयो भूयः परिणमते, भगवानाह–हन्तेत्यादि, हन्त गौतम ! कृष्णलेश्येत्यादि, तदेव ननु यदि न परिणमते तर्हि कथं सप्तमनरकपृथिव्यामपि सम्यक- त्वलाभः, स हि तेजोलेश्यादिपरिणामे भवति सप्तमनरकपृथिव्यां च कृष्णलेश्येति, कथं चेतत्, वाक्यं घटते ? 'भावपरावत्तीए पुण सुरनेरइयाणंपि छल्लेसा' इति लेश्यान्तरद्रव्यसम्पर्कतस्तद्रपूपतया परिणामासंभवेन भावपरावृत्तेरेवायोगात्, अत एव तद्विषये प्रश्ननिर्वचनसूत्रे आह–

'से केणट्ठेणं भंते !' इत्यादि, तत्र प्रश्नसूत्रं सुगमं निर्वचनसूत्रं–आकारः–तच्छायामात्रं आकारस्य भावः–सत्ता आकारभावः स एव मात्रा आकारभावमात्रा तयाऽऽकारभावमात्रया मात्राशब्द आकारभावातिरिक्तपरिणामान्तरप्रतिपत्तिव्युदासार्थः, 'से' इति सा कृष्णलेश्या

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नीललेश्यारूपतया स्यात् यदिवा प्रतिभागः-प्रतिबिम्बमादर्शादाविव विशिष्टः प्रतिबिम्ब्यवस्तुगत आकारः प्रतिभाग एव प्रतिभागमात्रा तया, अत्रापि मात्राशब्दः प्रतिबिम्बातिरिक्तपरिणामान्तर-व्युदासार्थः स्यात् कृष्णलेश्या नीललेश्यारूपतया, परमार्थतः पुनः कृष्णलेश्यैव नो खलु नीललेश्या सा, स्वस्वरूपापरित्यागात्, न खल्वादर्शादयो जपाकुसुमादिसन्निधानतस्तत्प्रतिबिम्बमात्रामादधाना नादर्शादय इति परिभावनीयमेतत्, केवलं सा कृष्णलेश्या तत्र-स्वस्वरूपे गता-अवस्थिता सती उत्ष्वष्कते तदाकारभावमात्रधारणतस्तत्प्रतिबिम्बमात्रधारणतो वोत्सर्प्पतीत्यर्थः, कृष्णलेश्यातो हि नीललेश्या विशुद्धा ततस्तदाकारभावं तत्प्रतिबिम्बमात्रं वा दधाना सती मनाक् विशुद्धा भवतीत्युत्सर्प्पतीति व्यपदिश्यते, उपसंहारवाक्यमाह-'से एएणट्ठेण'मित्यादि, सुगमं।

एवं नीललेश्यायाः कापोतलेश्यामधिकृत्य कापोतलेश्यायास्तेजोलेश्यामधिकृत्य तेजोलेश्यायाः पद्मलेश्यामधिकृत्य पद्मलेश्यायाः शुक्ललेश्यामधिकृत्य सूत्राणि भावनीयानि, सम्प्रति पद्मलेश्यामधिकृत्य शुक्ललेश्याविषयं सूत्रमाह-

'से नूनं भंते! सुक्कलेसा पम्हलेसं पप्प' इत्यादि, एतच्च प्राग्वद् भावनीयं, नवरं शुक्लले-श्यापेक्षया पद्मलेश्या हीनपरिणामा ततः शुक्ललेश्या पद्मलेश्याया आकारभावं तत्प्रतिबिम्बमात्रं वा भजन्ती मनागविशुद्धा भवति ततोऽवष्वष्कते इति व्यपदिश्यते, एवं तेजःकापोतनील-कृष्णलेश्याविषयाण्यपि सूत्राणि भावनीयानि, ततः पद्मलेश्यामधिकृत्य तेजःकापोतनीलकृष्णले-श्याविषयाणि तेजोलेश्यामधिकृत्य कापोतनीलकृष्णविषयाणि कापोतलेश्यामधिकृत्य नीलकृष्णलेश्याविषये नीललेश्यामधिकृत्य कृष्णलेश्याविषयमिति, अमूनि च सूत्राणि साक्षात् पुस्तकेषु न दृश्यन्ते केवलमर्थतः प्रतिपत्तव्यानि, तथा मूलटीकाकारेण व्याख्यानात्, तदेवं यद्यपि देवनैरयिकाणामवस्थितानि लेश्याद्रव्याणि तथापि तत्तदुपादीयमानलेश्यान्तरद्रव्यसम्पर्कतः तान्यपि तदाकारभावमात्रां भजन्ते इति भावपरावृत्तियोगतः षडपि लेश्या घटन्ते, ततः सप्तमनर-कपृथिव्यामपि सम्यकत्वलाभ इति न कश्चिद्दोषः ॥

पदं - १७, उद्देशकः- ५ - समाप्तः

-: पदं - १७, उद्देशकः- ६ :-

वृ. तदेवमुक्तः पञ्चमोद्देशकः, सम्प्रति षष्ठ उच्यते, तस्य चेदमादिसूत्रम्-

मू. (४७०) *कति णं भंते! लेसा पन्नत्ता ?, गोयमा! छ लेसा पन्नत्ता, तंजहा-कण्ह० जाव सुक्कलेसा, मणुस्साणं भंते! कइ लेसा पं० ?, गो० ! छ लेस्साओ पं०, तं०-कण्हलेसा जाव सुक्कलेसा मणुस्सी णं भंते! पुच्छा, गो० ! छल्लेस्साओ पं०, तं०-कण्हा जाव सुक्का ॥*

कम्मभूमयमणुस्साणं भंते! कइ लेसाओ पं० ?, गो० ! छ ले० पं०, तं०-कण्हा जाव सुक्का, एवं कम्मभूमयमणुस्सीणवि। भरहेरवयमणुस्साणं भंते! कति लेसाओ पं० ?, गो० ! छले० पं०, तं०-कण्हा जाव सुक्का, एवं मणुस्सीणवि,

अकम्मभूमयमणुस्साणं पुच्छा, गो० ! चत्तारि लेसाओ पं०, तं०-कण्हा जाव तेउ०, एवं अकम्मभूमिगमणुस्सीणवि, एवं अंतरदीवमणुस्साणं मणुस्सीणवि,

एवं हेमवयएरन्नवयअकम्मभूमयमणुस्साणं मणूसीण य कइ लेसाओ पं० ?, गो० ! चत्तारि, तं०-कण्हा जाव तेउ०, हरिवासरम्मयअकम्मयभूमयमणुस्साणं मणुस्सीण य पुच्छा,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गो० ! चत्तारि, तं०–कण्हा जाव तेउ०, देवकुरुउत्तरकुरुअकम्मभूमयमणुस्सा एवं चेव, एतेसिं चेव मणुस्सीणं एवं चेव, धायइसंडपुरिमद्धेवि एवं चेव, पच्छिमद्धेवि, एवं पुक्खरदीवेवि भाणियव्वं

कण्हलेसे णं भंते ! मणुस्से कण्हलेसं गब्भं जाणेज्ञा ?, हंता गो० ! जाणेज्ञा, कण्हले० मणुस्से नीलले० गब्भं जाणेज्ञा ?, हंता गो० ! जाणेज्ञा, जाव सुक्कलेसं गब्भं जणेज्ञा, नीलले० मणुस्से कण्हले० गब्भं जाणेज्ञा ?, हंता गो० ! जाणेज्ञा, एवं नील० मणुस्से जाव सुक्कले० गब्भं जाणेज्ञा, एवं काउलेसेणं छप्पि आलावगा भाणियव्वा, तेउलेसाणवि पम्हलेसाणवि सुक्कले०, एवं छत्तीसं आलावगा भा० । कण्ह० इत्थिया कण्ह० गब्भं जाणेज्ञा ?, हंता गोयमा ! जाणेज्ञा, एवं एतेवि छत्तीसं आलावगा भाणि० । कण्हले० भंते ! मणुस्से कण्हलेसाए इत्थियातो कण्हले० गब्भं जाणेज्ञा ? हंता गोयमा ! जाणेज्ञा, एवं एते छत्तीसं आलावगा, कम्मभूमगकण्हलेसे णं भंते ! मणुस्से कण्ह० इत्थियाए कण्हले० गब्भं जणेज्ञा ?, हंता गो० ! जाणेज्ञा, एवं एते छत्तीस०,

अकम्मभूमयकण्ह० मणु० अ० कण्ह० इत्थियाए अकम्मभूमयकण्हलेसं गब्भं जणेज्ञा हंता गोयमा ! जणेज्ञा, नवरं चउसु लेसासु सोलस आलावगा, एवं अंतरदीवगाणवि । (इति पन्नवणाए भगवईए लेस्सापदं समत्तं ।।)

वृ. 'कइ णं भंते ! लेस्साओ पन्नत्ताओ' इत्यादि, सुगमं उद्देशकपरिसमाप्ति यावत्, नवरमुत्पद्यमानो जीवो जन्मान्तरे लेश्याद्रव्याण्यादायोत्पद्यते तानि च कस्यचित्कानिचिदिति । कृष्णलेश्यापरिणतेऽपि जनके जन्यस्य विचित्रलेश्यासंभवः, एवं शेषलेश्यापरिणतेऽपि भा०

पदं – १७, उद्देशकः – ४ समाप्तम्

पदं – १७ – समाप्तम्

मुनि दीपरत्नसागरेण संशोधिता सम्पादिता प्रज्ञापनाउपाङ्गसूत्रे सप्तदशपदस्य मलयगिरिआचार्येण विरचिता टीका परिसमाप्ता ।

पदं – १८, "कायस्थिति"

वृ. तदेवमुक्तं सप्तदशं पदं, अधुनाऽष्टादशमारभ्यते, अस्य चामभिसम्बन्धः–इहानन्तरपदे लेश्यापरिणाम उक्तः, सम्प्रति परिणामसाम्यात् कायस्थितिपरिणाम उच्यते, तत्रचेदम् अधिकारगाथाद्वयं–

मू. (४७१) *जीव गइंदिय काए जोए वेए कसायलेसा य ।*
सम्मत्तनाणदंसण संजय उवओग आहारे ।।

मू. (४७२) *भासगपरित्त पज्ञत्त सुहूम सन्नी भवऽत्थि चरिमे य ।*
एतेसिं तु पदाणं कायठिई होइ नायव्वा ।।

वृ. 'जीवगइंदियकाए' इत्यादि, प्रथमं जीवपदं, किमुक्तं भवति ? –प्रथमं जीवपदमधिकृत्य कायस्थितिर्वक्तव्या इति १ ततो गतिपदं २ तदनन्तरमिन्द्रियपदं ३ ततःकायपदं ४ ततो योगपदं ५ तदनन्तरं वेदपदं ६ ततः कषायपदं ७ ततो लेश्यापदं ८ तदनन्तरं सम्यकत्वपदं ९ ततो ज्ञानपदं १० तदनन्तरं दर्शनपदं ११ ततः संयतपदं १२ तत उपयोगपदं १३ तदनन्तरमाहारकपदं १४

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ततः परीत्तपदं १५ । ततो भाषकपदं १६ ततः पर्याप्तपदं १७ ततः सूक्ष्मपदं १८ संज्ञिपदं १९ ततो भवसिद्धिकपदं २० तदनन्तरमस्तिकायपदं २१ ततश्चरमपदं २२ ।

एतेषां द्वाविंशतिसङ्ख्यानां पदानां कायस्थितिर्भवति ज्ञातव्या-यथा च भवति ज्ञातव्या तथा यथोद्देशं निर्देक्ष्यते, अथ कायस्थितिरिति कः शब्दार्थः ?, उच्यते, काय इह पर्यायः परिगृह्यते, काय इव काय इत्युपमानात्, स च द्विधासामान्यरूपो विशेषरूपश्च, तत्र सामान्यरूपो निर्विशेषणो जीवत्वलक्षणः विशेषरूपो नैरयिकत्वादिलक्षणः तस्य स्थितिः-अवस्थानं कायस्थितिः, किमुक्तं भवति ?-सामान्यरूपेण विशेषरूपेण वा पर्यायेणादिष्टस्य जीवस्य यदव्यवच्छेदेन भवनं सा कायस्थितिः, ततः प्रथमतः सामान्यरूपेण पर्यायेणादिष्टस्याव्यवच्छेदेन यद् भवनं तच्चिचिन्तयिषुराह-

पदं - १८ - दारं - १ "जीव"

[जीवे णं भंते ! जीवेत्ति कालतो केवचिरं होइ ?, गोयमा ! सव्वद्धं ।]

वृ. ['जीवे णं भंते !' इत्यादि, इह जीवनपर्यायविशिष्टो जीव उच्यते, ततः प्रश्नयति-जीवा 'णं' इति वाक्यालङ्कारे भदन्त ! जीव इति जीवनपर्यायविशिष्टतया इत्यर्थः 'कालतः' कालमधिकृत्य 'किय- च्चिरं' कियन्तं कालं यावद्भवति ?, भगवानाह-गौतम ! 'सर्वाद्धां' सर्वकालं यावत्, कथमिति चेत् ?, उच्यते, इह जीवनमुच्यते प्राणधारणं, प्राणाश्च द्विधा-द्रव्याप्राणा भावप्राणाश्च, द्रव्यप्राणा इन्द्रियपञ्चकबलत्रिकोच्छ्वासनिःश्वासायुः कर्मानुभववलक्षणाः संसारिणामस्ति यस्यामायुःकर्म्मा- नुभवनं न विद्यते इति, मुक्तानां तु ज्ञानादिरूपप्रमाणधारणमवस्थितं, मुक्तानामपि हि ज्ञानादिरूपाः प्राणाः सन्ति, यैर्मुक्तोऽपि द्रव्याप्राणैः जीवतीति व्यपदिश्यते, ते च ज्ञानादयो मुक्तानां शाश्वतिकाः, अतः संसार्यवस्थायां मुक्तावस्थायां च सर्वत्र जीवनमस्तीति सर्वकालभावी जीवनपर्यायः ॥]

पदं - १८ - दारं - २ "गति"

मू. (४७३) *नेरइए णं भंते ! नेरइएत्ति कालओ केच्चिरं होइ ?, गोयमा ! जहन्नेणं दस, वाससहस्साइं उक्को सेणं तेत्तीसं सागरोवमाइं ॥*

तिरिक्खजोणिए णं भंते ! तिरिक्खजोणिएत्ति कालओ केच्चिरं होइ ?, गोयमा ! जह० अंतोमुहुत्तं उक्कोसेणं अनंतं कालं अनंताओ उस्सप्पिणिओसप्पिणीओ कालतो खेत्तओ अनंता लोगा असंखेज्जपोग्गलपरियट्टा ते णं पुग्गलपरियट्टा आवलियाए असंखिज्जइभागे ।

तिरिक्खजोणिणी णं भंते ! तिरिक्खजोणिणित्ति कालओ केवचिरं होइ ?, गोयमा ! जहन्नेणं अंतोमुहुत्तं उक्कोसेणं तिन्नि पलिओवमाइं पुव्वकोडिपुहुत्तमब्भहियाइं ॥ एवं मणुस्सेवि मणुस्सीवि एवं चेव ॥

देवे णं भंते ! देवत्ति कालओ केवच्चिरं होइ ?, गोयमा ! जहेव नेरइए, देवी णं भंते ! देवित्ति कालतो केवच्चिरं होइ ?, गो० ! जहन्नेणं दस वाससहस्साइं उक्कोसेणं पणवन्नं पलिओवमाइं

सिद्धे णं भंते ! सिद्धेत्ति कालतो केवच्चिरं होइ ?, गोयमा ! सादिए अपज्जवसिए ।

नेरइए णं भंते ! नेरइयअपज्जत्तएत्ति कालतो केवच्चिरं होइ ?, गोयमा ! जहन्नेणवि उक्कोसेणवि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अंतोमुहुत्तं, एवं जाव देवी अपज्ञत्तिया।

नेरइयपज्ञत्तए णं भंते! नेरइयपज्ञत्तएत्ति कालतो केवच्चिरं होइ?, गोयमा! जहन्नेणं दस वाससहस्साइं अंतोमुहुत्तूणाइं उक्कोसेणं तेत्तीसं सागरोवमाइं अंतोमुहुत्तूणाइं।

तिरिक्खजोणियपज्ञत्तए णं भंते! तिरिक्खजोणियपज्ञत्तएत्ति कालतो केवचिरं होइ?, गोयमा! जहन्नेणं अंतोमुहुत्तं उक्कोसेणं तिन्नि पलिओवमाइं अंतोमुहुत्तूणाइं, एवं तिरिक्खजोणिणिपज्ञत्तियावि, एवं मणुस्सेवि मणुस्सवी, एवं चेव देवपज्ञत्तए जहा नेरइयपज्ञत्तए,

देवीपज्ञत्तिया णं भंते! देवीपज्ञत्तियत्ति कालतो केवचिरं होइ?, गोयमा! जहन्नेणं दस वाससहस्साइं अंतोमुहुत्तूणाइं उक्कोसेणं पणपन्नंपलिओवमाइं अंतोमुहुत्तूणाइं॥

वृ. सम्प्रति तस्यैव जीवस्य नैरयिकत्वादिपर्यायैरादिष्टस्य तैरेव पर्यायैरव्यवच्छेदेनावस्थानं चिन्तयन्नाह-'नेरइए णं भंते!' इत्यादि, सुगमं, नवरं नैरयिकास्तथाभवस्वाभाव्यात् स्वभवाच्युत्वा अनन्तरं न भूयो नैरयिकत्वेनोत्पद्यन्ते, ततो यदेव तेषां भवस्थितेः परिमाणं तदेव कायस्थितेरपि इत्युपपद्यते जघन्यत उत्कर्षतश्च यथोक्तपरिमाणा कायस्थितिः।

'तिरिक्खजोणिए णं भंते!' इत्यादि, तत्र यदा देवो मनुष्यो नैरयिको वा तिर्यक्षूत्पद्यते तत्र चान्तुहुर्त्तं स्थित्वा भूयः स्वगतौ गत्यन्तरे वा सङ्क्रामति तदा लभ्यते जघन्यतोऽन्तर्मुहूर्त्तप्रमाणा कायस्थितिः, उत्कर्षतोऽनन्तरं कालं यावत्, तस्य चानन्तस्य कालस्य प्ररूपणा द्विधा, तद्यथा-कालतः क्षेत्रतश्च, तत्र कालतोऽनन्ता उत्सर्प्पिण्यवलसर्प्पिणयः, उत्सर्प्पिणयवसर्प्पिणीपरिमाणं च नन्यध्ययनटीकातोऽवसेयं, तत्र सविस्तरमभिहितत्वात्, क्षेत्रतोऽनन्तालोकाः, किमुक्तं भवति?-अनन्तेषु लोकाकाशेषु प्रतिसमयमेकैकप्रदेशापहारे क्रियमाणे यावत्योऽनन्ता उत्सर्प्पिण्यवसर्प्पिण्यो भवन्ति तावतीर्यावत् तिर्यक् तिर्यकत्वेनावतिष्ठते,

एतदेव कालपरिमाणं पुद्गलपरावर्त्तसङ्ख्यातो निरूपयति-असङ्ख्येयाः पुद्गलपरावर्त्ताः, पुद्गलपरावर्त्तस्वरूपं च पञ्चसङ्ग्रहटीकायां विस्तरतरकेणाभिहितचमिति ततोऽवधार्यं, इह तु नाभिधीयते, ग्रन्थगौरवभयात्, असङ्ख्याता अपि पुद्गलपरावर्त्ताः कियन्त इति विशेषसङ्ख्या-यनिरूपणार्थमाह- 'ते णं' इत्यादि, ते पुद्गलपरावर्त्ता आवलिकाया असङ्ख्येयभागः, किमुक्तं भवति?- आवलिकाया असङ्ख्येयतमे भागे यावन्तः समयास्तावत्प्रमाणा असङ्ख्येयाः पुद्गलपरावर्त्ता इति, एतच्चैवं कायस्थितिपरिमाणं वनस्पत्यपेक्षया द्रष्टव्यं न शेषतिर्यगपेक्षया, वनस्पतिव्यतिरेकेण शेषतिरश्चामेतावत्कालप्रमाणकायस्थितेरसंभवात्,

'तिरिक्खजोणिणी णं भंते!' इत्यादि, इहोत्तरत्र च जघन्यान्तर्मुहूर्त्तभावना प्रागुक्तान्त-र्मुहूर्त्तभावनानुसारेण स्वयं भावनीया, उत्कर्शतस्त्रीणि पल्योपमानि पूर्वकोटीपृथकत्वाभ्यधिकानि, कथं इति चेत्?, उच्यते, इह तिर्यङ्मनुष्याणां संज्ञीपञ्चेन्द्रियाणामुत्कर्षतोऽप्यष्टौ भवाः कायस्थितिः "नरतिरियाण सत्तट्ठ भवा" इति वचनात्, तत्रोत्कर्षस्य चिन्तयमानत्वात् अष्टावपि भवा यथा-संभवमुत्कृष्टस्थितिकाः परिगृह्यन्ते, असङ्ख्येयवर्षायुष्कस्तु मृत्वा नियमतो देवलोकेषूत्पद्यते न तिर्यक्षु, ततः सप्त भवाः पूर्वकोट्यायुषो वेदितव्याः अष्टमस्तु पर्यन्तवर्त्ती देवकुर्वादिष्विति त्रीणि पल्योपमानि पूर्वकोटीपृथकत्वाभ्यधिकानि भवन्ति-'एवं मणुस्सेवि मणुस्सीवि' इति,

एवं-तिर्यक्स्त्रीगतेन प्रकारेण मनुष्योऽपि मानुष्यपि च वक्तव्या, किमुक्तं भवति मनुष्यसूत्रे

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मानुषीसूत्रे च जघन्यतोऽन्तर्मुहूर्त्तं उत्कर्षतस्त्रीणि पल्योपमानि पूर्वकोटीपृथकत्वाभ्यधिकानि वक्तव्यानीति, सूत्रपाठस्त्वेवं-'मणुस्से णं भंते ! मणुस्सत्ति कालओ केवच्चिरं होइ ?, गोयमा ! जहन्नेणं अंतोमुहुत्तं उक्कोसेणं तिन्नि पलिओवमाइं पुव्वकोडीपुहुत्तमब्भहियाइं, मणुस्सी णं भंते ! मणुस्सित्ति कालओ केवच्चिरं होइ' इत्यादि,

देवसूत्रे 'जहेव नेरइए' इति, यथैव नैरयिकः प्रागुक्तः तथैव देवोऽपि वक्तव्यः, देवस्यापि जघन्यतो दश वर्षसहस्राणि उत्कर्षतस्त्रयस्त्रिंशत्सागरोपमाणि वक्तव्यानीति भावः, देवा अपि हि स्वभवाच्च्युत्वा न भूयोऽनन्तरं देवत्वेनोपपद्यन्ते "नो देवे देवेसु उववज्जइ" इति वचनात्, ततो यदेव देवानामपि भवस्थितेः परिमाणं तदेव कायस्थितेरपि, देवीसूत्रे उत्कर्षतः पञ्चपञ्चाशत्पल्योपमानीति, देवीनां भवस्थितेत्कर्षतोऽप्येतावत्प्रमाणत्वात्, एतच्चेशानदेव्यपेक्षया द्रष्टव्यं, अन्यत्र देवीनामेतावत्याः स्थितेरसंभवात्, । सिद्धसूत्रे साद्यपर्यवसित इति, सिद्धत्वस्य क्षयासंभवात्, सिद्धत्वाद्धि च्यावयितुं ईशा रागादयो, न च ते भगवतः सिद्धस्य संभवन्ति, तन्निमित्तकर्मपरमाण्वभावात्, तदभावश्चा तेषां निर्मूलकाषंकषितत्वात् ॥

सम्प्रत्येतावतो नैरयिकादीन् पर्याप्तापर्याप्तविशेषणद्वारेण चिन्तयन्नाह-'नेरइए णं भंते इत्यादि, नैरयिको भदन्त ! अपर्याप्त इति-अपर्याप्तत्वपर्यायविशिष्टोऽविच्छेदेन कालतः कियन्तं कालं यावद्भवति ?, भगवानाह-गौतम ! इत्यादि, इहापर्याप्तावस्था जघन्यत उत्कर्षतश्चान्तर्मुहूर्त्तप्रमाणा, तत ऊर्द्ध नैरयिकाणामवश्यं पर्याप्तावस्थाभावात्, तत उक्तं 'जहन्नेणवि अंतोमुहुत्तं उक्कोसेणवि अंतोमुहुत्तं' । 'एवं जाव देवी अपज्जत्तिया' इति, एवं-नैरयिकोक्तेन प्रकारेणापर्याप्तास्तिर्यगादयनावद्वक्तव्याः यावद्देव्यपर्याप्तिका, अपर्याप्तकदेवीसूत्रं यावदित्यर्थः, तत्र तिर्यञ्चो मनुष्याश्चा यद्यप्यपर्याप्तका एव मृत्वा भूयो भूयोऽपर्याप्तत्वेनोपपद्यन्ते तथापि तेषामपर्याप्तावस्था नैरयन्तर्येणोत्कर्षतोऽपि अन्तर्मुहूर्त्तप्रमाणैव लभ्यते, यद्वक्ष्यति अपज्जत्तए णं भंते ! अपज्जत्तएत्ति कालतो केवच्चिरं होइ ?, गोयमा ! जहन्नेणं अंतोमुहुत्तं उक्कोसेणवि अंतोमुहुत्तं' इति, देवदेवीसूत्रे अन्तर्मुहूर्त्तभावना नैरयिकवत् वक्तव्या ।

'नेरइयपज्जत्तए णं भंते !' इत्यादि, नैरयिकपर्याप्त इति-पर्याप्तो नैरयिक इत्येवमविच्छेदेन कालतः कियच्चिरं भवति ?, भगवानाह-गौतम ! जघन्यतो दश वर्षसहस्राण्यन्तर्मुहूर्त्तोनानि, अन्तर्मुहूर्त्तस्याद्यस्या पर्याप्तावस्थायां गतत्वात्, अत एवोत्कर्षतोऽपि त्रयस्त्रिंशत्सागरोपमाण्यन्तर्मुहूर्त्तोनानि, तिर्यक्सूत्रे जघन्यतोऽन्तर्मुहूर्त्तभावना प्रागिव, उत्कर्षतस्त्रीणि पल्योपमान्यन्तर्मुहूर्त्तोनानि, एतच्चोत्कृष्टायुषो देवकुर्वादिभाविनस्तिरश्चोऽधिकृत्य वेदनीयं, अन्येषामेतावत्कालप्रमाणायाः पर्याप्तावस्थाया अविच्छेदेनाप्राप्यमाणत्वात्, अत्राप्यन्तर्मुहूर्त्तोनत्वमन्तर्मुहूर्त्तस्याद्यस्यापर्याप्तावस्थायां गतत्वात्, एवं तिर्यक्स्त्रीमनुष्यामनुषीसूत्रेष्वपि भावनीयं ।

देवदेवीसूत्रयोस्तु जघन्यतउत्कर्षतश्च कायस्थितिपरिमाणं प्रागुक्तमेव अपर्याप्तावस्थाभाविनाऽन्तर्मुहूर्त्तेन हीनं परिभावनीयं । गतं गतिद्वारं, इदानीमिन्द्रियद्वारमभिधित्सुराह-

-: पदं - १८ - दारं - ३ :- "इन्द्रियं"

मू. (४७४) सइंदिए णं भंते ! सइंदिएत्ति कालतो केवचिरं होइ ?, गोयमा ! सइंदिए दुविए पन्नत्ते, तंजहा-अणाइए वा अपज्जवसिए अणाइए सपज्जवसिए । एगिंदिए णं भंते ! एगिंदिएत्ति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कालतो केवचिरं होइ ?, गोयमा ! जहन्नेणं अंतोमुहुत्तं उक्कोसेणं अनंतं कालं वणस्सइकालो ॥

बेइंदिए णं भंते ! बेइंदिएत्ति कालतो केवचिरं होइ ?, गोयमा ! जहन्नेणं अंतोमुहुत्तं उक्कोसेणं संखेज्जं कालं । एवं तेइंदियचउरिंदिएवि । पंचिंदिए णं भंते ! पंचिंदिएत्ति कालतो केवचिरं होइ ?, गोयमा ! जहन्नेणं अंतोमुहुत्तं उक्कोसेणं सागरोवमसहस्सं साइरेगं ।

अनिंदिए णं पुच्छा, गोयमा ! साइए अपज्जवसिए । सइंदियपज्जत्तए णं भंते ! सइंदियपज्जत्तएत्ति कालतो केवचिरं होइ ?, गोयमा ! जहन्नेणं अंतोमुहुत्तं उक्कोसेणं सागरोवमसतपुहुत्तं सातिरेगं ।

एगिंदियपज्जत्तए णं भंते ! पुच्छा, गोयमा ! जहन्नेणं अंतोमुहुत्तं उक्कोसेणं संखेज्जाइं वाससहस्साइं । बेइंदियपज्जत्तए णं पुच्छा, गोयमा ! जहन्नेणं अंतोमुहुत्तं उक्कोसेणं संखेज्जवासाइं,

तेइंदियपज्जत्तए णं पुच्छा, गोयमा ! जहन्नेणं अंतोमुहुत्तं उक्कोसेणं संखेज्जाइं राइंदियाइं, चउरिंदियपज्जत्तए णं भंते ! पुच्छा, गोयमा ! जहन्नेणं अंतोमुहुत्तं उक्कोसेणं संखेज्जा मासा ।

पंचिंदियपज्जत्तए णं भंते ! पंचिंदियपज्जत्तएत्ति कालतो केवचिरं होइ ?, गोयमा ! जहन्नेणं अंतोमुहुत्तं उक्कोसेणं सागरोवमसयपुहुत्तं । सइंदियअपज्जत्तए णं भंते ! पुच्छा, गोयमा ! जहन्नेणवि उक्कोसेणवि अंतोमुहुत्तं, वं जाव पंचिंदियअपज्जत्तए ।

वृ. 'सइंदिए णं भंते !' इत्यादि, सहेन्द्रियं यस्य येन वा स सेन्द्रियः, इन्द्रियं च द्विधा–लब्धीन्द्रियं द्रव्येन्द्रियं च, तत्रेह लब्धीन्द्रियमवलसेयं, तद्विग्रहगतावप्यस्ति इन्द्रियपर्याप्तस्यापि च, ततो निर्वचनसूत्रमुपपद्यते, अन्यथा तदघटमानकमेव स्यात्, निर्वचनसूत्रमेवाह–गौतम ! इत्यादि, इह यः संसारी स नियमात् सेन्द्रियः,संसारश्चानादिः इत्यनादिः सेन्द्रियः, तत्रापि यः कदाचिदपि न सेत्स्यति सोऽनाद्यपर्यवसितः, सेन्द्रियत्वपर्यायस्य कदाचिदप्यव्यवच्छेदात्, यस्तु सेत्स्यति सोऽनादिसपर्यवसितः, मुक्तवस्थायां सेन्द्रियत्वपर्यायस्याभावात् ।

एकेन्द्रियसूत्रे यदुक्तं 'उक्कोसेणं अनंतं कालं' इति तमेवानन्तकालं सविशेषं निरूपयति– 'वणस्सइकालो' इति, यावान् वनस्पतिकालोऽग्रे वक्ष्यते तावन्तं कालं यावदित्यर्थः, वनस्पतिकायश्चैकेन्द्रियः, एकेन्द्रियपदे तस्यापि परिग्रहात्, स च वनस्पतिकालः एवंप्रमाणः–'अनंताओ उस्सप्पिणीओसप्पिणीओ कालओ खेत्तओ अनंता लोगा असंखेज्जा पोग्गलपरियट्टा, ते णं पोग्गलपरियट्टा आवलियाए असंखेज्जइभागो' इति द्वीन्द्रियसूत्रे 'संखेज्जं कालं'ति सङ्खयेयानि वर्षसहस्राणीत्यर्थः, 'विगलिंदियाण य वाससहस्सा संखेज्जा' इति वचनात्, एवं त्रीन्द्रियचतुरिन्द्रियोरपि सूत्रे वक्तव्ये, तत्रापि जघन्यतोऽन्तर्मुहूर्त्त उत्कर्षतः सङ्खयेयकालमिति वक्तव्यमिति भावः, सङ्खयेयश्च कालः सङ्खयेयानि वर्षसहस्राणि प्रत्येतव्यानि । पञ्चेन्द्रियसूत्रे उत्कर्षतः सातिरेकं सागरोपमसहस्रं, तच्च नैरयिकतिर्यक्पञ्चेन्द्रियमनुष्य-देवभवभ्रमणेन द्रष्टव्यं, अधिकं तु न भवति, एतावत एव कालस्य केवलवेदसोपलब्धत्वात् । अनिन्द्रियो द्रव्यभावेन्द्रियविकलः स च सिद्ध एव सिद्धश्च साद्यपर्यवसितःतत उक्तं 'साइए अपज्जवसए' इति ।

'सइंदियअपज्जत्तए णं' इत्यादि, इहापर्याप्ता लब्ध्यपेक्षया करणापेक्षया च द्रष्टव्याः, उभयथापि तत्पर्यायस्य जघन्त उत्कर्षतो वाऽनन्तर्मूहूर्त्तप्रमाणत्वात्, एवं तावद्वाच्यं यावत्पञ्चेन्द्रिया-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पर्याप्तकः-पञ्चेन्द्रियापर्याप्तकसूत्रं, तच्च सुगमत्वात्, स्वयं परिभावनीयं, अनिन्द्रियोऽत्र न वक्तव्यः, तस्य पर्याप्तापर्याप्तविशेषणरहितत्वात। 'सइंदियपज्जत्तए णं भंते!' इत्यादि, इह पर्याप्तो लब्ध्यपेक्षया वेदितव्यः, स हि विग्रहगतावपि संभवति, करणैरपर्याप्तस्यापि, तत उत्कर्षतः सातिरेकं सागरोपम-शतपृथकत्वमिति यन्निर्वचनं तदुपपद्यते, अन्यथा करणपर्याप्तत्वस्योत्कर्षतोऽप्यन्तर्मुहूर्तोन-त्रयस्त्रिंशत्सागरोपमप्रमाणतया लभ्यमानत्वात् यथोक्तं निर्वचनं नोपपद्यते, एवमुत्तरसूत्रेऽपि पर्याप्तत्वं लब्ध्यपेक्षया द्रष्टव्यं। एतेन्द्रियपर्याप्तसूत्रे सङ्ख्येयानि वर्षसहस्राणीति, एकेन्द्रियस्य हि पृथिवीकायस्योत्कर्षतो द्वाविंशतिर्वर्षसहस्राणि भवस्थितिः अप्कायस्य सप्त वर्षसहस्राणि वातकायस्य त्रीणि वर्षसहस्राणि वनस्पतिकायस्य दश वर्षसहस्राणि ततो निरन्तरकतिपयपर्याप्तभवसंकलनया सङ्ख्येयानि वर्षसहस्राणि घटन्ते इति।

द्वीन्द्रियपर्याप्तसूत्रे सङ्ख्येयानि वर्षाणि, द्वीन्द्रियस्य हि उत्कर्षतो भवस्थितिपरिमाणं द्वादश संवत्सराणि, न च सर्वेष्वपि भवेषूत्कृष्टस्थितिसंभवः ततः कतिपयनिरन्तरपर्याप्तभवसंकलनयापि सङ्ख्येयानि वर्षाण्येव लभ्यन्ते न तु वर्षशतानि वर्षसहस्राणि वा।

त्रीन्द्रियपर्याप्तसूत्रे सङ्ख्येयानि रात्रिन्दिवानि, तेषां च भवस्थितेतेरुत्कर्षतोऽप्येकोन-पञ्चाशद्दिनमानतया कतिपयनिरन्तरपर्याप्तभवसंकलनायामपि सङ्ख्येयानां रात्रिन्दिवानामेव लभ्यमानत्वात् चतुरिन्द्रियपर्याप्तसूत्रे सङ्ख्येयया मासाः, तेषां भवस्थितेरुत्कर्षतः षण्मासप्रमाणतया कतिपयनिरन्तरपर्याप्तभवकालसंकलनायामपि सङ्ख्येयानां मासानां प्राप्यमाणत्वात्। पञ्चेन्द्रिसूत्रं सुगमं। गतमिन्द्रियद्वारं, इदानीं कायद्वारमभिधित्सुराह-

-: पदं - १८, द्वारं - ४ :- "काय" :-

मू. ४७५ *सकाइए णं भंते! सकाइएत्ति कालतो केवचिरं होइ?, गोयमा! सकाइए दुविहे पन्नत्ते, तंजहा-अणाइए वा अपज्जवसिए अणाइए वा सपज्जवसिए जहन्नेणं अंतोमुहुत्तं उक्कोसेणं दो सागरोवमसहस्साइं संखेज्जवाससमब्भहियाइं, अकाइए णं भंते! पुच्छा, गोयमा! अकाइए सादिए अपज्जवसिए, सकाइयअपज्जत्तए णं पुच्छा, गोयमा! जहन्नेणवि उक्कोसेणवि अंतोमुहुत्तं, एवं जाव तसकाइयअपज्जत्तए।*

सकाइयपज्जत्तए पुच्छा, गोयमा! जहन्नेणं अंतोमुहुत्तं उक्कोसेणं सागरोवमसयपुहुत्तं सातिरेगं, पुढविकाइए णं पुच्छा, गोयमा! जहन्नेणं अंतोमुहुत्तं उक्कोसेणं असंखेज्जं कालं असंखेज्जाओ उस्सप्पिणिओसप्पिणीओ कालतो खेत्ततो असंखेज्जा लोगा, एवं आउतेउवाउकाइयावि,

वणस्सइकाइया णं पुच्छा, गोयमा! जहन्नेणं अंतोमुहुत्तं उक्कोसेणं अनंतं कालं अनंताओ उस्सप्पिणिअवसप्पिणिओ काल खेत्तओ अनंता लोगा असंखेज्जा पुग्गलपरियट्टा ते णं पुग्गलपरियट्टा आवलियाए असंखेज्जइभागो।

पुढविकाइए पज्जत्तए पुच्छा, गोयमा! जहन्नेणं अंतोमुहुत्तं उक्कोसेणं संखेज्जाइं वाससहस्साइं, एवं आउवि, तेउकाइए पज्जत्तए पुच्छा, गोयमा! जहन्नेणं अंतोमुहुत्तं उक्कोसणं संखेज्जाइं राइंदियाइं, वाउकाइयपज्जत्तए णं पुच्छा, गोयमा! जहन्नेणं अंतोमुहुत्तं उक्कोसेणं संखेज्जाइं वाससहस्साइं,

वणस्सइकाइयपज्जत्तए पुच्छा, गोयमा! जहन्नेणं अंतोमुहुत्तं उक्कोसेणं संखेज्जाइं वास-

Jain Education International	For Private & Personal Use Only	www.jainelibrary.org

सहस्साइं, तसकाइयपज्जत्तए पुच्छा, गोयमा ! जहन्नेणं अंतोमुहुत्तं उक्कोसेणं सागरोवमसयपुहुत्तं सातिरेगं ।

वृ. सकाइए णं भंते !' इत्यादि, सह कायो यस्य येन वा स सकायः " सकाय एव सकायिकः आर्षत्वात् स्वार्थे इकप्रत्ययः, कायः-शरीरं, तच्चदारिकवैक्रियाहारकतैजसकार्मणभेदात् पञ्चधा, तत्रेह कार्मणं तैजसं वा द्रष्टव्यं, तस्यैवाऽऽसंसारभावात्, अन्यथा विग्रहगतौ वर्त्तमानस्य शरीर-पर्याप्तया पर्याप्तस्य च शेषशरीरासंभवादकायिकत्वं स्यात्, तथा च सति निर्वचनसूत्रप्रतिपादितं द्वैविध्यं नोपपद्यते, अथ निर्वचनसूत्रमाह-

'काइए दुविहे पन्नत्ते' इत्यादि, तत्र यः संसारपारगामी न भविष्यति सोऽनाद्यपर्यवसितः कदाचिदपि तस्य कायस्य व्यवच्छेदासंभवात्, यस्तु मोक्षमदिगन्ता सोऽनादिसपर्यवसितः तस्य मुक्त्यवस्थासंभवे सर्वात्मना शरीरपरित्यागात्, पृथिव्यप्तेजोवायुवनस्पतिसूत्राणि सुगमानि, अन्यत्रापि तदर्थस्य प्रतीतत्वात्, तथा चोक्तं-

॥ १ ॥ "असंखोसप्पिणिओसप्पिणीओ एगिंदियाण उ चउण्हं ।
ता चेव उ अणंता वणस्सइए उ बोद्धव्वा ॥"

ननु यदि वनस्पतिकालप्रमाणं असङ्ख्येयाः पुद्गलपरावर्त्तास्ततो यद्गीयते सिद्धान्ते-मरुदेवाजीवो यावज्जीवभावं वनस्पतिरासीदिति, तत्कथं स्यात् ?, कथं वा वनस्पतीनामनादित्वं, प्रतिनियतकालप्रमाणतया वनस्पतिभावस्यानादित्वविरोधात्, तथाहि-असङ्ख्येयाः पुद्गलपरा वर्त्तास्तेषामवस्थानमानिं, तत एतावति कालेऽतिक्रान्ते नियमात् सर्वेऽपि कायपरावर्त्त कुर्वते, यथा स्वस्थितिकालान्ते सुरादयः, उक्तं च-

॥ १ ॥ "जइ पुग्गलपरियट्टा संखाईया वणस्सईकालो ।
तो अच्चंतवणस्सईणमणाइयत्तमहेतूओ ॥
॥ २ ॥ न य मरुदेवाजीवो जावज्जीवं वणस्सई आसी ।
जमसंखेज्जा पुग्गलपरियट्टा तत्थऽवत्थाणं ॥
॥ ३ ॥ कालेणेवइएणं जम्हा कुव्वंति कायपल्लट्टं ।
सव्वेवि वणस्सइणो ठिइकालंते जह सुराई ॥"

किं च-एवं यद्वनस्पतीनां निर्लेपनमागमे प्रतिषिद्धं तदपीदानीं प्रसक्तं, कथमिति चेद् ?, उच्यते, इह प्रतिसमयमसङ्ख्येया वनस्पतिभ्योजीवा उद्वर्त्तन्ते, वनस्पतीनां च कायस्थितिपरि माणमसङ्ख्येयाः पुद्गलपरावर्त्तास्ततो यावन्तोऽसङ्ख्येयेषु पुद्गलपरावर्ततेषु समयास्तैरभ्यस्ता एकसमयोद्वृत्ता जीवा यावन्तो भवन्ति तावत्परिमाणमागतं वनस्पतीनां, ततः प्रतिनियत-परिमाणतया सिद्धं निर्लेपनं, प्रतिनियतपरिमाणत्वादेव च गच्छता कालेन सिद्धिरपि सर्वेषां भव्यानां प्रसक्ता, तत्प्रसक्तौ च मोक्षपथव्यवच्छेदोऽपि प्रसक्तः, सर्वभव्यसिद्धिगमनानन्तरमन्यस्य सिद्धिगमनायोगात्, आह च-

॥ १ ॥ "कायट्ठिइयकालेणं तेसिमसंखज्जयावहारेणं ।
निल्लेवणमावन्नं सिद्धीवि य सव्वभव्वाणं ॥
॥ २ ॥ पइसमयसंखेज्जा जेणुव्वट्टंति तो तदब्भत्था ।
कायट्ठिइए समया वणस्सईणं च परिमाणं ॥"

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न चैतदस्ति, वनस्पतीनामनादित्वस्य निर्लेपनप्रतिषेधस्य सर्वभव्यासिद्धेर्मोक्षपथाव्यवच्छेदस्य च तत्र तत्र प्रदेशे सिद्धान्तेऽभिधानात्, उच्यते, इह द्विविधा जीवाः–

सांव्यवहारिका असांव्यवहारिकाश्चेति, तत्र ये निगोदावस्थात् उद्‌वृत्त्य पृथिवीकायिकादिभेदेषु वर्त्तन्ते ते लोकेषु दृष्टिपथमागताः सन्तःपृथिवीकायिकादिव्यवहारमनुपतन्तीति व्यवहारिका उच्यन्ते, ते च यद्यपि भूयोऽपि निगोदावस्थामुपयान्ति तथापि ते सांव्यवहारिका एव, संव्यहारे पतितत्वात्, ये पुनरनादिकालादारभ्य निगोदावस्थामुपगता एवावतिष्ठन्ते ते व्यवहारपथातीतत्वादसांव्यवहारिका;, कथमेतदवसीयते ? द्विविधाः जीवाः सांव्यवहारिकाः असांव्यवहारिकाश्चेति, उच्यते, युक्तिवशात्, इह प्रत्युत्पन्नवनस्पतीनामपि निर्लेपनमागमे प्रतिषिद्धं, किं पुनः सकलवनस्पतीनां, तथा भव्यानामपि, य(त)च्च यद्यसांव्यवहारिकराशिनिपतिता अत्यन्तवनस्पतयो न स्युः ततः कथमुपपद्येत ?, तस्मादवसीयते अस्त्यसांव्यवहारिकराशिरपि यद्‌गतानां वनस्पतीनामनादिता, किं चेयमपि गाथा गुरूपदेशादागता समये प्रसिद्धा–

॥१॥ "अत्थि अनंता जीवा जेहिं न पत्तो तसाइपरिणामो ।
तेवि अनंतानंता निगोयवासं अनुवसंति ॥"

–तत इतोऽप्यसांव्यवहारिकराशिः सिद्धः, उक्तं च-

॥१॥ "पच्चुप्पन्नवणस्सईण निल्लेवणं न भव्वाणं ।
जुत्तं होइ न तं जइ अच्चंतवणस्सई नत्थि ॥

॥२॥ एवमणादिवणस्सईणमत्थित्तमत्थओ सिद्धं ।

भन्नइ य इमावि गाहा गुरूवएसागया समये ॥ अत्थि अनंता जीवा०" इत्यादि,

तत्रेदं सूत्रं सांव्यवहारिकानधिकृत्यावसेयं, न चासांव्यवहारिकान्, अविषयत्वात् सूत्रस्य, न चैतत् स्वमनीषिकाविजृम्भितं, यत आहुः जिनभद्रगणिक्षमाश्रमणपूज्यापादाः–

॥१॥ "तह कायट्ठिइकालादओ विसेसे पडुच्च किर जीवे ।
नाणाइवणस्सइणो ज संववहारबाहिरया ॥"

अत्रादिशब्दात् सर्वैरपि जीवैः श्रुतमनन्तशः स्पृष्टमित्यादि यदस्यामेव प्रज्ञापनायां वक्ष्यति प्रागुक्तं च तत्परिग्रहः, ततो न कश्चिद्दोषः । त्रसकायसूत्रं सुप्रतीतं ॥

एतानेव त्रसकायिकादीन् पर्याप्तापर्याप्तविशेषणविशिष्टान् चिन्तयन्नाह–'सकाइयअपज्जत्तए णं भंते !' इत्यादि, सुगमं, नवरं तेजःकायसूत्रे उत्कर्षतः सङ्ख्येयानि रात्रिन्दिवानीति, तेजःकायस्य हि भवस्थितिरुत्कर्षतोऽपि त्रीणि रात्रिन्दिवानि, ततो निरन्तरकतिपयपर्याप्तभवकालसंकलनायामपि सङ्ख्येयनानि रात्रिन्दिवान्येव लभ्यनते, न तु वर्षाणि वर्षसहस्राणि वा ।

सम्प्रति कायद्वारान्तःप्रवेशसंभवात् सूक्ष्मकायिकादीन्निरूपयितुकाम आह०–

मू. (४७६) *सुहुमे णं भंते ! सुहुमेत्ति कालतो केवचिरं होति ?, गो० ! जह० अंतो० उ० असंखेज्जं कालं असंखेज्जाओ उस्सप्पिणिओसप्पिणीतो कालतो खेत्ततो असंखेज्जा लोगा, सुहुमपुढविकाइते सुहुमआउका० सुहुमतेउका० सुहुमवाउका० सुहुमवणप्फकाइते० सुहुमनिगोदेवि ज० अंतोमुहुत्तं उक्को० असंखेज्जं कालं असंखिज्जाओ उस्सप्पिणिओसप्पिणीतो कालतो खेत्ततो असंखेज्जा लोगा, सुहुमे णं भंते ! अपज्जत्तएत्ति पुच्छा, गो० ! ज० उ० अंतोमुहुत्तं,*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पुढविकाइयआउकयतेउकाय- वाउकायवणफ्फइकाइयाण य एवं चेव, पज्ञत्तियाणवि एवं चेव जहा ओहियाणं।

बादरे णं भंते! बादरेत्ति कालतो केवचिरं होति?, गो० ! जह० अंतो० उक्को० असंखेज्ञं कालं असंखेज्ञाओ उस्सप्पिणिओसप्पिणीतो कालओ खेत्तओ अंगुलस्स असंखेज्ञतिभागं, बादरपुढविकाइए णं भंते! पुच्छा, गो० ! जह० अंतो० उक्को० सत्तरि सागरोवमकोडाकोडीतो, एवं बादरआउक्काइएवि जाव बादरतेउकाइएवि बादरवाउक्काइएवि, बादरवणफ्फइकाइते बादर० पुच्छा, गो० ! ज० अंतो० उक्को० असंखेज्ञं कालं जाव खेत्तओ अंगुलस्स असंखेज्ञतिभागं, पत्तेयसरीरबादरवणफ्फइकाइए णं भंते! पुच्छा, गो० ! जह० अंतो० उक्को० सत्तरि सागरोवमकोडाकोडीतो।

निगोदे णं भंते! निगोएत्ति केवचिरं होति?, गो० ! जह० अंतो० उक्कोसेणं० अनंताओ उस्सप्पिणिओसप्पिणीओ कालतो खेत्ततो अड्ढाइज्ञा पोग्गलपरियट्टा, बादरनिगोदे णं भंते! बादर० पुच्छा, गो० ! जह० अंतो० उक्सो० सत्तरि सागरोवमकोडाकोडीतो।

बादरतसकाइया णं भंते! बादरतसकाइयत्ति काल० केवचिरं होइ?, गो० ! जह० अंतो० उक्को० दो सागरोवमसहस्साइं संखेज्ञवासमब्भहियाइं, एतेसिं चेव अपज्ञत्तगा सव्वेवि जह० उक्को० अंतो०, बादरपज्ञत्ते णं भंते! बादरपज्ञत्त० पुच्छा, गो० ! जह० अंतो० उक्को० सागरोवमसतपुहुत्तं सातिरेगं, बादरपुढविकाइयपज्ञत्तए णं भंते! बादर० पुच्छा, गो० ! जह० अंतो० उक्को० संखिज्ञाइं वाससहस्साइं, एवं आउकाइएवि,

तेउकाइयपज्ञत्तए णं भंते! तेउकाइयपज्ञ० पुच्छा, गो० ! ज० अंतो० उक्को० संखिज्ञाइं राइंदियाइं, वाउकाइयवणस्सइकाइयपत्तेयसरीरबादरवणफ्फइकाइते पुच्छा, गो० ! ज० अंदो० उ० संखेज्ञाइं वाससहस्सआइं, निगोयपज्ञत्तते बादरनिगोदपज्ञत्तए पुच्छा, गो० ! दोण्हवि ज० अन्तो० उक्को० अंतो०। बादरतसकाइयपज्ञत्ताए णं भंते! बादरतसकाइयपज्ञत्तएत्ति कालतो केवचिरंहोति?, गो० ज० अंतो० उ० सागरोवमसतपुहुत्तं सातिरेगं।

वृ. 'सुहुमे णं भंते!' इत्यादि 'सूक्ष्मः' सूक्ष्मकायिको भदन्त! सूक्ष्म इति सूक्ष्मत्वपर्यायविशिष्टः सन्नव्यवच्छेदेने कालतः कियच्चिरं भवति, भगवानाह–गौतम! 'जहन्नेण'मित्यादि, एतदपि सूत्रं सांव्यवहारिकजीवविषयमवसातव्यं, अन्यथा उत्कर्षतोऽसङ्ख्येयकालमिति यन्निर्वचनमुक्तं तन्नोपपद्यते, सूक्ष्मनिगोदजीवानामसांव्यवहारिकाराशिनिपतिकतानामनादितायाः प्रागुपपादितत्वात्, 'खेत्ततो असंखेज्ञा लोगा' इति, असङ्ख्येयेषु लोकाकाशेषु प्रतिसमयमेकैकप्रदेशापहारे यावत्य उत्सर्प्पिण्यवसर्पिण्यो भवन्ति तावत्प्रमाणा असङ्ख्येया उत्सर्प्पिण्यवसर्प्पिण्य इत्यर्थः।

सूक्ष्मवनस्पतिकायसूत्रमपि प्रागुक्तयुक्तिवशात् सांव्यवहारिकजीवविषयं व्याख्येयं।

तथा सूक्ष्माः सामान्यतः पृथिवीकायिकादिविशेषणविशिष्टश्च पर्याप्ता अपर्याप्ताश्च निरन्तरं भवन्तो जघन्यतःउत्कर्षतो वाऽन्तर्मुहूर्त्तकालं यावत् न परमपि, ततस्तद्विषयसूत्रकदम्बके सर्वत्रापि जघन्यतः उत्कर्षतो वाऽन्तर्मुहूर्त्तमुक्तं, बादरसामान्यसूत्रे यदुक्तम् 'असंखेज्ञकालं' तस्य विशेषनिरूपणार्थमाह–असंङ्ख्येया उत्सर्प्पिण्यवसर्प्पिण्यः, इदं कालतः परिमाणमुक्तं, क्षेत्रत आह–

'अंगुलस्स असंखेज्ञइभागो' इति, अङ्गुलस्यासङ्ख्येयभागः, किमुक्तं भवति? –अङ्गुल-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्यासङ्ख्येयतमे भागे यावन्त आकाशप्रदेशास्तेषां प्रतिसमयं एकैकप्रदेशापहारे यावन्त्योऽसङ्ख्येया उत्सर्प्पिण्यवसर्प्पिण्यो भवन्ति तावत्य इति, अथ कथं अङ्गुलासङ्ख्येयभागमात्रस्यापि प्रतिसमयमेकैकप्रदेशापहारे असङ्ख्येया उत्सर्प्पिण्यवसर्प्पिण्यो लगन्ति ?, उच्यते, क्षेत्रस्य सूक्ष्मत्वात्, उक्तं च-

"सुहुमो य होइ कालो तत्तो सुहुमयरयं हवइ खित्त" मित्यादि, एतच्च बादरवनस्पतिकायापेक्षयाऽवसातव्यं, अन्यस्य बादरस्यैतावत्का यस्थितेरसम्भवात्, शेषसूत्राणि द्वारसमाप्तिं यावत् सुगमानि । गतं कायद्वारम्, इदानीं योगद्वारमभिधित्सुराह-

-: पदं - १८, दारं - ५ "योगः" :-

मू. (४७७) *सजोगी णं भंते! सजोगित्ति काल० ?, गो० ! सजोगी दुविहे पं०, तं०-अणादीए वा अपज्जवसिते अणादीए वा सपज्जवसिते, मनजोगी णं भंते ! मनजोगीत्ति कालतो० ? गो० ! ज० एक्कं समयं उक्को० अंतो०, एवं वइजोगीवि, कायजोगी णं भंते ! काल० ?, गो० ! जहन्नेणं अंतो० उक्को० वणप्फइकालो, अजोगी णं भंते ! अजोगित्ति काल केवचिरं होति ?, गो० ! सादीए अपज्जवसिते ।*

वृ. 'सजोगी णं भंते !' इत्यादि, योगाः-मनोवाक्कायव्यापाराः, योगा एषां सन्तीति योगिनः मनोवाक्कायाः सहयोगिनो यस्य येन वा स सयोगी, अत्र निर्वचनं 'सजोगी दुविहे पं०' इत्यादि, अनाद्यपर्यवसितो यो न जातुचिदपि मोक्षं गन्ता स हि सर्वकालमवश्यमन्यतमेन योगेन सयोगी ततोऽनाद्यपर्यवसितो, यस्तु यास्यति मोक्षं सोऽनादिसपर्यवसितः, मुक्तिपर्यायप्रादुर्भावे योगस्य सर्वथापगमात्,

मनोयोगिसूत्रे जघन्यतः एकं समयमिति-यदा कश्चिदौदारिककाययोगेन प्रथमसमयेन मनोयेग्यान् पुद्गलानादाय द्वितीयसमये मनस्त्वेन परिणमय्य मुञ्चति तृतीयसमये चोपरमते म्रियते वा तदा एकं समयं मनोयोगी लभ्यते, उत्कर्षतोऽन्तर्मुहूर्त्तं, निरन्तरं मनोयोग्यपुद्गलानां ग्रहणनिसर्गौ कुर्वन् तत ऊर्द्ध्वं सोऽवश्यं जीवस्वाभाव्यादुपरमते, उपरम्य च भूयोऽपि ग्रहणनिसर्गौ करोति, परं कालसौक्ष्म्यात् कदाचिन्न स्वसंवेदनपथमायाति, तत उत्कर्षतोऽपि मनोयोगोऽन्तर्मुहूर्त्तमेव, एवं 'वयजोगीवि' इति, एवं मनोयगीव वाग्योग्यपि वक्तव्यः, तद्यथा-'वइजोगी णं भंते ! वइजोगीति कालओ केवचिरं होति ?, गो० ! जह० एक्कं समयं उक्को० अंतोमुहुत्त'मिति तत्र यः प्रथमसमये काययोगेन भाषायोग्यानि द्रव्याणि गृह्णाति द्वितीयसमये तानि भाषात्वेन परिणमय्य मुञ्चति तृतीयसमये चोपरमते म्रियते वा स एकं समयं वाग्योगी लभ्यते, आह च मूलटीकाकारः-

'पढमसमये कायजोगेण गहियाणं भासादव्वाणं बिइयसमये वइजोगेण निसग्गं काऊण उवरमंतस्स मरंतस्स वा एगसमओ लब्भइ' इति, अन्तर्मुहूर्त्तं निरन्तरं ग्रहणनिसर्गौ कुर्वन् तदनन्तरं चोपरमते, तथाजीवस्वाभाव्यात्, काययोगी जघन्यतोऽन्तर्मुहूर्त्तमिति, इह द्वीन्द्रियादीनां वाग्योगोऽपि लभ्यते, संज्ञिपञ्चेन्द्रियाणां मनोयोगोऽपि ततो यदा वाग्योगो भवति मनोयोगो वा तदा न काययोगप्राधान्यमिति सादिसपर्यवसितत्वभावात् जघन्यतोऽन्तर्मुहूर्त्तं काययोगी लभ्यते,

उत्कर्षतो वनस्पतिकालः, स च प्रागेवोक्तः, वनस्पतिकायिकेषु हि काययोग एव केवलो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न वाग्योगो मनोयोगो वा, ततः शेषयोगासम्भवात्तेष्वाकायस्थितेः सतंत काययोग इति मतं, अयोगी च सिद्धः, स च साद्यपर्यवसित इत्ययोगी साद्यपर्यवसित उक्तः ।

गतं योगद्वारमिदानीं वेदद्वारं प्रतिपिपादयिषुराह–

–: पदं – १८, दारं – ६ "वेद" :–

मू. (४७८) *सवेदए णं भंते! सवेदएत्ति० ?, गो० ! सवेदए तिविधे पं०, तं०–अणादीए वा अपज्जवसिते अणादीए वा सपज्जवसिए सादीए वा सपज्जवसिए, तत्थ णं जे से सादीए सपज्जवसिए से जह० अंतो० उक्को० अणंतं कालं अणंताओ उस्सप्पिणिओसप्पिणीतो कालतो खेत्ततो अवड्ढं पोग्गलसपरियट्टं देसूणं,*

इत्थिवेदे णं भंते! इत्थिवेदेत्ति काल० ?, गो० ! एगेणं आदेसेणं जह० एक्कं समयं उक्को० दसुत्तरं पलिओवमसतं पुव्वकोडिपुहुत्तमब्भहियं १, एगेणं आदेसेणं जह० एगं समयं उक्को९ अट्ठारसपलितोवमाइं पुव्वकोडिपुहुत्तमब्भहियाइं २, एगेणं आदेसेणं ज० एगं समयं उक्को० चउद्दस पलिओवमाइं पुव्वकोडिपुहुत्तमब्भहियाइं ३, एगेणं आदेसेणं ज० एगं समयं उक्को० पलिओवमसतं पुव्वकोडिपुहुत्तमब्भहियं ४, एगेणं आदेसेणं जह० एगं समयं उक्को० पलितोवमपुहुत्तं पुव्वकोडिपुहुत्तमब्भहियं ५,

पुरिसवेदे णं भंते ! २ ?, गो० ! जह० अंतो० उक्को० सागरोवमसतपुहुत्तं सातिरेगं,

नपुंसगवेए णं भंते! नपुंसगवेदेत्ति, पुच्छा, गो० ! ज० एवं समयं उक्को० वणस्सइकालो, अवेदए णं भंते ! अवेदएत्ति पुच्छा, गो० ! अवेदे दुविधे पं०, तं०–सादीए वा अपज्जवसिए साइए वा सपज्जवसिते, तत्थ णं जे से साइए सपज्जवसिते से जहन्नेणं एगं समये उक्को० अंतो०

वृ. 'सवेदए णं भंते' इत्यादि, सह वेदो यस्य येन वा स सवेदकः, 'शेषाद्वे' ति कप्रत्ययः स च त्रिविधः, तद्यथा अनाद्यपर्यवसितोऽनादिसपर्यवसितःसादिसपर्यवसितश्च, तत्र यः उपशमश्रेणिं क्षपकश्रेणिं वा जातु–कदाचिदपि न प्राप्स्यति सोऽनाद्यपर्यवलसितः, कदाचिदपि तस्य वेदोदयव्यवच्छेदासम्भवात्, यस्तु प्राप्स्यति उपशमश्रेणिं क्षपकश्रेणिं वा सोऽनादिसपर्यवसितः, उपशमश्रेणितप्रतिपत्तौ क्षपकश्रेणिप्रतिपत्तौ वा वेदोदव्यवच्छेदस्य भावित्वात्, यस्तूपशमश्रेणिं प्रतिपद्यते तत्र चावेदको भूत्वा भूय उपशमश्रेणीतःप्रतिपतन् सवेदको भवति स सादिसपर्यवसितः,

स च जघन्यतोऽन्तर्मुहूर्त्तं, कथमिति चेत् ?, उच्यते, इह यदा कोऽपि उपशमश्रेणिं उपपद्य त्रिविधमपि वेदमुपशमय्यावेदको भूत्वा पुनरपि श्रेणीतःप्रतिपतन् सवेदकत्वं प्राप्य झटित्युपशमश्रेणिं कार्मग्रन्थिकाभिप्रायेण क्षपकश्रेणिं वा प्रतिपद्यते प्रतिपद्य च वेदत्रयमुपशमयति क्षपयति वा अन्तर्मुहूर्त्तेन तदा जघन्येनान्तर्मुहूर्त्त सवेदकःउत्कर्षतोऽपार्द्धपुद्‌गलपरावर्त्त देशोनं, अपगतमर्द्धं यस्य सोऽपार्द्धः देशोनः–किञ्चिदूनः, उपशमश्रेणितो हि प्रतिपतित एतावन्तं कालं संसारे पर्यटति, ततो यथोक्तमुत्कर्शषतःसादिसपर्यवसितस्य सवेदकस्य कालमानमुपपद्यते ।

स्त्रीवेदविषये च पञ्चादेशास्तान्क्रमेण निरूपयति–'एगेणं आदेसेण' मित्यादि, तत्र सर्वत्रापि जघन्यतःसमयमात्रभावनेयं–काचित् युवतिरुपशमश्रेण्यां वेदत्रयोपशमेनावेदकत्वमनुभूय ततः श्रेणेः प्रतिपतन्ती स्त्रीवेदोदयमेकसमयमनुभूय द्वितीयसमये कालं कृत्वा देवेषूत्पद्यते, तत्र च

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तस्याः पुंस्त्वमेव न स्त्रीत्वं तत एवं जघन्यतः समयमात्रं स्त्रीवेदः, उत्कर्षचिन्तायामियं प्रथमादेश-भावना-कश्चिज्जन्तुर्नारीषु तिरश्चीषु वा पूर्वकोट्यायुष्कासु मध्ये पञ्चान् भवान् अनुभूय ईशाने कल्पे पञ्चपञ्चाशत्प्रमाणपल्योपमोत्कृष्टस्थितिष्वपरिगृहीतासु देवीषु मध्ये देवीत्वेनोत्पन्नस्ततः स्वायुः-क्षये च्युत्वा भूयोऽपि नारीषु तिरश्चीषु वा पूर्वकोट्यायुष्कासु मध्ये स्त्रीत्वेनोत्पन्नस्ततो भूयोऽपि द्वितीयं वारं ईशाने देवलोके पञ्चपञ्चाशत्पल्योपमप्रमाणोत्कृष्टायुष्कास्वपरिगृहीतदेवीषु मध्ये देवीत्वेनोत्पन्नस्ततः परमवश्यं वेदनान्तरमेव गच्छति, एवं दशोत्तरं पल्योपमशतं पूर्वकोटि-पृथकत्वाभ्यधिकं प्राप्यते, अत्र पर आह-

ननु यदि देवकुरूत्तरकुर्वादिषु पल्योपमत्रयस्थितिकासु स्त्रीषु मध्ये समुपपद्यते ततोऽधि-काऽपि स्त्रीवेदस्य स्थितिरवाप्यते, ततः किमित्येतावत्येवोपदिष्टा ?, तदयुक्तमभिप्रायापरिज्ञानात्, तथाहि-इह तावद्देवीभ्यश्च्युत्वा असङ्ख्येयवर्षायुष्कासु स्त्रीषु मध्ये नोत्पद्यते, देवयोनेश्च्युतानां असङ्ख्येयवर्षायुष्केषु मध्ये उत्पादप्रतिषेधात्, नाप्यसङ्ख्येयवर्षायुष्का सती योषित् उत्कृष्टासु देवीषु जायते, यत उक्तं मूलटीकाकृता-"जत्तो असंखेज्जवासाउया उक्कोसट्ठिई न पावेइ" इति, ततो यथोक्तप्रमाणैवोत्कृष्टा स्थिति; स्त्रीवेदस्यावाप्यते, द्वीतायदेशवादिनः पुनरेवमाहुः-

नारीषु तिरश्चीषु वा पूर्वकोट्यायुष्कासु मध्ये पञ्चान् भवान् अनुभूय पूर्वप्रकारेणेशान-देवलोकेषु वारद्वयमुत्कृष्टस्थितिकासु देवीषु मध्ये उत्पद्यमाना नियमतः परिगृहीतास्वेवोत्पद्यते नापरिगृहीतासु ततस्तन्मतेनोत्कृष्टमवस्थानं स्त्रीवेदस्याष्टादश पल्योपमानि पूर्वकोटिपृथकत्वं च, तृतीयादेशवादिनां तु सौधर्मदेवलोके परिगृहीतासु सप्तपल्योपमप्रमाणोत्कृष्टायुष्कासु वारद्वयं समुत्पद्यते, ततस्तन्मतेन चतुर्दश पल्योपमानि पूर्वकोटिपृथकत्वाभ्यधिकानि स्त्रीवेदस्य स्थितिः, चतुर्थादेशवादिनां तु मतेन सौधर्मदेवलोके पञ्चाशत्पल्योपमप्रमाणोत्कृष्टास्वपरिगृहीतदेवीष्वपि पूर्वप्रकारेण वारद्वयं देवीत्वेनोत्पद्यते, ततस्तन्मतेन पल्योपमशतं पूर्वकोटिपृथकत्वाभ्यधिकमवाप्यते, पञ्चमादेशवादिनः पुनरिदमाहुः-

नानाभवभ्रमणद्वारेण यदि स्त्रीवेदस्योत्कृष्टमवस्थानं चिन्त्यते तर्हि पल्योपमपृथकत्वमेव पूर्वकोटीपृथकत्वाभ्यधकं प्राप्यते न ततोऽधिकं, कथमेतदिति चेत् ?, उच्यते, नारीषु तिरश्चीषु वा पूर्वकोट्यायुष्कासु मध्ये सप्त भवाननुभूयाष्टमभवे देवकुर्वादिषु त्रिपल्योपमस्थितिषु स्त्रीमध्ये स्त्रीत्वेन समुत्पद्यते, ततो मृत्वा सौधर्मे देवलोके जघन्यस्थितिकासु देवीषु मध्ये देवीत्वेनोपजायते, तदनन्तरं चावश्यं वेदान्तरमभिगच्छति इति, अमीषां पञ्चानामादेशानामन्यतमादेशसमीचीन-तानिर्णयोऽतिशयज्ञानिभिः सर्वोत्कृष्टश्रुतलब्धिसम्पन्नैर्वा कर्त्तुं शक्यते, ते च भगवदार्यश्यामप्रतिपत्तौ नासीरन्, केवलं तत्कालापेक्षया ये पूर्वतमाः सूरयस्तत्कालभाविग्रन्थपौर्वापर्यपर्यालोचनया यथा-स्वमति स्त्रीवेदस्य स्थितिं प्ररूपितवन्तस्तेषां सर्वेषामपि प्रावचनिकसूरीणां मतानि भगवानार्यश्याम उपदिष्टवान्, तेऽपि च प्रावचनिकसूरयःस्वमतेन सूत्रं पठन्तो गौतमप्रश्नभगवन्निर्वचनरूपतया पठन्ति, ततस्तदवस्थान्येव सूत्राणि लिखता गोतमा ! इत्युक्तं, अन्यथा भगवति गौतमाय निर्देष्टरि न संशयकथनमुपपद्यते, भगवतःसकलसंशयातीतत्वात्,

पुरुषवेदसूत्रे जघन्यतोऽन्तर्मुहूर्त्तमिति, यदा कश्चिदन्यवेदेभ्यो जीवेभ्य उध्धृत्य पुरुषवेदेषूत्पद्य तत्र चान्तर्मुहूर्त्तं सर्वायुर्जीवित्वा गत्यन्तरे अन्यवेदेषु मध्ये समुत्पद्यते तदा पुरुषवेदस्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जघन्यतोऽन्तर्मुहूर्तमवस्थानं लभ्यते, उत्कृष्टमानं कण्ठयं

नपुंसकवेदसूत्रे जघन्यतः एकः समयः स्त्रीवेदस्येव भावनीयः, उत्कर्षतो वनस्पतिकालः, स च प्रागेवोक्तः, एतच्च सांव्यवहारिकजीवानधिकृत्य यदा चिन्ता क्रियते यदा त्वसांव्यवहारिकजीवानधिकृत्य चिन्ता क्रियते तदा द्विविधा नपुंसकवेदाद्धा, कांश्चिदधिकृत्यानाद्यपर्यवसाना, ये न जातुचिदपि सांव्यवहारिकराशौ निपतिष्यन्ति, कांश्चिदधिकृत्य पुनरनादिसपर्यवसाना, ये असांव्यवहारिकराशेरुद्वृ त्य सांव्यवहारिककराशावागमिष्यन्ति,

अथ किमसांव्यवहारिकराशेरपि विनिर्गत्य सांव्यवहारिकराशावागच्छन्ति येनैवं प्ररूपणा क्रियते ?, उच्यते, आगच्छन्ति, कथमेतदवसेयमिति चेत् ?, उच्यते, पूर्वाचार्योपदेशात्, तथा चाह दुष्षमान्धकारनिमग्नजिनप्रवचनप्रदीपो भगवान् जिनभद्रगणिक्षमाश्रमणः–

॥१॥ "सिज्झंति जत्तिया किर इह संववहारजीवरासीओ ।
एंति अणाइवणस्सइरासीओ तत्तिया तंमि ॥"

अवेदको द्विधा–साद्यपर्यवसितः सादिसपर्यवसितश्च, तत्र यः क्षपकश्रेणिं प्रतिपद्यावेदको भवति स साद्यपर्यवसितः, क्षपकश्रेणेः प्रतिपातासम्भवात्, यस्तूपशमश्रेणिं प्रतिपद्यावेदको जायते स सादिसपर्यवसितः, स च जघन्येनैकं समयं, कथमेकं समयमिति चेत् ?, उच्यते, यदा एकसमयमवेदको भूत्वा द्वितीयसमये पञ्चत्वमुपागच्छति तदा तस्मिन्नेव पञ्चत्वसमये देवेषूत्पन्नः पुरुषवेदेदयेन सवेदको भवति, तत एवं जघन्यत एवं समयमवेदकः, उत्कर्षतोऽन्तर्मुहूर्तं, परतोऽवश्यं श्रेणीतःप्रतिपाते वेदोदयसद्भावात् इति ।

गतं वेदद्वारमिदानीं कषायद्वारं, तत्रेदमादिसूत्रम्–

–: पदं – १८ – दारं – ७ :– "कषाय" :–

मू. (४७९) सकसाई णं भंते ! सकसादित्ति काल० ?, गो० ! सकसाती तिविधे पं०, तं०–अणादीए वा अपज्जवसिते अणादीए वा सपज्जवसिते सादीए वा सपज्जवसिते जाव अवड्ढं पोग्गलपरियट्टं देसूणं,

कोहकसाई णं भंते ! पुच्छा, गो० ! जह० उक्को० अंतोमुहुत्तं, एवं जाव मानमायकसाती, लोभकसाई णं भंते ! लोभ० पुच्छा, गो० ! जह० एक्कं समयं उक्को० अंतोमु०,

अकसाई णं भंते ! अकसादित्ति काल० ?, गो० ! अकसादी दुविहे पं०, तं०–सादीए वा अपज्जवसिते सादीए वा सपज्जवसिते, तत्थ णं जे से सादीए सपज्जवसिते से जह० एगं समयं उक्को० अंतो० ।

वृ. 'सकसाई णं भंते !' इत्यादि, सह कषायो येषां यैर्वा ते सकषाया–जीवपरिणामविशेषास्ते विद्यन्ते यस्य स सकषायी, इदं सकलमपि सूत्रं सवेदसूत्रवदविशेषेण भावनीयं, समानभावेनोक्तत्वात्, 'कोहकसाई णं भंते !' इत्यादि, जघन्यतोऽप्यन्तर्मुहूर्तं इति उत्कतर्षतोऽप्यन्तर्मुहूर्तमिति– क्रोधकषायोपयोगस्य जघन्यत उत्कर्षतो वाऽन्तर्मुहूर्तप्रमाणत्वात्, तथाजीवस्वाभाव्यात्, इदं च सूत्रचतुष्टयमपि विशिष्टोपयोगापेक्षमिति, लोभकषायी जघन्येनैकं समयमिति,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यदा कश्चिदुपशमक उपशमश्रेणिपर्यवसाने उपशान्तवीतरागो भूत्वा श्रेणीतः प्रतिपतन् लोभाणुप्रथमसमयसंवेदनकाल एव कालं कृत्वा देवलोकेषूत्पद्यते, तत्र चोत्पन्नः सन् क्रोधकषायी मानकषायी मायाकषायी वा भवति तदा एकं समयं लोभकषायी लभ्यते, अथैवं क्रोधादिष्वप्येकसमयता कस्मान्न लभ्यते ?, उच्यते, तथास्वाभाव्यात्, तथाहि-

श्रेणीतः प्रतिपतन् मायाणुवेदनप्रथमसमये मानाणुवेदनप्रथमसमये क्रोधाणुवेदनप्रथमसमये वा यदि कालं करोति कालं च कृत्वा देवलोकेषूत्पद्यते तथापि तथास्वाभाव्यात् येन कषायोदयेन कालं कृतवान् तमेव कषायोदयं तत्रापि गतः सन्नन्तर्मुहूर्त्तमनुवर्त्तयति, एतच्चावसीयते अधिकृतसूत्रप्रामाण्यात्, ततोऽनेकसमयता क्रोधादिष्विति। अकषायसूत्रं वेदसूत्रमिव भावनीयं।

गतं कषायद्वारमधुना लेश्याद्वारं, तत्रेदमादिसूत्रम्-

-: पदं - १८, दारं - ८ "लेश्या" :-

मू. (४८०) *सलेसे णं भंते ! सलेसेत्ति पुच्छा, गो० ! सलेसे दुविधे पं०, तं०- अणादीए वा अपज्जवसिते अणादीए वा सपज्जवसिते, कण्हलेसे णं भंते ! कण्हलेसेत्ति कालतो केवचिरं होइ ?, गो० ! जह० अंतो० उक्को० तेत्तीसं सागरोवमाइं अंतोमुहुत्तमब्भहियाइं,*

नीललेसे णं भंते ! नीललेसेत्ति पुच्छा, गो० ! जह० अंतो० उक्को० दस सागरोवमाइं पलितोवमासंखिज्जइभागमब्भहियाइं, काउलेसे णं पुच्छा, गो० ! जह- अंतो० उक्को० तिन्नि सागरोवमाइं पलितोवमासंखिज्जतिभागमब्भहियाइं,

तेउलेसे णं पुच्छा, गो० ! जह० अंतोमुहुत्तं उक्को० दो सागरोवमाइं पलितोवमासंखिज्जतिभागमब्भहियाइं, पम्हलेसे णं पुच्छा, गो० ! जह० अंतो० उक्को० दस सागरोवमाइं अंतोमुहुत्तमब्भहियाइं, सुक्कलेसे णं पुच्छा०, गो० ! जह० अंतो० उक्को० तेत्तीसं सागरोवमाइं अंतोमुहुत्तमब्भहियाइं, अलेसे णं पुच्छा, गो० ! सादीए अपज्जवसिते।

वृ. 'सलेसे णं भंते' इत्यादि, सह लेश्या यस्य येन वा स सलेश्यः, स द्विविधः प्रज्ञप्तः, तद्यथा-अनादिरपर्यवसितो यो न जातुचिदपि संसारव्यवच्छेदं कर्त्ता अनादिसपर्यवसितो यः संसारपारगामी,

'कण्हलेसे णं भंते !' इत्यादि, इह तिरश्चां मनुष्याणां च लेश्याद्रव्याण्यन्तर्मुहूर्त्तिकानि, ततः परमवश्यं लेश्यान्तरपरिणामं भजन्ते, देवनैरयिकाणां तु पूर्वभवचरमान्तर्मुहूर्त्तादारभ्य परभावाद्यमन्तर्मुहूर्त्तं यावत् अवस्थितानि ततःसर्वत्र जघन्यमन्तर्मुहूर्ततं तिर्यग्मनुष्यापेक्षया द्रष्टव्यमुत्कृष्टं देवनैरयिकापेक्षया, तच्च विचित्रमिति भाव्यते, तत्र यदुक्तं-त्रयस्त्रिंशत्सागरोपमाणि अन्तर्मुहूर्त्ताभ्यधिरकानीति तत्सप्तमनरकपृथिव्यपेक्षया द्रष्टवयं, तत्रत्या हि नैरयिकाः कृष्णलेश्याकाः, तेषां च स्थितिरुत्कृष्टा त्रयस्त्रिंशत्सागरोपमाणि, यत्तु पूर्वोत्तरभवगते यथाक्रमं चरमाद्ये अन्तर्मुहूर्त्ते ते द्वे अप्येकं, अन्तर्मुहूर्त्तस्यासङ्ख्यातभेदभिन्नत्वात्, तथा चान्यत्राप्युक्तम्-

॥१॥ "मुहुत्तद्धं तु जहन्ना तित्तीसं सागरा मुहुत्तहिया।
उक्कोसा होइ ठिई नायव्वा कण्हलेसाए॥"

अत्र 'मुहुत्तहिया' इति चूर्णिकृता व्याख्यातमन्तर्मुहूर्त्ताधिकेति, नीललेश्यासूत्रे यानि दश

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सागरोपमाणि पल्योपमासङ्ख्येयभागाभ्यधिकान्युक्तानि तानि पञ्चमपृथिव्यपेक्षया वेदितव्यानि, तत्र हि प्रथमप्रस्तटे नीललेश्या 'पंचमियाए मीसा' इति वचनात्, तस्मिंश्च प्रथमलप्रस्तटे स्थितिरुत्कर्षत एतावती, ये तु पूर्वोत्तरभगवते अन्तर्मुहूर्त्ते त पल्योपमासङ्ख्येयभागे एवान्तर्गते इति न पृथग्विवक्षिते, एवमुत्तरत्रापि द्रष्टव्यं, कापोतलेश्यासूत्रे त्रीणि सागरोपमाणि पल्योपमासङ्ख्येयभागाभ्यधिकानि तृतीयनरकपृथिव्यपेक्षयाऽवसातव्यानि, तृतीयपृथिव्यामपि प्रथमप्रस्तटे कापोतलेश्याया भावात्, 'तईयाए मीसिया' इति वचनात् तत्र चोत्कृष्टस्थितेरेतावत्याः सम्भवात्,

तेजोलेश्यासूत्रे द्वे सागरोपमे पल्योपमासङ्ख्येयभागाभ्यधिके ईशानदेवलोकदेवापेक्षया वेदितव्ये, ते हि तेजोलेश्याका उत्कर्षत एतावत्स्थितिकाः, पद्मलेश्यासूत्रे दश सागरोपमाणि अन्तर्मुहूर्त्ताभ्यधिकानि ब्रह्मलोकापेक्षया भावनीयानि, तत्र हि देवानां स्थितिरुत्कृष्टा दश सागरोपमाणि लेश्या च पद्मलेश्या, ये च पूर्वोत्तरभगवते अन्तर्मुहूर्त्ते ते किलैकमन्तर्मुहूर्त्तमिति अन्तर्मुहूर्त्ताभ्यधिकानीत्युक्तं,

शुक्ललेश्यासूत्रे त्रयस्त्रिंशत्सागरोपमाणि अन्तर्मुहूर्त्ताभ्यधिकानि अनुत्तरसुरापेक्षया, तेषामुत्कर्षतः स्थितेः त्रयस्त्रिंशत्सागरोपमप्रमाणत्वात्, अन्तर्मुहूर्त्ताभ्यधिकत्वभावना च प्राग्वत्, अलेश्यः-अयोगिकेवली सिद्धश्च, ततो न तस्यामप्यवस्थायामलेश्यत्वव्या घात इति साद्यपरेयवसितः । गतं लेश्याद्वारम्, इदानीं सम्यकत्वद्वारं तत्रेदमादिसूत्रम्—

—: पदं – १८, दारं – ९ – "सम्यकत्व" :—

मू. (४८१) *सम्मद्दिट्ठी णं भंते! सम्मद्दि० काल० ?, गो० ! सम्मद्दिट्ठी दुविहे पं०, तं०—सादीए वा अपज्जवसिते सादीए वा सपज्जवसिते से जह० अंतो० उक्को० छावट्ठिं सागरोवमाइं साइरेगाइं,*

मिच्छादिट्ठी णं भंते! पुच्छा०, गो० ! मिच्छादिट्ठी तिविधे पं०, तं०—अणाइए अपज्जवसिए वा अणादीए वा सपज्जवसिए सादीए वा सपज्जवसिए, तत्थ णं जे से सादीए सपज्जवसिते से जह० अंतो० उक्को० अनंतं कालं अनंताओ उइस्सप्पिणिओसप्पिणीओ कालतो खेत्ततो अवड्ढं पोग्गलपरियट्टं देसूणं, सम्मामिच्छादिट्ठी णं पुच्छा, गो० ! जह० अंतो० उक्को० अंतो० ।

वृ. 'सम्मद्दिट्ठी णं भंते!' इत्यादि, सम्यग्—अविपर्यस्ता दृष्टिः—जिनप्रणीतवस्तुतत्त्वप्रतिपत्तिर्यस्य स सम्यग्दृष्टिः, स चान्तरकरणकालभाविना औपशमिकसम्यकत्वेन सासादनसम्यकत्वेन विशुद्धदर्शनमोहपुञ्जोदयसम्भविक्षायोपशमिकसम्यकत्वेन सकलदर्शनमोहनीयक्षयसमुत्थक्षायिकसम्यकत्वेन वा द्रष्टव्यो, निर्वचनं—

सम्यग्दृष्टिर्द्विविधः प्रज्ञप्तः, तद्यथा—'साद्यपर्यवसितः' एष क्षायिके सम्यकत्वे उत्पादिते सति वेदितव्यः, तस्य प्रतिपाताभावात्, 'सादिसपर्यवसितः' एष क्षायोपशमिकादिसम्यकत्वापेक्षया, तत्र योऽसौ सादिसपर्यवसितः सम्यग्दृष्टिः स जघन्येनान्तर्मुहूर्त्तं, परतो मिथ्यात्वगमनात्, उत्कर्षतः षट्षष्टिः सागरोपमाणि सातिरेकाणि, तत्र यदि वारद्वयं विजयादिषु चतुर्ष्वप्रतिपतितसम्यकत्व उत्कृष्टस्थितिको देव उत्पद्यते वेलात्रयं वाऽच्युतदेवलोके ततो देवभवैरेव षट्षष्टिः सागरोपमाणि परिपूर्णानि भवन्ति, ये तु मनुष्यभवाः सम्यकत्वसहितालस्तेऽधिका इति तैः सातिरेकाणीति, उक्तं च—"दो वारे विजयाइसु गयस्स तिन्निऽच्चुए अहव ताइं । अहरेगं नरभवियं" इति

'मिच्छादिट्ठी णं भंते!' इत्यादि, मिथ्या—विपर्यस्ता दृष्टिः—जीवाऽऽदिवस्तुतत्त्वप्रतिपत्तिर्यस्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भक्षितहृत्पूरपुरुषस्य सिते पीतप्रतिपत्तिवत् स मिथ्यादृष्टिः, ननु मिथ्यादृष्टिरपि कश्चिद् भक्ष्यं भक्ष्यतया जानाति पेयं पेयतया मनुष्यं मनुष्यतया पशुं पशुतया ततःस कथं मिथ्यादृष्टिः ?, उच्यते, भगवति सर्वज्ञे तस्य प्रत्ययाभावात्, इह हि भगवदर्हत्प्रणीतं सकलमपि प्रवचनार्थमभिरोचयमानोऽपि यदि तद्गतमेकमप्यक्षरं न रोचयति तदानीप्येष मिथ्यादृष्टिरेवोच्यते, तस्य भगवति सर्वज्ञे प्रत्ययनाशतः, उक्तं च-

॥१॥ "सूत्रोक्तस्यैकस्याप्यरोचनादक्षरस्य भवति नरः।
मिथ्यादृष्टिः सूत्रं हि नः प्रमाणं जिनाभिहितम् ॥"

किं पुनः शेषो भगवदर्हदभिहितं यथावद् जीवाजीवादिवस्तुतत्त्वप्रतिपत्तिविकलः, ननु सकलप्रवचनार्थाभिरोचनात् तद्गतकतिपयार्थानां चारोचनादेष न्यायतः सम्यग्मिथ्यादृष्टिरेव भवितुमर्हति कथं मिथ्यादृष्टिः ?, तदसत्, वस्तुतत्त्वापरिज्ञानात्, इह यदा सकलं वस्तु जिनप्रणीततया सम्यक् श्रद्धते तदानीमसौ सम्यग्दृष्टिर्यदा त्वेकस्मिन्नपि वस्तुनि पर्याये वा मतिदौर्बल्यादिना एकान्तेन सम्यक्परिज्ञानमिथ्यापरिज्ञानाभावतो न सम्यक्श्रद्धानं नाप्येकान्ततो विप्रतिपत्तिः तदा सम्यग्मिथ्यादृष्टिः, उक्तं च शतकबृहच्चूर्णौ-"जहा नालिकेरीदीववासिस्स खुहाइयस्सवि एत्थ समागयस्स पुरिसस्स ओयणाइए अनेगविहे ढोइए तस्स आहारस्स उवरिं न रुई न य निंदा, जेण तेण सो ओयणाइओ आहारो न कयाइ दिट्ठो नावि सुओ,

एवं सम्मामिच्छद्दिट्ठिस्सवि जीवाइपयत्थाणं उवरिं न य रुई नावि निंदा"त्ति, यदा पुनरेकस्मिन्नपि वस्तुनि पर्याये वा एकान्ततो विप्रतिपद्यते तदा मिथ्यादृष्टिरेवेत्यदोषः, स च त्रिविधः, तद्यथा-अनाद्यपर्यवसितोऽनादिसपर्यवसितः सादिसपर्यवसितश्च, तत्र यः कदाचनापि सम्यकत्वं नावाप्स्यति सोऽनाद्यपर्यवसितः, यस्त्ववाप्स्यति सोऽनादिसपर्यवसितः, यस्तु सम्यकत्वमासाद्य भूयोऽपि मिथ्यात्वं याति स सादिसपर्यवसितः, स च जघन्येनान्तर्मुहूर्त्तं, तदनन्तरं कस्यापि भूयः सम्यक्त्वावाप्तेः, उत्कर्षतोऽनन्तं कालं, तमेवानन्तं कालं द्विधा प्ररूपयति-

कालतः क्षेत्रतश्च, तत्र कालतोऽनन्ता उत्सर्पिण्यवसर्पिणीर्यावत्, क्षेत्रतोऽपार्द्धपुद्गलपरावर्त्तं देशोनं, अत्र क्षेत्रत इति निर्देशात् क्षेत्रपुद्गलपरावर्त्तः परिग्राह्यो, नतु द्रव्यपुद्गलपरावर्त्तादयः, एवं पूर्वोत्तरत्रापि च भावनीयं, 'सम्मामिच्छादिट्ठी ण' मित्यादि, सम्यग्मिथ्या दृष्टिर्यस्यासौ सम्यग्मिथ्यादृष्टिः स जघन्यत उत्कर्षतो वा अन्तर्मुहूर्त्तं, परतोऽवश्यं तत्परिणामविध्वंसात्, तथा जीवस्वाभाव्यात्। गतं सम्यकत्वद्वारमिदानीं ज्ञानद्वारं, तत्रेदमादिसूत्रम्-

-: पदं - १८, दारं - १० :- "ज्ञानं" :-

मू. (४८२) *नाणी णं भंते ! नाणित्ति काल०, गो० ! नाणी दुविधे पं०, तं०-सातीते वा अपज्जवसिते साइए वा सपज्जवसिते, तत्थ णं जे से सादीए सपज्जवसिते से जहन्नेणं अंतो० उक्को० छावट्ठिं सागरोवमाइं साइरेगाइं,*

आभिनिबोहियनाणी णं पुच्छा, गो० ! एवं चेव, एवं सुयनाणीवि, ओहिनाणीवि एवं चेव, नवरं जहन्नेणं एगं समयं, मनपज्जवनाणी णं भंते ! पुच्छा मनपज्जवनाणित्ति कालतो०, गो० ! जह० एगं समयं उक्को० देसूणा पुव्वकोडी, केवलनाणी णं पुच्छा, गो० ! सातिए अपज्जवसिते

अन्नाणी मतिअन्नाणी सुतअन्नाणी पुच्छा, गो० ! अन्नाणी मइअन्नाणी सुयअन्नाणी

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तिविधे पं०, तं०—अणाइए वा अपज्जवसिए अणादीए वा सपज्जवसिते सादीए वा सपज्जवसिते, तत्थ णं जे से सादीए सपज्जवसिते से जह०— अंतो० उक्को० अनंतं कालं, अनंताओ उस्सप्पिणि-ओसप्पिणीओ कालतो खेत्तओ अवड्ढपोग्गलपरियट्टं देसूणं,

विभंगनाणी णं भंते ! पुच्छा, गो० ! जहन्नेणं एगं समयं उक्कोसेणं तेत्तीसं सागरोवमाइं देसूणाते पुव्वकोडीते अब्भहिताइं ।

वृ. 'नाणी णं भंते' इत्यादि, ज्ञानमस्यास्तीति 'अतोऽनेकस्वारा'दितीन्, स द्विधा साद्यपर्यवसितः सादिसपर्यवसितश्च, तत्र केवलज्ञानापेक्षया साद्यपरेयवसितः, प्रतिपाताभावात्, शेषज्ञानापेक्षया सादिसर्पयवसितः, शेषज्ञानानां प्रतिनियतकालभावित्वात्, स जघन्येनान्तर्मुहूर्तं, परतो मिथ्यात्वगमनेन ज्ञानपरिणामापगमात्, उत्कर्षतः षट्षष्टिसागरोपमाणि सातिरेकाणि यावत्, तानि सम्यग्दृष्टेरिव भावनीयानि, सम्यग्दृष्टेरेव ज्ञानित्वात्,

आभिनिबोधिकज्ञानिसूत्रे 'एवं चेव'त्ति यथा सामान्यतो ज्ञानी सादिसपर्यवसितो जघन्यत उत्कर्षतश्चोक्तस्तथाऽऽभिनिबोधिकज्ञान्यपि वक्तव्यः, स चैवं—'जह० अंतो० उक्को० छावट्ठी सागरोवमाइं सातिरेगाइं' एवं श्रुतज्ञान्यपि, अवधिज्ञान्यप्येवं, नवरं स जघन्यत एकं समयं वक्तव्यः कथमेकसमयताऽवधिज्ञानस्येति चेत् ?, उच्यते,

इह तिर्यक्पञ्चेन्द्रियो मनुष्यो देवो वा विभङ्गज्ञानी सन् सम्यकत्वं प्रतिपद्यते, तस्य च सम्यकत्वप्रतिपत्तिसमये एव सम्यकत्वभावतो विभङ्गज्ञानमवधिज्ञानं जातं, तच्च यदा देवस्य च्यवनेन मरणेनान्यस्यान्यथा वाऽनन्तरसमये प्रतिपततति तदा भवत्यवधिज्ञानस्यैकसमयता, उत्कर्षतःसातिरेकाणि षट्षष्टिं सागरोपमाणि यावत्, तानि चाप्रतितितावधिज्ञानस्य वारद्वयं विजयादिषु गमनेन वारत्रयमच्युतदेवलोकगमनेन वा वेदितव्यानि,

मनःपर्यवज्ञानिन एकसमयता संयतस्याप्रमत्ताद्धायां वर्त्तमानस्य मनःपर्ययज्ञानमुत्पाद्यानन्तरसमये कालं कुर्वतो भावनीया, उत्कर्षत देशोना पूर्वकोटी, तत ऊर्ध्वंसंयमाभावेन मनःपर्यव- ज्ञानस्याप्यभावात्, केवलज्ञानी साद्यसपर्यवसितः, प्रतिपाताभावात्, ।

अज्ञानी त्रिविधः, तद्यथा—अनाद्यपर्यवसितोऽनादिसपर्यवसितः सादिसपर्यवसितश्च, तत्र यस्य कदाचनापि ज्ञानलाभो न भावी सोऽनाद्यपर्यवसितो, यस्तु ज्ञानमासादयिष्यति सोऽनादिसपर्यवसितः, यः पुनर्ज्ञानमासाद्य भूयो मिथ्यात्वगमनेनाज्ञानित्वमधिगच्छति स सादिसपर्यवसितः, स च जघन्येनान्तर्मुहूर्त्तं, परतः सम्यकत्वस्यासादनेनाज्ञानित्वपरिणामापगमसम्भवात्, उत्कर्षतोऽनन्तं कालमित्यादि प्राग्वत्, तत ऊर्ध्वमवश्यं सम्यकत्वावाप्तेरज्ञानित्वापगमात्,

एवं मत्यज्ञानी श्रुताज्ञानी च त्रिविधो भावनीयः, विभङ्गज्ञानी जघन्यत एकं समयं, कथमिति चेत् ?, उच्यते, कश्चित्तिर्यक्पञ्चेन्द्रियो मनुष्यो देवो वासम्यग्दृष्टित्वादवधिज्ञानी सन् मिथ्यात्वं गतस्तस्मिंश्च मिथ्यात्वप्रतिपत्तिसमये मिथ्यात्वप्रभावतोऽवधिज्ञानं विभङ्गज्ञानीभूतं, "आदायत्रयमज्ञानपि भवति मिथ्यात्वसंयुक्त''मिति वचनात्,

ततोऽनन्तरसमये देवस्य च्यवनेनान्यस्य मरणेनान्यथा वा तद्विभङ्गज्ञानं परिपतति, तत एवमेकसमयता विभङ्गज्ञानस्य, उत्कर्षतस्त्रयस्त्रिंशत्सागरोपमाणि देशोनपूर्वकोट्यभ्यधिकानि, तथाहि—यदि कश्चिन्मिथ्यादृष्टिस्तिर्यक्पञ्चेन्द्रियो मनुष्यो वा पूर्वकोट्यायुः कतिपयवर्षातिक्रमे

Jain Education International		For Private & Personal Use Only		www.jainelibrary.org

विभङ्गज्ञानी जायते, जातश्च सन्नप्रतिपतितविभङ्गज्ञान एवाविग्रहगत्या सप्तमनरकपृथिव्यां त्रयस्त्रिंशत्सागरोवपमस्थितिको नैरयिको जायते तदा भवति यथोक्तमुत्कृष्टं मानं, तत ऊर्ध्वंतु सम्यकत्वप्रतिपत्त्याऽवधिज्ञानभावतःसर्वथाऽपगमाद्वा तद्विभङ्गज्ञानमपगच्छति। गतंज्ञानद्वारम्, इदानीं दर्शनद्वार, तत्रेदमादिसूत्रम्–

–: पदं – १८, दारं – ११ – "दर्शनं" :–

मू. (४८३) चक्खुदंसणी णं भंते! पुच्छा, गो० ! जह० अंतो० उक्कोसेणं सागदरोवमसहस्सं सातिरेगं, अचक्खुदंसणी णं भंते ! अचक्खुदंसणित्ति काल०, गो० ! अचक्खुदंसणी दुविहे पं०, तं०–अणादीए वा अपज्ञवसिते अणादीए वा सपज्ञवसिए,

ओहिदंसणी णं पुच्छा, गो० ! जह० एगं समयं उक्को० दो छावट्ठीओ सागरोवमाणं साइरेगाओ, केवलदंसणी णं पुच्छा, गो० ! सातीए अपज्ञवसिते ॥

वृ. चक्खुदंसणी णं भंते!' इत्यादि, इह यदा त्रीन्द्रिया दिश्चतुरिन्द्रियादिषूत्पद्य तत्र चान्तर्मुहूर्त्तं स्थित्वा भूयोऽपि त्रीन्द्रियादिषु मध्ये उत्पद्यते तदा चक्षुर्दर्शनी अन्तर्मुहूर्त्त लभ्यते, उत्कर्षतः सातिरेकं सागरोपमसहस्र, तच्चतुरिन्द्रियतिर्यक्पञ्चेन्द्रियनैरयिकादिभवभ्रमणेनावसातव्यम्, अचक्षुर्दर्शनी अनाद्यपर्यवसितो यो कदाचिदपि न सिद्धिभावमधिगमिष्यति, यस्त्वधिगन्ता सोऽनादिसपर्यवसितः, तथा तिर्यक्पञ्चेन्द्रियो मनुष्यो वा तथाविधाध्यवसायादवधिदर्शनमुत्पाद्यानन्तरसमये यदि कालं करोति तदाऽवधिदर्शनं प्रतिपतति, तदाऽवधिदर्शनिन एकसमयता, उत्कर्षतोऽवधिदर्शनी द्विषट्षष्टी सागरोपमाणि सातिरेकाणि, कथमिति चेत् ?, उच्यते,

इह कश्चिद्विभङ्गज्ञानी तिर्यक्पञ्चेन्द्रियो मनुष्यो वाऽप्रतिपतितविभङ्गज्ञान एवाविग्रहगत्याऽधःसप्तमनरकपृथिव्यां त्रयस्त्रिंशत्सागरोपमस्थितिर्नैरयिको जातः, तत्र चोद्वर्त्तनाप्रत्यासत्तिकाले सम्यकत्वमुत्पाद्य ततः परिभ्रष्टसततोऽप्रतिपतितेन विभङ्गज्ञानेन पूर्वकोट्यायुष्केषु तिर्यक्पञ्चेन्द्रियेषु समुत्पन्नस्तत्र च परिपूर्णं स्वायुः प्रतिपाल्य पुनरप्रतिपतितविभङ्ग एवाधःसप्तमपृथिव्यां त्रयस्त्रिंशत्सागरोपमस्थितिको नैरयिको जातस्तत्रापि चोद्वृ त्तिप्रत्यासत्तौ समय्कत्वमासाद्य परित्यजति, ततो भूयोऽप्यप्रतिपतितवि भङ्गएव पूर्वकोट्यायुष्केषु तिर्यक्पञ्चेन्द्रियेषु जातस्तदेवमेका षट्षष्टिः सागरोपमाणामभूत्,

सर्वत्र च तिर्यक्षूत्पद्यमानोऽविग्रहेणोत्पद्यते, विग्रहे विभङ्गस्य तिर्यक्षु मनुष्येषु च निषेधात्, यद्वक्ष्यति–"विभंगनाणी पंचिंदियतिरिक्खजोणिया मणूसा आहारगा नो अनाहारगा" इति, आह–किं सम्यकत्वमेषोऽपान्तराले प्रतिपाद्यते ?, उच्यते, इह विभङ्गस्य स्थितिरुत्कर्षतोऽपि त्रयस्त्रिंशत्सागरोपमाणि देशोनपूर्वकोट्यभ्यधिकानि, तथा चोक्तं प्राक्–"विभंगनाणी जह० एगं समयं उक्को० तेत्तीसं सागरोवमाइं देसूणाए पुव्वकोडीए अब्भहियाइं" इति,

तत एतावन्तं कालमविच्छेदेन विभङ्गस्याप्राप्यमाणत्वात् अपान्तराले सम्यकत्वं प्रतिपाद्यते, ततोऽप्रतिपतितविभङ्गं एव मनुष्यत्वमवाप्य संयमं पालयित्वा द्वौ वारौ विजयादिषूत्वद्यमानस्य द्वितीया षट्षष्टिः सागरोपमाणां सम्यग्दष्टेर्भवति, एवं द्वे षट्षष्टी सागरोपमणमवधिदर्शनस्य, अथ विभङ्गावस्थायामवधिदर्शनं कर्मप्रकृत्यादिषु प्रतिषिद्धं ततः कथमिह विभङ्गे तद्भाव्यते ?, नैष दोष, सूत्रे विभङ्गेऽप्यवधिदर्शनस्य प्रतिपादितत्वात्, तथा ह्ययं सूत्राभिप्रायः–विशेषविषयं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विभङ्गज्ञानं सामान्यविषयमधिदर्शनं, यथा सम्यग्दृष्टेः विशेषविषयमवधिज्ञानं सामान्यविषयमवधिदर्शनमुच्यते केवलं विभङ्गज्ञानिनोप्यवधिदर्शनं, यथा सम्यग्दृष्टेः विशेषविषयमवधिज्ञानं सामान्यविषयमवधिदर्शनमुच्यत केवलं विभङ्गज्ञानिनोप्यवधिदर्शनमनाकारमात्रत्वेनाविशिष्टत्वात् अवधिज्ञानिनोऽवधिदर्शनतुल्यमिति तदप्यवधिदर्शनमुच्यते, न विभङ्गदर्शनमिति,

आह च मूलटीकाकारोऽप्येतद्भावनायाम्—"दंसणं च विभंगोहीणं जतो तुल्लमेव, अतो चेव दो छावट्ठीओ साइरेगाओ' इति, ततोऽस्माभिरपि विभङ्गेऽवधिदर्शनं भावितं, कार्मग्रन्थिकाः पुनराहुः—यद्यपि साकारेतरविशेषभावेन विभङ्गज्ञानमवधिदर्शनं च पृथगस्ति तथापि न सम्यग्निश्चयो विभङ्गज्ञानेन, मिथ्यात्वरूपत्वात्, नाप्यवधिदर्शनेन तस्यानाकारमात्रत्वादतः किं तेन पृथग्विवक्षितेनापीति तदभिप्रायेण न विभङ्गावस्थाया मवधिदर्शनं, न चैतत् स्वमनीषिकाविजृम्भितं, पूर्वसूरिभिरप्येवं मतविभागस्य व्यवस्थापितत्वात्, उक्तं च विशेषणवत्यं जिनभद्रगणिक्षमाश्रमणपूज्यापादैः—

॥१॥ "सुत्ते विभंगस्सवि परूवियं ओहिदंसणं बहुसो।
कीस पुणो पडिसिद्धं कम्मप्पगडीपगरणंमि ॥

॥२॥ विभंगेवि दरिसणं सामण्णविसेसविसयओ सुत्ते।
तं चऽविसिट्ठमनागारमेत्तं तोऽवहिविभंगाणं ॥

॥३॥ कम्मपगडीमयं पुन सागरेयरविसेसभावेवि।
न विभंगनाणदंसणविसेसणमणिच्छयत्तणओ ॥" इति,

अन्ये तु व्याचक्षते—किं सप्तमनरकपृथिवीनिवासिनारककल्पनया?, सामान्येनैव नारकतिर्यग्नरामरभवेषु पर्यटतः खल्ववधिविभङ्गौ एतावन्तं कालं भवतस्तत उध्र्ध्वंमपवर्ग इति। केवलदर्शनिनः सूत्रं केवलज्ञानिनः सूत्रवद्भावनीयं,।

गतं दर्शनद्वारम्, इदानीं संयतद्वारं, तत्रेदमादिसूत्रम्—

—: पदं – १८, दारं – १२ "संयतः" :—

मू. (४८४) *संजए णं भंते! संजतेत्ति पुच्छा, गो०! ज० एगं समयं उक्को० देसूणं पुव्वकोडिं, असंजते णं भंते! असंजएत्ति, पुच्छा, गो०! असंजते तिविधे पं०, तं०—अणातीए वा अपज्ञवसिते अणातीए वा सपज्ञवसिते सातीए वा सपज्ञव सिते, तत्थ णं जे से सातीए सपज्ञवसिते से जह० अं० उक्को० अनं० अनंताओ उस्सप्पिणिओसप्पिणीओ कालओ खेत्ततो अवड्ढं पोग्गलपरियट्टं देसूणं, संजतासंजते णं पुच्छा, गो०! जह० अंतो० उक्को० देसूणं पुव्वकोडिं, नोसंजतेनोअसंजतेनोसंजतासंजते णं पुच्छा, गो०! सादीए अपज्ञवसिते।*

वृ. 'संजए णं भंते' इत्यादि, जघन्यत एकसमयता संयतस्य चारित्रपरिणामसमय एव कस्यापि कालकरणात्, असंयतस्तु त्रिधा—अनाद्यपर्यवसितोऽनादिसपर्यवसितः सादिसपर्यवसितश्च, तत्र यः संयमं कदाचनापि न प्राप्स्यति सोऽनाद्यपर्यवसितो, यस्तु प्राप्स्यति सोऽनादिसपर्यवसितो, यस्तु संयमं प्राप्य ततः परिभ्रष्टः स सादिसपर्यवसितः, स च जघन्येनान्तर्मुहूर्त्तं, ततः परं कस्यापि पुनरपि संयमप्रतिपत्तिभावात्, उत्कर्षतोऽनन्तं कालमित्यादि प्राग्वत् तत ऊध्र्ध्वमवश्यं संयमप्राप्तिः,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

संयतासंयतो–देशविरतः, स च जघन्यतोऽप्यन्तर्मुहूर्तं देशविरतिप्रतिपत्त्युपयोगस्य, जघन्यतोऽप्यान्तर्मौहूर्त्तिकत्वात्, देशविरतिर्हि द्विविधत्रिविधादिभङ्गबहुला ततस्तत्प्रतिपत्तौ जघन्येनाप्यन्तर्मुहूर्त्त लगति, सर्वविरतिस्तु सर्वं सावद्यमहं न करोमीत्येवंरूपा ततस्तत्प्रतिपत्त्युपयोग एकसामयिकोऽपि भवतीति प्राक् संयतस्य एकसमयतोक्ता, यस्तु न संयतो नाप्यसंयतो नापि संयतासंयतः स सिद्ध इति साद्यपर्यवसित इति। गतं संयतद्वारम्,

–ः पदं – १८, दारं – १३ "उपयोगः" :–

मू. (४८५) *सागरोवओगोवउत्ते णं भंते ! पुच्छा, गो० ! जह० उक्को० अंतो० । अनागारोवउत्तेवि, एवं चेव ।*

वृ. इदानीमुपयोगद्वारं, तत्रेदमादिसूत्रम्–'सागारोवओगोवउत्ते णं भंते !' इत्यादि, इह संसारिणामुपयोगः साकारोऽनाकारो वा, जघन्यतोऽप्यान्तर्मुहूर्त्तिकः उत्कर्षतोऽपि, ततःसूत्रद्वयेऽपि जघन्यत उत्कर्षतश्चान्तर्मुहूर्त्तमुक्तं, यस्तु केवलिनामुक्तः एकसामयिक उपयोगः स इह न विवक्षित इति। गतं उपयोगद्वारं, इदानीमाहारद्वारं, तत्रेदमादिसूत्रम्–

–ः पदं – १८, दारं १४ :–

मू. (४८६) *आहारए णं भंते ! पुच्छा, गो० ! आहारए दुविधे० पं०, तं०–छउमत्थआहारए य केवलिआहारए य, छउमत्थआहारए णं भंते ! छउमत्थाहारएत्ति काल० ?, गो० ! ज० खुड्डागभवग्गहणं दुसमयऊणं उक्को० असंखेज्जं कालं असंखेज्जाओ उस्सप्पिणीओसप्पिणीतो कालतो खेत्ततो अंगुलस्स असंखेज्जतिभागं, केवलिआहारए णं भंते ! केवलिआहारएत्ति कालतो० ?, गो० ! जह० अंतो० उ० देसूणं पुव्व० ।*

अनाहारए णं भंते ! अनाहारएत्ति० ?, गो० ! अनाहारए दु० पं०, तं०–छउमत्थअनाहारए य केवलिअनाहारए य, छउमत्थअनाहारए णं भंते ! पुच्छा, गो० ! जह० एगं समयं उक्को० दो समया,

केवलिअनाहारए णं भंते ! केवलि० ?, गो० ! केवलिअनाहारए दुविधे पं०, तं०–सिद्धकेवलिअनाहारए य भवत्थकेवलिअनाहारए य, सिद्धकेवलिअनाहारए णं पुच्छा, गो० ! सादीए अपज्जवसिए, भवत्थकेवलिअनाहारए णं भंते ! पुच्छा, गो० ! भवत्थकेवलिअनाहारए दुविधे पं०, तं०–सजोगिभवत्थकेवलिअनाहारए अजोगिभवत्थकेवलिअनाहारए य,

–सजोगिभवत्थकेवलिअनाहारए णं भंते ! पुच्छा, गो० ! अजहन्नमनुक्कोसेणं तिन्नि समया, अजोगिभवत्थकेवलिअणाहारए णं पुच्छा, गो० ! जह० उक्को० अंतो० ।

वृ. 'आहारगे णं भंते !' इत्यादि सुगमं, नवरं 'जहन्नेणं खुड्डागभवग्गहणं दुसमऊण'मिति इह यद्यपि चतुःसामयिकी पञ्चसामयिकी च विग्रहगतिर्भवति, आह च–

॥१॥ "उजुया य एगवंका, दुहतोवंका गती विणिद्दिट्ठा ।
जुज्जइ तिचउवंकावि नाम चउपंचसमयाओ ॥" इति

तथापि बाहुल्येन द्विसामयिकी त्रिसामयिकी वा प्रवर्त्तते न चतुः–सामयिकी पञ्चसामयिकी वा प्रवर्तते ततो न ते विवक्षिते, तत्रोत्कर्षतस्त्रिसामयिक्यां विग्रहगतौ द्वावाद्यौ समयावनाहारक

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इत्याहारकत्वचिन्तायां क्षुल्लकभवग्रहणं ताभ्यां न्यूनमुक्तं, ऋजुगतिरेकवक्रगतिश्च न विवक्षिता, सर्वजघन्यस्य परिचिन्त्यमानत्वात्, उत्कर्षतोऽसङ्ख्येयकालमित्यादि सुगमं, नवरं एतावतः कालादूर्ध्ध्वमवश्यं विग्रहगतिर्भवति, तत्र चानाहारकत्वमित्यनन्तं कालमिति नोक्तं।

केवलिसूत्रं सुगमं, छद्मस्थानाहारकसूत्रे 'उक्कोसेणं दो समया'इति त्रिसायिकी विग्रहगतिमधिकृत्य, चतुःसामयिकी पञ्चसामयिकी च विग्रहगतिर्न विवक्षितेत्यभिहितमनन्तरं, सयोगिभवस्थकेवलिअनाहारकसूत्रे त्रयः समया अष्टसामयिकस्य केवलिसमुद्घातस्य तृतीयचतुर्थपञ्चमरूपाः, उक्तं च–

॥१॥ "दण्डं प्रथमे समये कपाटणथ चोत्तरे तथा समये।
मन्थानमथ तृतीये लोकध्यापी चतुर्थे तु॥
॥२॥ संहरति पञ्चमे त्वन्तराणि मन्थानमथ तथा षष्ठे।
सप्तमके तु कपाटं संहरति ततोऽष्टमे दण्डम्॥
॥३॥ औदारिकप्रयोक्ता प्रथमाष्टमसमयोरसाविष्टः।
मिश्रौदारिकयोक्ता सप्तमषष्ठद्वितीयेषु॥
॥४॥ कार्मणशरीरयोगी चतुर्थके पञ्चमे तृतीये च।
समयत्रयेऽपि तस्मिन् भवत्यनाहारको नियमात्॥" इति

–गतमाहारद्वारं, अधुना भाषाद्वारमाह–

–ः पदं – १८, दारं – १५ "भाषा" ः–

मू. (४८७) *भासए णं पुच्छा, गो० ! जहन्नेणं एगं समयं उक्को० अंतो०, अभासए णं पुच्छा, गो० ! अभासए तिविधे पं०, तं०– अणाइए वा अपज्जवसिए अणाइए वा सपज्जवसिए साइए वा सपज्जवसिए, तत्थ णं जे से साइए वा सपज्जवसिते से जहन्नेणं अं० उ० वणप्फइकालो*

वृ. 'भासए णं भंते !' इत्यादि, इह जघन्यत एकसमयता उत्कर्षत आन्तर्मुहूर्त्तिकता च वाग्योगिन इवावसातव्या, अभाषकस्त्रिविधस्तद्यथा–अनाद्यपर्यवसितः अनादिसपर्यवसितः सादिसपर्यवसितश्च, तत्र यो न जातुचिदपि भाषकत्वं प्राप्स्यति सोऽनादयपर्यवसितो यस्त्ववाप्स्यति सोऽनादिसपर्यवसितः, यस्तु भाषको भूत्वा भूयोऽप्यभाषको भवति स सादिसपर्यवसितः, स च जघन्योनान्तर्मुहूर्त्तं, भाषित्वा कञ्चित्कालमवस्थाय पुनर्भाषकत्वोपलब्धेः अथवा द्वीन्द्रियादिभाषक एकेन्द्रियादिष्वभाषकेषूत्पद्य तत्र चान्तर्मुहूर्त्त जीवित्वा पुनवरपि यदा द्वीन्द्रियादिरेवोत्पद्यते तदा जघन्यतोऽन्तर्मुहूर्त्तमभाषकः, उत्कर्षतो वनस्पतिकालः, स च प्रागेवोक्त इति नोपदर्श्यते।

गतं भाषकद्वारं, इदानीं परीतद्वारं,–

–ः पदं – १८, दारं – १६ "परित्त" ः–

मू. (४८८) *परित्तए णं पुच्छा, गो० ! परित्ते दुविहे पं०, तं०–कायपरित्ते य संसारपरित्ते य, कायपरित्ते णं पुच्छा, गो० ! जह० अंतो० उक्को० असं० पुढविकालो असंखेज्जाओ उस्सप्पिणिओसप्पिणीतो, संसारपरित्ते णं पुच्छा, गो० ! ज० अंतो० उ० अनंतं कालं जाव अवड्ढं पणोग्गलपरियट्टं देसूणं। अपरित्ते णं पुच्छा, गो० ! अपरित्ते दु० पं०, तं०–कायअपरित्ते य संसारअ०, कायअपरित्ते णं पुच्छा, गो० ! ज० अंतो० उ० वणस्सइकालो, संसारअपरित्ते णं पुच्छा, गो० !*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

संसारअपरित्ते दु० पं०, तं०-अणादीए वा सपज्जवसिते अणादीए वा अपज्जवसिते, नोपरित्तेनोअपरित्ते णं पुच्छा, गो० ! सादीए अपज्जवसिते,

वृ. परीतो द्विविधः-कायपरीतः संसारपरीतश्च, तत्र यःप्रत्येकशरीरी स कायपरीतो, यस्तु सम्यकत्वादिना कृतपरिमितसंसारः स संसारपरीतः, कायपरीतो जघन्यतोऽन्तर्मुहूर्त्तं, स च यदा कश्चिन्निगोदादुद्धृत्य प्रत्येकशरीरिषु समुत्पद्य च तत्र चान्तर्मुहूर्त्तं स्थित्वा भूयोऽपि निगोदेषूत्पद्यते तदा लभ्यते, उत्कर्षतोऽसङ्ख्येयं कालं, स चासङ्ख्येयः कालः पृथिवीकालो, यावान् पृथिवीकायिककायस्थितिकालस्तावान्वेदितव्य इत्यर्थः,

तमेव कालतो निरूपयति-असङ्ख्येया उत्सर्पिण्यवसर्पिण्यः, संसारपरीतो जघन्यतोऽन्तर्मुहूर्त्तं तत ऊर्ध्वमन्तकृत्केवलित्वयोगेन मुक्तिभावात्, उत्कर्षतोऽनन्तं कालं, तमेव निरूपयति-'अनंताओ' इत्यादि प्राग्वत्, तत ऊर्ध्वमश्यं मुक्तिगमनात्, कायापरीतोऽनन्तकायिकः,

संसारापरीतः सम्यकत्वादिना अकृतपरिमितसंसारः, कायापरीतो जघन्येनान्तर्मुहूर्त्तं, स च यदा सकश्चित्प्रत्येकशरीरिभ्य उद्धृत्य निगोदेषु समुत्पद्यते तत्र चान्तर्मुहूर्त्तं स्थित्वा भूयोऽपि प्रत्येकशरीरिषूत्पद्यते तदाऽवसातव्यः, उत्कर्षतो वनस्पतिकालो वाच्यः, स च प्रागेवोपदर्शितः, तत ऊर्ध्वं नियमात्तत् उद्धृत्तेः, संसारापरीतो द्विधा-अनाद्यपर्यवसितो यो न कदाचनापि संसार-व्यवच्छेदं करिष्यति, यस्तु करिष्यति सोऽनादिसपर्यवसितः, नोपरीतोनोअपरीतश्च सिद्धः, स च साद्यपर्यवसित एव ।

-: पदं - १८, दारं - १७ "पर्याप्त" :-

मू. (४८९) *पज्जत्तए णं पुच्छा, गो० ! ज० अं० उ० सागरोवमसतपुहुत्तं सातिरेगं, अपज्जत्तए णं पुच्छा, गो० ! ज० उ० अंतो०, नोपज्जत्तएनोअपज्जत्तए णं पुच्छा, गो० ! सादीए अपज्जवसिते*

वृ. पर्याप्तद्वारे पर्याप्तो जघन्येनान्तर्मुहूर्त्तं, तत ऊर्ध्वमपर्याप्तत्वप्रसक्तेः, उत्कर्षतः सातिरेकं सागरोपमशतपृथकत्वं, एतावन्तं कालं पर्याप्तलब्ध्यवस्थानसम्भवात्, अर्याप्तो जघन्यत उत्कर्षतश्चान्तर्मुहूर्त्तं, तत ऊर्ध्वमवश्यं पर्याप्तलभ्ध्युत्पत्तेः, नोपर्याप्तोनोअपर्याप्तश्च सिद्धः, स च साद्यपर्यवसितः, सिद्धत्वस्याप्रच्युतेः ।

-: पदं - १८, दारं - १८ "सूक्ष्मं" :-

मू. (४९०) *सुहुमे णं भंते ! सुहुमित्ति पुच्छा, गो० ! ज० अंतो० उ० पुढविकालो, बादरे णं पुच्छा, गो० ! ज० अं० उ० असंखेज्जं कालं जाव खेत्तओ अंगुलस्स असंखेज्जति भागं, नोसुहुमनोबादरे णं पुच्छा, गो० ! सादीए अपज्जवसिते*

वृ. सूक्ष्मद्वारे सूक्ष्मसूत्रे उत्कर्षतः पृथिवीकाल इति, यावान् पृथिवीकायिककायस्थितिकालस्तावान् वक्तव्यः । बादरसूत्रं सुगमं, अनयोश्च भावना प्रागेव कृता, नोसूक्ष्मोनोबादरश्च सिद्धस्ततः साद्यपर्यवसितः ।

-: पदं - १८, दारं - १९ "संज्ञी" :-

मू. (४९१) *सण्णी णं भंते ! पुच्छा, गो० ! ज० अंतो० उ० सागरोवमसतपुहुत्तं सातिरेगं, असण्णी णं पुच्छा, गो० ! ज० अंतो० उक्को० वणस्सइकालो, नोसण्णीनोअसण्णी णं पुच्छा, गो० ! सादीए अपज्जवसिते ।*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ. संज्ञिद्वारे संज्ञिसूत्रे जघन्यतोऽन्तर्मुहूर्त्तेमिति, यदा कश्चिज्जन्तुरसंज्ञिभ्य उद्वृत्त्य संज्ञिषु समुत्पद्यते तत्र चान्तर्मुहूबर्त्तं जीवित्वा भूयोऽपि असंज्ञिषूत्पद्यते तदा लभ्यते, उत्कृषटं सुगमं। असंज्ञी जघन्यतोऽन्तर्मुहूर्त्तं, स चैवं–कश्चित् संज्ञिभ्य उद्वृत्त्यासंज्ञिषूत्पद्यते, तत्र चान्तर्मुहूर्त्तं स्थित्वा भूयोऽपि संज्ञिषु मध्ये समागच्छति, उत्कर्षतो वनस्पतिकालो, वनस्पतिकायस्याप्यसंज्ञिग्रहणेन ग्रहणात् नोसंज्ञिनोअसंज्ञी न सिद्धः, स च साद्यपर्यवसितः।

–: पदं – १८, दारं – २० "भव०" :–

मू. (४९२) *भवसिद्धिए णं पुच्छा, गो० ! अणादीए सपज्जवसिते, अभवसिद्धिए णं पुच्छा, गो० ! अणादीए अपज्जवसिते, नोभवसिद्धिएनोअभवसिद्धिए णं पुच्छा, गो० ! सादीए अपज्जवसिते।*

वृ. भवसिद्धिकद्वारे 'भवसिद्धि ण' मित्यादि, भवे सिद्धिर्यवस्यासौ भवसिद्धिको भव्य इत्यर्थः, स चानादिसपर्यवसितः, अन्यथा भव्यत्वायोगात्, अभवसिद्धकोऽभव्यः, स चानाद्यपर्यवसितः, अन्यथाऽभव्यत्वायोगात्, नोभव्योनोअभव्यश्च सिद्धः, ततः साद्यपर्यवसितः।

–: पदं – १८, दारं – २१ "अस्ति" :–

मू. (४९३) *धम्मत्थिकाए णं पुच्छा, गो० ! सव्वद्धं, एवं जाव अद्धासमए।*

वृ. अस्तिकायाः पञ्चापि सर्वकालभाविनः, अद्धासमयोऽपि प्रवाहापेक्षया, तत उक्तं 'एवं जाव अद्धासमए'।

–: पदं – १८, दारं – २२ "चरिम" :–

मू. (४९४) *चरिमे णं पुच्छा, गो० ! अणादीए सपज्जवसिते, अचरिमे णं पुच्छा, गो० ! अचरिमे दुविधे पं०, तं०–अणादीए वा अपज्जवसिते सादीते वा अपज्जवसिते (पन्नवणाए भगवईए अट्ठारसमं कायट्ठिनामपयं समत्तं) ॥*

वृ. चरमो भवो भविष्यति यस्य सोऽभेदाच्चरमो–भव्यस्तद्विपरीतोऽचरमः स चाभव्यस्तस्य चरमभवाभावात्, सिद्धश्च, तस्यापि चरमत्वायोगात्, तत्र चरमोऽनादिसपर्यवसितोऽन्यथा चरमत्वायोगात्, अचरमो द्विविधोऽनाद्यपर्यवसितः साद्यपर्यवसितश्च, तत्रानादिअपर्यवसितोऽभव्यः, साद्यपर्यवसितः सिद्धः।

पदं – १८ – समाप्तम्

मुनि दीपरत्नसागरेण संशोधिता सम्पादिता प्रज्ञापनाउपाङ्गसूत्रे अष्टादशपदस्य मलयगिरिआचार्येण विरचिता टीका परिसमाप्ता।

पदं – १९ – सम्यक्त्वम्

वृ. 'तदेवं व्याख्यातमष्टादशं पदं, साम्प्रतमेकोनविंशतितममारभ्यते, अस्य चायमभिसंबन्धः–इहानन्तरपदे कायस्थितिरुक्ता, अत्र तु कस्यां कायस्थितौ कतिविधाः सम्यग्दृष्ट्यादिभेदेन जीवा भवन्तीति चिन्त्यते, तत्रेदं सूत्रम्–

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मू. (४९५) *जीवा णं भंते ! किं सम्मदिट्ठी मिच्छादिट्ठी सम्मामिच्छादिट्ठी ?, गोयमा ! जीवा सम्मदिट्ठीवि मिच्छादिट्ठीवि सम्मामिच्छादिट्ठीवि । एवं नेरइयावि । असुरकुमारादि एवं चेव जाव थणियकुमारा ।*

पुढवीकाइया णं पुच्छा, गोयमा ! पुढवीकाइया नो सम्मदिट्ठी मिच्छादिट्ठी नो सम्मामिच्छादिट्ठी, एवं जाव वणस्सइकाइया बेइंदियाणं पुच्छा, गोयमा ! बेइंदिया सम्मदिट्ठी मिच्छादिट्ठी नो सम्मामिच्छादिट्ठी, एवं जाव चउरिंदिया,

पंचिंदियतिरिक्खजोणिया मणुस्सा वाणमंतरजोइसियवेमाणिया य सम्मदिट्ठीवि मिच्छादिट्ठीवि सम्मामिच्छादिट्ठीवि, सिद्धा णं पुच्छा, गोयमा ! सिद्धा सम्मदिट्ठी, नो मिच्छादिट्ठी णो सम्मामिच्छादिट्ठी । (पन्नवणाभगवईए सम्मत्तपदं समत्तं)

वृ. 'जीवा णं भंते ! किं सम्मदिट्ठी' इत्यादि सुगमं आपदपरिसमाप्तेः, नवरं सासादनसम्यक्त्वयुक्तोऽपि सूत्राभिप्रायेण पृथिव्यादिषु नोत्पद्यते, "उभयाभावो पुढवाइएसु" इति वचनात्, द्वीन्द्रियादिषु सासादनसम्यक्त्वयुक्त उपपद्यते,

ततः पृथिव्यादयःसम्यग्दृष्टयः प्रतिषिद्धाः, द्वीन्द्रियादयोऽभिहितः, सम्यग्मिथ्यादृष्टिपरिणामः पुनः संज्ञिपञ्चेन्द्रियाणां भवति, न शेषाणां, तथास्वाभाव्यात्, अत उभयेऽपि सम्यग्मिथ्यादृष्टयः प्रतिषिद्धाः ॥

पदं – १९ – समाप्तम्

पदं – २० – "अन्तक्रिया"

वृ. व्याख्यातमेकोनविंशतितमं पदं, अधुना विंशतितमं आरभ्यते, अस्य चायमभिसंबन्धः– इहानन्तरपदे सम्यक्त्वपरिणाम उक्तः, अत्र तु परिणामसाम्याद् गतिपरिणामविशेषोऽन्तक्रियाऽभिधीयते, तत्रेयमादौ अधिकारद्वारगाथा–

मू. (४९६) *नेरइय अंतकिरिया अनंतरं एगसमय उव्वट्टा ।*
तित्थगरचक्कि बलदेववासुदेवमंडलियरयणा य ॥

वृ. 'नेरइय अंतकिरिया' इत्यादि, प्रथमतो नैरयिकोपलक्षितेषु चतुर्विंशतिस्थानेषु अन्तक्रिया चिन्तनीया । ततोऽनन्तरगताः किमन्तक्रियां कुर्वन्ति परम्परागता वा ? इत्येवमन्तरं चिन्तनीयं, ततो नैरयिकादिभ्योऽनन्तरमागताः कियन्त एकसमयेनान्तक्रियां कुर्वन्तीति चिन्त्यते,

तत 'उव्वट्टा' इति उद्वृत्ताः सन्तः कस्यां योनावुत्पद्यन्ते इति वक्तव्यं, तथा यत उद्वृत्तास्तीर्थकराश्चक्रवर्तिनो बलदेवा वासुदेवा माण्डलिकाश्चक्रवर्तिनो रत्नानि च–सेनापतिप्रमुखाणि भवन्ति ततस्तानि क्रमेण वक्तव्यानि इति द्वारगाथासंक्षेपार्थः । विस्तरार्थं तु सूत्रकृदेव वक्ष्यति, तत्र प्रथमतोऽन्तक्रियामभिधित्सुराह–

–: पदं – २०, दारं – १ "नैरयिक" :–

मू. (४९७) *जीवे णं भंते ! अंतकिरियं करेज्जा ?, गोयमा ! अत्थेगइए करेज्जा, अत्थेगतिए नो करेज्जा । एवं नेरइए जाव वेमाणिए ।*

नेरइए णं भंते ! नेरइएसु अंतकिरियं करेज्जा ? गोयमा ! नो इणट्ठे समट्ठे । नेरइया णं भंते

Jain Education International For Private & Personal Use Only www.jainelibrary.org

असुरकुमारेसु अंतकिरियं करेज्ञा ?, गोयमा ! नो इणट्ठे समट्ठे । एवं जाव वेमाणिएसु ।

नवरं मणूसेसु अंतकिरियं करेज्ञत्ति पुच्छा, गोयमा ! अत्थेगतिए करेज्ञा अत्थेगतिए नो करेज्ञा । एवे असुरकुमारा जाव वेमाणिए । एवमेव चउवीसं २ दंडगा भवंति ।

वृ. 'जीवे णं भंते !' इत्यादि, जीवो 'ण'मिति वाक्यालङ्कृतौ भदन्त ! 'अन्तक्रिया'मिति अन्तः—अवसानं, तच्च प्रस्तावादिह कर्मणामवसातव्यं, अन्यत्रागमेऽन्तक्रियाशब्द (वाच्यतया त)स्य रूढत्वात्, तस्य क्रिया—करणमन्तक्रिया—कर्मान्तकरणं मोक्ष इति भावार्थः, ''कृत्स्नकर्म-क्षयान्मोक्षः'' इति वचनात्, तां कुर्याद् ?, भगवानाह— गौतम ! अस्त्येकको यः कुर्यात्, अस्त्येकको यो न कुर्यात्, इयमत्र भावना—यस्तथाविध- भव्यत्पपरिपाकवशतो मनुष्यत्वादिकामविकलां सामग्रीमवाप्य तत्सामर्थ्यसमुद्भूतातिप्रबलवी- र्योल्लासवशतः क्षपकश्रेणिसमारोहणेन केवलज्ञानमासाद्याधातीन्यपि कर्माणि क्षपयेत् स कुर्यात्, अन्यस्तु न कुर्यात्, विपर्यायादिति ।

एवं नैरयिकादिचतुर्विंशतिदण्डकक्रमेण तावद् भावनीया यावद् वैमानिकाः, सूत्रपाठ-स्त्वेवम्—'नेरइए णं भंते ! अंतकिरियं करेज्ञा ?, गोयमा ! अत्थेगइए करेज्ञा अत्थेगइए नो करेज्ञा' इत्यादि । इदानीं नैरयिकेषु मध्ये वर्तमानोऽन्तक्रियां करोति किं वा न करोति ? इति पिपृच्छिषुरिदमाह—

—: पदं – २०, दारं – २ ''अंतक्रिया'' :—

मू. (४९८) *नेरइया णं भंते ! किं अनंतरागया अंतकिरियं करेंति परंपरागया अंतकिरियं करेंति ?, गोयमा ! अनंतरागयावि अंतकिरियं करेंति परंपरागयावि अंतकिरियं करेंति । एवं रयणप्पभापुढविनेरइयावि जाव पंकप्पभापुढवीनेरइया, धूमप्पभापुढवीनेरइयाणं पुच्छा, गोयमा नो अनंतरागया अंतकिरियं पकरेंति, परंपरागया अंतकिरियं पकरेंति, एवं जाव अहेसत्त-मापुढवीनेरइया ।*

असुरकुमारा जाव थणियकुमारा पुढवीआउवणस्सइकाइया य अनंतरागयावि अंतकिरियं पकरेंति परंपरागयावि अंतकिरियं पकरेंति, तेउवाउबेइंदियतेइंदियचउरिंदिया नो अनंतरागया अंतकिरियं पकरेंति परंपरागया अंतकिरियं पकरेंति ।

सेसा अनंतरागयावि अंतकिरियं पकरेंति परंपरागयावि अंतकिरियं पकरेंति ।

वृ. 'नेरइए णं भंते' इत्यादि, भगवानाह—गौतम ! नामयर्थः समर्थः नायमर्थो युक्त्युपपन्न इत्यर्थः । कथमिति चेत् ?, उच्यते, इह कृत्स्नकर्मक्षयः प्रकर्षप्राप्तात्सम्यग्दर्शनज्ञानचारित्रसमु दायाद् भवति, न च नैरयिकावस्थायां चारित्रपरिणामः, तथा भवस्वाभाव्यादिति । एवमसुरकुमारा-दिषु वैमानिकपर्यवसानेषु प्रतिषेधो वक्तव्यः । मनुष्येषु तु मध्ये समागतः सन् कश्चिदन्तक्रियां कुर्यात्, यस्य परिपूर्णा चारित्रादिसामग्री स्यात्, कश्चिन्न कुर्यात्, यस्तद्विकल इति । एवम-सुरकुमारादयोऽपि वैमानिकपर्यवसानाः प्रत्येकं नैरयिकादिचतुर्विंशतिदण्डकक्रमेण वक्तव्याः, तत एवमेते चतुर्विंशतिदण्डकाश्चतुर्विंशतयो भवन्ति ॥

अथैते नैरयिकादयः स्वस्वनैरयिकादिभवेभ्योऽनन्तरं मनुष्यभवे समागताः सन्तोऽन्तक्रियां कुर्वन्ति किंवा तिर्यगादिभवव्यवधानेन परंपरागता इति निरूपयितुकाम आह—'नेरइया णं भंते इत्यादिप्रश्नसूत्रं सुगमं, भगवानाह—गौतम ! अनन्तरागता अपि अन्तक्रियां कुर्वन्ति परम्परागता अपि, तत्र रत्नशर्करावालुकापङ्कप्रभाभ्योऽनन्तरागता अपि परम्परागता अपि, धूमप्रभापृथिव्या-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दिभ्यः पुनः परम्परागता एव, तथास्वाभाव्यात, एनमेव विशेषंप्रतिपिपादयिषुः सूत्रसप्तकमाह-'एवं रयणप्पभापुढवीनेरइयावि' इत्यादि, सुगमं।

असुरकुमारादयः स्तनितकुमारपर्यवसाना; पृथिव्यब्वनस्पतयश्चानन्तरागता अपि अन्तक्रियां कुर्वन्तिपरम्परागता अप्यन्तक्रियां कुर्वन्ति, उभयथाऽप्यागतानां तेषामन्तक्रियाकरणाविरोधात्, तथा केवलचक्षुषोपलब्धेः। तेजोवायुद्वित्रिचतुरिन्द्रियाः परम्परागता एव, न त्वनन्तरागताः, तत्र तेजोवायूनामानन्तर्येण मनुष्यत्वस्यैवाप्राप्तेः, द्वीन्द्रियादीनां तु तथाभवस्वाभाव्यादिति शेषास्तु तिर्यक्पञ्चेन्द्रियादयो वैमानिकपर्यवसाना अनन्तरागता अपि परम्परागता अपि। अथ नैरयिकादिभवेभ्योऽनन्तर भगवताः कियन्त एकसमयेऽन्तक्रियां कुर्वन्ति इत्येवंरूपं तृतीयं द्वारमभिधित्सुराह-

-: पदं - २०, द्वारं - ३, "अनंतरागता" :-

मू. (४९९) *अनंतरागया नेरइया एगसमये केवइया अंतकिरियं पकरेंति ?, गोयमा! जहन्नेणं एगो वा दो वा तिन्नि वा उक्कोसेणं, दस, रयणप्पभापुढवीनेरइयावि एवं चेव, जाव वालुयप्पभापुढवी०, अनंत० भंते ! पंकपभापुढवीनेरइया एगसमयेणं केवतिया अंतकिरियं पकरेंति ?, गोयमा ! जहन्नेणं एक्को वा दो वा तिन्नि वा उक्कोसेणं चत्तारि, अनंतरागया णं भंते ! असुरकुमारा एगसमये केवतिआ अंत० पकरेंति ?, गोयमा ! जह० एक्को वा दो वा तिन्नि वा उक्कोसेणं दस, अनंतरागया णं भंते ! असुरकुमारीओ एगस० केव० अंत० पकरेंति ?, गोयमा जह० एक्को वा दो वा तिन्नि वा उक्कोसेणं पंच, एवं जहा असुरकुमारा सदेवीया तहा जाव थणिअ०*

अनंतरागया णं भंते ! पुढवि० एगसमये केवइया अंतकिरियं पकरेंति ?, गोयमा ! जह० एक्को वा दो वा तिन्नि वा, उक्कोसेणं चत्तारि, एवं आउक्काइयावि चत्तारि, वणस्सइकाइया छच्च, पंचिदियतिरिक्खजोणिया दस, तिरिक्खजोणिणीओ दस, मणुस्सा दस, मणुस्सीओ वीस, वाणमंतरा दस, वाणमंतरीओ पंचस जोईसिआ दस, जोइसिणीओ वीसं, वेमाणिआ अट्ठसयं, वेमाणिणीओ वीसं।

वृ. 'अनंतरागयां णं भंते!' इत्यादिक नैरयिकभवादनन्तरं-अव्यवधानेन मनुष्यभवमागता अनन्तरागताः, नैरयिका इति प्राग्भवपर्यायेणं व्यपदेशः सुरादिप्राग्भवपर्यायप्रतिपत्तिव्युदासार्थः, एवमुत्तरत्रापि तत्तत्प्राग्भवपर्यायेण व्यपदेशे प्रयोजनं चिन्तनीयमिति। शेषं कण्ठयं। सम्प्रति तत उद्वृत्ताः कस्यां योनावुत्पद्यन्ते ? इति चतुर्थं द्वारमभिधित्सुराह-

-: पदं - २०, दारं - ४ "उद्वर्तन" :-

मू. (५००) *नेरइए णं भंते! नेरइएहिंतो अनंतरं उव्वट्टित्ता नेरइएसुउववज्जेज्ञा ?, गोयमा नो इणट्ठे समट्ठे, नेरइए णं भंते ! नेरइएहिंतो अनंतरं उव्वट्टित्ता असुरकुमारेसु उववज्जेज्ञा ?, गोयमा ! नो इणट्ठे समट्ठे। एवं निरंतरं जाव चउरिंदिएसु पुच्छा, गोयमा ! नो इणट्ठे समट्ठे।*

नेरइए णं भंते ! नेरइएहिंतो अनंतरं उव्वट्टित्ता पंचिंदियतिरिक्खजोणिएसु उववज्जेज्ञा अत्थेगतिए उववज्जेज्ञा अत्थेगइए नो उववज्जेज्ञा, जे णं भंते ! नेरइएहिंतो अनंतरं पंचिंदियतिरिक्खजोणिएसु उवव० से णं भंते ! केवलिपन्नत्तं धम्मं लभेज्ञा सवणयाए ?, गोयमा अत्थेगतिए लभेज्ञा अत्थेगतिए नो लभेज्ञा,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

—ओसन्नं कारणं पडुच्च वण्णओ कालनीलातिं गंधओ दुब्भिगंधातिं रसओ तित्तरसकडुयाइं फासओ कक्खडगुरुयसीयलुक्खाइं तेसिं पोराणे वण्णगुणे गंधगुणे रसंगुणे फासगुणे विपरिणामइत्ता परिपीलइत्ता परिसाडइत्ता परिविद्धंसइत्ता अन्ने अपुव्वे वण्णगुणे गंधगुणे रसगुणे फासगुणे उप्पाइत्ता आयसरीरखेत्तोगाढे पोग्गले सव्वप्पणयाए आहारं आहारेंति।

नेरइया णं भंते ! सव्वओ आहारेंति सव्वओ परिणामंति सव्वओ ऊससंति सव्वओ नीससंति अभिक्खणं आहारेंति अभिक्खणं परीणामंति अभिक्खणं ऊससंति अभिक्खणं नीससंति आहच्च आहारेंति आहच्च परणीमेंति आहच्च ऊससंति आहच्च नीससंति ?, हंता ! गो० ! नेरइया सव्वतो आहारेंति एवं तं चेव जाव आहच्च नी०।

नेरइया णं भंते ! पोग्गले आहारत्ताते गिण्हतिं ते णं तेसिं पोग्गलाणं सेयालंसि कतिभागं आहारेंति कतिभागं आसाएंति ?, गो० ! असंखेज्जतिभागं आ० अनंतभागं अस्साएंति, नेरइया णं भंते ! जे पोग्गले आहारत्ताते गिण्हंति ते किं सव्वे आहारेंति नो सव्वे आहारेंति ?, गो० ! ते सव्वे अपरिसेसए आहारेंति। नेरइया णं भंते १ जे पोग्गले आहारत्ताए गिण्हंति ते णं तेसिं पोग्गलाकीसत्ताए भुज्जो २ परिणामेंति ?, गो० ! सोतिंदियत्ताते जाव फासिंदियत्ताते अनिट्ठत्ताते अकंतत्ताए अन्निट्ठत्ताए अमणुण्णत्ताए अमणामत्ताते अनिच्छियत्ताते अभिज्झित्ताए अहत्ताते नो उद्धत्ताए दुक्खत्ताते नो सुहत्ताते एतेसिं भुज्जो २ परिणमंति।

वृ. 'नेरइया णं भंते १' इत्यादि, नैरयिका भदन्त ! किं सचित्ताहाराः—सचित्तमाहारयन्तीति सचित्ताहाराः,एवमचित्ताहारा मिश्राहारा इत्यपि भावनीयं, भगवानाह—'गौतमे'त्यादि, इह वैक्रियशरीरिणो वैक्रियशरीरपरिपोषयोग्यान् पुद्गलानाहारयन्ति, ते चाचित्ता एव सम्भवन्ति न जीवपरिगृहीता इत्यचित्ताहारा न सचित्ताहारा नापि मिश्राहाराः, एवमसुरकुमारादयः स्तनितकुमारापर्यवसाना भवनपतयो व्यन्तरा ज्योतिष्का वेमानिकाश्च वेदितव्याः, औदारिकशरीरिणः पुनरौदारिकशरीरपरिपोषयोग्यान् पुद्गलानाहारयन्ति, ते च पृथिवीकायिकादिपरिणामपरिणता इति सचित्ताहारा अचित्ताहारा मिश्राहाराश्च घटन्ते, तथा चाह—'ओरालियसरीरा जाव मणूसा' इत्यादि, औदारिकशरीरिणः पृथिवीकायिकेभ्य आरभ्य यावन्मनुष्याः, किमुक्तं भवति ? —पृथिव्यप्तेदोवायुवनस्पतिरकूपा एकेन्द्रिया द्वित्रिचतुःपञ्चेन्द्रिया मनुष्याश्चच एते प्रत्येकं सचित्ताहारा अप्यचित्ताहारा अपि मिश्राहारा अपि वक्तव्याः। उक्तः प्रथमाधिकारः, सम्प्रति द्वितीयादीनष्टमपर्यन्तान् सप्ताधिकारान् चतुर्विशतिदण्डकक्रमेण युगपदभिधित्सुः प्रथमतो नैरयिकाणामभिदधाति—

'नेरइया ण'मित्यादि, नैरयिकाणमिति वाक्यालङ्कारे, भदन्त ! आहारार्थिनः, काक्वाऽभिधानतः प्रश्नार्थत्वावगतिः, भगवानाह—'हंते'त्यादि, हन्तेत्यनुमतौ अनुमतमेतत्, गौतम आहारार्थिनो नैरयिका इति, यदि आहारार्थिनस्ततो भदन्त ! नैरयिका णमिति पूर्ववत् 'केवइकालस्स'त्ति प्राकृतत्वात् तृतीयार्थे षषअठी, कियता कालेन आहारार्थः—आहारलक्षणं प्रयोजनं आहाराभिलाष इतियावत् समुत्पद्यते ?, भगवानाह—'गौतम !' इत्यादि, नैरयिकाणां द्विविधो—द्विप्रकारः आहारः, तद्यथा—आभोगनिर्वार्त्तितोऽनाभोगनिर्वर्त्तितश्च, तत्र आभोगनमाभोगः—आलोचनमभिसन्धिरित्यर्थः आभोगेन निर्वर्त्तितः—उत्पादित आभोगनिर्वर्त्तित

Jain Education International For Private & Personal Use Only www.jainelibrary.org

केवलिप्रज्ञप्तधर्मश्रवणश्रद्धानादवश्यं तयोर्भावात्, भूयः प्रश्नयति-यो भदन्त! आभिनिधिकश्रुतज्ञाने उत्पादयति स 'संचाएज्जा' शक्नुयात् 'शीलं' ब्रह्मचर्यं 'व्रतं' चित्रं द्रव्यादिविषयनिमरूपं गुणं-उत्तरगुणं भावनादिरूपं विरमणं-विरतिरतीतस्थूलप्राणातिपातादेः प्रत्याख्यानं-अनागतस्य स्थूलप्राणातिपातादेरेव, पोषं-धर्मपोषं दधाति-करोतीति पोषधं-अष्टम्यादिपर्व तस्मिन्नुपवासः पोषधोपवासः तं प्रतिपत्तुं शक्नुयात् ? । भगवानाह-'अत्थेगइए' इत्यादि,

इह तिरश्चां मनुष्याणां च भवप्रत्ययतोऽवधिर्नोपजायते किन्तु गुणतः, गुणाश्च शीलव्रतादयोऽस्यापि विद्यन्ते ततः किमस्यावधिज्ञानमुत्पद्यते किं वा न ? इति प्रश्नयति, 'जे णं भंते इत्यादि, यस्य शीलव्रतादिविषयविप्रकृष्टपरिणामभावात् अवधिज्ञानावरणकर्मणः क्षयोपशम उपजायते स उत्पादयेत्, शेषस्तु नेत्यर्थः ॥

अवधिज्ञानान्तरं च मनःपर्यवज्ञानं द्रष्टव्यं, मनःपर्यवज्ञानं चानगारस्य भवति "तं संजयस्स सव्वप्पमायरहियस्स विविहरिद्धिमतो" [तत् संयतस्य सर्वप्रमादरहितस्य विविधर्द्धिमतः] इति वचनात्, ततोऽनगारतामेव प्रश्नयति-'जे णं भंते!' इत्यादि, मुण्डो द्विधा-द्रव्यतो भावतश्च, द्रव्यतः केशाद्यपनयनेन भावतःसर्वसङ्गपरित्यागेन, तत्रेह द्रव्यमुण्डत्वासंभवाद् भावमुण्डः परिगृह्यते, मुण्डो भूत्वा अगारात्-स्वाश्रयरूपाद् विनिर्गत्य न विद्यते अगारं-गृहं द्रव्यतो भावतश्च यस्यासौ अनगारः तद्भावोऽनगारतातां प्रव्रजितुं शक्नुयात् ? भगवानाह-नायमर्थः समर्थः तिरश्चां भलस्वभावातः तथारूपपरिणामासंभवात्, अनागारताया अभावे मनःपर्यवज्ञानस्य चाभावः सिद्ध एव । यथा च तिर्यक्पञ्चेन्द्रियविषयं सूत्रकदम्बकमुक्तं तथा मनुष्यविषयमपि वक्तव्यं, नवरं मनुष्येषु सर्वभावसंभवात् मनःपर्यवज्ञानकेवलज्ञानसत्रे अधिके प्रतिपादयति-'जे णं भंते संचाएज्जा मुंडे भवित्ता' इत्यादि सुगमं, नवरं 'सिज्झेज्जा' इत्यादि, सिध्येत-समस्ताणिमैश्वलर्यादिसिद्धिभाक् भवेत् बुध्येत-लोकालोकस्वरूपमशेषमवगच्छेत् मुच्यते-भवोपग्राहिकर्मभिरपि, किमुक्तं भवति सर्वदुःखानामन्तं कुर्यात् ।

वानमन्तरज्योतिष्कवैमानिकेषु प्रतिषेधो वक्तव्यः, नैरयिकस्य भवस्वाभाव्यान्नैरयिकदेवभवयोग्यायुर्बन्धासंभवात् । तदेवं नैरयिका नैरयिकादिचतुर्विंशतिदण्डकक्रमेण चिन्तिताः, साम्प्रतमसुरकुमारान्नैरयिकादिचतुर्विंशतिदण्डकक्रमेण चिन्तयति-

मू. (५०१) *असुरकुमारे णं भंते! असुरकुमारेहिंतो अनंतरं उव्वट्टित्ता नेरइएसु उववज्जेज्जा गोयमा! नो इणट्ठे समट्ठे। असुरकुमारे णं भंते! असुरकुमारेहिंतो अनंतरं उव्वट्टित्ता असुरकुमारेसु उववज्जेज्जा ?, गोयमा! नो इणट्ठे समट्ठे, एवं जाव थणियकुमारेसु।*

असुरकुमारे णं भंते! असुरकुमारेहिंतो अनंतरं उव्वट्टित्ता पुढवीकाइएसु उववज्जेज्जा ?, हंता गोयमा! अत्थेगइए उववज्जेज्जा अत्थेगतिए नो उववज्जेज्जा। जे णं भंते! उववज्जेज्जा से णं केवलियं धम्मं लभेज्जा सवणयाए ?, गोयमा! नो इणट्ठे समट्ठे। एवं आउवणस्सइसुवि।

असुरकुमारा णं भंते! असुरकुमारेहिंतो अनंतरं उव्वट्टित्ता तेउवाउबेइंदियतेइंदियचउरिंदिएसु उववज्जेज्जा ?, गोयमा! नो इणट्ठे समट्ठे, अवसेसेसु पंचसु पंचिंदियतिरिक्खजोणिइसु असुरकुमारेसु जहा नेरइओ, एवंजाव थणियकुमारा।

वृ. 'असुरकुमारा णं भंते!' इत्यादि प्राग्वत्, नवरमेते पृथिव्यब्वनस्पतिष्वप्युत्पद्यन्ते,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ईशानन्तदेवानां तेषूत्पादाविरोधात्, तेषु चोत्पन्ना न केवलिप्रज्ञप्तं धर्मं लभन्ते श्रवणतया, श्रवणेन्द्रियस्याभावात्, शेषं सर्वं नैरयिकवत्, एवं 'जाव थणियकुमारा' इति एवमसुरकुमारोक्तेन प्रकारेण तावद्वक्तव्यं यावत्स्तनितकुमाराः ।

मू. (५०२) *पुढवीकाइए णं भंते ! पुढवीकाइएहिंतो अनंतरं उव्वट्टित्ता नेरइएसु उववज्जेज्जा गोयमा ! नो इणट्ठे समट्ठे, एवं असुरकुमारेसुवि, जाव थणियकुमारेसुवि । पुढवीकाइए णं भंते ! पुढवीकाइएहिंतो अनंतरं उव्वट्टितता पुढवीकाइएसु उववज्जेज्जा ?, गोयमा ! अत्थेगतिए उववज्जेज्जा अत्थेगतिए नो उववज्जेज्जा, जे णं भंते ! उववज्जेज्जा से णं केवलिपन्नत्तं धम्मं लभेज्जा सवणयाए ?, गोयमा ! नो इणट्ठे समट्ठे । एवं आउक्काइआदिसु निरंतरं भाणिव्वं जाव चउरिंदिएसुं ।*

पंचिंदियतिरिक्खजोणिमणुस्सेसु जहा नेरइए । वाणमंतरजोइसियवेमाणिएसु पडिसेहो एवं जहा पुढवीकाओ भणिओ तहेव आउक्काइओवि, जाव वणस्सइकाइओवि भाणियव्वो ।।

तेउक्काइए णं भंते ! तेउकाइएहिंतो अनंतरं उव्वट्टित्ता नेरइएसु उववज्जेज्जा ?, गोयमा ! नो इणट्ठे समट्ठे, एवं असुरकुमारेसुवि, जाव थणियकुमारेसु, पुढवीकाइअआउवाउतेउवणबेइंदियतेइंदियचउरिंदिएसु अत्थेगतिए णो उववज्जेद्जा,

जे णं भंते ! उववज्जेज्जा से णं केवलिपन्नत्तं धम्मं लभेज्जा सवणयाए ?, गोयमा ! नो इणट्ठे समट्ठे । तेउक्काइए णं भंते ! तेउकाइएहिंतो अनंतरं उव्वट्टित्ता पंचिंदियतिरिक्खजोणिएसु उववज्जेज्जा गोयमा ! अत्थेगइए उववज्जेज्जा अत्थेगइए नो उववज्जा,

से णं केवलिपन्नत्तं धम्मं लभेज्जा सवणयाए ?, गोयमा ! अत्थेगइए लभेज्जा अत्थेगइए नो लभेज्जा, जे णं भंते ! केवलिपन्नत्तं धम्मं लभेज्जा सवणयाए से णं केवलिं बोहिं बुज्झेज्जा ?, गोयमा नो इणट्ठे समट्ठे ।। मणुस्सवाणमंतरजोइसियवेमाणिएसु पुच्छा, गोयमा ! नो इणट्ठे समट्ठे । एवं जहेव तेउक्काइए निरंतरं एवं वाउकाइएवि ।

वृ. पृथिवीकायिका नैरयिकेषु देवेषु च प्रतिषिध्यन्ते, तेषां विशिष्टमनोद्रव्यासंभवतस्तीव्रसंक्लेशविशुद्धाध्यवसायाभावात्, शेषेषु तु सर्वेष्वपि स्थानेषु उत्पद्यन्ते, तद्योग्याध्यवसायस्थानसंभवात्, तत्रापि च तिर्यक्पञ्चेन्द्रियेषु मनुष्येषु च नैरयिकवद् वक्तव्यं, एवमप्कायिका वनस्पतिकायिकाश्च वक्तव्याः ।

तेजस्कायिका वायुकायिकाश्च मनुष्येष्वपि प्रतिषेधनीयाः, तेषामानन्तर्येणं मनुष्येषूत्पादासंभवात्, असंभवश्च क्लिष्टपरिणामतया मनुष्यगतिमनुष्यानुपूर्वमनुष्यायुर्बन्धासंभवात्, तिर्यक्पञ्चेन्द्रियेषूत्पन्नाः केवलिप्रज्ञप्तं धर्मं श्रवणतया लभेरन्, श्रवणेन्द्रियस्य भावात्,

पुनस्तां केवलिकीं बोधिं नावबुध्येरन्, संक्लिष्टपरिणामत्वात् ।

मू. (५०३) *बेइंदिए णं भंते ! बेइंदिएहिंतो अनंतरं उव्वट्टित्ता नेरइएसु उववज्जेज्जा ?, गोयमा ! जहा पुढवीकाइआ । नवरं मणुस्सेसु जाव मनपज्जवनाणं उप्पाडेज्जा । एवं तेइंदिया चउरिंदियावि जाव मनपज्जवनाणं उप्पाडेज्जा । जे णं मनपज्जवनाणं उप्पाडेज्जा से णं केवलनाणं उप्पाडेज्जा ?, गोयमा ! नो इणट्ठे समट्ठे ।*

वृ. द्वित्रिचतुरिन्द्रियाः पृथिवीकायिकवत् देवनैरयिकवर्जेषु शेषेषु सर्वेष्वपि स्थानेषूत्पद्यन्ते,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नवरं पृथिवीकायिका मनुष्येष्वागता अन्तक्रियामपि कुर्युः ते पुनरन्तक्रियां न कुर्वन्ति, तथाभवस्वभावात्, मन;पर्यज्ञानं पुनरुत्पादयेयुः।

मू. (५०४) *पंचिंदियतिरिक्खजोणिया णं भंते! पंचिंदियतिरिक्खजोणिएहिंतो अनंतरं उव्वट्टित्ता नेरइएसु अनंतरं उववज्जेज्जा?, गोयमा! अत्थेगइए उववज्जेज्जा अत्थेगइए नो उववज्जेज्जा,*

से णं केवलिपन्नत्तं धम्मं लभेज्जा सवणयाए?, गोयमा! अत्थेगइए लभेज्जा अत्थेगइए नो लभेज्जा, जे णं केवलिपन्नत्तं धम्मं लभेज्जा सवणयाए से णं केवलिं बोहिं बुज्झेज्जा?, गोयमा! अत्थेगतिए बुज्झेज्जा अत्थेगतिए नो बुज्झेज्जा,

जे णं भंते! केवलिं बोहिं बुज्झेज्जा से णं सद्दहेज्जा पत्तिएज्जा रोएज्जा?, हंता गोयमा! जाव रोएज्जा, जे णं भंते! सद्दहेज्जा० से णं आभिनिबोहियनाणसुयनाणओहिनाणाइं उप्पाडेज्जा?, हंता गोयमा! जाव उप्पाडेज्जा!, जे णं भंते! आभिणिबोहियनाणसुयनाणओहिनाणाइं उप्पाडेज्जा से णं संचाएज्जा सीलं वा जाव पडिवज्जित्तए?, गोयमा! नो इणट्ठे समट्ठे। एवं असुरकुमारेसुवि, जाव थणियकुमारेसु। एगिंदियविगलिंदिएसु जहा पुढवीकाइआ। पंचिंदियतिरिक्खजोणिएसु मणुस्सेसु य जहा नेरइए। वाणमंतरजोइसियवेमाणिएसु जहा नेरइएस उववज्जइ पुच्छा भणिया एवं मणुस्सेवि, वाणमंतरजोइसियवेमाणिएसु जहा असुरकुमारे।

वृ. तिर्यक्पञ्चेन्द्रिया मनुष्याश्च सर्वेष्वपि स्थानेषूत्पद्यन्ते, तद्वक्तव्यता च पाठसिद्धा। वानमन्तरज्योतिष्कवैमानिका असुरकुमारवद् भावनीयाः।

गतं चतुर्थं द्वारं। इदानीं पञ्चमं तीर्थकरत्ववक्तव्यतालक्षणं द्वारमभिधित्सुराह-

-: पदं - २० - दारं - ५ "तीर्थकर" :-

मू. (५०५) *रयणप्पभापुढवीनेरइए णं भंते! रयणप्पभापुढवीनेरइएहिंतो अनंतरं उव्वट्टित्ता तित्थगरत्तं लभेज्जा?, गोयमा! अत्थेगइए लभेज्जा अत्थेगइए नो लभेज्जा, से केणट्ठेणं भंते! एवं वुच्चइ-अत्थेगइए लभेज्जा अत्थेगइए नो लभेज्जा?, गो०!*

जस्स णं रयणप्पभापुढवीनेरइअस्स तित्थगरनामगोयाइं कम्माइं बद्धाइं पुट्ठाइं निधत्ताइं कडाइं पट्ठवियाइं निविट्ठाइं अभिनिविट्ठाइं अभिसमन्नागयाइं उदिन्नाइं नो उवसंताइं हवंति से णं रयणप्पभापुढवीनेरइए रयणप्पभापुढवीनेरइएहिंतो अनंतरं उव्वट्टित्ता तित्थगरत्तं लभेज्जा, जस्स णं रयणप्पभापुढवीनेरइयस्स तित्थगरनामगोयाइं नो बद्धाइं जाव नो उदिन्नाइं उवसंताइं हवंति से णं रयणप्पभापुढवीनेरइए रयणप्पभापुढवीनेरइएहिंतो अनंतरं उव्वट्टित्ता तित्थगरत्तं नो लभेज्जा, से तेणट्ठेणं गोयमा! एवं वुच्चइ-अत्थेगतिए लभेज्जा अत्थेगतिए नो लभेज्जा। एवं सक्करप्पभाजाववालुयप्पभापुढवीनेरइएहिंतो तित्थगरत्तं लभेज्जा।

पंकप्पभापुढवीनेरइए णं भंते! पंकप्पभा० हिंतो अनंतरं उव्वट्टित्ता तित्थगरत्तं लभेज्जा गोयमा! नो इणट्ठे समट्ठे, अंतकिरियं पुण करेज्जा, धूमप्पभापुढवी० पुच्छा, गोयमा! नो इणट्ठे समट्ठे, सव्वविरइ पुण लभेज्जा, तमप्पभापुढवीपुच्छा, विरयाविरइं पुण लभेज्जा, अहेसत्तमपुढवीपुच्छा, गोयमा! नो इणट्ठे समट्ठे, सम्मत्तं पुण लभेज्जा।

असुरकुमारस्स पुच्छा, नो इणट्ठे समट्ठे, अंतकिरियं पुण करेज्जा। एवं निरंतरं जाव आउकाइए तेउकाइए णं भंते! तेउक्काइएहिंतो अनंतरं उव्वट्टित्ता उववज्जेज्जा (तित्थगरत्तं ल०),

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गो० ! नो० ति०, केवलिपन्नत्तं धम्मं लभेज्ञा सवणयाते, एवं वाउकाइएवि, वणस्सइकाइए णं पुच्छा, गो० ! नो० ति०, अंतकिरियं पुण करेज्ञा,

बेइंदियतेइंदियचउरिंदिए णं पुच्छा, गो० ! नो० ति०, मनपज्ञवनाणं उप्पाडेज्ञा, पंचिंदियतिरिक्खजोणियमणूसवाणमंतरजोइसिए णं पुच्छा, गो० ! नो० ति०, अंतकिरियं पुण करेज्ञा, सोहम्मगदेवे णं भंते ! अनंतरं चयं चइत्ता तित्थगरत्तं लभेज्ञा, गो० ! अत्थे० ल० अत्थे० नो ल०, एवं जहा रयणप्पभापुढविनेरइए एवं जाव सव्वट्ठसिद्धगदेवे ॥

वृ. 'रयणप्पभापुढवीनेरइया णं भंते !' इत्यादि सुगमं, नवरं 'बद्धानि' सूचीकलाप इव सूत्रेण प्रथमतो बद्धमात्राणि, तदनन्तरमग्निसंपर्कानन्तरं सकृत् घनकुट्टितसूचीकलापवत् स्पृष्टानि 'निधत्तानि' उद्वर्तनापवर्तनावर्जशेषकरणायोग्यत्वेन व्यवस्थापितानीति भावार्थः 'कृतानि' निकाचितानि सकलकरणायोग्यत्वेन व्यवस्थापितानीत्यर्थः 'प्रस्थापितानि' मनुष्यगतिपञ्चेन्द्रियजातित्रसबादरपर्याप्तसुभगादेययशःकीर्तिनामसहोदयत्वेन व्यवस्थापितानीति भावः 'निविष्टानि' तीव्रानुभावजनकतया स्थितानि 'अभिनिविष्टानि' विशिष्टविशिष्टतराध्यवसायभावतोऽतितीव्रानुभावजनकतया व्यवस्थितानि 'अभिसमन्वागतनानि' उदयाभिमुखीभूतानि 'उदीर्णानि' विपाकोदयमागतानि 'नोपशान्तानि' न सर्वथाऽभावमापन्नानि निकाचिताद्यवस्थोद्रेकरहितानि वा न भवन्ति, शेषं समस्तमपि कण्ठयं, एवं शर्कराप्रभावालुकाप्रभाविषये अपि सूत्रे वक्तव्ये ।

पङ्कप्रभापृथिवीरनैरयिकस्ततोऽनन्तरमुद्वृत्तः तीर्थकरत्वं न लभते, अन्तक्रियां पुनः कुर्यात्, धूमप्रभापृथिवीनैरयिकोऽन्तक्रियामपि न करोति, सर्वविरतिं पुनर्लभते, तमः—प्रभापृथिवीनैरयिकः सर्वविरतिमपि न लभते, विरत्यविरतिं—देशविरतिं पुनर्लभते, अधःसप्तमपृथिवीनैरयिकः पुनस्तामपि देशविरतिं न लभते, यदि परं सम्यकत्वमात्रं लभते ।

असुरादयो यावद्वनस्पतिकाया अनन्तरमुद्वृत्ताः तीर्थकरत्वं न लभन्ते, अन्तक्रियां पुनः कुर्युः । वसुदेवचरिते पुनर्नागकुमारेभ्योऽप्युद्वृत्तोऽनन्तरमैरावतक्षेत्रेऽस्यामेवावसर्पिण्यां चतुर्विंशतितमस्तीर्थकर उपदर्शितः, तदत्र तत्त्वं केवलिनो विदन्ति ।

तेजोवायवोऽनन्तरमुद्वृत्ताः अन्तक्रियायामपि न कुर्वन्ति, मनुष्येषु तेषामानन्तर्येणोत्पादाभावाद्, अपि च ते तिर्यक्षूत्पन्नाः केवलिप्रज्ञप्तं धर्मं श्रवणतया लभेरन्, न तु बोधत इत्युक्तं प्राक्, वनस्पतिकायिका अनन्तरमुद्वृत्तास्तीर्थकरत्वं न लभन्ते, अंतक्रियां पुनः कुर्युः, द्वित्रिचतुरिन्द्रिया अनन्तरमुद्वृत्तास्तामपि न कुर्वन्ति, मनःपर्यायज्ञानं पुनरुत्पादयेयुः,

तिर्यक्पञ्चेन्द्रियमनुष्यव्यन्तरज्योतिष्का अनन्तरमुद्वृत्तास्तीर्थकरत्वं न लभन्ते, अन्तक्रियां पुनः कुर्युः, सौधर्मादयः सर्वार्थसिद्धिपर्यवसाना नैरयिकवद्वक्तव्याः ।

गतं तीर्थकरद्वारं, सम्प्रति चक्रवर्त्तित्वादीनि द्वाराण्युच्यन्ते—

—: पदं – २०, द्वाराणि (६....९) चक्रवर्तीआदि :—

मू. (५०६) *रयणप्पभापुढविनेरइए णं भंते ! अनंतरं उव्वट्टित्ता चक्कवट्टित्तं लभेज्ञा, गो० ! अत्थे० लभेज्ञा अत्थे० नो लभेज्ञा, से केणट्ठेणं भंते ! एवं वु० ?, गो० ! जहा रयणप्पभापुढविनेरइयस्स तित्थगरत्तं ।*

सक्करप्पभानेरइए अनंतरं उवट्टित्ता चक्कवट्टित्तं लभेज्ञा ?, गो० ! नो० ति०, एवं जाव अधेसत्तमापुढविनेरइए, तिरियमणुएहिंतो पुच्छा, गो० ! णो० ति०,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भवणपतिवाणमंतरजोतिसियवेमाणिएहिंतो पुच्छा गो० ! अत्थे० ल० अत्थे० नो लभेज्ञा,

एवं बलदेवत्तंपि, नवरं सक्करप्पभापुढविनेरइएवि लभेज्ञा, एवं वासुदेवत्तं दोहिंतो पुढवीहिंतो वेमाणिएहिंतो य अनुत्तरोववाइयवज्ञेहिंतो, सेसेसु नो ति०,

मंडलियत्तं अधेसत्तमा तेउवाऊवज्ञेहिंतो, सेनावइरयणत्तं गाहावइरणत्तं वड्ढतिरयणत्तं पुरोहियरयणत्तं इत्थिरयणं(णत्तं) च एवं चेव, नवरं अनुत्तरोववाइयवज्ञेहिंतो, आसरयणत्तं हत्थिरयणत्तं रयणप्पभाओ निरंतरं जाव सहस्सारो, अत्थे० लभेज्ञा अत्थे० नो लभेज्ञा, चक्करयणत्तं छत्तरयणत्तं चम्मरयणत्तं दंडरयणत्तं असिरयणत्तं मणिरयणत्तं कागिणिरयणत्तं एतेसिणं असुरकुमारेहिंतो आरद्वृ निरंतरं जाव ईसाणाओ उववाओ, सेसेहिंतो नो तिणट्ठे समट्ठे ।

वृ. तत्र चक्रवर्त्तित्वं रत्नप्रभानैरयिकभवनपतिव्यन्तरज्योतिष्कवमानिकेभ्यो न शेषेभ्यो, बलदेववासुदेवत्वे शर्करातोऽपि नवरं वासुदेवत्वं वैमानिकेभ्योऽनुत्तरोपपातवर्जेभ्यः,

मण्डलिकत्वमधःसप्तमतेजोवायुवर्जेभ्यः शेषेभ्यः सर्वेभ्योऽपि स्थानेभ्यः, सेनापतिरत्नत्वं गाथापतिरत्नत्वं वार्द्धकिरत्नत्वं पुरोहितरत्नत्वं स्त्रीरत्नत्वं चाधःसप्तमपृथिवीतेजोवायुअनुत्तरोपपन्नदेववर्जेभ्यः शेषेभ्यः स्थानेभ्यः, अश्वरत्नत्वहस्तिरत्नत्वे रत्नप्रभात आरभ्य निरन्तरं यावदासहस्रारात्, चक्ररत्नत्वं छत्ररत्नत्वं चर्मरत्नत्वं दण्डरत्नत्वमसिरत्नत्वं मणिरत्नत्वं काकणिरत्नत्वं चासुरकुमारादारभ्य निरन्तरं यावदीशानात्, सर्वत्र विधिवाक्ये 'अत्थेगइए लभेज्ञा अत्थेगइए नो लभेज्ञा' इति वक्तव्यं, प्रतिषेधे 'नो इणट्ठे समट्ठे' इति ।

तदेवमुक्तानि द्वाराणि, सम्प्रतिउपपातगतं किञ्चिदक्तव्यमस्तीति तदभिधित्सुराह–

मू. (५०७) *अह भंते! असंजयभवियदव्वदेवाणं अविराहियसंजमाणं विराहियसंजमाणं अविराहियसंजमासंजमाणं विराहियसंजमासंजमाणं असण्णीणं तावसाणं कंदप्पियाणं चरगपरिव्वायगाणं किव्विसियाणं तिरिच्छियाणं आजीवियाणं आभिओगियाणं सलिंगीणं दंसणवावण्णगाणं देवलोगेसु उववज्ञमाणाणं कस्स कहिं उववाओ पन्नत्तो ?,*

–गो० ! असंजयभवियदव्वदेवाणं जहन्नेणं भवणवासीसु उक्को० उवरिमगेवेज्ञएसु, अविराहियसंजमाणं जह० सोहम्मे कप्पे उक्को० सव्वट्ठसिद्धे, विराहियसंजमाणं जह० भवणवासीसु उक्को० सोहम्मे कप्पे, अविराहियसंजमासंजमाणं जह० सोहम्मे कप्पे उक्को० अच्चुए कप्पे, विपाहितसंजमासंजमाणं ज० भवणवासीसु उक्को० जोतिसिएसु, असन्नीणं जहन्नेणं भवणवासीसु उ० वाणमंतरेसु, तावसाणं ज० भवणवासीसु उक्को० जोइसिएसु, कंदप्पियाणं ज० भवणवासीसु उ० सोहम्मे कप्पे, चरगपरिव्वायगाणं ज० भवणवसीसु उ० बंभलोए कप्पे, किब्बिसियाणं जह० सोहम्मे कप्पे उ० लंतए कप्पे, तिरिच्छियाणं जह० भवणवासीसु उ० सव्वारेकप्पे, आजीवियाणं ज० भवणवासीसु उ० अच्चुए कप्पे, एवं आभिओगाणवि, सलिंगीणं दंसणाववण्णगाणं ज० भवणवासीसु उ० उवरिमगेवेज्ञएसु ।

वृ. 'अह भन्ते !' इत्यादि, अथेति परप्रश्ने 'असंजयभवियदव्वदेवाण'मिति असंयताः– चरणपरिणामशून्या भव्या–देवत्वयोग्यः अत एव द्रव्यदेवाः, समासश्चैवं–असंयताश्च ते भव्यद्रव्यदेवाश्चसंयतभव्यद्रव्यदेवास्तषां, तत्रैके प्राहुः–एते किलसंयतसम्यग्दष्टयो देवेषूत्पादात्, उक्तं च किलैवमागमे–

॥१॥ "अणुव्वयमहव्वएहि य बालतवोकामनिज्जराए य।
देवाऊ निबंधइ सम्मद्दिट्ठी य जो जीवो ॥"

तदयुक्तम्, यतोऽमीषामुत्कृष्टत उपरितनग्रैवेयकेषूपपातो वक्ष्यते, सम्यग्दृष्टीनां तु देशविरता- नामपि न तत्रोपपातोऽस्ति, देशविरतश्रावकाणामप्यच्युतादूर्द्धमगमनात्, नाप्येते निह्नवास्तेषामिहैव भेदेनाधिधानात्, तस्मान्मिथ्यादृष्टय एवाभव्या भव्या वा श्रमणगुणधारिणो निखिलसामाचार्य- नुष्ठनयुक्ता द्रव्यलिङ्गधारिणऽसंयतभव्यद्रव्यदेवाः प्रतिपत्तव्याः, तेऽपीहाखिलकेवलक्रियाप्रभावत उपरितनग्रैवेयकैषूत्पद्यन्त एवेति, असंयताश्च सत्यप्यनुष्ठाने चारित्रपरिणामशून्यत्वात्,

'अविराहियसंजमाण'मिति प्रव्रज्याकालादारभ्याभग्नचारित्रपरिणामतां संज्वलनक-षायसामर्थ्यात् प्रमत्तगुणस्थानकवशाद्वा स्वल्पमायादिदोषसम्भवेनापि अनाचरितसर्वथाचरणो-पघातमामित्यर्थः, तथा 'विराहियसंजमाणं'ति विराधितः—सर्वात्मना खण्डितो न पुनः प्रायश्चित्तप्रतिपत्त्या भूयः सन्धितः संयमो यैस्ते विराधितसंयमास्तषां 'अविराहियसंजमासंजमाणं'ति प्रतिपत्तिकालादारभ्याखण्डितदेशविरतिपरिणामानां श्रावकाणां 'विराहियसंजमासंजमाण'मिति विराधित सर्वात्मना खण्डितो न पुनः प्रायश्चित्तप्रतिज्ञया पुनर्नवीकृतः संयमासंयमो यैस्ते विराधितसंय- मासंयमास्तेषां,

असंज्ञिनां—मनोलब्धिरहितानामकामनिर्ज्ररावतं तथा 'तावसाणं'ति परिशटितपत्रा-द्युपभोगवतां बालतपस्विनां, तथा 'कंदप्पियाणं'ति कन्दप्पः—परिहासः स एमास्ति तेन वा ये चर न्ति ते कान्दर्प्पिकाः, कान्दर्प्पिका व्यवहारतश्चरणवन्त एव कन्दर्प्पकौकुच्यादिकारकाः, एकं च—

॥१॥ "कंदप्पे कुक्कुइए दवसीले यावि हासणकरे य।
विम्हाविंतो य परं कंदप्पं भावनं कुणइ ॥

॥२॥ कहुकहकहन्ना हसणं कंदप्पो अनिहुया य उल्लावा।
कंदप्पकहाकहणं कंदप्पुवएस संसा य ॥

॥३॥ भुमनयनवयणदसणच्छदो करपायकण्णमाईहिं।
तं तं करेइ जह जह हसइ परो अत्तणा अहसं ॥

॥४॥ वायाइ कुक्कुओ पुण तं जंपइ जेण इस्सए लोओ।
नानाविहजीवरुते कुव्वइ मुहतूरए चेव ॥

॥५॥ भासइ दुयं २ गच्छए य दरिओ(य)गोव सो सरए।
सव्वं दव्वं कुणइकारी फुट्टइ वड्डि(भरि)ओ य दप्पेणं ॥

॥६॥ वेसवयणेहिं हासं जनयंतो अप्पणो परेसिं च।
अह हासणोत्ति भन्नइ घयणोव्व छले नियच्छंतो ॥

॥७॥ सुरजालमाइएहिं तु विम्हयं कुणइ तव्विहजण्णस।
तेड्ड न विम्हइ य सयं आहट्टुक्क हट्टएसु च ॥

॥८॥ जो संजओवि एयासु अप्पसत्थासु भावणं कुणइ।
सो तव्विहेसु गच्छइ सुरेसु भइओ चरणहीणो ॥"

तेषां कान्दर्प्पिकाणां, 'चरगपरिव्वाययाणं'ति चरकपरिव्राजका—धाटिभैक्षोप-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जीविनस्त्रिदण्डिनः, अथवा चरकाः–कच्छोटकादयः परिव्राजकाः–कपिलमुनिसूनवः, चरकाश्च परिव्राजकाश्च तेषां, तथा 'किव्विसियाणं'ति किल्बिषं–पापं तदस्ति येषां ते किल्बिषिकास्ते च व्यवहारतश्चरणवन्त एव ज्ञानाद्यवर्णवादिनः, उक्तं च–

॥ १ ॥ "नाणस्स केवलीणं धम्मायरियस्स सव्वसाहूणं ।
माई अवण्णवाई किव्विसियं भावनं कुणइ ॥
॥ २ ॥ काया वया य ते च्चिय ते चेव पमाय अप्पमाया य ।
मोक्खाहिगारियाणं जोइसजोणीहिं किं कज्जं ? ॥
॥ ३ ॥ एगंतरमुप्पाए अन्नोन्नावरणया दुवेण्हंपि ।
केवलदंसणनाणाणमेगकाले व एगत्तं ॥
॥ ४ ॥ जच्चाईहि अवण्णं विहसइ वट्टइ नयावि उववाए ।
अहिओ छिद्दप्पेही पगासवाई अननुकूलो ॥
॥ ५ ॥ अविसहणातुरियगई अनानुवत्ती य अवि गुरूणंपि ।
खणमेत्तपीइरोसा गिहवच्छलगा य संजइया ॥
॥ ६ ॥ गूहइ आयसहावं धायइ य गुणे परस्स संतेवि ।
चोरोव्व सव्वसंकी गूढायारो वितहभासी ॥"

तेषां, 'तिरिच्छियाणं'ति तिरश्चां–गवादीनां देशविरतिभाजां 'आजीवियाणं'ति आजीविकाः–पाखण्डविशेषाःगोशालमतानुसारिणः अथवाऽऽजीवन्ति ये अविवेकतो लब्धिपूजाख्यात्यादिभिश्चरणादीनि इत्याजीविकाः तेषां, तथा 'आभियोगिणं'ति अभियोजनं–विद्यामन्त्रादिभिः परेषां वशीकरणादि अभियोगः, स च द्विधा, यदाह–

॥ १ ॥ "दुविहो खलु अभिओगो दव्वे भावे य होइ नायव्वो ।
दव्वंमि होंति जोगा विज्जा मंता य भावम्मि ॥"

सोऽस्ति येषां तेन वा चरन्ति ये ते अभियोगिका आभियोगिका वा, ते च व्यवहारतश्चरणवन्त एव मन्त्रादिप्रयोक्तारः, उक्तं च–

॥ १ ॥ "कोउय भूईकम्मे पसिणापसिणे निमित्तमाजीवी ।
इड्डिरससायगरुओ अभिओगं भावणं कुणइ ॥"

कौतुकं–सौभाग्याद्यर्थं स्नपनं भूतिकर्म–ज्वरितादिभूतिदानं प्रश्नाप्रश्नः–स्वप्नविद्यादि, 'सलिंगीण'मिति रजोहरणादिसाधुलिङ्गवतां, किंविधानामित्याह–'दंसनवावण्णगाणं'ति दर्शनं सम्यकत्वं व्यापन्नं–भ्रष्टं येषां ते तथा तेषां, निह्नवानामित्यर्थः, 'देवलोगेसु उववज्जमाणाणं'ति अनेन देवत्वादन्यत्रापि यथाऽध्यवसायमुत्पादो भवतीति प्रतिपादितं,

'विराहियसंजमाणं जहन्नेणं भवणवासीसु उक्कोसेणं सोहम्मे' इति, अत्र कश्चिदाह–विराधितसंयमानामुत्कर्षेण सौधर्मे कल्पे इति यदुक्तं तत्कथं घटते ?, द्रौपद्याः सुकुमालिकाभवे विराधितंसयमाया अपि ईशानकल्पे उत्पादश्रवणात्, नैष दोषः, तस्या हि संयमविराधना उत्तरगुणविषया बकुशत्वमात्रकारिणी न मूलगुणविराधना, सौधर्मोत्पादश्च प्रभूततरसंयमविराधनायां भवति, यदि पुनर्विराधनामात्रमपि सौधर्मोत्पत्तिकारणं स्यात् तदा बकुशादीनामुत्तरगुणा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दिप्रतिसेवावतां कथमच्युतादिषूत्पत्तिरूपपद्यते ?, कथश्चिद्विराधकत्वात्तेषामिति । असंज्ञी देवेषूत्पद्यते इत्युक्तं, स चायुषा इति तदायुर्निरूपयति–

मू. (५०८) *कतिविहे णं भंते! असन्नियाउए पन्नत्ते?, गो० ! चउव्विधे असन्निआउए पं०, तं०–नेरइयअसन्नियाउए जाव देवअसन्नियाउए ।*

असण्णी णं भंते! जीवे किं नेरइयाउयं पकरेति जाव देवाउयं पकरेति?, गो० ! नेरइयाउयं पकरेति जाव देवाउयं पकरेति, नेरइयाउं पकेरमाणे जह० दस वाससहस्साइं उ० पलिओवमस्स असंखेज्जभागं पकरेति, तिरिक्खजोणियाउयं पकरेति, तिरिक्खजोणियाउयं पकरेमाणे जह० अंतो० उक्को० पलितोवमस्स असंखेज्जइभागं पकरेति, एवं मणुस्साउयंपि, देवाउयं जहा नेरइयाउयं

एयस्स णं भंते ! नेरइयअसण्णिआउयस्स जाव देवअसण्णिआउयस्स कतरे २ हिंतो अप्पा वा ४?, गो० ! सव्वत्थोवे देवअसण्णियाउए मणूसअसण्णिआउए असंखेज्जगुणे तिरिक्खजोणियअसण्णिआउए असंखे० नेरइयअसण्णिआउए असंखे० ।

वृ. 'कइविहे ण'मित्यादि व्यक्तं नवरं 'असण्णिआउए'त्ति असंज्ञी सन् यत्परभवयोग्यमायुर्बध्नाति तदसंज्ञ्यायुः, 'नेरइयअसन्नियउए'इति नैरयिकप्रायोग्यमसंज्ञ्यायुर्नैरयिकासंज्ञ्यायुरेवमन्यान्यपि, इहासंज्ञ्यायुरसंज्ञ्यवलस्थानुभूयमानमप्युच्यते, न चेदमत्र प्रकृतमतस्तत्कृतलक्षणसम्बन्धविशेषनिरूपणार्थमाह–

'असण्णी' इत्यादि, व्यक्तं नवरं 'पकरेइ' इति बध्नाति, 'दस वाससहस्साइं' इति रत्नप्रभाप्रथमप्रस्तटमधिकृत्य 'उक्कोसेणं पलिओवमस्स असंखेज्जइभागं' इति एतत् रत्नप्रभाचतुर्थप्रतरे मध्यमस्थितिकं नारकमधिकृत्य, प्रथमप्रस्तटे हि जघन्या स्थितिर्दश वर्षसहस्राणि उत्कृष्टा नवतिः सहस्राणि, द्वितीये दश लक्षाणि जघन्या उत्कृष्टा नवतिर्लक्षाणि, एषैव तृतीये जघन्या उत्कृष्टा पूर्वकोटी, एषैव ततुर्थे जघन्या उत्कृष्टा सागरोपमस्य दशभागः, ततोऽत्र पल्योपमासङ्ख्येयागो मध्यमा स्थितिर्भवति, तिर्यक्सूत्रे पल्योपमासङ्ख्येयभागो मिथुनकतिरश्चोऽधिकृत्य,

'एवं मणुयाउयंपि' इति जघन्येनान्तर्मुहूर्त्तमुत्कर्षतः पल्योपमासङ्ख्येयभागमित्यर्थः, अत्रापि पल्योपमासङ्ख्येयभागो मिथुनकनरानाश्रित्य प्रतिपत्तव्यः, 'देवाउयं जह नेरइयाउय' मिति देवासंज्ञ्यायुस्तथा वक्तव्यं यथा नैरयिकासंज्ञ्यायुर्जधन्यतो दश वर्षसहस्राणि उत्कर्षतः पल्योपमासङ्ख्येयभागप्रमाणं वक्तव्यमिति भावः

'एयस्स णं भंते !' इत्यादिना यदसंज्ञ्यायुषोऽल्पबहुत्वं तदस्य ह्स्वदीर्घत्वे प्रतीत्य ॥

पदं – २० – समाप्तम्

मुनि दीपरत्नसागरेण संशोधिता सम्पादिता प्रज्ञापनाउपाङ्गसूत्रे विंशतितमपदस्य मलयगिरिआचार्येण विरचिता टीका परिसमाप्ता ।

पदं – २१ – "शरीर"

वृ. व्याख्यातं विंशतितमं पदं, इदानीमेकविंशतितममारभ्यते–अस्य चायमभिसम्बन्धः, इहानन्तरपदे गतिपरिणामविशेषोऽन्तक्रियारूपपरिणाम उक्तः, इहापि गतिपरिणामविशेष एव शरीरस्य संस्थानादिरकादिगतिषूत्पन्नानां प्रतिपाद्यते, अत्र चेयमधिकारगाथा–

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मू. (५०९) *विहिसंठाणपमाणे पोग्गलचिणणा सरीरसंजोगो ।*
दव्वपएसऽप्पबहुं सरीरोगाहणप्पबहुं ॥

वृ. 'विहिसंठाणपमाणे' इत्यादि प्रथमं विधयो-भेदाः-शरीराणां वक्तव्याः, तदनन्तरं संस्थानानि, ततः प्रमाणानि, तदनन्तरं कतिभ्यो दिग्भ्यः शरीराणां पुद्गलोपचयो भवतीत्येवं पुद्गलचयनं वक्तव्यं, ततः, कस्मिन् शरीरे सति किं शरीरमवश्यंभावीत्येवंरूपः परस्परसंयोगो वक्तव्यः, ततो द्रव्याणि च प्रदेशाश्च द्रव्यप्रदेशाः ते च द्रव्याणि च प्रदेशाश्च द्रव्यप्रदेशाः 'समानानामेकशेषः' इत्येकशेषस्तैरल्पबहुत्वं वक्तव्यं, किमुक्तं भवति ?-द्रव्यार्थतया प्रदेशार्थतया द्रव्यार्थप्रदेशार्थतया च पञ्चानामपि शरीराणामल्पबहुत्वमभिधातव्यमिति, ततः पञ्चानामपि शरीराणामवगाहनाविषयमल्पबहुत्वं वाच्यमिति गाथासङ्क्षेपार्थः ।

मू. (५१०) *कति णं भंते ! सरीरया पन्नत्ता ? गो० ! पंच सरीरया पं०, तं०-ओरालिए १ वेउव्विए २ आहारए ३ तेयए ४ कम्मए ५,*

ओरालियसरीरे णं भंते ! कतिविधे पं० ? गो० ! पंचविधे पं० तं०-एगिंदिय-ओरालियसरीरे जाव पंचिंदियओरालियसरीरे,

एगिंदियओरालियसरीरे णं भंते ! कतिविधे पं०, ? गो० ! पंचविहे पं० तं०-पुढविकाइएगिंदियओरालियसरीरे जाव वणप्फइकाइयएगिंदिएओरालियसरीरे पुढविकाइएगिंदियओरालियसरीरे णं भंते ! कतिविहे पं० ?, गो० ! दुविहे पं०, तं०-सुहुमपुढविकाइएगिंदियओरालियसरीरे बादरपुढविकाइएगिंदियओरालियसरीरे य, सुहुमपुढविकाइएगिंदियओरालियसरीरे णं भंते ! कतिविधे पं० ?, गो० ! दु० पं०, तं०-पज्जत्तगसुहुमपुढविक्काइएगिंदियओरालियसरीरे य अपज्जत्तगसुहुमपुढविक्काइएगिंदियओरालियसरीरे य, बादरपुढविकाइयावि एवं चेव, एवं जाव वणस्सइकाइएगिंदियओरालियत्ति,

बेइंदियओरालियसरीरे य, एवं तेइंदिया चउरिंदियावि ।

पंचिंदियओरालियसरीरे णं भंते ! कतिविधे पं० ?, गो० ! दुविधे, पं०, तं०-तिरिक्खोजोणियपंचिंदियओरा० मणुस्सपंचिंदियओरा०,

तिरिक्खजोणियपंचिंदियओरालियसरीरे णं भंते ! कतिविधे पं० ?, गो० ! तिविधे पं०, तं०-जलयरतिरिकअखजोणियपंचिं० ओरालिय० थलयरतिरिक्खजोणियपंचिंदियओरा० खहयरति० पंचिं० ओरा०,

जलयरतिरि० पं० ओरालियसरीरे णं भंते ! कतिविधे पं० ?, गो० ! दुविधे, पं०, तं०-संमुच्छिमजल० पं० तिरि० ओरालि० गब्भवक्कंतिजलयरपंचि० तिरि० ओरालसियसरीरे य, संमुच्छिमजल० तिरि० पंचिंदियओरालियसरीरे णं भंते ! कतिविधे पं० ?, गो० ! दुविहे पं०, तं०-पज्जत्तगसंमुच्छिमपंचिं० तिरि० ओरा० अपज्जत्तगसंमुच्छिम० पं० ति० ओरालि०, एवं गब्भवक्कंतिएवि,

थलयरपंचिं० तिरिक्ख० ओरालियसरीरे णं भंते ! कतिविधे, पं० ?, गो० ! दुविहे पं०, तं०-चउप्पयथलयर० तिरि० पंचिं० ओरा० परिसप्पथल० तिरि० पं० ओ, चउप्पयथल० तिरि० पंचि० ओरालियसरीरे णं भंते ! कतिविधे पं०, ?, गो० ! दुविहे पं०, तं०-समु० थल०

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चउप्पयतिरि० पं० ओरा० गब्भवक्कंतियचउप्पयथल० ति० पं० ओरा०, संमुच्छिमचउ० ओरालियसरीरे कइविहे पं० ?, गो० ! दुविहे पं०, तं०-पज्जत्तसंमु० चउ० थल० तिरि० पंचि० ओरा० अपज्जत्तसंमुच्छिचउ० थल० तिरि० पंचिं० ओरा०, एवं गब्भवक्कंतिएवि,

परिसप्पथलयरतिरि० पंचि० ओरा० भंते ! कतिविधे पं० ?, गो० ! दु० पं०, तं०-उरपरिसप्पथल० पं० तिरि० ओरा० भुयपरिसप्पथलपं० तिरि० ओरालियसरीरे य, उरपरिसप्पथल० पंचिं० तिरि० ओरालियसरीरे णं भंते ! कतिविधे पं० ?, गो० ! दु० पं०, तं०-संमुच्छिमउर० थल० पंचिं० तिरि० ओरा० गब्भवरक्कंतियउर० थल० तिरि० पंचिं० ओरा०, संमुच्छिमे दुविहे पं०, तं०-अपज्जत्तसंमु० उर० थल० तिरि० पंचिं० ओरालियसरीरे य पज्जत्तसंमुच्छिमउरपरिसप्प- थलयरितिर० पंचिं० ओरालि०, एवं गब्भवक्कंतियउरपरिसप्पे चउक्कतो भेओ, एवं भुयपरिसप्पावि संमुच्छिमगब्भवक्तंतियपज्जत्ता अपज्जत्ता य,

खहयरा दुविधा, पं०, तं०-संमुच्छिमा य गब्भवक्कंतिया य, संमुच्छिमा दुविधा पं० ?, पज्जत्ता अपज्जत्ता य, गब्भवक्कंतियावि पज्जत्ता अपज्जत्ता य ।

मणूसपंचिंदियओरालियसरीरे णं भंते ! कतिविधे पं० ?, गो० ! दुविहे पं०, तं०- संमुच्छिममणूसपंचिं० ओरा० य गब्भवक्कंतियमणूसपंचिं० ओरालि०, गब्भवक्तंतियम० पंचिं० ओरालियसरीरे णं भंते ! कतिविधे पं० ?, गो० ! दु० पं०, तं०-पज्जत्तगब्भवक्कंतियमणूस- पंचिंदियओरा० अपज्जत्तगगब्भ० मणूसपंचिंदियओरा० ।

वृ. तत्र 'यथोद्देशं निर्देश' इति प्रथमतो विधिद्वारमभिधित्सुरादौ शरीररमूलभेदान् प्रतिपादयति,-'कइ णं भंते !' इत्यादि, कति-किंपरिमाणानि णमिति वाक्यालङ्कारे भदन्त ! शीर्यन्ते-प्रतिक्षणं विशरारुभावं बिभ्रतीति शरीराणि, शरीराण्येव शरीरकाणि, तथा स्वार्थे कप्रत्ययः, भगवानाह- गौ० ! पञ्च शरीराणि प्रज्ञप्तानि मया अन्यैश्च शैषेस्तीर्थकृद्भिः, तान्येव नामत आह-

'ओरालिए' इत्यादि, उदारं प्रधानं, प्राधान्यं चास्य तीर्थकरगणधरशरीराण्यधिकृत्य, ततोऽन्यस्यानुत्तरशरीरस्याप्यनन्तगुणहीनत्वात्, यद्वा उदारं-सातिरेकयोजनसहस्रमानत्वात् शेषसरीरापेक्षया बृहत्प्रमाणं, बृहत्ता चास्य वैक्रियं प्रति भवधारणीयसहजशरीरापेक्षया द्रष्टव्या, अन्यथा उत्तरवैक्रियं योजनलक्षमानमपि लक्ष्यते, उदारमेव औदारिकं विनयादिपाठादिकण्,

तथा विविधा विशिष्टा वा क्रिया विक्रिया तस्यां भवं वैक्रियं, तथाहि-तदेकं भूत्वा अनेकं भवति अनेकं भूत्वा एकं तथा अणु भूत्वा महद्भवति महच्च भूत्वा अणु तथा खचरं भूत्वा भूमिचरं भवति भूमिचरं भूत्वा खचरं तथा दृश्यं भूत्वा अदृश्यं भवति अदृश्यं भूत्वा दृश्यमित्यादि, तच्च द्विविधं-औपपातिकं लब्धिप्रत्ययं च, तत्रौपपातिकमुपपातजन्मनिर्मितं, तच्च देवनारकाणां, लब्धिप्रत्ययं तिरग्मनुष्याणां, तथा 'आहारए' इति आहारकं चतुर्दशपूर्वविदा तीर्थकरस्फाति- दर्शनादिक- तथाविधप्रयोजनोत्पत्तौ सत्यां विशिष्टलब्धिवशादाह्रियते-निर्वर्त्यते इत्याहारकं, 'कृद्‌बहुल' मिति वचनात् कर्मणि वुञ् यथा पादहारक इत्यत्र, उक्तं च-

॥१॥ "कज्जंमि समुप्पन्ने सुयकेवलिणा विसिट्ठलद्धीए ।
जं एत्थ आहरिज्जइ भणित्तं आहारगं तं तु ॥"

-कार्यं चेदम्-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

॥२॥ "पाणिदयरिद्धिदंसणसुहुमपयत्थावगहणहेउं वा ।
संसयवोच्छेयत्थं गमणं जिनवायमूलंमि ॥"

तच्च वैक्रियशरीरापेक्षया अत्यन्तशुभं स्वच्छस्फटिकशिलेव शुभ्रपुद्गलसमूहघटनात्मकं,

तेज इति-तैजसं तेजसः-तेजःपुद्गलानां विकारस्तैजसं 'विकार' इत्यण, तत् ऊष्मलिङ्गं भुक्ताहारपरिणमनकारणं, तद्वशाच्च विशिष्टतपःसमुत्थलब्धिविशेषस्य पुंसस्तेजोलेश्याविनिर्गमः, उक्तं च-

॥१॥ "सव्वस्स उम्हसिद्धं रसाइयआहारपाकजणगं च ।
तेयगलद्धिनिमित्तं च तेयगं होइ नायव्वं ॥"

'कम्मए' इति कर्मणो जातं कम्मंज, किमुक्तं भवति? -कर्मपरमाणव एवात्मप्रदेशैः सह ये क्षीरनीरवत् अन्योऽन्यानुगताः सन्तः शरीररूपतया परिणतास्ते कर्मजं शरीरमिति, अत एवैतदन्यत्र कार्मणमित्युक्तं, कर्मणो विकारः कार्मणमिति, तथा चोक्तम्-

॥१॥ "कम्मविगारो कम्मणमट्ठविहविचित्तकम्मनिप्फन्नं ।
सव्वेसिं सरीराणं कारणभूतं मुणेयव्वं ॥"

अत्र 'सव्वेसि'मिति सर्वेषामौदारिकादीनां शरीराणां कारणभूतं-बीजभूतं कार्मणशरीरं, न खल्वामूलसमुच्छिन्ने भवप्रपञ्चप्ररोहबीजभूते कार्मणे वपुषि शेषशरीरप्रादुर्भावः इदं च कर्मजं शरीरं जन्तोर्गत्यन्तरसङ्क्रान्तौ साधकतमं करणं, तथाहि-कर्मजेनैव वपुषा तैजससहितेन परिकरितो जन्तुर्मरणादेशमपहायोत्पत्तिदेशमभिसर्प्पति, ननु यदि तैजससहितकार्मणवपुःपरिकरितो गत्यन्तरं सङ्क्रामति तर्हि स गच्छन्नागच्छन् वा कस्मान्न दृष्टिपथमवतरति?, उच्यते, कर्मपुद्गलानां चातिसूक्ष्मतया चक्षुरादीन्द्रियागोचरत्वात्, तथा च परतीर्थिकैरप्युक्तम्

॥१॥ "अन्तरा भवदेहोऽपि, सूक्ष्मत्वान्नोपलभ्यते ।
निष्क्रामन् प्रविशन् वापि, नाभोवोऽनीक्षणादपि ॥" इति ।

सम्प्रति औदारिकशरीरस्य जीवजातिभेदतोऽवस्थाभेदतश्च भेदानभिधित्सुराह- 'ओरालियसरीरे णं भंते!' इत्यादि, औदारिकशरीरमेकद्वित्रिचतुःपञ्चेन्द्रियभेदात् पञ्चधा, एकेन्द्रियौदारिकशरीरमपि पृथिव्यप्तेजोवायुवनस्पतिएकेन्द्रियभेदात् पञ्चविधं, पृथिवीकायिकैकेन्द्रियौदारिकशरीरमपि सूक्ष्मेतरभेदाद् द्विधा, पुनरेकैकं द्विधा पर्याप्तापर्याप्तभेदात्, एवमप्तेजोवायुवनस्पत्येकेन्द्रियौदारिकशरीराण्यपि प्रत्येकं चतुर्विधानीति सर्वसङ्ख्ययैकेन्द्रियोदारिकशरीराणि विंशतिधा, द्वित्रिचतुरिन्द्रियौदारिकशरीराणि प्रत्येकं पर्याप्तापर्याप्तभेदात् द्विभेदानि,

पञ्चेन्द्रियौदारिकशरीरं द्विविधं-तिर्यग्मनुष्यभेदात्, तिर्यक्पञ्चेन्द्रिययौदारिकशरीरं त्रिधा, जलचरस्थलचरखचरभेदात्, जलचरतिर्यक्पञ्चेन्द्रियौदारिकशरीरं द्विविधं-सम्मूर्च्छिमगर्भव्युत्क्रान्तिकभेदात्, एकैकमपि पुनर्द्विभेदं- पर्याप्तापर्याप्तभेदात्, स्थलचरतिर्यक्पञ्चेन्द्रियौदारिकशरीरमपि द्विधा-चतुष्पदपरिसर्पभेदात्, चतुष्पदस्थलचरतिर्यक्पञ्चेन्द्रियौदारिकशरीरमपि द्विधा-सम्मूर्च्छिमगर्भव्युतक्रान्तिकभेदात्, पुनरेकैकं द्विधा-पर्याप्तापर्याप्तभेदात्, परिसर्प्पस्थलचरतिर्यग्योनिकपञ्चेन्द्रियौदारिकशरीरमपि उरःपरिसर्प्पभुजपरिसर्प्पभेदतो द्विभेदं, पुनरेकैकं द्विधा-सम्मूर्च्छिमगर्भव्युत्क्रान्तिकभेदात्, तत्रापि पुनः प्रत्येकं द्वैविध्यं पर्याप्तापर्याप्तभेदात्,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सर्वसङ्ख्ययाऽष्टभेदं परिसर्प्पस्थलचरतिर्यक्पञ्चेन्द्रियौदारिकशरीरं, खचरतिर्यक्पञ्चेन्द्रियौदारिकशरीरं सम्मूर्च्छिमगर्भव्युत्क्रान्तिकभेदात् द्विभेदं, पुनरेकैकं द्विधा—पर्याप्तापर्याप्तभेदादिति, सर्वसङ्ख्यया तिर्यक्पञ्चेन्द्रियौदारिकशरीरं विंशतिभेदं, मनुष्यपञ्चेन्द्रियौदारिकशरीरं सम्मूर्च्छिमगर्भव्युत्क्रान्तिकभेदात् द्विभेदं, पुनरेकैकं द्विधा—पर्याप्तापर्याप्तभेदाद्।

एवमौदारिकस्य भेदा उक्ताः, सम्प्रत्येतेषामेव यथाक्रमं संस्थानान्याह—

मू. (५११) *ओरालियसरीरे णं भंते! किंसंठिते पन्नत्ते?, गो० ! नानासंठाणसंठित पं०, एगिंदियओरा० किंसंठिते पं० ?, गो० ! नानासंठाणसंठिते पं०, पुढविकाइयएगिंदिओरा० किंसंठिते पं० ?, गो० ! मसूरचंदसंठाणसंठिते पं०, एवं सुहुमपुढविकाइयाणवि बादराणवि, एवं चेव पज्जत्तापज्जत्ताणवि, [एवं चेव] -*

आउक्काइएगिंदियओरा० भंते ! किंसंठिते पं० ?, गो० ! थिबुकबिंदुसंठाणसंठिते पं०, एवं सुहुमबादरपज्जत्तापज्जत्ताणवि, तेउक्काइयएगिं० उरा० भंते ! किंसंठिते पं० ?, गो० ! सूईकलावसंठाणसंठिते पं०, एवं सुहुमबादरपज्जत्तापज्जत्ताणवि, वाउक्काइयाणवि पडागासंठाणसंठिते, एवं सुहुमबादरपज्जत्तापज्जत्ताणवि, वणप्फइकाइयाणं नानासंठाणसंठिते पं०, एवं सुहुमबादरपज्जत्तापज्जत्ताणवि। 'बेइंदियओरा० भंते ! किंसं० पं० ?, गो० ! हुंडसंठाणसंठिते पं०, एवं पज्जत्तापज्जत्ताणवि, एवं तेइंदियचउरिंदियाणवि।

पंचिंदियतिरिक्खजोणियपंचिं० ओरा० भंते! किंसंठा० पं० ?, गो० ! छव्विहसंठाणसं० पं०, तं०—समचउरंससंठाणसं० जाव हुंडसंठाणसंटितेवि, एवं पज्जत्तापज्जत्ताणवि ३, संमुच्छिमतिरिक्खजो० पंचिं० ओरा० भंते! किं सं० पं० ?, गो० ! हुंडसंठाणसंठिते पं०, एवं पज्जत्तापज्जत्ताणवि, गब्भवक्कं० तिरिक्ख० पंचिंदिय० ओरा० भंते! किंसंठा० पं० ?, गो० ! छव्विहसंठाणसं० पं० तं०—समचउरंसे जाव हुंडसंठा०, एवं पज्जत्तापज्जत्ताणवि ३,

एवमेते तिरिक्खजोणियाणं ओहियाणं नव आलावगा जलयरपं० तिरि० ओरा० भंते ! किसंठाणसंठिते पं० ?, गो० ! छव्विहसंठाणसं० पं० तं०—समचउरंसे जाव हुंडे, एवं पज्जत्तापज्जत्ताणवि, संमुच्छिमजलयरा हुंडसंठाणसंठिता, एतेसिं चेव पज्जत्तावि अपज्जत्तगावि एवं चेव, गब्भवक्कंतियजलयरा छव्विहसंठाणसंठिता, एवं पज्जत्तापज्जत्ताणवि, एवं थलयराणवि नव सुत्ताणि एवं चउप्पयथलयराणवि उरपरिसप्पथलयराणवि भुयपरिसप्पथलयराणवि, एवं खहयराणवि नव सुत्ताणि, नवरं सव्वत्थ संमुच्छिमा हुंड संठाणसंठिता भाणितव्वा, इयरे छसुवि।

मणूसपंचिंदियओरालियसरीरे णं भंते! किंसंठाणसंठिते पं० ?, गो० ! छव्विहसंठाणसंठिते प०, तं०—समचउरंसे जाव हुंडे, पज्जत्तापज्जत्ताणवि एवं चेव, गब्भवक्कंतियाणवि एवं चेव, पज्जत्तापज्जत्ताणवि एवं चेव, संमुच्छिमाणं पुच्छा, गो० ! हुंडसंठाणसंठिता पन्नत्ता।

वृ. 'ओरालियसरीरे णं भंते !' इत्यादि, नानासंस्थानसंस्थितं जीवजातिभेदतः संस्थानभेदभावात्, एकेन्द्रियौदारिकशरीरे नानासंस्थानसंस्थितता पृथिव्यादिषु प्रत्येकं संस्थानभेदात्, तत्र पृथिवीकायिकानां सूक्ष्माणां बादराणां पर्याप्तानामपर्याप्तानां चौदारिकशरीराणि मसूरचन्द्रसंस्थानसंस्थितानि, मसूरो—धान्यविशेषः तस्य चन्द्रः—चन्द्राकारमर्द्धदलं तस्येव यत्संस्थानं तेन संस्थितानि,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अप्कायिकानां सूक्ष्मादिभेदतःचतुर्भेदानामौदारिकशरीराणि स्तिबुकबिन्दुसंस्थान-संस्थितानि, स्तिबुकाकारो यो बिन्दुर्न पुनरितस्ततो वातादिना विक्षिप्तः स्तिबुकबिन्दुस्तस्येव यत्संस्थानं तेन संस्थितानि, तैजसकायिकानां सूक्ष्मादिभेदतश्चतुर्भेदानामौदारिकशरीराणि सूचीकलापसंस्थान-संस्थितानि,

वायुकायिकानां सूक्ष्मादिभेदतश्चतुर्भेदानामौदारिकशरीराणि पताकासंस्थानसंस्थितानि,

वनस्पतिकायिकानां सूक्ष्माणां बादराणां पर्याप्तानामपर्याप्तानां च प्रत्येकमौदारिकशरीराणि नानासंस्थानसंस्थितानि, देशकाजलातिभेदतः तेषां संस्थानानामनेकभेदभिन्नत्वात्,

द्वित्रिचतुरिन्द्रियाणां प्रत्येकं पर्याप्तानामपर्याप्तानामौदारिकशरीराणि हुंडसंस्थानसंस्थितानि,

तिर्यक्पञ्चेन्द्रियौदारिकशरीरं सामान्यतः षड्विधसंस्थानसंस्थितं, तदेवोपदर्शयति-'समचउरंससंठाणसंठिए' इत्यादि, यावत्करणात् 'नग्गोहपरिमंडलसंठाणसंठिए साइसं० वामणसं० खुज्जसंठाणसंठिए हुंडसंठाणसंठिए' इति परिग्रहः, तत्र समाः-सामुद्रिकशास्त्रोक्तप्रमाण-लक्षणाविसंवादिन्यश्चतस्रोऽस्त्रयः-चतुर्दिग्विभागोपलक्षिताः शरीरावयवा यस्य तत्समचतुरस्रं, समासान्तोऽप्रत्ययः, समचतुरस्रं च तत्संस्थानं च समचतुरस्रसंस्थानं तेन संस्थितं समचतुर-स्रसंस्थानसंस्थितं, तथा न्यग्रोधवत्परिमण्डलं यस्य तत् न्यग्रोधपरिमण्डलं, यथा न्यग्रोध उपरि सम्पूर्णप्रमाणोऽधस्तु हीनः तथा यत्संस्थानं नाभेरुपरि सम्पूर्णप्रमाणं अधस्तु न तता तन् न्यग्रोधपर-रिमण्डलं, तथा आदिरिहोत्सेधाख्यो नाभेरधस्तनो देहभागो गृह्यते, ततः सह आदिना-नाभेरधस्तन-भागेन यथोक्तप्रमाणलक्षणेन वर्त्तते इति सादि, यद्यपि सर्वं शरीरमादिना सह वर्त्तते तथापि सादित्वविशेषणान्यथानुपपत्त्या विशिष्ट एव प्रमाणलक्षणोपपन्न आदिरिह लभ्यते, तत उक्तं यथोक्तप्रमाणलक्षणेनेति,

इदमुक्तं भवति-यत्संस्थानं नाभेरधः प्रमाणोपपन्नमुपरि च हीनं तत्सादीति, अपरे तु साचीति पठन्ति, तत्र साचीं प्रवचनवेदिनः शाल्मलीतरुमाचक्षते, ततः साचीव यत्संस्थानं तत्साचि-संस्थानं, यथा शाल्मलीतरोः स्कन्धः काण्डमतिपुष्टमुपरितना तदनुरूपा न महाविशालता तद्वदस्यापि संस्थानस्याधोभागः परिपूर्णो भवति उपरितनभागस्तु नेति, तथा यत्र शिरोग्रीवं हस्तपादादिकं च यथोक्तप्रमाणलक्षणोपेतं उरउदरादि च मडभं तत्कुब्जसंस्थानं, यत्र पुनरुरउदरादि प्रमाण-लक्षणोपेतं हस्तपादादकं हीनं तद्वामनसंस्थानं, यत्र तु सर्वेऽप्यवयवाः प्रमाणलक्षणपरिभ्रष्टास्तद् हुण्डसंस्थान्, समासः सर्वत्रापि पूर्ववत्,

एवं 'पज्जत्तापज्जत्ताणवि' इति, एवं-उक्तप्रकारेण सामान्यतस्तिर्यक्पञ्चेन्द्रियाणामिव पर्याप्तानां अपर्याप्तानां च प्रत्येकं सूत्रं वक्तव्यं, तदेवमेतानि त्रीणि सूत्राणि, एवमेव च सामान्यतः सम्मूर्च्छिमतिर्यक्पञ्चेन्द्रियाणामपि त्रीणि सूत्राणि वक्तव्यानि, नवरं तेषु त्रिष्वपि सूत्रेषु हुण्डसंस्थानसंस्थितमिति वक्तव्यं, सम्मूर्च्छिमाणामविशेषेण सर्वेषामपि हुण्डसंस्थानभावात्,

त्रीणि सामान्यतो गर्भजतिर्यक्पञ्चेन्द्रियाणामपि, नवरं तेषु त्रिष्वपि सूत्रेषु 'छव्विहसंठाण-संठिए पन्नत्ते' इत्यादि वक्तव्यं, गर्भजेषु समचतुरस्रादिसंस्थानानामपि सम्भवात्, तदेवमेते सामान्य-तस्तिर्यक्पञ्चेन्द्रियविषया नव आलापकाः, अनेनैव क्रमेणैव जलचरतिर्यक्पञ्चेन्द्रियाणां सामान्यतः स्थलचराणां चतुष्पदस्थलचराणामुरःपरिसर्प्पस्थलचराणां भुजपरिसर्प्पस्थलचराणां खचरति-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

र्यक्पञ्चेन्द्रियाणां च प्रत्येकं नव २ सूत्राणि वक्तव्यानि, सर्वसङ्ख्या तिर्यक्पञ्चेन्द्रियाणां त्रिषष्टिः सूत्राणि मनुष्याणां नव सर्वत्र सम्मूर्च्छिमेषु हुण्डसंस्थानं च वक्तव्यमितरत्र षडपि संस्थानानि

तदेवमुक्तान्यौदारिकभेदानां संस्थानानि, साम्प्रतमवगाहनामानमाह–

मू. (५१२) *ओरालियसरीरस्स णं भंते! केमहालिया सरीरोगाहणा पं० ?, गो० ! जहन्नेणं अंगुलस्स असंखेज्जतिभागं उक्को० सातिरेगं जोयणसहस्सं, एगिंदियओरालियस्सवि एवं चेव जहा ओहियस्स, पुढविकाइएगिंदियओरालियसरीरस्स णं भंते! केमहालिया सरीरोगाहणा पं० ?, गो० ज० उ० अंगुलस्स असंखेज्जतिभागं, एवं अपज्जत्तयाणवि पज्जत्तयाणवि, एवं सुहुमाणं पज्जत्तापज्जत्ताणं, बादराणं पज्जत्तापज्जत्ताणवि, एवं एसो नवओ भेदो जहा पुढविक्काइयाणं तहा आउक्काइयाणवि तेउक्काइयाणवि वाउक्काइयाणवि,*

वणस्सइकाइयओरालियसरीरस्स णं भंते ! केमहालिया सरीरोगाहणा पं० ?, गो० ! ज० अंगुलस्स असंखेज्जतिभागं उक्को० सातिरेगं जोअणसहस्सं, अपज्जत्तगाणं जह० उक्को० अंगुलस्स असंखेज्जतिभागं, पज्जत्तगाणं जह० अंगुलस्स असं० उक्को० सातिरेगं जोयणसहस्सं, बादराणं जह० अंगुलस्स असं० उक्को० जोअणसहस्सं सातिरेगं, पज्जत्ताणवि एवं चेव, अपज्जत्ताणं जह० उक्को० अंगुलस्स असं०, सुहुमाणं पज्जत्तापज्जत्ताण य तिण्हवि जह० उक्को० अंगुलस्स असं० ।

बेइंदियओरा० भंते ! केमहालिया सरीरोगाहणा पं० ?, गो० ! जह० अंगुलस्स असं० उक्को० बारस जोअणाइं, एवं सव्वत्थवि अपज्जत्तयाणं अंगुलस्स असंखे० जहन्नेणवि उक्कोसेणवि, पज्जत्तगाणं जहेव ओरालियस्स ओहियस्स, एवं तेइंदियाणं तिन्नि गाउयाइं, चउरिंदियाणं चत्तारि गाउ० पंचिंदियतिरिक्खजोणियाणं उक्कोसेणं जोयणसहस्सं ३, एवं संमुच्छिमाणं ३, गब्भवक्कंतियाणवि ३ एवं चेव नवओ भेदो भाणियव्वो, एवं जलयराणवि जोयणसहस्सं, नवओ भेदो, थलयराणवि नव भेदा ९, उक्को० छ गाउयाइं पज्जत्तगाणवि, एवं चेव संमुच्छिमाणं पज्जत्तगाण य उक्को० गाउयपुहुत्तं ३, गब्भवक्कंतियाणं उक्को० छ गाउयाइं पज्जत्ताण य २ ओहियचउप्पयपज्जत्तगब्भवक्कंतियपज्जत्तयाणवि उक्को० छ गाउयाइं, संमुच्छिमाणं पज्जत्ताण य गाउयपुहुत्तं उक्को०,

एवं उरपरिसप्पाणवि ओहियगब्भवक्कंतियपज्जत्तगाणं जोयणसहस्सं, संमुच्छिमाणं पज्जत्ताण य जोयणपुहुत्तं, भुयपरिसप्पाणं ओहियगब्भवक्कंतियाणवि उक्को० गाउयपुहुत्तं, संमुच्छिमाणं धनुपुहुत्तं, खहयराणं ओहियगब्भवक्कंतियाणं संमुच्छिमाण य तिण्हवि उक्कोसेणं धनुपुहुत्तं,

इमाओ संगहणिगाओ–

वृ. 'ओरालियस्स णं भंते !' इत्यादि, औदारिकस्य जघन्यतोऽवगाहना अङ्गुलासङ्ख्येयभागः, सा चोत्पत्तिप्रथमसमयेपृथिवीकायिकादीनां चावसातवया, उत्कर्षतः सातिरेकं योजनसहस्रं, एषा लवणसमुद्रगोतीर्थादिषु पद्मनालाद्यधिकृत्यावसातव्या, अन्यत्रैतावत औदारिकशरीरस्यासम्भवात्, एवमेकेन्द्रियसूत्रेऽपि, तथा चाह–

'एगिंदियओरालियस्स एवं चेव जहा ओहियस्स' इति पृथिव्यप्तेजोवायूनां सूक्ष्माणां बादराणां प्रत्येकं पर्याप्तानामपर्याप्तानां चौदारिकशरीरस्य जघन्यत उत्कर्षतश्चावगाहना अङ्गुलासङ्ख्येयभागः प्रत्येकं च नव सूत्राणि, तेषां औघिकसूत्रमौघिकापर्याप्तसूत्रमौघिकपर्याप्तसूत्रं तथा सूक्ष्मसूत्रं सूक्ष्मपर्याप्तसूत्रं सूक्ष्मापर्याप्तकसूत्रं एव बादरेऽपि सूत्रत्रिकमिति, एवं वनस्पतिकायिकानामपि

Jain Education International   For Private & Personal Use Only   www.jainelibrary.org

नव सूत्राणि, नवरमौघिकवनस्पतिसूत्रे औघिकवनस्पतिपर्याप्तकसूत्रे बादरसूत्रे बादरपर्याप्तकसूत्रे च जघन्यतोऽङ्गुलासङ्ख्येयभाग उत्कर्षतः सातिरेकं योजनसहस्रण, तच्च पद्मनालाद्यधिकृत्य वेदितव्यं, शेषेषु तुपञ्चसूत्रेषु जघन्यत उत्कर्षतो वाऽङ्गुलासङ्ख्येयभागः,

द्वित्रिचतुरिन्द्रियाणां प्रत्येकं त्रीणि २ सूत्राणि, तद्यथा–औघिकसूत्रमपर्याप्तसूत्रं पर्याप्तसूत्रं च, तत्रौघिकसूत्रे पर्याप्तसूत्रे च द्वीन्द्रियाणामुत्कर्षतो द्वादश योजनानि,

त्रीन्द्रियाणांत्रीणि गव्यूतानि,

चतुरिन्द्रियाणां चत्वारि गव्यूतानि, अपर्याप्तसूत्रे तु जघन्यत उत्कर्षतश्चाङ्गुलासङ्ख्येय भागः,

तथा सामान्यतस्तिर्यक्पञ्चेन्द्रियाणां जलचराणां सामान्यतः स्थलचराणां चतुष्पदानामुरः-परिसर्प्पाणां भुजपरिसर्प्पाणां खचरपञ्चेन्द्रियतिरश्चां च प्रत्येकं नव २ सूत्राणि, तद्यथा–त्रीणि औघिकानि त्रीणि संमूर्च्छिमविषयाणि त्रीणि गर्भव्युत्क्रान्तिकविषयाणि, तत्रापर्याप्तेषु स्थानेषु सर्वेष्वपि जघन्यत उत्कर्षतो वा अङ्गुलासङ्ख्येयभागः, शेषेषु तु स्थानेषु जघन्यतोऽङ्गुलासङ्ख्येयभाग उत्कर्षतः सामान्यतस्मिर्यक्पञ्चेन्द्रिययेषु जलचरेषु चोत्कर्षतो योजनसहस्रं, सामान्यतः स्थलचरेषु चतुष्पदस्थलचरेषु चौघिकेषु गर्भव्युत्क्रान्तिकेषु च षट् गव्यूतानि, सम्मूर्च्छिमेषु गव्यूतपृथकत्वं, उरः परिसर्प्पेष्वौघिकेषु गर्भव्युत्क्रान्तिकेषु च योजनसहस्रं सम्मूर्च्छिमेषु योजनपृथकत्वं, भुजपरिसर्प्पेष्वौघिकेषु गर्ब्भव्युत्क्रान्तेषु च गव्यूतपृथकत्वं, सम्मूर्च्छिमेषु धनुःपृथकत्वं, खचरैष्वौघिकेषु गर्भव्युत्क्रान्तिकेषु सम्मूर्च्छिमेषु च सर्वेषु स्थानेषु धनुःपृथकत्वं ।

मू. (५१३) *'जोयणसहस्स छग्गाउयाइं तत्तो य जोअणसहस्सं ।*
गाउयपुहुत्तं भुयए धनुहपुहुत्तं च पक्खीसु ॥

मू. (५१४) *जोयणसहस्स गाउयपुहुत्तं तत्तो य जोअणपुहुत्तं ।*
दोण्हं तु धनुपुहुत्तं समुच्छिमे होति उच्चत्तं ॥

वृ. अत्रेमे सङ्ग्रहगाथे–''जोअणसहस्स''मित्यादि, गर्भव्युत्क्रान्तिकानां जलचराणामुत्कर्षतः शरीरावगाहनाया मानं योजनसहस्रं, चतुष्पदस्थलचराणां षड् गव्यूतानि, उरःपरिसर्प्पस्थलचराणां योजनसहस्रं, भुजपरिसर्प्पस्थलचराणां गव्यूतपृथकत्वं, पक्षिणां धनुःपृथकत्वं, तथा सम्मूर्च्छिमानां जलचराणामुत्कर्षतः शरीरावगाहनायाः प्रमाणं योजनसहस्रं, चतुष्पदस्थलचराणां गव्यूतपृथकत्वं, उरःपरिसर्प्पस्थलचराणां योजनपृथकत्वं, भुजपरिसर्प्पस्थलचराणां पक्षिणां च धनुःपृथकत्वमिति

मू. (५१५) *मणूसोरालियसरीरस्स णं भंते ! केमहालिया सरीरोगाहणा पं० ? गो० ! जह० अंगु० उक्को० तिन्नि गाउयाइं, एवं अपज्जत्ताणं जह० उक्को० अंगुलस्स असं०, संमुच्छिमाणं जह० उक्को० अंगुलस्स असं०, गब्भवक्कंतियाणं पज्जत्ताण य जह० अंगुलस्स असं० उक्को० तिन्नि गाउयाइं ।*

वृ. उक्तं तिर्यक्पञ्चेन्द्रियौदारिकशरीरावगाहनामानमिदानीं मनुष्यपञ्चेन्द्रियौदारिकशरीरावगाहनामानमाह–'मणुस्सोरालियसरीरस्स ण' मित्यादि, कण्ठ्यं, नवरं त्रीणि गव्यूतानि देवकुर्वाद्यपेक्षया, तदेवमौदारिकशरीरस्य विधयः संस्थानानि प्रमाणानि चोक्तानि, सम्प्रति तानि क्रमेण वैक्रियस्याभिधित्सुराह–

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मू. (५१६) वेउव्वियसररे णं भंते! कतिविधे पं० ?, गो० ! दुविधे पं०, तं०–एगिंदियवेउव्वियसरीरे य पंचिंदियवेउव्वियस०,

जति एगिंदियवेउव्वियसरीरे किं वाउक्काइएगिंदियवेउव्वियसरीरे अवाउक्काइयएगिंदियवेउव्वियसरीरे ?, गो० ! वाउक्काइयएगिंदियवेउव्वियसरीरे नो अवाउक्काइयएगिंदियवेउव्वियसरीरे, जइ वाउकाइयवेउव्वियसरीरे किं सुहुमवाउक्काइयवेउव्वियसरीरे बायरवाउक्काइयवेउव्वियसरीरे ?, गो० ! नो सुहुमवाउक्काइयएगिंदियवेउव्वियसरीरे बादरवाउकाइयएगिंदियवेउव्वियस०, जइ बादरवाउक्काइयएगिंदियवेउव्वियसरीरे किं पज्जत्तबादरवाउक्काइयएगिंदियवेउव्वियसरीरे अपज्जत्तबादरवाउक्काइयएगिंदियवेउव्वियररीरे ?, गो० ! पज्जत्तबादरवाउक्काइयएगिंदियवेउव्वियसरीरे नो अपज्जत्तबादरवाउक्काइयएगिंदियवेउव्वियसरीरे,

जति पंचेंदियवेउव्वियसरीरे किं नेरइयपंचिंदियवेउव्वियसरीरे जाव किं देवपंचिंदियवेउव्वियसरीरे ?, गो० ! नेरइयपंचिंदियवेउव्वियसरीरेवि जाव देवपंचिंदियवेउव्वियसरीरेवि, जइ नेरइयपंचिंदियवेउव्वियसरीरे किं रयणप्पभापुढविपंचिंदियवेउव्विय० जाव किं अधेसत्तमापुढविनेरइयपं० वेउव्वियसरीरे ?, गो० ! रयणप्पभापुढविनेरइयपंचिंदियवेउव्वियसरीरेवि जाव अधेसत्तमापुढविनेरइयपंचिं० वेउव्वियसरीरेऽवि,

–जइ रयणप्पभापुढविनेरइयविउव्वियसरीरे किं पज्जत्तगरय० नेरइयवेउ० स० अपज्जत्तगरय णप्पभापु० नेरइ० पं० वे० सरीरे ?, गो० ! पज्जत्तगरयणप्पभापु० नेर० पं० अपज्जत्तगरयणप्पभापु० नेर० पं०, एवं जाव अधेसत्तमाए दुगतो भेदो भाणितव्वो,

जइ तिरिक्खजोणियपंचिंदियवेउव्वियसरीरे किं संमुच्छिमपं० तिरि० वेउ० सं० गब्भवक्कंतियपंचिं० ति० वे० स० ?, गो० ! नो संमुच्छिमपं० ति० वे० सरीरे गब्भवक्कंतियपं० ति० वेउव्वियसरीरे, जति गब्भवक्कंतियपं० ति० वेउव्वियसरीरे, जति गब्भवक्कं० पंचि० ति० वेउव्वियसरीरे किं संखेज्जवासाउयगब्भवक्कंतियपंचि० वे० सरी० असंखिज्जवासाउयग० पं० ति० वे० सरीरे ?, गो० ! संखेज्जावासाउयगब्भ० पं० ति० वे० स० नो असं० गब्भ० पंचिं० तिरि० वेउ० सं०, जइ संखिज्ज० गब्भ० पंचिं० ति० वेउ० सरीरे किं पज्जत्तगसं० गब्भ० पं० ति० वे० सरीरे अपज्जत्तगसं० ग० पं० ति० वे० सरीरे ?, गो० ! पज्ज० सं० ग० पं० ति० वे० सरीरे नो अप० सं० गब्भ० पं० ति० वे० सरीरे,

–जइ संखेज्जवासा० किं जलयरगब्भ० पं० ति० वे० सरीरे थलयरसं० ग० पं० ति० वे० सरीरे खहयरसं० ग० पं० ति० वे० सरीरे ?, गो० ! जल० सं० ग० पं९ ति० वे० सरीरेवि थल- यरसं० गं० पं० ति० वे० सरीरेवि खहयरसं० गब्भ० पं० ति९ वे० सरीरेवि, जइ जल० सं० किं पज्जत्तगजल० सं० गं० पं० ति० वे० सरीरे अपज्जत्तगजल० सं० ग० पं० ति० वेउ० सरीरे य ?, गो० ! पज्ज० जल० सं० गब्भ० पं० तिरि० वे० स० नो अपज्ज० सं० जलग० पं० ति० वे० स०,

–जति थलयरपंचिं० जाव सरीरे किं चउप्पय जाव सरीरे किं परिसप्प जाव० ?, गो० ! चउप्पयजावसं० परिसप्पजाव सं०, एवं सव्वेसिं णेयव्वं जाव खहयराणं पज्जत्ताणं नो अपज्जत्ताणं, जति मणूसपंचिं० तेउ० सरीरे किं संमुच्छिममणूस० पं० वे० सरीरे गब्भ० म० पं० वेउव्वियसरीरे

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गो० ! नो संमु० म० पं० वेउ० सरीरे गब्भ० म० पंचिं० वे० सरीरे,

जइ गब्भ० म० पं० वे० स० किं कम्मभूमग० गं० म० पं० वे० स० अकम्मभूमग० ग० म० पं० वे० स० अंतरदीवग० ग० म० पं० वे० सरीरे ?, गो० ! कम्मभूमगगब्भ० म० पं० वे० स० नो अकम्भूमग० नो अंतरदीवग०, जइ कम्मभूमगगब्भ० मणूस० पंचिं० वे० सरीरे किं संखेज्जवासाउयकम्म० ग० म० वे० स० असं० कम्म० ग० म० पं० वे० स० ?, गो० ! संखे० कम्म० ग० म० पं० वे० स० नो असं० कम्म० ग० म० पं० वे० सरीरे, जति संखे० कम्म० ग० म० पं० वे० सरीरे किं पज्जत्तयसंखे० क० म० पं० वे० स० अपज्जत्तग० सं० क० ग० म० पं० वे० सरीरे ?, गो० ! पज्ज० सं० क० ग० म० पं० वे० सरीरे नो अपज्ज० सं० क० ग० म० पं० वे० सरीरे।

–जइ देव पंचिंदियवेउव्वियसरीरे किं भवणवासिदेव० पं० वे० सरीरे जाव वेमाणियदेव० वे० स० ?, गो० ! भवणवासीदेव० पं० वे० सरीरेवि जाव वेमाणियदेव० पंचि० वेउ० सरीरेवि, जइ भवणवासिदेव० पं० वे० सरीरे किं असुरकुमारभव० देव० पं० वे० सं० जाव थणियकुमार-भव० देव० पं० वे० सरीरे ?, गो० !असुरकु० जाव थणियकुमार० वेउ० सरीरेवि,

–जइ असुरकुमारदेव० पं० वे० स० किं पज्जत्तगअसुर० भ० देव० पं० वे० सरीरे अपज्जत्तग० असुरकुमारभ० देव० पं० वे० स० ?, गो० ! पज्ज० असुर० भ० देव० पं० वे० सरीरेवि अपज्ज- त्तगअसु० भ० देव० पं० वे० सरीरेवि, एवं जाव थणियकुमाराणं दुगतो भेदो, एवं वाणमंतराणं अट्ठविहाणं जोतिसियाणं पंचविहाणं,

वेमाणिया दुविहा–कप्पोवगा कप्पातीता य, कप्पोवगा बारसविहा, तेसिंपि एवं चेव दुहतो भेदो, कप्पातीता दुविहा गेवेज्जगा य अनुत्तरोववाइया य, गेवेज्जगा नवविहा अनुत्तरोववाइया पंचविहा, एतेसिं पज्जत्तापज्जत्ताभिलावेणं दुगतो भेदो भाणि० ।

वृ. 'वेउव्वियसरीरे णं भंते !' इत्यादि, वैक्रियशरीरं मूलतो द्विभेदं––एकेन्द्रिय-पञ्चेन्द्रियभेदात्, तत्रैकेन्द्रियस्य वातकायस्य तत्रापि बादरस्य तत्रापि पर्याप्तस्य, शेषस्य वैक्रियलब्ध्यसम्भवात्, उक्तं च–"तिण्हं ताव रासीणं वेउव्वियलद्धी चेव नत्थि, बायरपज्जत्ताणंपि संखेज्जइभागमेत्ताणं' अत्र 'तिण्हं'ति त्रयाणां पर्याप्तापर्याप्तसूक्ष्मापर्याप्ताबादररूपाणां ।

पञ्चेन्द्रियचिन्तायामपि जलचरचतुष्पदोरःपरिसर्प्पभुजपरिसर्प्पखचरान् मनुष्यांश्च गर्भव्युत्क्रान्तिकान् सङ्ख्येयवर्षायुषो भुक्त्वा शेषाणां प्रतिषेधो, भवस्वभावतया तेषां वैक्रियलब्ध्यसम्भवात् । उक्ता भेदाः,संस्थानान्यविधित्सुराह–

मू. (५१७) वेउव्वियसरीरे णं भंते ! किंसंठिते प० ?, गो० ! नानासंठाणसंठिते पं०, वाउकाइयएगिंदियवेउ० सरीरे णं भंते ! किंसंठिते पं० ?, गो० ! पडागासंठाणसंठिते पं०,

नेरइयपंचिंदियवेउव्वियसरीरे णं भंते ! किंसंठाणसंठिते पं० ?, गो० ! नेरइयपंचिंदिय-वेउव्वियसरीरे दुविधे पं०, तं०–भवधारणिज्जे य उत्तरवेउव्विए य, तत्थ णं जे से भवधारणिज्जे से णं हुंडसंठाणसंठिते पं०, तत्थ णं जे से उत्तरवेउव्विते सेवि हुंडसंठाणसंठिते पं०,

रयणप्पभापुढविनेरइयपंचिं० वेउ० सरीरे णं भंते ! किंसंठाणसंठिते पं० ?, गो० ! रयणप्पभापुढविनेरइयाणं दुविधे सरीरे पं०, तं०–भवधारणिज्जे य उत्तरवेउव्विए य, तत्थ णं जे

Jain Education International For Private & Personal Use Only www.jainelibrary.org

से भवधारणिज्जे से णं हुं०, जे से उत्तरवेउव्विते सेवि हुंडे, एवं जाव अधेसत्तमापुढविनेरइय-वेउव्वियसरीरे।

तिरिक्खजोणियपं० वे० सरीरे णं भंते! किसंठाणसंठिते पं० ?, गो०! नानसंठाणसठिते पं०, एवं जलयरथलयरखहयराणवि, थलयराणवि चउप्पयपरिसप्पाणवि परिसप्पाणवि उरपरिसप्पभुयपरिसप्पाणवि। एवं मणूसंपंचिंदियवे० सरीरेवि।

असुरकुमारभवणवासी देव० पंचि० वे० सरीरे णं भंते! किंसंठिते पं० ?, गो! असुर-कुमाराणं देवाणं दुविहे सरीरे पं०, तं०—भवधारणिज्जे य उत्तरवेउव्विते य, तत्थ णं जे से भवधारणिज्जे से णं समचउरसंसंठाणसं० पं०, तत्थ णं जे से उत्तरवेउव्विए से णं नानासंठाणसं० पं०, एवं जाव थणियकुमारदेवपंचिंदियवेउव्वियसरीरे, एवं वाणमंतराणवि, नवरं ओहिया वाणमंतरा पुच्छिज्जंति, एवं जोतिसियाणवि ओहियाणं, ।एवं सोहम्मे जाव अच्चुयदेवसरीरे, गेवेज्जगकप्पा-तीतवेमाणियदेवपंचिंदियवेउव्वियसरीरे णं भंते! किंसंठिते पं० ?, गो० ! गेवेज्जगदेवाणं एगे भवधारणिज्जे सरीरे, से णं समचउरसंसंठाणसंठिते पं०, एवं अनुत्तरोववाइयाणवि।

वृ. 'वेउव्वियसरीरे णं भंते!' इत्यादि सुगमं, नवरं नैरयिकाणां भवधारणीयमुत्तरवैक्रियं च हुण्डसंस्थानमत्यन्तक्लिष्टकर्मोदयवशात्, तथाहि—तेषां भवधारणीयं शरीरं भवस्वभावत एव निर्मूलविलुप्तपक्षोत्पाटिकसकलग्रीवादिरोमपक्षिसंस्थानवदतीव बीभत्सं हुण्डसंस्थानं, यदप्युत्तरवैक्रियं तदपि वयं शुभं करिष्याम इत्यभिसन्धिना कर्त्तुमारब्धमपि तथाविधात्यन्ताशुभ-नामकर्मोदयवशादतीवाशुभतरमुपजायते इति हुण्डसंस्थानं।

तिर्यक्पञ्चेन्द्रियाणां मनुष्याणां च वैक्रियं नानासंस्थानसंस्थितमिच्छावशतः प्रवृत्तेः दशविधभवनपतिव्यन्तरज्योतिष्कसौधर्माद्यच्युतपर्यवसानवैमानिकानां भवधारणीयं भवस्वभावतया तथाविधशुभनामकर्मोदयवशात् प्रत्येकं सर्वेषां समचतुरस्रसंस्थानं, उत्तरवैक्रियं त्विच्छानुरोधतः प्रवृत्तेर्नानासंस्थानसमंस्थितं, ग्रैवेयकानामनुत्तरोपपातिनां चोत्तरवैक्रियं न भवति, प्रयोजनाभावाद्, उत्तरवैक्रियं ह्यत्र गमनागमननिमित्तं परिचाणानिमित्तं वा क्रियते, न चैतेषामेतदस्ति, यत्तु भवधारणीयमेतेषां तत्समचतुरस्रसंस्थानसंस्थितमिति।

उक्तानि संस्थानानि, सम्प्रत्यवगाहनामानमाह—

मू. (५१८) *वेउव्वियसरीरस्स णं भंते! केमहालिया सरीरावगाहणा पं० ?, गो०! जह० अंगुलस्स असं० उक्को० सातिरेगं जोयणसयसहस्सं।*

वाउक्काइयएगिंदियसरीरस्स णं भंते! केमहालिया सरीरोगाहणा पं० ?, गो० ! जह० अंगुलस्स असं० उक्कोसेणवि अंगुलस्स असं०,

नेरइयपंचिंदियवेउव्वियसरीरस्स णं भंते! केमहा० पं० ?, गो०! दुविहा पं०, तं०—भवधारणिज्जा य उत्तरवेउव्विया य, तत्थ णं जा सा भवधारणिज्जा सा जह० अंगुलस्स असंखेज्जतिभागं उक्को० पंचधनुसयाइं, तत्थ णं जा सा उत्तरवेउव्विया सा जह० अंगुलस्स संखेज्जतिभागं उक्को० धनुसहस्सं। रयणप्पभापुढविनेरइयाणं भंते! केमहा० पं० ?, गो०! दुविहा पं०, तं०—भवधारणिज्जा य उत्तरवेउव्विता य, तत्थ णं जा सा भवधारणिज्जा सा जह० अंगु० असं० उक्को० सत्त धनूइं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तिन्नि रयणीओ छच्च अंगुलाइं, तत्थ णं जा सा उत्तरवेउव्विता सा जह० अंगु० असं० उक्को० पन्नरस धणूतिं अड्डाइज्ञाओ रयणीओ।

सक्करप्पभाए पुच्छा, गो० ! जाव तत्थ णं जा सा भवधारणिज्ञा सा जह० अंगु० असं० उक्को० पन्नरस धनूइं अड्डाइज्ञातो रयणीओ, तत्थ णं जा सा उत्तरवेउव्विता सा जह० अंगु० संखे० उक्को० एक्कतीसं धणूइं एक्का य रयणी। वालुयप्पभाए पुच्छा, भवधारणिज्ञा एक्कतीसं धनूइं एक्का रयणी उत्तरवे उव्विया छावट्ठिं धनूतिं दो रयणीओ।

पंकप्पभाए भवधारणिज्ञा बावट्ठि धनूइं दो रयणीओ, उत्तरवेउव्विया पणवीसं धनुसयं। धूमप्पभाए भवधारणिज्ञा पणवीसं धनुसयं, उत्तरवेउव्विया अड्डातिज्ञाइं धनुसयाइं। तमाए भवधारणिज्ञा अड्डाइज्ञाइं धनूसताइं उत्तरवेउव्विया पंच धणुसताइं।

अधेसत्तमाए भवधारणिज्ञा पंच धणुसयाइं उत्तरवेउव्वित्ता धणुसहस्सं, एवं उक्कोसेणं। जहन्नेणं भवधारणिज्ञा अंगुलस्स असंखेज्ञतिभागं उत्तरवेउव्विता अंगुलस्स संखिज्ञतिभागं।

तिरिक्खजोणियपंचिंदियवेउव्वियसरीरस्स णं भंते! केमहालिया सरीरोगाहणा पं० ?, गो० ! जह० अंगु० सं० उक्कोसेणं जोअणसतपुहुत्तं। मणुस्सपंचिंदियवेउव्वियसरीरस्स णं भंते! केमहा० ?, गो० ! जह० अंगुल० सं० उक्को० सातिरेगं जोअणसतसहस्सं।

असुरकुमारभवणवासिदेव० पंचि० वेउव्वियसरीरस्स णं भंते ! केमहा० ?, गो० ! असुरकुमाराणं देवाणं दुविहा सरीरोगाहणा पं०, तं०-भवधारणिज्ञा य उत्तरवेउव्विया य, तत्थ णं जा सा भवधारणिज्ञा सा ज० अंगु० असं० उक्को० सत्त रयणीओ, तत्थ णं जा सा उत्तरवेउव्विता सा जह० अंगु० संखे० उक्को० जोअणसतसहस्सं, एवं जाव थणियकुमाराणं, एवं ओहियाणं वाणमंतराणं, एवं जोइसियाणवि।

सोहम्मीसाणदेवाणं, एवं चेव उत्तरवेउव्विता, जाव अच्चुओ कप्पो, नवरं सणंकुमारे भवधारणिज्ञा जह० अंगु० अ० उक्को० छ रयणीओ, एवं माहिंदेवि, बंभलोयलंतगेसु पंच रयणीओ महासुक्कसहस्सारेसु चत्तारि रयणीओ, आणयपाणयआरणच्चुएसु तिन्नि रयणीओ।

गेविज्ञगकप्पातीतवेमाणियदेवपंचिंदियवेउ० स० केम० ?, गो० ! गेवेज्ञगदेवाणं एगा भवधारणिज्ञा सरीरोगाहणा पं० सा जह० अंगुल० असं० उक्को० दो रयणी, एवं अनुत्त-रोववाइयदेवाणवि, नवरं एक्का रयणी

वृ. 'वेउव्वियसरीरस्स ण'मित्यादि, जघन्यतोऽङ्गुलासङ्ख्येयभागं नैरयिकादीनां भवधा-रणीयस्यापर्याप्तावस्थायां वातकायस्य वा, उत्कर्षतः सातिरेकं योजनशतसहस्रं देवानामुत्तरवैक्रियस्य मनुष्याणां वा, 'एगिंदियवेउव्वियसरीरस्स ण'मित्यादि, अत्र एकेन्द्रियो वातकायोऽन्यस्य वैक्रियलब्ध्यसम्भावात्, तस्य जघन्यत उत्कर्षतो वाऽवगाहनामानमङ्गुलासङ्ख्येयभागप्रमाणं, एतावत्प्रमाणविकुर्वणायामेव तस्य शक्तिसम्भवात्, सामान्यमनैरयिकसूत्रे 'भवधारणीया' भवो धार्यते यया सा भवधारणीया 'कृद्बहुल'मिति वचनात् करणे अनीयप्रत्ययः, उत्कर्षतः पञ्च धनुःशतानि, उत्तरवैक्रिया धनुःसहस्रं सप्तमनरकपृथिव्यपेक्षया, अन्यत्रैतावत्या भवधारणीयाया उत्तरवैक्रियाया वा शरीरावगाहनाया अप्राप्यमाणत्वात्,

अधुना प्रतिपृथिव्यवगाहनामानमाह-'रयणप्पभे'त्यादि, अङ्गुलासङ्ख्येयभागप्रमाणता

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रथमोत्पत्तिकाले वेदितव्या, उत्कर्षतः सप्त धनूंषि त्रयो हस्ताः षट् चाङ्गुलानि पर्याप्तावस्थायां, इदं चोत्कर्षतः शरीरावगाहनामानं त्रयोदशे प्रस्तटे द्रष्टव्यं, शेषेषु त्वर्वाक्तनेषु प्रस्तटेषु स्तोकं स्तोकतरं, तच्चैवम्–रत्नप्रभायाः प्रथमप्रस्तटे त्रयो हस्ता उत्कर्षतः शरीरप्रमाणं, द्वितीये प्रस्तटे धनुरेकमेको हस्तः सार्द्धानि चाष्टावङ्गुलानि, तृतीये प्रस्तटे धनुरेकं त्रयो हस्ताः सप्तदशाङ्गुलानि, चतुर्थे द्वे धनुषी द्वौ हस्तौ सार्धमेकमङ्गुलं, पञ्चमे त्रीणि धनूंषि दशाङ्गुलानि, षष्टे त्रीणि धनूषिं द्वौ हस्तौ सार्द्धान्यष्टादशाङ्गुलानि सप्तमे चत्वारि धनूंषि एको हस्तः त्रीणि चाङ्गुलानि, अष्टमे चत्वारि धनूंषि त्रयो हस्ताः सार्द्धान्येकादशाङ्गुलानि, नवमे पञ्च धनूंषि एको हस्तो विंशतिरङ्गुलानि, दशमे षट् धनूंषि सार्द्धानि चत्वारि अङ्गुलानि, एकादशे षट् धनूंषि द्वौ हस्तौ त्रयोदशाङ्गुलानि, द्वादशे सप्त धनूंषि सार्द्धान्येकविंशतिरङ्गुलानि, त्रयोदशे सप्त धनूंषि त्रयो हस्ताः षट् परिपूर्णान्यङ्गुलानि, अत्र चायं तात्पर्यार्थः–

प्रथमप्रस्तटे यच्छरीरावगाहनापरिमाणं त्रयो हस्ता इति तस्योपरि प्रस्तटक्रमेण सार्द्धानि षट्पञ्चाशदङ्गुलानि प्रक्षिप्यन्ते, ततो यथोक्तं प्रस्तटेषु शरीरावगाहनापरिमाणं भवति, उक्तं च–

॥ १ ॥ "रयणाए पढमपयरे हत्थतियं देहउस्सओ भणिओ।
छप्पन्नंगुल सड्ढा पयरे २ हवइ वुड्ढी ॥"

'तत्थ णं जा सा उत्तरवेउव्विया' इत्यादि, जघन्यतोऽङ्गुलसङ्ख्येयभागं, प्रथमसमयेऽपि तस्या अङ्गुलसङ्ख्येयभागप्रमाणाया एव भावात्, न त्वसङ्ख्येयभागप्रमाणायाः, आह च सङ्ग्रहणि-मूलटीकाकारो हरिभद्रसूरिः–

"उत्तरवैक्रिया तु तथाविधप्रयत्नभावादाद्यसमयेऽप्यङ्गुलसङ्ख्येयभागमात्रैव, उत्कर्षतः पञ्चदश धनूंषि अर्धतृतीया हस्ताः" इदं च उत्तरवैक्रियशरीरावगाहनापरिमाणं त्रयोदशे प्रस्तटेऽव-सातव्यं, शेषेषु तु प्रस्तटेषु प्रागुक्तभवधारणीयमानापेक्षया द्विगुणं प्रत्येतव्यं १ ।

शर्कराप्रभायां भवधारणीया उत्कर्षतः पञ्चदश धनूंषि अर्द्धतृतीया हस्ताः, इदं चोत्कर्षतो भवधारणीयावगाहनापरिमाणमेकादशे प्रस्तटेऽवसातव्यं, शेषेषु तु प्रस्तटेष्विदं–शर्करायाःप्रथमे प्रस्तटे सप्त धनूंषि त्रयो हस्ताः षट् चाङ्गुलानि, द्वितीये प्रस्तटे अष्टौ धनूंषि द्वौ हस्तौ नव चाङ्गुलानि, तृतीये नव धनूंषि एको हस्तो द्वादश चाङ्गुलानि, चतुर्थे दश धनूंषि पञ्चदशाङ्गुलानि, पञ्चमे दश धनूंषि त्रयो हस्ता अष्टादशाङ्गुलानि, षष्ठे एकादश धनूंषि द्वौ हस्तावेकविंशतिरङ्गुलानि, सप्तमे द्वादश धनूंषि द्वौ हस्तौ, अष्टमे त्रयोदश धनूंषि एको हस्तःत्रीणि अङ्गुलानि, नवमे चतुर्दश धनूंषि षट् चाङ्गुलानि, दशमे चतुर्दश धनूंषि त्रयो हस्ता नव चाङ्गुलानि, एकादशे सूत्रोक्तमेव परिमाणं, अत्रापीदं तात्पर्यं–प्रथमे प्रस्तटे यत्परिमाणमुक्तं तस्योपरि प्रस्तटक्रमेण त्रयो हस्तास्त्रिणि चाङ्गुलानि प्रक्षेप्तव्यानि, ततो यथोक्तं प्रस्तटेषु परीमाणं भवति,

॥ १ ॥ "सो चेव य बीयाए पढमे पयरंमि होइ उस्सेहो।
हत्थतिय तिन्नि अंगुल पयरे पयरे य वुड्ढीए ॥
॥ २ ॥ एक्कारसमे पयरे पन्नरस धणूणि दोन्नि रयणीओ।
बारस य अंगुलाइं देहपमाणं तु विन्नेयं ॥"

गाथाद्वयस्यापीयमक्षरगमनिका–य एव प्रथमपृथिव्यां त्रयोदशे प्रस्तटे उत्कर्षत उत्सेधो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भणितः–सप्त धनूंषि त्रयो हस्ताः षट् चाङ्गुलानि इति, स एव द्वितीयस्यां–शर्कराप्रभायां पृथिव्यां प्रथमे प्रस्तटे उत्सेधो भवति ज्ञातव्यः, ततः प्रतरे प्रतरे वृद्धिरवसेया त्रयो हस्तास्त्रीणि चाङ्गुलानि, तथा च सत्येकादशे प्रस्तटे उत्कर्षतो भवधारणीयशरीरपरिमाणमायाति पञ्चदश धनूंषि द्वौ हस्तौ द्वादश चाङ्गुलानि इति, उत्तरवैक्रियोत्कर्षपरिमाणमाह–एकत्रिंशद्धनूंषि एके हस्तः, इदं च एकादशे प्रस्तटे वेदितव्यं, शेषेषु तु प्रस्तटेषु स्वस्वभवधारणीयापेक्षया द्विगुणमवसेयं २।

तथा तृतीयस्यां वालुकाप्रभायां पृथिव्यामुत्कर्षतो भवधारणीया एकत्रिंशद्धनूंषि एको हस्तः, एतच्च नवमं प्रस्तटमधिकृत्योक्तमवसेयं, शेषेषु प्रस्तटेष्वेवं–तत्र प्रथमप्रस्तटे भवधारणीया पञ्चदश धनूंषि द्वौ हस्तौ द्वादशाङ्गुलानि, द्वितीये प्रस्तटे सप्तदश धनूंषि द्वौ हस्तौ सार्द्धानि सप्ताङ्गुलानि, तृतीये एकोनविंशतिर्धनूंषि द्वौ हस्तौ त्रीण्यङ्गुलानि, चतुर्थे एकविंशतिः धनूंषि एको हस्तः सार्द्धानि द्वाविंशतिरङ्गुलानि, पञ्चमे त्रयोविंशतिर्धनूंषि एको हस्तोऽष्टादश चाङ्गुलानि, षष्ठे पञ्चविंशतिर्धनूंषि एको हस्तः सार्द्धानि त्रयोदशाङ्गुलानि, सप्तमे सप्तविंशतिर्धनूंषि एको हस्तो नव चाङ्गुलानि, अष्टमे एकोनत्रिंशद्धनूंषि एको हस्तः सार्द्धानि चत्वार्यङ्गुलानि, नवमे यथोक्तरूपं परिमाणं भवति, अत्रापि चायं भावार्थः–प्रथमे प्रस्तटे यत्परिमाणमुक्तं तस्योपरि प्रस्तटे प्रस्तटे सप्त हस्ताः सार्द्धानि च एकोनविंशतिरङ्गुलानि क्रमेण प्रक्षेप्तव्यानि, ततो यथोक्तं प्रस्तटेषु परिमाणं भवति, उक्तं च–

॥१॥ "सो चेव य तइयाए पढमे पयरंमि होइ उस्सेहो।
सत्त रयणीउ अंगुल उणवीसं सद्धवुड्ढी य॥
॥२॥ पयरे पयरे य तहा नवमे पयरंमी होइ उस्सेहो।
धणुयाणि एगतीसं एक्का रयणी य नायव्वा॥"

अस्यापि गाथाद्वयस्येयमक्षरगमनिका–य एव द्वितीयस्याः शर्करप्रभाया एकादशे प्रस्तटे भवधारणीयाया उत्कर्षत उत्सेध उक्तः–पञ्चदश धनूंषि द्वौ हस्तौ द्वादश चाङ्गुलानि, स एव तृतीयस्याः वालुकाप्रभायाः पृथिव्याःप्रथमे प्रस्तटे उत्सेधो भवति, ततः प्रतरे २ वृद्धिरसवसेया सप्त हस्ताः सार्द्धानि चैकोनविंशतिरङ्गुलानि, तथा च सति नवमे प्रस्तटे यथोक्तं भवधारणीयावगाहनामानं भवति–एकत्रिंशद्धनूंषि एको हस्त इति, उत्तरवैक्रियोत्कृष्टपरिमाणमाह–द्वाषष्टिर्धनूंषि द्वौ हस्तौ, एतच्च नवमप्रस्तटापेक्षमवसेयं, शेषेषु तु प्रस्तटेषु निजनिजभवधारणीयप्रमाणापेक्षया द्विगुणद्विगुणमिति ३।

चतुर्थ्यां पङ्कप्रभायां पृथिव्यामुत्कर्षतो भवधारणीया द्वाषष्टिर्धनूंषि द्वौ हस्तौ, इदं च सप्तमे प्रस्तटे प्रत्येयं, शेषेषु प्रस्तटेष्वेवं–पङ्कप्रभायाःप्रथमे प्रस्तटे एकत्रिंशद्धनूंषि एको हस्तः, द्वितीये षट्त्रिंशद्धनूंषि एको हस्तो विंशतिरङ्गुलानि, तृतीये एकचत्वारिंशद्धनूंषि द्वौ हस्तौ षोडश अङ्गुलानि, चतुर्थे षट्चत्वारिंशद्धनूंषि त्रयो हस्ता द्वादशाङ्गुलानि, पञ्चमे द्विपञ्चाशद्धनूंषि अष्टावङ्गुलानि, षष्ठे सप्तपञ्चाशद्धनूंषि एको हस्तः चत्वार्यङ्गुलानि, सप्तमे यथोक्तरूपं परिमाणं, अत्रापि चैष भावार्थः–प्रथमे प्रस्तटे यत्परिमाणमुक्तं तस्योपरि प्रस्तटे प्रस्तटे क्रमेण पञ्च धनूंषि विंशतिरङ्गुलानीत्येवंरूपा वृद्धिरवगन्तव्या, ततः प्रथमे प्रस्तटे सूत्रोक्तं परिमाणं भवति, उक्तं च–

॥१॥ "सो चेव चउत्थीए पढमे पयरमिं होइ उस्सेहो।
पंच धनु वीस अंगुल पयरे पयरे य वुड्ढी य॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

॥ २ ॥ जो सत्तमए पयरे नेरइयाणं तु होइ उस्सेहो ।
बासट्ठी धनुयाणं दोन्नि रयणी य बोद्धव्वा ॥''

अस्यापि गाथाद्वयस्याक्षरगमनिका प्राग्वत् भावनीया, उत्तरवैक्रियोत्कर्षपरिमाणं पञ्चविंशं धनुःशतं, तच्च सप्तमे प्रस्तटे, शेषेषु तु प्रस्तटेषु स्वस्वभवधारणीयापेक्षया द्विगुणमिति ४ ।

पञ्चम्यां धूमप्रभायां पृथिव्यां भवधारणीयोत्कर्षतः पञ्चविंशं धनुःशतं, तच्च पञ्चमं प्रस्तटमधिकृत्योक्तमवसेयं, शेषेषु प्रस्तटेष्विदं–प्रथमप्रस्तटे द्वाषष्टिर्धनूंषि द्वौ हस्तौ, द्वितीयेऽष्टसप्ततिर्धनूंषि एका वितस्तिः, तृतीये त्रिनवतिर्धनूंषि त्रयो हस्ताश्चतुर्थे नवोत्तरं धनुःशतं एको हस्तः एका च वितस्तिः, पञ्चमे सूत्रोक्तं परिमाणं, अत्रापि चायं तात्पर्यार्थः–यत्प्रथमे प्रस्तटे परिमाणमुक्तं तदुपरि प्रस्तटे २ क्रमेण पञ्चदश धनूंषि सार्द्धहस्तद्वयाधिकानि प्रक्षेप्तव्यानि, तथा च सति यथोक्तं पञ्चमे प्रस्तटे परिणामं भवति, उक्तं च–

॥ १ ॥ "सो चेव य पंचमीए पढमे पयरंमि होइ उस्सोहो ।
पनरस धणूणि दो हत्थ सड्ढ पयरेसु वुड्ढी य ॥
तह पंचमए पयरे उस्सेहो धनुस्सयं तु पणवीसं ॥''

अस्याः सार्द्धगाथाया अक्षरगमनिका प्राग्वत् वक्तव्या, उत्तरवैक्रियोत्कर्षपरिमाणं अर्धतृतीयानि धनुःशतानि, एतानि च पञ्चमे प्रस्तटे वेदितव्यानि, शेषेषु प्रस्तटेषु स्वस्वभवधारणीयापेक्षया द्विगुणमिति । षष्ठ्यां तमःप्रभायां पृथिव्यामुत्कर्षतो भवधारणीया अर्द्धतृतीयानि धनुःशतानि, तानि च तृतीये प्रस्तटे प्रत्येतव्यानि, प्रथमे तु प्रस्तटे पञ्चविंशं धनुःशतं, द्वितीये सार्द्धसप्ताशीत्यधिकं धनुःशतंतृतीये तु सूत्रोक्तमेव परिमाणं, अत्राप्ययं तात्पर्यार्थः–प्रथमे प्रस्तटे यत्परिमाणमुक्तं तस्योपरि प्रस्तटे प्रस्तटे सार्द्धानि द्वाषष्टिर्धनूंषि प्रक्षेप्तव्यानि, तथा च सति तृतीये प्रस्तटे यथोक्तं परिमाणं भवति, उक्तं च–

॥ १ ॥ "सो चेव य छट्ठीए पढमे पयरंमि होइ उस्सेहो ।
बावट्ठि धणुयं सड्ढा पयरे पयरे य वुड्ढीओ ॥
छट्ठीए तइयपयरे दोसय पन्नासया होंति ॥''

अस्याप्युत्तरार्द्धपूर्विकाया गाथाया अक्षरगमनिका प्राग्वत् कर्त्तव्या, उत्तरवैक्रियोत्कर्षपरिमाणं पञ्चधनुःशतानि, तानि च तृतीयप्रस्तटे वेदितव्यानि, आद्ययोस्तु द्वयोः प्रस्तटयोः स्वस्वभवधारणीयापेक्षया द्विगुणं द्विगुणमवबोद्धव्यं ६ ।

अथ सप्तम्यां तु पृथिव्यां भवधारणीया उत्कर्षतः पञ्च धनुःशतानि, उत्तरवैक्रिया धनुःसहस्रं, सर्वत्र भवधारणीया जघन्यतोऽङ्गुलासङ्ख्येयभागप्रमाणा उत्तरवैक्रिया सङ्ख्येयभागप्रमाणेति । तिर्यक्पञ्चेन्द्रियस्य वैक्रियशरीरावगाहना उत्कर्षतो योजनशतपृथकत्वं, तत ऊर्ध्वं करणशक्तेरभावात्, मनुष्याणां सातिरेकं योजनशतसहस्रं, विष्णुकुमारप्रभृतीनां तथाश्रवणात्, जघन्या तूभयेषामप्यङ्गुलसङ्ख्येयभागप्रमाणा, न त्वसङ्ख्येयभागमाना, तथारूपप्रयत्नासम्भवात् ।

असुरकुमारादीनां स्तनितकुमारपर्यवसानानां व्यन्तराणां ज्योतिष्काणां सौधर्मेशानदेवानां प्रत्येकं जघन्या भवधारणीया वैक्रियशरीरावगाहना अङ्गुलासङ्ख्येयभागप्रमाणा, सा चोत्पत्तिसमये द्रष्टव्या, उत्कृष्टा सप्त रत्नयः, उत्तरवैक्रिया जघन्या अङ्गुलसङ्ख्येयभागमात्रा, उत्कृष्टा योजनशतसहस्रं,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'उत्तरवेउव्विया जाव अच्चुओ कप्पो' त्ति उत्तरवैक्रिया तावद् वक्तव्या यावदच्युतः कल्पः,परत उत्तरवैक्रियासम्भवात्, एतच्च प्रागेवोक्तं, सर्वत्र जघन्यतोऽङ्गुलसङ्ख्येयभागमाना उत्कर्षतो योजनलक्षं, भवधारणीया तु विचित्रा ततस्तां पृथगाह– 'नवर'मित्यादि, नवरमयं भवधारणीयां प्रति विशेषः–

सनत्कुमारे कल्पे जघन्यतोऽङ्गुलासङ्ख्येयभाग उत्कर्षतःषड् रत्नयः, 'एवं माहिंदेवि' इति एवं–उक्तेन प्रकारेण जघन्या उत्कृष्टा च भवधारणीया माहेन्द्रकल्पेऽपि वक्तव्या, एतच्च सप्तसागरोपमस्थितिकान् देवानधिकृत्योक्तमवसेयं, द्व्यादिसागरोपमस्थितिष्वेवं–येषां सनत्कुमारमाहेन्द्रकल्पयोर्द्वे सागरोपमे स्थितिस्तेषामुत्कर्षतो भवधारणीया परिपूर्णसप्तहस्तप्रमाणा, येषां त्रीणि सागरोपमाणि तेषां षड् हस्ताः चत्वारश्च हस्तस्यैकादशभागाः, येषां चत्वारि सागरोपमाणि तेषां षड् हस्तास्त्रयो हस्तस्यैकादशभागाः, येषां पञ्च सागरोपमाणि तेषां षड् हस्ताः द्वौ च हस्तस्यैकादशभागौ, येषां षट् सागरोपमाणि तेषां षड् हस्ताः एकश्च हस्तस्यैकादशभागः, येषां तु परिपूर्णानि सप्त सागरोपमाणि स्थितिस्तेषां परिपूर्णा षड् हस्ता भवधारणीया, उक्तं च–

॥१॥ "अयरतिगं ठिइ जेसिं सणंकुमारे तहेव माहिंदे।
रयणीछक्कं तेसिं भागचउक्काहियं देहो ॥
॥२॥ तत्तो अयरे अयरे भागो एक्केक्कओ पडइ जाव।
सागरसत्तठिईणं रयणीछक्कं तनुपमाणं ॥"

इह जघन्या भवधारणीया सर्वत्राप्यङ्गुलासङ्ख्येयभागप्रमाणा, सा च प्रतीतेति तामवधीर्योत्कृष्टां प्रतिपादयति–'बंभलोगलंतगेसु पंच रयणीओ' इति, इह यद्यपि ब्रह्मलोकस्योपरि लान्तको न समश्रेण्या तथापीह शरीरप्रमाणचिन्तायामिदं द्विकं विवक्ष्यते, द्विकपर्यन्त एव हस्तस्य त्रुटिततया लभ्यमानत्वात्, एमुत्तरत्रापि द्विकचतुष्कादिपरिग्रहे कारणं वाच्यं, तत्र ब्रह्मलोकलान्तकयोरुत्कर्षतया भवधारणीया पञ्च रत्नयः, एतच्च लान्तके चतुर्दशसागरोपमस्थितिकान् देवानधिकृत्य प्रतिपादितमवसेयं, शेषसागरोपमस्थितिष्वेवं– येषां ब्रह्मलोके सप्त सागरोपमाणि स्थितिस्तेषां षड् रत्नयः परिपूर्णा भवधरणीया, येषामष्टौ सागरोपमाणि तेषां पञ्च हस्ताः षड् हस्तस्यैकादशभागाः, येषां नव सागरोपमाणि तेषां पञ्च हस्ताः पञ्च हस्तस्यैकादशभागाः, येषां दश सागरोपमाणि तेषां पञ्च हस्ताश्चत्वारश्चैकादशभागाः हस्तस्य, ।

लान्तकेऽपि येषां दश सागरोपमाणि स्थितिस्तेषामेतावती भवधारणीया उत्कर्षतो, येषामेकादश सागरोपमाणि लान्तके स्थितिस्तेषां पञ्चहस्तास्त्रयो हस्तस्यैकादशभागाः, येषां द्वादश सागरोपमाणि तेषां पञ्च हस्ता द्वौ च हस्तैकादशभागौ, येषां त्रयोदश सागरोपमाणि तेषां पञ्च हस्ता एको हस्तस्यैकादशभागो, येषां चतुर्दश सागरोपमाणि स्थितिस्तेषां परिपूर्णा पञ्चहस्ता भवधारणीया, । 'महासुक्कसहस्सारेसु चत्तारि रयणीओ' महाशुक्रसहस्त्ररयोश्चलस्रो रत्नय उत्कर्षतो भवधारणीया, एतच्च सहस्रारगतान् अष्टादशसागरोपमस्थितिकान् देवानधिकृत्योक्तं वेदितव्यं, शेषसागरोपमस्थितिष्वेवंयेषां महाशुक्रे कल्पे चतुर्दश सागरोपमाणि स्थितिस्तेषामुत्कतर्षतो भवधारणीया परिपूर्णाः पञ्च हस्ताः, येषां पञ्चदश सागरोपमाणि तेषां चत्वारो हस्तास्त्रयश्च हस्तस्यैका- दशभागाः, येषां षोडश सागरोपमाणि तेषां चत्वारो हस्ता द्वौ च हस्तस्यैकादशभागौ,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

येषां सप्तदश सागरोपमाणि तेषां चत्वारो हस्ता एको हस्तस्यैकादशभागः,

सहस्रारेऽपि येषां सप्तदश सागरोपमाणि तेषामेतावती भवधारणीया, येषां पुनःसहस्रारे परिपूर्णान्यष्टादश सागरोपमाणि स्थितिस्तेषां परिपूर्णाश्चत्वारो हस्ताः भवधारणीया,

'आणयपाणयआरणच्चुएसु तिन्नि रयणीओ' इति आनतप्राणतारणाच्युतेषु तिस्रो रत्नय उत्कृष्टा भवधारणीया, एतच्चाच्युते कल्पे द्वाविंशतिसागपोपमस्थितिकान् देवानधिकृत्योक्तं द्रष्टव्यं, शेषसागपोपमस्थितिष्वेवं—येषामानतेऽपि कल्पे परिपूर्णानि किञ्चित्समधिकानि चाष्टादश सागरोपमाणि स्थितिः तेषां परिपूर्णाश्चत्वारो हस्ता उत्कृष्टा भवधारणीया, येषां पुनरेकोविंशतिः सागरोपमाणि तेषां त्रयो हस्तास्त्रयश्च हस्तस्यैकादशभागाः", प्राणतेऽपि कल्पे येषामेकोनविंशतिः सागरोपमाणि स्थितिस्तेषामेतावती भवधारणीया, येषां पुनः प्राणते कल्पे विंशतिः सागरोपमाणि स्थितिस्तेषां त्रयो हस्ता द्वौ च हस्तस्यैकादशभागौ, येषामारणेऽपि कल्पे विंशतिः सागरोपमाणि स्थितिस्तेषामेतावती भवधारणीया, येषां पुनरारणेऽपि कल्पे एकविंशतिः सागरोपमाणि स्थितिस्तेषां त्रयो हस्ता एकस्य हस्तस्यैकादशभागो भवधारणीया, अच्युतेऽपि कल्पे येषामेकविंशतिः सागरोपमाणि स्थितिस्तेषामेतावत्येव भवधारणीया, येषां पुनरच्युते कल्पे द्वाविंशतिः सागरोपमाणि स्थितिस्तेषामुत्कर्षतो भवधारणीया परिपूर्णास्त्रयो हस्ताः,

गेवेज्जकप्पातीते'त्यादि भावितं, नवरं 'उक्कोसेणं दो रयणीओ'त्ति एतन्नवमग्रैवेयके एकत्रिंशत्सागरोपमस्थितिकान् देवान् प्रति द्रष्टव्यं, शेषसागरोपमस्थितिष्वेवं—प्रथमे ग्रैवेयके येषां द्वाविंशतिः सागरोपमाणि स्थितिस्तेषां त्रयो हस्ता भवधारणीया, येषां पुनस्तत्रैव त्रयोविंशतिःसागरोपमाणि स्थितिस्तेषां द्वौ हस्तावष्टौ हस्तस्यैकादशभागाः द्वितीयेऽपि ग्रैवेयके येषां त्रयोविंशतिःसागरोपमाणि स्थितिस्तेषामेतावती भवधारणीया, येषां पुनस्तत्र चतुर्विंशतिः सागरोपमाणि स्थितिस्तेषां द्वौ हस्तौ सप्त च हस्तस्यैकादशभागा भवधारणीया, तृतीयोऽपि ग्रैवेयके येषां चतुर्विंशतिः सागरोपमाणि स्थितिस्तेषामेतावत्येव भवधारणीया, येषां पुनः पञ्चविंशतिः सागरोपमाणि तत्र स्थितिस्तेषां द्वौ हस्तौ षट् हस्तस्यैकादशभागा भवधारणीया, चतुर्थेऽपि ग्रैवेयके येषां पञ्चविंशतिः सागरोपमाणि स्थितिस्तेषामेतावती भवधारणीया, येषां पुनस्तत्र षड्विंशतिः सागरोपमाणि स्थितिस्तेषां द्वौ हस्तौ पञ्च हस्तस्यैकादशभागाः,

—पञ्चमेऽपि ग्रैवेयके येषां षड्विंशतिः सागरोपमाणि तेषामेतावती भवधारणीया, येषां तु तत्र सप्तविंशतिः; सागपोपमाणि तेषां द्वौ हस्तौ चत्वारो हस्तस्यैकादशभागा भवधारणीया, षष्ठेऽपि ग्रैवेयके येषां सप्तविंशतिःसागरोपमाणि तेषामेतावत्येव भवधारणीया, येषां पुनस्तत्राष्टाविंशतिःसागरोपमाणि स्थितिस्तेषां द्वौ हस्तौ त्रयो हस्तस्यैकादशभागा भवधारणीया, सप्तमेऽपि ग्रैवेयके येषामष्टाविंशतिः सागरोपमाणि (स्थितिः) तेषामेतावती, येषां पुनस्तत्र एकोनत्रिंशत्सागरोपमाणि तेषां भवधारणीया द्वौ हस्तौ द्वौ च हस्तस्यैकादशभागौ, अष्टमेऽपि ग्रैवेयके येषां स्थितिरेकोनत्रिंशत्सागपोपमाणि तेषामेतावत्प्रमाणा, येषां पुनस्तत्र त्रिंशत्सागरोपमाणि स्थितिस्तेषां द्वौ हस्तौ एकश्च हस्तस्यैकादशो भागो भवधारणीया, नवमे ग्रैवेयके येषां स्थितिस्त्रिंशत्सागरोपमाणि तेषां भवधारणीया एतावत्प्रमाणा, येषां पुनरेकत्रिंशत्सागरोपमाणि तत्र स्थितिस्तेषां परिपूर्णौ द्वौ हस्तौ भवधारणीया,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'एवं अनुत्तरे' इत्यादि, एवं ग्रैवेयकोक्तेन प्रकारेण अनुत्तरोपपातिकदेवानामपि सूत्रं वक्तव्यं, नवरमुत्कर्षतो भवधारणीया एका रत्निः–हस्तो वक्तव्यः, एतच्च त्रयस्त्रिंशत्सागरोपम-स्थितिकान् प्रति ज्ञातव्यं, येषां पुनर्विजयादिषु चतुर्षु विमानष्वेकत्रिंशत्सागरोपमाणि स्थितिस्तेषां परिपूर्णौ द्वौ हस्तौ भवधारणीया, येषां पुनस्तत्रैव मध्यमा द्वात्रिंशत्सागरोपमाणि स्थितिसतेषामेको हस्त एकश्च हस्तस्यैकादशभागो भवधारणीया, येषां पुनस्तत्र सर्वार्थसिद्धमहाविमाने त्रयस्त्रिं-शत्सागरोपमाणि तेषामेको हस्तो भवधारणीया, जघन्या सर्वत्राङ्गुलासङ्ख्येयभागमात्रा ॥

तदेवमुक्तानि वैक्रियशरीरस्यापि विधिसंस्थानावगाहनाप्रमाणानि, सम्प्रत्याहारकस्य प्रतिपिपादयिषुराह–

मू. (५१९) *आहरगसरीरे णं भंते! कतिविधे पन्नत्ते?, गो०! एगागारे पं०, जइ एगागारे किं मणूसआहारगसरीरे अमणूसआहारगसरीरे?, गो०! मणूसआहारगसीरे नो अमणूसआ०,*

मणूसआहा० किं संमुच्छिममणूसआहा० गब्भवक्कंतियमणूसआहा० ?, गो० ! नो संमुच्छिममणूसआहा० गब्भवक्कंतियमणूसाआहा०

–जइ गब्भव० म० आ० किं कम्मभूमगग० म० आ० अकम्मभूमगग० म० आ० अंतर-द्दीवगग–० म० आ० ?, गो० ! कम्मभूमग० नो अकम्मभूमगग० नो अंतरदीवग०, जइ कम्म-भूमगग० म० आ० किं संखेज्जवासाउय० क० ग० म० आ० असंखेज्जवासाउक० ग० म० आ० ?, गो० ! संखिज्जवा० क० गब्भ० म० आहारगसरीरे नो असं० क० म० आ०, जति संखे० क० ग० म० आहा० सरीरे किं पज्जत्तसं० वा० क० ग० म० आ० सरीरे अपज्जत्तसं० वा० क० ग– म० आ० ?, गो–! पज्जत्तसं० वासा० क० ग० म० आ० नो अपज्जत्तं क० ग० मणू० आ०,

–जइ पज्जत्त० सं० क० ग० म० आ० किं सम्मद्दिट्ठीपज्जत्तगसं० क० ग० म० आ० मिच्छद्दट्ठीप० सं० क० ग० म० आ० सम्मामिच्छद्दिट्ठिपज्ज० सं० क० ग० म० आ०, जइ सम्मद्दि-ट्ठिपज्जत्तसं० वा० क० ग० म० आ० किं संजयस० म० सं० क० ग० म० आ० असंजतसम्म० प० सं० क० ग० म० आ० संजयासंजय० प० सं० क० ग० म० आ० ?, गो० संजयसम्म० पं० सं० क० ग० म० आ० नो असंजतसम्म० प० आहा० नो संजतासंतसम्म० आहा०,

–जइ संजतसम्म० पं० सं० क० ग० म० आ० किं पमत्तसंजतसम्म० म० आ० अपम-त्तसंजतसम्म० सं० क० ग० म० आ० ?, गो० ! पमत्तसं० सम्मद्दिट्ठिप० सं० क० ग० म० आ० नो अपमत्तसं० स० प० सं० क० ग० म० आ०, जइ अपमत्तसं० स० प० सं० क० म० आ० किं इड्डिपत्तप्पमत्तसं० स० क० सं० ग० म० आ० अनिड्डिपत्तसं० प० क० सं० ग० आ० गो० ! इड्डिपत्त० स० प० सं० क० ग० म० आ० नो अनिड्डिय० स० प० सं० क० ग० म० आहा० ।

आहारगसरीरे णं भंते! किंसंठिते पं० ?, गो० ! समचउरंससंठाणसंठिते पं०, आहार-गसरीरस्स णं भंते! केमहालिया सरीरोगाहणा पं० ?, गो० ! जह० देसूणा रयणी उ० पडिपुन्ना रयणी ।

वृ. 'आहारकसरीरे णं भंते! कइविहे पं०' इत्यादि सुगमं, नवरं 'संजय'त्ति 'यमू उपरमे'-संयच्छन्ति स्म–सर्वसावद्ययोगेभ्यः सम्यगुपरमन्ति स्मेति संयताः, 'गत्यर्थनित्याकर्मका' दिति कर्त्तरि क्तप्रत्यः, सकलचारित्रिणः, असंयता–अविरतसम्यग्दृष्टयः संयतासंयता–देशविरतिमन्तः,

तथा 'पमत्त'त्ति प्रमाद्यन्ति स्म–मोहनीयादिकर्मोदयप्रभावतःसञ्ज्वलनकषायनिद्रा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्यन्यतमप्रमादयोगतःसंयमयोगेषु सीदन्ति स्म प्रमत्ताः, पूर्ववत्कर्त्तरि क्तप्रत्ययः, ते च प्रायो गच्छवासिनस्तेषां क्वचिदनुपयोगसम्भवात्, तद्विपरीता अप्रमत्ताः, ते च प्रायो जिनकल्पिकपरिहार-विशुद्धिकयथालन्दकल्पिकप्रतिमाप्रतिपन्नास्तेषां सततोपयोगसम्भवात्,

इह जिनकल्पिकादयो लब्धिं नोपजीवन्ति, तेषां तथाकल्पत्वात्, येऽपि च गच्छवासिन आहारकशरीरं कुर्वन्ति तेऽपि तदानीं लब्ध्युपजीवनेनौत्सुक्यभावतः प्रमादवन्तो, मोचनेऽपि च प्रमादवन्त आत्मप्रदेशानामौदारिकशरीरे सर्वात्मनोपसंहरणेन व्याकुलीभावात्, आहारकशरीरे चान्तर्मुहूर्त्तावस्थानं, ततो यद्यपि तन्मध्यभागे कियत्कालं मनाक् विशुद्धिभावतः कार्मग्रन्थिकैरप्रमत्त-तोपवण्यते तथापि स लब्ध्युपजीवनेन प्रमत्त एवेत्यप्रमत्तस्य 'नो अपमत्तसंजए' इत्यादिना प्रतिषेधःकृतः, 'इड्ढिपत्त'त्ति ऋद्धीः–आमर्षौषध्यादि लक्षणाः प्राप्त ऋद्धिप्राप्तस्तद्विपरीतोऽनृ-द्धिप्राप्तः, ऋद्धीश्च प्राप्नोति प्रथमतो विशिष्टमुत्तरोत्तरमपूर्वापूर्वार्थप्रतिपादकं श्रुतमवगाहमान; श्रुतसामर्थ्यतस्तीव्रतीव्रतरशुभभावनामधिरोहन् अप्रमत्तःसन्, उक्तं च–

॥१॥ "अवगाहते च स श्रुतजलधिं प्राप्नोति चावधिज्ञानम् ।
मानसपर्यायं वा ज्ञानं कोष्ठादिबुद्धीर्वा ॥

॥२॥ चारणवैक्रियसर्वौषधिताद्या वाऽपि लब्धयस्तस्य ।
प्रादुर्भवन्ति गुणतो बलानि वा मानसादीनि ॥"

अत्र 'स' इत्यप्रमत्तसंयतः, मानसपर्यायमिति–मानसाः–मनसः सम्बन्धिः पर्याया–विषया यस्य तन्मानसपर्यायं मनःपर्यायज्ञानमित्यर्थः, कोष्ठादिबुद्धीर्वा इत्यत्रादिशब्दात् पदानुसारि-बीजपरिग्रहः, तिस्रो हि बुद्धयः परमातिशयरूपाः प्रवचने प्रतिपाद्यन्ते, तद्यथा–

कोष्ठबुद्धिः १ पदानुसारिबुद्धिः २ बीजबुद्धि ३ श्च, तत्र कोष्ठक इव धान्यं या बुद्धिरा-चार्यमुखाद्विनिर्गतौ तदवस्थानौ च सूत्रार्थौ धारयति न किमपि तयोः कालान्तरे गलति सा कोष्ठबुद्धिः १, या पुनरेकमपि सूत्रपदमवधार्य शेषमश्रुतमपि तदवस्थमेव श्रुतमवगाहते सा पदानुसारिणी २, या पुनरेकमर्थपदं तथाविधमनुसृत्य शेषमश्रुतमपि यथावस्थितं प्रभूतमर्थमवगाहते सा बीजबुद्धिः ३,

सा च सर्वोत्तमप्रकर्षप्राप्ता भगवतां गणभृतां, ते हि उत्पादादिपदत्रयमवधार्यं सकलमपि द्वादशाङ्गात्मकं प्रवचनमभिसूत्रयन्ति, तथा चारणाश्च वैक्रियं च सर्वौषध्यश्च तद्भावश्चाचार-णवैक्रियसर्वौषधिता, तत्र चरणं–गमनं तद्विद्यते येषां ते चारणाः 'ज्योत्स्नादिभ्योऽणि' ति मत्वर्थी-योऽण् प्रत्ययः, तत्र गमनमन्येषामपि मुनीनां विद्यते ततो विशेषणान्यथानुपपत्त्या चरणमिह विशिष्टं गमनमभिगृह्यते, अत एव चातिशायने मत्वर्थीयो, यथा रूपवती कन्या इत्यत्र, ततोऽयमर्थः– अतिशायिचरणसमर्थाश्चारणाः, आह च भाष्यकृत् स्वकृतमाष्टटीकायां–

"अतिशयचरणाच्चारणाः, अतिशयगमनादित्यर्थः" ते च ते द्विविधा–जङ्घाचारणाः विद्या-चारणाश्च, तत्र ये चारित्रतपोविशेषप्रभावतः समुद्भूतगमनविषयलब्धिविशेषास्ते जङ्घाचारणाः, ये पुनर्विद्यावशतःसमुत्पन्नगमनलब्ध्यतिशयास्ते विद्याचारणाः, जङ्घाचारणाश्च रुचकवरद्वीपं यावत् गन्तुं समर्थाःविद्याचारणा नन्दीश्वरं, तत्र जङ्घाचारणा यत्र कुत्रापि गन्तुमिच्छवस्तत्र रविकतानपि निश्रीकृत्य गच्छन्ति, विद्याचारणास्तेववमेव, जङ्घाचारणश्च रुचकवरद्वीपं गच्छन् एकेनैवोत्पातेन गच्छति, प्रतिनिवर्त्तमानस्त्वेकेनोत्पातेन नन्दीश्वरमायाति द्वितीयेन स्वस्थानं, यदि पुनर्मेरुशिखरं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जिगमिषुस्तर्हि प्रथमेनैवोत्पातेन पण्डकवनमधिरोहति प्रतिनिवर्त्तमानस्तु प्रथमोनोत्पातेन नन्दनवनमागच्छति द्वितीयेन स्वस्थानमिति,

जङ्घाचारिणो हि चारित्रातिशयप्रभावतो भवन्ति, ततो लब्ध्युपजीवने औत्सुक्यभावतः प्रमादसम्भवाच्चारित्रातिशयनिबन्धना लब्धिः परिहीयते, ततः प्रतिनिवर्त्तमानो द्वाभ्यामुत्पाताभ्यां स्वभुवमायाति, विद्याचारणःपुनःप्रथमेनोत्पातेन मानुषोत्तरं पर्वतं गच्छति द्वितीयेन तु नन्दीश्वरं, प्रतिनिवर्त्तमानस्त्वेकेनैवोत्पातेन स्वस्थानमायातीति, तथा स एवोर्ध्वं गच्छन् प्रथमोत्पातेन नन्दनवनं गच्छति द्वितीयेनोत्पातेन पण्डकवनं, प्रतिनिवर्त्तमानस्त्वेकैनैवोत्पातेन स्वस्थानमायातीति, विद्याचारणो विद्यावशतो भवति, विद्या च परिशील्यमाना स्फुटा स्फुटतरोपजायते, अतः प्रतिनिवर्त्तमानस्य शक्यत्यतिशयसम्भवादेकेनोत्पातेन स्वस्थानगमनमिति उक्तं च–

॥१॥ "अइसयचरणसमत्था जंघाविज्ञाहि चारणा मुणओ।
जंघाहि जाइ पढमो नीसं काउं रविकरेवि ॥
॥२॥ एगुप्पाएण गओ रुयगवरंमि उ तओ पडिनियत्तो।
बिइएणं नंदिस्सरमिहं तओ एइ तइएणं ॥
॥३॥ पढमेणं पंडगवन बिइउप्पाएण नंदनं एइ।
तइउप्पाएण तओ इह जंघाचारणो एइ ॥
॥४॥ पढमेण माणुसोत्तरनगं स नंदिस्सरं तु बिइएण।
एइ तओ तइएणं कयचेइयवंदणो इहइं ॥
॥५॥ पढमेणं नंदनवने बिअप्पाएण पंडगवनंमि।
एइ इहं तइएणं जो विज्ञाचारणो होइ ॥"

तथा सर्वं–विड्मूत्रादिकमौषधं यस्य स सर्वौषधः, किमुक्तं भवति ? – यस्य मूत्रं विट् श्लेष्मा शरीरमलो वा रोगोपशमसमर्थो भवति स सर्वौषधः, आदिशब्दादामर्षौषध्यादिलब्धिपरिग्रहः, एताश्च ऋद्धीरप्रमत्तः सन् प्राप्य पश्चात् प्रमत्तो भवति, तेनैवेह प्रयोजनं तत उक्तम्–'इड्ढिपत्तपमत्तसंजये'त्यादि, आह–मनुष्यस्याहारकशरीरमित्युक्ते सामर्थ्यादमनुष्यस्य नाहारकशरीरमित्यवसीयते ततः कस्मादुच्यते–'नो अमणुस्साहारगसरीरे' इत्यादि ? ,निरर्थकत्वात्, उच्यते,

इह त्रिविधा विनेयाः, तद्यथा–उद्घटितज्ञा मध्यमबुद्धयः प्रपञ्चितज्ञाश्च, तत्र ये उद्घटितज्ञा मध्यमबुद्धयो वा ते यथोक्तं सामर्थ्यमवबुध्यन्ते, ये पुनरद्याप्यव्युत्पन्नत्वात् न यथोक्तसामथ्यावगमकुशलास्ते प्रपञ्चितमेवावगन्तुमीशते नान्यथा, ततस्तेषामनुग्रहाय सामर्थ्यलब्धस्यापि विपक्षनिषेधस्याभिधानं, महीयांसो हि परमकरुणापरीतत्वात् अविशेषेण सर्वेषामनुग्रहाय प्रवर्त्तन्ते, ततो न कश्चिद्दोषः,

'जहन्नेणं देसूणा रयणी' इति आहारकशरीरस्य जघन्यतोऽवगाहना देशोना–किञ्चिदूना रत्निः–हस्तः तथाविधप्रयत्नभावतः प्रारम्भसमयेऽपि तस्या एतावत्या एव भावात्। तदेवमुक्तान्याहारकशरीरस्य विधिसंस्थानावगाहनामानानि, सम्प्रति तैजसस्य तान्यभिधित्सुराह–

मू. (५२०) *तेयगसरीरे णं भंते ! कतिविधे पं० ?, गो० ! पंचविहे पं०, तं–-एगिंदियतेयगसरीरे जाव पंचिंदियतेयगसरीरे, एगिंदियतेयगसरीरे णं भंते ! कइविधे पं० ?, गो० !*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पंचविधे पं०, तं०—पुढविराइय० जाव वणस्सइकाइयएगिंदियसरीरे, एवं जहा ओरालियसरीरस्स भेदो भणितो तहा तेयगस्सवि जाव चउरिंदियाणं।

पंचिंदियतेयगसरीरे णं भंते! कतिविधे पं० ?, गो० ! चउव्विहे पं०, तं०—नेरइयतेयगसरीरे जाव देवतेयगसरीरे, नेरइयाणं दुगतो भेदो भाणितव्वो, जहा वेउव्वियसरीरे । पंचिंदियतिरिक्खजोणियाणं मणूसाण य जहा ओरालियसरीरे भेदो भाणितो तहा भाणियव्वो । देवाणं जहा वेउव्वियसरीरभेदो भाणितो तहा भाणियव्वो, जाव सव्वट्ठसिद्धदेवत्ति ।

तेयगसरीरे णं भंते! किंसंठिए पं० ?, गो० ! नानासंठाणसंठिए पं०, एगिंदियतेयगसरीरे णं भंते! किंसंठिए पन्नत्ते ?, गो० ! नानासंठाणसंठिए पं०, पुढविकाइयएगिंदियतेयगसरीरे णं भंते! किंसंठिए पं० ?, गो० ! मसूरचंदसंठाणसंठिते पं०, एवं ओरालियसंठाणाणुसारेण भाणितव्वं जाव चउरिंदियाणवि,

नेरइयाणं भंते! तेयगसरीरे किंसंठिए पं० ?, गो० ! जह वेउव्वियसरीरे, पंचिंदियतिरिक्खजोणियाणं मणूसाणं जहा एतेसिं चेव ओरालियंति, देवाणं भंते! किंसंठिते तेयगसरीरे पं० गो० ! जहा वेउव्वियस्स जाव अनुत्तरोववाइयत्ति ।

वृ. 'तेयगसरीरे णं भंते !' इत्यादि, इह तैजसशरीरं सर्वेषामवश्यं भवति ततो यथा एकद्वित्रिचतुरिन्द्रियगत औदारिकशरीरभेदो भणितस्तथा चतुरिन्द्रियान् यावत् तैजसशरीरभेदोऽपि वक्तव्यः, पञ्चेन्द्रियतैजसशरीरचिन्तायां ततुर्विधं पञ्चेन्द्रियतैजसशरीरं, नैरयिकतिर्यग्मनुष्यदेवभेदात्, तत्र नैरयिकतैजसशरीरचिन्तायां यथा प्राक् वैक्रियशरीरे पर्याप्तपर्याप्तविषयतया द्विगतो भेद उक्तस्तथाऽत्रापि वक्तव्यः स चैव—

—'जइ नेरइयपंचिंदियतेयगसरीरे किं रयणप्पभापुढविनेरइयपंचिंदियतेयगसरीरे जाव किं अहेसत्तमापुढविनेरइयपंचिंदियतेयगसरीरे ?, गो० ! रयणाप्पभापुढविनेरइयपं— तेयगसरीरेवि जाव अहेसत्तमापुढविनेरइयपं० तेयगसरीरेवि, जइ रयणप्पभापुढविनेरइयपंचिंदियतेयगसरीरे किं पज्जत्तगरयणप्पभे'त्यादि, पञ्चेन्द्रियतिर्यग्योनिकानां मनुष्याणां च यथा प्रागौदारिकशरीरभेद उक्तस्तथा अत्रापि वक्तव्यः, स चैवम्—

'तिरिक्खजोणियपंचिंदियतेयगसरीरे णं भंते ! कइविहे पन्नत्ते ?' इत्यादि, देवानां यथा वैक्रियशरीरभेदं उक्तस्तथा भणितव्यः, स चैवम्—'जइ देवंचिंदियतेयगसरीरे किं भवणवासिदेवपंचिं०तेयगसरीरे' इत्यादि, यावत्सर्वार्थसिद्धदेवसूत्रं ।

उक्तो भेदः, सम्प्रति संस्थानप्रतिपादनार्थमाह—'तेयगसरीरे णं भंते ! किंसंठिए पं० ?' इत्यादि, सुगमं, इह जीवप्रदेशानुरोधि तैजसं शरीरं ततो यदेव तस्यां २ योनावौदारिकशरीरानुरोधेन वैक्रियशरीरानुरोधेन च जीवप्रदेशानां संस्थानं तदेव तैजसशरीरस्यापि इति प्रागुक्तमेकद्वित्रिचतुरिन्द्रियतिर्यक्पञ्चेन्द्रियमनुष्यगतमौदारिकसंस्थानं नैरयिकदेवेषु वैक्रियसंस्थानमतिदिष्टमिति गतं संस्थानमधुना अवगाहनामानमाह—

मू. (५२१) *जीवस्स णं भंते ! मारणंतियसमुग्घाएणं समोहयस्स तेयासरीरस्स केमहालिया सरीरोगाहणा पं० ?, गो० ! सरीरपमाणमेत्ता विक्खंभबाहल्लेणं जायामेणं जह० अंगुलस्स असं० उक्को० लोगंताओ लोगंते,*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एगिंदियस्स णं भंते! मारणंतियसमुग्घाएणं समोहयस्स तेयासरीरस्स केमहालिया सरीरो० गो० ! एवं चेव, जाव पुढवि० आउ० तेउ० वाउ० वणप्फइकइयस्स, बेइंदियस्स णं भंते! मारणंतियसमु० समो० तेयासरीरस्स केमहा० ?, गो० ! सरीरप्पमाणमेत्ता विक्खंभबाहल्लेणं आयामेणं जह० अंगुलस्स असंखे० उक्को० तिरियलोगाओ लोगंते, एवं जाव चउरिंदियस्स,

नेरइयस्स णं भंते! मार० समु० समो० तेयासरीरस्स केमहा० ?, गो० ! सरीरप्पमाणमेत्ता विक्खंभबाहल्लेणं आयामेणं जह० सातिरेकं जोयणसहस्सं उक्को० अधे जाव अहेसत्तमा पुढवी तिरियं जाव सयंभुरमणे समुद्दे उड्ढं जाव पंडगवने पुक्खरिणीतो, पंचिंदियतिरिक्खजोणियस्स णं भंते! मार० समु० समो० तेयासरीरस्स य केमहा० ?, गो० ! जहा बेइंदियसरीरस्स, मणुस्सस्स णं भंते! मार० समु० समो० तेयासरीरस्स केमहा० ?, गो० ! समयखेत्ताओ लोगंतो,

असुरकुमारस्स णं भंते ! मारणंतियसमुग्घाएणं समोहयस्स तेया० केम० ?, गो० ! सरीरप्पमाणमेत्ता विक्खंभबाहल्लेणं आयामेणं जह० अंगुलस्स असंखे उक्को० अधे जाव तच्चाए पुढवीए हिट्ठिल्ले चरमंते तिरियं जाव सयंभुरमणसमुद्दस्स बाहिरिल्ले वेइयंते उड्ढं जाव इसीपब्भारा पुढवी, एवं जाव थणियकुमारतेयगसरीरस्स, वाणमंतरजोइसियसोहम्मीसाणगा य एवं चेव,

सणंकुमारदेवस्स णं भंते! मारणंतियसमुग्घाएणं समोहयस्स तेयासरीरस्स केमहा० ?, गो० ! सरीरप्पमाणमेत्ता विक्खंभबाहल्लेणं आयामेणं जह० अंगु० असं० उक्को० अधे जाव महापातालाणं दोच्चे तिभागे, तिरियं जाव सयंभुरमणे समुद्दे उड्ढं जाव अच्चुओ कप्पो, एवं जाव सहस्सारदेवस्स अच्चुओ कप्पो, आणयदेवस्स णं भंते! मार० समु० समो० तेयास० केम० ?, गो० ! सरीरप्पमाणमेत्ता विक्खंभबाहल्लेणं आयामेणं जह० अंगु० असं० उक्को० जाव अधोलोइयगामा, तिरियं जाव मणूसखेत्ते उड्ढं जाव अच्चुओ कप्पो, एवं जाव आरणदेवस्स अच्चुअदेवस्स एवं चेव, नवरं उड्ढं जाव सयाइं विमाणातिं,

गेविज्जगदेवस्स णं भंते! मारणंतियसमु० समो० तेयग० केम० ?, गो० ! सरीरमानमेत्ता विक्खंभबाहल्लेणं आयामेणं जह० विज्जाहरसेढीतो उक्को० जाव अहोलोइगामा तिरियं जाव मणूसखेत्ते उड्ढं जाव सगातिं विमाणातिं, अनुत्तरोववाइयस्सवि एवं चेव ।

कम्मगसरीरे णं भंते! कतिविधे पं० ?, गो० ! पंचविधे पं० तं०-एगिंदियकम्मगसरीरे जाव पंचिंदिय० य, एवं जहेव तेयगसरीरस्स भेदो संठाणं ओगाहणा य भणिता तहेव निरवसेसं भाणितव्वं जाव अनुत्तरोववाइयत्ति ।

वृ. 'जीवस्स णं भंते!' इत्यादि, जीवस्य नैरयिकत्वादिविशेषणाविवक्षायां सामान्यतः-संसारिणो णमिति वाक्यालङ्कारे मारणान्तिकसमुद्घातेन वक्ष्यमाणलक्षणनेन समवहतस्य सतः 'केमहालिया' इति किंमहती किंप्रमाणमहत्वा शरीरावगाहना ?, शरीरमौदारिकादिकमप्यस्ति तत आह-तैजसशरीरस्य, प्रज्ञप्ता ?, भगवानाहशरीरप्रमाणमात्रा विष्कम्भबाहल्येन, विष्कम्भश्च बाहल्यं च विष्कम्भबाहल्यं समाहारो द्वन्द्वस्तेन, विष्कम्भेन बाहल्येन चेत्यर्थः, तत्र विष्कम्भ उदरादिविस्तारः बाहल्यमुरःपृष्ठस्थूलता आयामो दैर्ध्यं, तत्रायामेन जघन्यतोऽङ्गुलस्या-सङ्ख्येयभागः-अङ्गुलासङ्ख्येयभागप्रमाणा, इयं च एकेन्द्रियस्यैकेन्द्रियेष्वत्यासन्नमुत्पद्यमानस्य द्रष्टव्या, उत्कर्षतोलोकान्तात् लोकान्तः, किमुक्तं भवति ?-

अधोलोकान्तादारभ्य यावदूर्ध्वलोकान्त ऊर्ध्वलोकान्तादारभ्य यावदधोलोकान्तस्तावत्प्रमाण इति, इयं च सूक्ष्मस्य बादरस्य वा एकेन्द्रियस्य वेदितव्या, न शेषस्यासम्भवात्, एकेन्द्रिया हि सूक्ष्मा बादराश्च यथायोगं समस्तेऽपि लोके वर्त्तन्ते न शेषास्ततो यदा सूक्ष्मो बादरो वा एकेन्द्रियोऽधोलोके वर्त्तमान ऊर्ध्वलोकान्ते सूक्ष्मतया बादरतया वोत्पत्तुमिच्छति ऊर्ध्वलोकान्ते वा वर्त्तमानः सूक्ष्मो बादरो वा अधोलोकान्ते सूक्ष्मतया बादरतया वोत्पत्स्यते तदा तस्य मारणान्तिकसमुद्घातेन समवहतस्य यथोक्तप्रमाणा तैजसशरीरावगाहना भवति, एतेन पृथिव्यप्तेजोवायुवनस्पतिसूत्राण्यपि भावितानि द्रष्टव्यानि, तथाहि— सूक्षमपृथिवीकायिकोऽधोलोके ऊर्ध्वलोके वा वर्त्तमानो यदा सूक्ष्मपृथिवीकायिकादितया बादरवायुकायिकतया वा ऊर्ध्वलोके अधोलोके वा समुत्पत्तुमिच्छति तदा भवति तस्य मारणा न्तिकसमुद्घातेन समवहतस्योत्कर्षतो लोकान्तात्त लोकान्तं यावत् तैजसशरीरावगाहना, एवमप्कायिकादिष्वपि भाव्यं,

द्वीन्द्रियसूत्रे आयामेन जघन्यतोऽङ्गुलासङ्ख्येयभागप्रमाणा यदा अपर्याप्तो द्वीन्द्रियोऽङ्गुलासङ्ख्येयभागप्रमाणौदारिकशरीरः स्वप्रत्यासन्नप्रदेशे एकेन्द्रियादितयोत्पद्यते तदा अवसेया, अथवा यस्मिन् शरीरे स्थितःसन् मारणान्तिकसमुद्घातं करोति तस्मात् शरीरात् मारणान्तिकसमुद्घातवशात् बहिर्विनिर्गततैजशरीरस्यायामविष्कम्भविस्तारैरवगाहना चिन्त्यते न तत् शरीरसहितस्य, अन्यथा भवनपत्यादेर्यज्ञधन्यतोऽङ्गुलसङ्ख्येयभागत्वं वक्ष्यते तद्विरुध्येत, भवनपत्यादिशरीराणां सप्तादिहस्तप्रमाणत्वात्, ततो महाकायोऽपि द्वीन्द्रियो यदा स्वप्रत्यासन्नदेशे एकेन्द्रियतयोत्पद्यते तदाप्यङ्गुलासङ्ख्येयभागप्रमाणा वेदितव्या, उत्कर्षतस्तिर्यग्लोकाल्लोकान्तः, किमुक्तं भवति ? –तिर्यग्लोकादधोलोकान्तो ऊर्ध्वलोकान्तो वा यावता भवति तावत्प्रामाणा इत्यर्थः, कथमेतावत्प्रमाणेति चेत्, उच्यते, इह द्वीन्द्रिया एकेन्द्रियेष्वप्युत्पद्यन्ते, एकेन्द्रियाश्च सकललोकव्यापिनः, ततो यदा तिर्यग्लोकस्थितो द्वीन्द्रिय ऊर्ध्वलोकान्ते अधोलोकान्ते वा एकेन्द्रियतया समुत्पद्यते तदा भवति तस्य मारणान्तिकसमुद्घातसमवहतस्य यथोक्तप्रमाणा तैजसशरीरावगाहना, तिर्यग्लोकग्रहणं च प्रायस्तेषां तिर्यग्लोकः स्वस्थानमिति कृतमन्यथा अधोलोकैकदेशेऽप्यधोलौकिकग्रामादौ ऊर्ध्वलोकैकदेशेऽपि पण्डकवनादौ द्वीन्द्रियः सम्भवतीति तदपेक्षयाऽतिरिक्ताऽपि तैजसशरीरावगाहना द्रष्टव्या, एवं त्रिचतुरिन्द्रियसूत्रे अपि भावनीये।

नैरयिकसूत्रे आयामेन जघन्यतो यत्सातिरेकं योजनसहस्रमुक्तं तदेवं परिभावनीयम्–इह वलयामुखादयश्चात्वारः पातालकलशाः लक्षयोजनावगाहा योजनसहस्रबाहल्यठिक्करिकाः, तेषामधस्त्रिभागो वायुपरिपूर्ण उपरितनस्त्रिभाग उदकपरिपूर्णो मध्यस्त्रभागो वायूदकयोरुत्सरणापसरणधर्मा, तत्र यदा कश्चित्सीमन्तकादिषु नरकेन्द्रकेषु वर्त्तमानो नैरयिकः पातालकलशप्रत्यासन्नवर्त्ती च स्वायुःक्षयागदुद्वृ त्य पातालकलशकुड्यं योजनसहस्रबाहल्यं भित्त्वा पातालकलशमध्ये द्वीतीये तृतीये वा त्रिभागे मत्स्यतयोत्पद्यते तदा भवति सातिरेकयोजनसहस्रमाना नैरयिकस्य मारणान्तिकसमुद्घातसमवहतस्य जघन्या तैजशरीरावगाहना, उत्कर्षतो यावदधः सप्तमपृथिवी तिर्यक् यावत्स्वयम्भूरमणसमुद्रपर्यन्त ऊर्ध्वं यावत्पण्डकवने पुष्करिण्यस्तावद् द्रष्टव्या, किमुक्तं भवति अधः सप्तमपृथिव्या आरभ्य तिर्यग् यावत् स्वयम्भूरमणपर्यन्त ऊर्ध्वं यावत् पण्डकवनपुष्करिण्यस्तावत्प्रमाणा, एतावती च तदा लभ्यते यदाऽधः सप्तमपृथिवीनारकःस्वयम्भूरमणसमुद्रपर्यन्ते

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मत्स्यतयोत्पद्यते पण्डकवने पुष्करिणीषु चेति, तिर्यक्पञ्चेन्द्रियस्योत्कर्षतस्तिर्यग्लोकाल्लोकान्तोऽत्रापि भावना द्वीन्द्रियवत्कर्त्तव्या, तिर्यक्पञ्चेन्द्रियस्यैकेन्द्रियेषूत्पादसम्भवात्, ।

मनुष्यस्योत्कर्षतःसमयक्षेत्रात्, समयप्रधानं क्षेत्रं समयक्षेत्रं मयूरव्यंसकादित्वान्मध्यपदलोपी समासः, यस्मिन् अर्द्धतृतीयद्वीपप्रमाणे सूर्यादिक्रियाव्यङ्ग्यः समयो नाम कालद्रव्यमस्ति तत्समयक्षेत्रं मानुषक्षेत्रमिति भावस्तस्मात, यावदध ऊर्ध्वं वा लोकान्तस्तावत्प्रमाणा, मनुष्यस्याप्येकेन्द्रियेषूत्पादसम्भवात्, समयक्षेत्रग्रहणं समयक्षेत्रादन्यत्र मनुष्यजन्मनः संहरणस्य चासम्भवेनातिरिक्ताया अवगाहनाया असम्भवात् ।

असुरकुमारादिस्तनितकुमारापर्यवसानभवनपतिव्यन्तरज्योतिष्कसौधर्मेशानदेवानां जघन्यतोऽङ्गुलासङ्ख्येयभागः, कथमिति चेत्, उच्यते, एते ह्येकेन्द्रियेषूत्पद्यन्ते ततो यदा ते स्वाभरणेष्वङ्गदादिषु कुण्डलादिषु वा ये मणयः पद्मरागादयस्तेषु गृद्धा मूर्च्छितास्तदध्यवसायिनस्तेष्वेव शरीरस्थेष्वाभरणादिषु पृथिवीकायिकत्वेनोत्पद्यन्ते तदा भवति जघन्यतोऽङ्गुलासङ्ख्येयभागप्रमाणा तैजशरीरावगाहना, अन्ये त्वन्यथाऽत्र भावनिकां कुर्वन्ति, सा च नातिश्लिष्टेति, न लिखिता न च दूषिता, 'कुमार्गं न हि तित्यक्षुः, पुनस्तमनुधावती'ति न्यायानुसरणात्, उत्कर्षतो यावदधस्तृतीयस्याः पृथिव्या अधस्तनश्चरमान्तः तिर्यक् यावत्स्वयम्भूरमणसमुद्रस्य बाह्यो वेदिकान्त ऊर्ध्वं यावत् ईषत्प्राग्भारा पृथिवी तावत् द्रष्टव्या, कथमिति चेत्, उच्यते, यदा भवनपत्यादिको देवस्तृतीयस्याः पृथिव्या अधस्तनं चरमान्तं यावत् कुतश्चित्प्रयोजनवशाद् गतो भवति, तत्र च गतःसन् कथमपि स्वायुःक्षयान्मृत्वा तिर्यक् स्वयम्भूरमणसमुद्रबाह्यवेदिकान्ते यदिवा ईषत्प्राग्भाराभिधपृथिवीपर्यन्ते पृथिवीकायिकतयोत्पद्यते तदा भवत्युत्कर्षतो यथोक्ता तता तैजसशरीरावगाहना,

सनत्कुमारदेवस्यापि जघन्यतोऽङ्गुलासङ्ख्येयभागप्रमाणा तैजसशरीरावगाहना, कथमिति चेत्, उच्यते, इह सनत्कुमारादय एकेन्द्रियेषु विकलेन्द्रियेषु वा नोत्पद्यन्ते, तथा भवस्वाभाव्यात्, किन्तु तिर्यक्पञ्चेन्द्रियेषु मनुष्येषु वा, ततो यदा मन्दरादिपुष्करिण्यादिषु जलावगाहं कुर्वतां स्वभवायुः क्षयात् तत्रैव स्वप्रत्यासन्ने देशे मत्स्यतयोत्पद्यन्ते तदा अङ्गुलासङ्ख्येयभागप्रमाणा द्रष्टव्या, अथवा पूर्वसम्बन्धिनीं मनुष्यस्त्रियं मनुष्येणोपभुक्तामुपलभ्य गाढानुरागादिहागत्य परिष्वजते परिष्वज्य च तदवाच्यप्रदेशे स्वावाच्यं प्रक्षिप्य कालं कृत्वा तस्या एव गर्भे पुरुषबीजे समुत्पद्यते तदा लभ्यते, उत्कर्षतोऽधः पातालकलसानां लक्षयोजनप्रमाणावगाहानां द्वितीयत्रिभागं यावत् तिर्यग् यावत् स्वयम्भूरमणसमुद्रपर्यन्त ऊर्ध्वं यावदच्युतकल्पस्तावदवगन्तव्या, कथमिति चेत्, उच्यते, इह सनत्कुमारादिदेवानामन्यदेवनिश्रया अच्युतकल्पं यावद् गमनं भवति, न च तत्र वाप्यादिषु मत्स्यादयःसन्ति तत इह तिर्यग्मनुष्येषूत्पत्तव्यं, तत्र यदा सनत्कुमारदेवोऽन्यदेवनिश्रया अच्युतकल्पं गतो भवति तत्र च गतः सन् स्वायुःक्षयात्कालं कृत्वा तिर्यक् स्वयंभूरमणपर्यन्ते यदिवाऽधः पातालकलशानां द्वितीयत्रिभागे वायूदकयोरुत्सरणापसरणभाविनि मत्स्यादितयोत्पद्यते तदा भवति तस्य तिर्यगधो वा यथोक्तक्रमेण तैजसशरीरावगाहनेति,

'एवं जाव सहस्सारदेवस्स'त्ति एवं–सनत्कुमारदेवगतेन प्रकारेण जघन्यत उत्कर्षतश्च तैजसशरीरावगाहना तावद्वाच्या यावत्सहस्रार्देवेभ्यः, भावनाऽपिसर्वत्रापि समाना, आनत-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

देवस्यापि जघन्यतोऽङ्गुलासङ्ख्येयबागप्रमाणा तैजसशरीरावगाहना, नन्वानतादयो देवा मनुष्येष्वेवोत्पद्यन्ते मनुष्याश्च मनुष्यक्षेत्र एवेति कथमङ्गुलासङ्ख्येयभागप्रमाणा ?, उच्यते, इह पूर्वसम्बन्धिनीं मनुष्यस्त्रियमन्येन मनुष्येणोपभुक्तामानतदेवः कश्चनाप्यवधिज्ञानत उपलभ्यासन्नमृत्युतया विपरीतस्वभावत्वात् सत्त्वचरितवैचित्र्यात् कर्मगतेरचिन्त्यत्वात् कामवृत्तेर्मिलिनत्वाच्च, उक्तं च-

॥१॥ "सत्त्वानां चरितं चित्रं, विचित्रा कर्मणां गतिः ।
मलिनत्वं च कामानां, वृत्तिः पर्यन्तदारुणा ॥" इति,

गाढानुरागादिहागत्य नकुलोपगूहं तां परिष्वज्य तदवाच्यप्रदेशे स्वावाच्यं प्रक्षिप्यातीव मूर्च्छितः स्वायुःक्षयात् कालं कृत्वा यदा तस्या एव गर्भे मनुष्यबीजे मनुष्यत्वेनोत्पद्यते, मनुष्यबीजं च जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षतो द्वादश मुहूर्त्तान् यावदवतिष्ठति, उक्तं च-

"मणुस्सबीए णं भंते ! कालतो केवच्चिरं होइ ?, गो० ! जह० अंतो० उक्कोसेणं बरस मुहुत्ता" इति, ततो द्वादशमुहूर्त्ताभ्यन्तर उपभुक्तां परिष्वज्य मृतस्य तत्रैवोत्पत्तिर्मनुष्यत्वेन द्रष्टव्या, उत्कर्षतोऽधो यावदधोलौकिका ग्रामास्तिर्यग् यावन्मनुष्यक्षेत्रं ऊध्धर्वंयावदच्युतः कल्पस्तावदवसेया, कथमिति चेत्, उच्यते, इह यदाऽऽनतदेवः कस्याप्यन्यस्य देवस्य निश्रया अच्युतकल्पं गतो भवति, स च तत्र गतः सन् कालं कृत्वाऽधोलौकिकग्रामेषु यदिवा मनुष्यक्षेत्रपर्यन्ते मनुष्यत्वेनोत्पद्यते तदा लभ्यते, एवं प्राणतारणाच्युतकल्पदेवानामपि भावनीयं, तथा चाह-

'एवं जाव आरणदेवस्स, अच्चुयदेवस्स एवं चेव, नवरं उड्ढं जाव सयाइं विमाणाइं' इति, अच्युतदेवस्यापि जघन्यतः उत्कर्षतश्च तैजसशरीरावगाहना एवमेव-एवंप्रमाणैव, परं सूत्रपाठे 'उड्ढं जाव सयाइं विमाणाइं' इति वक्तव्यं, नतु 'उड्ढं जाव अच्चुओ कप्पो' थि, अच्युतदेवो हि यदा चिन्त्यते तदा कथमूध्धर्वंयावदच्युतः कल्प इति घटते ?, तस्य तत्र विद्यमानत्वात्, केवलमच्युतदेवोऽपि कदाचिदूध्धर्वं स्वविमानपर्यन्तं यावद् गच्छति तत्र च गतः सन् कालमपि करोति तत उक्तम्- 'उड्ढं जाव सयाइं विमाणाइं' इति, ग्रैवेयकानुत्तरसुरा भगवद्वन्दनादिकमपि तत्रस्था एव कुर्व्वन्ति तत इहागमनासम्भवात् अङ्गुलासङ्ख्येयभागप्रमाणता न लभ्यते, किन्तु यदा वैताढ्यगतासु विद्याधरश्रेणिषूत्पद्यन्ते तदा स्वस्थानादारभ्याधो यावद्विद्याधरश्रेणयस्तावत्प्रमाणा जघन्या तैजसशरीरावगाहना, अतोऽपि मध्ये जघन्यतराया असम्भवात्, उत्कृष्टा यावदधोलौकिका ग्रामा-स्ततोऽप्यध उत्पादासम्भवात्, तिर्यग्यावन्मनुष्यक्षेत्रपर्यन्तस्ततः परं तिर्यगप्युत्पादाभावात्, यद्यपि हि विद्याधरा विद्याधर्यश्च नन्दीश्वरं यावद् गच्छन्ति अर्वाक् सम्भोगमपि कुर्वन्ति तथापि मनुष्यक्षेत्रात् परतो गर्भे मनुष्येषु नोत्पद्यन्ते ततस्तिर्यग्यावत् मनुष्यक्षेत्रमित्युक्तं ।

तदेवमुक्तानि तैजसशरीरस्य विधिसंस्थानावगाहनामानानि, सम्प्रति कार्मणस्य वक्तव्यानि, कार्मणं च तैजससहाविनाभावि तैजसवच्च जीवप्रदेशानुरोधि संस्थानं ततो यथैव तैजसशरीरस्योक्तानि तथैव कार्मणस्यापि वक्तव्यानि, तथा चाह-'एवं जहेव तेयगसरीरस्स भेदो संठाणमोगाहणा य भणिता तहेव निरवसेसं भाणितव्वं जाव अनुत्तरोववाइय'त्ति ॥

उक्तानि पञ्चानामपि शरीराणां विधिसंस्थानवगाहनामानानि, सम्प्रति पुद्गलचयनमाह-

मू. (५२२) *ओरालियसरीरस्स णं भंते ! कतिदिसिं पोग्गला चिज्जंति ?, गो० ! निव्वाघएणं छद्दिसिं वाघाये पडुच्च सिय तिदिसिं सिय छउद्दिसिं सिय पंचदिसिं, वेउव्वियसरीरस्स णं भंते !*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कतिदिसिं पोग्गलाचिज्ञंति ?, गो० ! नियमा छद्दिसिं, एवं आहारगसरीरस्सवि, तेयाकम्मगाणं जहा ओरालियसरीरस्स ।

ओरालियसरीरस्स णं भंते ! कतिदिसिं पोग्गला उवचिज्ञंति ?, गो० ! एवं चेव जाव कम्मगसरीरस्स, एवं उवचिज्ञंति, अवचिज्जंति ।

जस्स णं भंते १ ओरालियसरीरं तस्स वेउव्वियसरीरं जस्स वेउव्वियसरीरं तस्स ओरालियसरीरं ?, गो० ! जस्स ओरालियसरीरं तस्स वेउव्वियसरीरं सिय अत्थि सिय नत्थि, जस्स वेउव्वियसरीरं तस्स ओरालियसरीरं सिय अत्थि सिय नत्थि,

जस्स णं भंते ! ओरालियसरीरं तस्स आहारगसरीरं जस्स आहारगसरीरं तस्स ओरालियसरीरं गो० ! जस्स ओरालियसरीरं तस्स आहारगसरीरं सिय अत्थि सिय नत्थि, जस्स पुण आहारगसरीरं तस्स ओरालियसरीरं नियमा अत्थि,

जस्स णं भंते ! ओरालियसरीरं तस्स तेयगसरीरं जस्स तेयगसरीरं तस्स ओरालियसरीरं गो० ! जस्स ओरालियसरीरं तस्स तेयगसरीरं नियमा अत्थि जस्स पुण तेयगसरीरं तस्स ओरालियसरीरं सिय अत्थि सिय नत्थि, एवं कम्मगसरीरंपि,

जस्स णं भंते ! वेउव्वियसरीरं तस्स आहारगसरीरं जस्स आहारगसरीरं तस्स वेउव्वियसरीरं गो० ! जस्स वेउव्वियसरीरं तस्स आहारगसरीरं नत्थि, जस्सवि आहारगसरीरं तस्सवि वेउव्वियसरीरं नत्थि, तेयाकम्मातिं जहा ओरालियएण समं तहेव आहारगसरीरेणवि समं तेयाकम्मगातिं चारेयव्वाणि, । जस्स णं भंते ! तेयगसरीरं तस्स कम्मगसरीरं जस्स कम्मगसरीरं तस्स तेयगसरीरं ?, गो० ! जस्स तेयगसरीरं तस्स कम्मगसरीरं नियमा अत्थि, जस्सवि कम्मगसरीरं तस्सवि तेयगसरीरं नियमा अत्थि ।

वृ. 'ओरालियसरीरस्स णं भंते !' इत्यादि, औदारिकशरीरस्य 'ण'मिति वाक्यालङ्कारे भदन्त ! 'कइदिसिं' इति पञ्चम्यर्थे द्वितीया बहुवचने चैकवचनं प्राकृतत्वात्, ततोऽयमर्थः—कतिभ्यो दिग्भ्यःसमागत्य पुद्गलाश्चीयन्ते, कर्मकर्त्तर्ययं प्रयोगः, स्वयं चयनमागच्छन्तीत्यर्थः-,भगवानाह—निर्व्याधातेन—व्याघातस्याभावो निर्व्याघातमव्ययीभावः 'तेन वा तृतीयाया' इति विकल्पेनाम्विधानान्नात्राम्भावः 'छद्दिसिं'ति षड्भ्यो दिग्भ्यः, किमुक्तं भवति ?—यत्र त्रसनाड्या मध्ये बहिर्वा व्यवस्थितस्यौदारिकशरीरिणो नैकापि दिग् अलोकेन व्याहता वर्त्तते तत्र निर्व्याधाते व्यवस्थितस्य नियमात् षड्भ्यो दिग्भ्यः पुद्गलानामागमनं,

व्याघातं—अलोकेन प्रतिस्खलनं प्रतीत्य 'सिय तिदिसिं'ति स्यात्—कदाचित्तिसृभ्यो दिग्भ्यः स्याच्चतसृभ्यः स्यात् पञ्चभ्यः, कथमिति चेत्, उच्यते, सूक्ष्मजीवस्यौदारिकशरीरिणो यत्रोर्ध्वं लोका-काशं न विद्यते नापि तिर्यक् पूर्वदिशि नापि दक्षिणदिशि तस्मिन् सर्वोर्ध्वप्रतरे आग्नेयकोणरूपे लोकान्ते व्यवस्थितस्याधः पश्चिमोत्तररूपाभ्यस्तिसृभ्यो दिग्भ्यः पुद्गलोपचयः शेषदिक्त्रयस्यालोकेन व्याप्तत्वात्, पुनः स एव सूक्ष्मजीव औदारिकशरीरी पश्चिमां दिशमनुसृत्य तिष्ठति तदा पूर्वदिगस्याधिका —जातेति चतसृभ्यो दिग्भ्यः पुद्गलानामागमनं, यदा पुनरधो द्वितीयादिप्रतरे गतः पश्चिमदिशमवलम्ब्य तिष्ठति तदा ऊर्ध्वादिगप्यधिका लभ्यते केवला दक्षिणैव दिगलोकेन व्याहतेति पञ्चभ्यो दिग्भ्यः पुद्गलानामागमनं, वैक्रियशरीरमाहारकशरीरं च त्रसनाड्या मध्य एव सम्भवति नान्यत्रेति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तयोरपि पुद्गलचयो नियमात् षड्भ्यो दिग्भ्यः,

तैजसकार्मणे सर्वसंसारिणां, ततो यथौदारिकस्य निर्व्याधातेन षड्भ्यो दिग्भ्यो व्याघातं प्रतीत्य पुनः स्यात् त्रिदिग्भ्यः स्याच्चतुर्दिगभ्यः स्यात् पञ्चदिग्भ्यः तथा तैजसकार्मणयोरपि द्रष्टव्यः, यथा चयस्तथा उपचयोऽपचयश्च वक्तव्यः, तत्र उपचयः-प्राभूत्येन चयः अपचयो-ह्रासः शरीरेभ्यः पुद्गलानां विचटनमितियावत्। उक्तं पुद्गलचयनमिदानीं शरीरसंयोगमाह-

'जस्स णं भंते!' इत्यादि, यस्यौदारिकं तस्य वैक्रियं स्यादस्ति स्यान्नास्ति, य औदारिकशरीरी सन् वैक्रियलब्धिमान् वैक्रियमारभ्य तत्र वर्त्तते तस्यास्ति शेषस्य नास्तीति भावः, यस्य वैक्रियशरीरं तस्यौदारिकशरीरं स्यादस्ति स्यान्नास्ति, देवनारकाणां वैक्रियशरीरवतामौदारिकशरीरं नास्ति तिर्यग्मनुष्याणां तु वैक्रियशरीरवतामस्तीति भावार्थः, आहारकशरीरेणापि सह चिन्तायां यस्यौदारिकशरीरं तस्याहारकशरीरं स्यादस्ति स्यान्नास्ति, य औदारिकशरीरी चतुर्दशपूर्वधर आहारकलब्धिमान् आहारकशरीरमारभ्य वर्त्तते तस्यास्ति शेषस्य नास्तीत्यर्थः, यस्य पुनराहारकशरीरं तस्यौदारिकशरीरं नियमादस्ति, औदारिकशरीरविरहे आहारकलब्धेरप्यसम्भवात्, तैजसशरीरेण सह चिन्तायां यस्यौदारिकशरीरं तस्य नियमात्तैजसशरीरं, तैजसशरीरविरहे औदारिकशरीरासम्भवात्, यस्य पुनस्तैजसशरीरं तस्यौदारिकं स्यादस्ति स्यान्नास्ति, देवनैरयिकाणां नास्ति तिर्यग्मनुष्याणामस्तीति भावः, एवं कार्मणशरीरेणापि सह चिन्ता कर्त्तव्या, तैजसकार्मणयोः सहचारित्वात, सम्प्रति वैक्रियशरीरस्याहारकशरीरादिभिः सह संयोगचिन्तां कुर्वन्नाह-

'जस्स णं भंते!' इत्यादि, यस्य वैक्रियशरीरं न तस्याहारकशरीरं यस्याहारकशरीरं न तस्य वैक्रियशरीरं, समकालमनयोरेकस्यासम्भवात्, तैजसकार्मणे यथौदारिकशरीरेण सह चिन्तिते तथा वैक्रियशरीरेणापि सह चिन्तयितव्ये, आहारकशरीरेणापि सह तथैव, तैजसकार्मणयोस्तु परस्परमविनाभावित्वात् यस्य तैजसं तस्य नियमात् कार्मणं यस्य कार्मणं तस्य कार्मणं तस्य नियमात् तैजसम्। गतं संयोगद्वारम्, इदानीं द्रव्यप्रदेशोभयैरल्पबहुत्वमिधित्सुराह-

मू. (५२३) *एतेसि णं भंते! ओरालियवेउव्वियआहारगतेयगकम्मगसरीराणं दव्वट्ठयाए पदेसट्ठयाए दव्वट्ठपएसट्ठयाते कयरे२हिंतो अप्पा वा ४ ?, गो० ! सव्वत्थोवा आहारगसरीरा दव्वट्ठयाते वेउव्वियसरीरा दव्वट्ठयाए असंखेज्जगुणा ओरालियसरीरा दव्वट्ठयाते असं० तेयाकम्मगसरीरा दोवि तुल्ला दव्वट्ठयाते अनंतगुणा,*

पदेसट्ठयाए सव्वत्थोवा आहारगसरीरा पदे० वेउव्वियसरीरा पदे० असं० ओरालियसरीरा पदे० असं० तेयगसरीरा पदे० अनं० कम्मगसरीरा पदे० अनं०,

दव्वट्ठपदेसट्ठयाते सव्वत्थोवा आहारगसरीरा दव्वट्ठयाते वेउव्वियसरीरा दव्वट्ठाए असं० ओरालियसरीरा दव्वट्ठयाए असं० ओरालियसरीरेहिंतो दव्वट्ठयाएहिंतो आहारगसरीरा पदेसट्ठयाए अनं० वेउव्वियसरीरा पदे० असं० ओरालियसरीरा० पदे० असंखेज्जगुणा तेयाकम्मा दोवि तुल्ला दव्वट्ठयाए अनं० तेयगसरीरा पदे० अनंतगुणा कम्मगसरीरा पदे० अनं०

वृ. 'एएसि णं भंते!' इत्यादि, सर्वस्तोकान्याहारकशरीराणि द्रव्यार्थतया, शरीरमात्रद्रव्यसङ्ख्यया इत्यर्थः, उत्कृष्टपदेऽपि तेषां सहस्रपृथकत्वस्य प्राप्यमाणत्वात्, 'उक्कोसेण उ जुगवं पुहुत्तमेत्तं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सहस्साण'मिति वचनात् तेभ्योऽपि वैक्रियशरीराणि द्रव्यार्थतया असङ्ख्येयगुणानि,

सर्वेषां नैरयिकाणां सर्वेषां च देवानां कतिपयतिर्यक्पञ्चेन्द्रियमनुष्यबादरवायुकायिकानां च वैक्रियशरीरसम्भवात्, तेभ्योऽप्यौदारिकशरीराणि द्रव्यार्थतया असङ्ख्येयगुणानि, पृथिव्यप्तेजोवायुवनस्पतिद्वित्रिचतुरिन्द्रियतिर्यक्पञ्चेन्द्रियमनुष्याणामौदारिकशरीरभावात्, पृथिव्यप्तेजोवायुवनस्पतिशरीराणां च प्रत्येकमसङ्ख्येयलोकाकाशप्रदेशप्रमाणत्वात्, तेभ्योऽपि तैजसकार्मणशरीराणि द्रव्यार्थतयाऽनन्तगुणानीति, सूक्ष्मबादरनिगोदजीवानामनन्तानान्तानां प्रत्येकं तैजसकार्मणशरीरभावात्, स्वस्थाने तु परस्परं तुल्यानि, परस्पराविनाभावित्वादेकस्याभावेऽन्यस्याप्यभावात्, ।

प्रदेशार्थचिन्तायां सर्वस्तोकान्याहारकशरीराणि सहस्रपृथकत्वमात्रशरीरप्रदेशानामल्पत्वात्, तेभ्योऽपि वैक्रियशरीराणि प्रदेशाथतया असङ्ख्येयगुणानि, इह यद्यपि वैक्रियशरीरयोग्यवर्गणाभ्य आहारकशरीरवर्गणाः परमाण्वपेक्षया अनन्तगुणास्तथापि स्तोकाभिर्वर्गणाभिराहारंकशरीरं निष्पद्यते हस्तमात्रत्वादतिप्रभूताभिर्वैक्रियशरीरवर्गणाभिर्वैक्रियं उत्कर्षतः सातिरेकलक्षयोजनप्रमाणत्वात् अतिस्तोकानि चाहारकशरीराणि सहस्रपृथक्तवेन प्राप्यमाणत्वात् अतिप्रभूतानि वैक्रियशरीराणि असङ्ख्येयश्रेणिगताकाशप्रदेशराशिप्रमाणत्वात् तत उपपद्यन्ते आहारकशरीरेभ्यः प्रदेशार्थतया वैक्रियशरीराण्टयसङ्ख्येयगुणानि, ।

तेभ्योऽप्यौदारिकशरीराणि प्रदेशार्थतया असङ्ख्येयगुणानि, असङ्ख्येयलोकाकाशप्रदेशप्रमाणतया तेषां लभ्यमानत्वेन तत्प्रदेशानामतिप्रभूतानां सम्भवात्, तेभ्योऽपि तैजसशरीराणि प्रदेशार्थतया अनन्तगुणानि, द्रव्यार्थतयाऽपि तेभ्यस्तेषामनन्तगुणत्वात्, तेभ्योऽपि कार्मणशरीराणि प्रदेशार्थतया अनन्तगुणानि, तैजसवर्गणाभ्यः कार्मणवर्गणानां परमाण्वपेक्षयाऽन्तगुणत्वात्, द्रव्यार्थप्रदेशार्थचिन्तायां 'सव्वत्थोवा आहारगसरीरा दव्वट्ठयाए वेउव्वियसरीरा दव्वट्ठयाए असंखेज्जगुणा ओरालियसरीरा दव्व० असं०' इत्यत्र भावना प्रागुक्ताऽनुसर्त्तव्या, तेभ्यो द्रव्यार्थतयौदारिकशरीरेभ्य आहारकशरीराणि प्रदेशार्थतयाऽनन्तगुणानि, औदारिकशरीराणि सर्वसङ्ख्याऽप्यसङ्ख्येयलोकाकाशप्रदेशप्रमाणानि,

आहारकशरीरयोग्यवर्गणायां त्वेकैकस्यामप्यभव्येभ्योऽनन्तगुणाः परमाणव इति, तेभ्योऽपि वैक्रियशरीराणि प्रदेशार्थतया असङ्ख्येयगुणानि, तेभ्योप्यौदारिकशरीराणि प्रदेशार्थतया असङ्ख्येयगुणानि, अत्र भावना प्रागेव कृता, तेभ्योऽपि तैसजकार्मणानि द्रव्यार्थतया अनन्तगुणानि अतिप्रभूतानन्तसङ्ख्येयोपेतत्वात्, तेभ्योऽपि तैजसशरीराणि प्रदेशार्थतयाऽनन्तगुणानि, अनन्तपरमाण्वात्मिकाभिरननताभि(र्वर्गणाभि)रेकैकस्य तैजसशरीरस्य निष्पाद्यत्वात्, तेभ्योऽपि कार्मणशरीरराणि प्रदेशार्थतयाऽनन्तगुणानि, अत्र कारणं प्रागेवोक्तं ।

तदेवं पञ्चानामपि शरीराणां द्रव्यप्रदेशोभयैरल्पबहुत्वमुक्तम्, इदानीं जघन्योत्कृष्टोभयावगाहनाविषमल्पबहुत्वमाह–

***मू. (५२४)** एतेसि णं भंते ! ओरालियवेउव्वियआहारगतेयगकम्मगसरीराणं जहन्नियाए ओगाहणाए उक्कोसियाए ओगाहणाए जहन्नुक्कोसियाए ओगाहणाए कतरे२हिंतो अप्पा वा ४ गो० ! सव्वत्थोवा ओरालियसरीरस्स जहन्निया ओगाहणा,*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तेयाकम्मगाणं दोण्हवि तुल्ला जहन्निया ओगाहणा विसे० वेउव्वियसरीरस्स जहन्निया ओगाहणा असं० आहारगसरीरस्स जहन्निया ओगाहणा असं०, उक्कोसियाए ओगाहणाए सव्वत्थोवा आहारगसरीरस्स उक्कोसिया ओगाहणा ओरालियसरीरस्स उक्कोसिया ओगाहणा संखे० वेउव्वियसरीरस्स उक्कोसिया ओगाहणा संखि० तेयाकम्मगाणं दोवि तुल्ला उक्कोसिया ओगाहणा असं०, जहन्नुक्कोसियाते ओगाहणाते सव्वत्थोवा ओरालियसरीरस्स जहन्निया ओगाहणा तेयाकम्माणं दोण्हवि तुल्ला जहन्नयि ओगाहणा विसे० वेउव्वियसरीरस्स जहन्निया ओगा० असं० आहारगसरीरस्स जहन्नियाहिंतो ओगाहणहिंतो तस्स चेव उक्कोसिया ओगा० विसे० ओरालियसरीरस्स उक्कोसिया ओगा० संखे० वेउव्विसरीरस्स णं उक्कोसिया ओगाहणा संखि० तेयाकम्मगाणं दोण्हवि तुल्ला उक्कोसिया ओगाहणा असंखिज्जुणा ।। (पन्नवणाए भगवईए एगवीसइमं पयं समत्तं)

वृ. 'एएसि ण'मित्यादि, सर्वस्तोका औदारिकशरीरस्य जघन्यावगाहना, अङ्गुलासङ्ख्येयभागमात्रप्रमाणत्वात, तैजसकार्मणयोर्जघन्यावगाहना द्वयोरपि परस्परं तुल्या, औदारिकजघन्यावगाहनातो विशेषाधिका, कथमिति चेत्, उच्यते, जइह मारणान्तिकसमुद्घातेन समवहतस्य पूर्वशरीरात् यद्वहिर्विनिर्गतं तैजशरीरं तस्यायामबाहल्यविस्तारैरवगाहना चिन्त्यते इत्युक्तं प्राक्,

तत्र यस्मिन् प्रदेशे उत्पत्स्यन्ते सोऽपि प्रदेश औदारिकशरीरावगाहनाप्रमितोऽङ्गुलासङ्ख्येयभागप्रमाणो व्याप्तो यदप्यपान्तरालमतिस्तोकं तदपि व्याप्तमित्यौदारिकजघन्यावगाहनातो विशेषाधिका, ततोऽपि वैक्रियशरीरस्य जघन्यावगाहना असङ्ख्येयगुणा, अङ्गुलासङ्ख्येयभागस्याङ्ख्येयभेदभिन्नत्वात्, ततोऽप्याहारकशरीरस्य जघन्यावगाहनाऽसङ्ख्येयगुणा, देशोनहस्तप्रमाणत्वात्, उत्कृष्टावगाहनाचिन्तायां सर्वस्तोका आहारकशरीरस्योत्कृष्टाऽवगाहना, हस्तमात्रत्वात्, ततोऽप्यौदारिकशरीरस्य उत्कृष्टावगाहना सङ्ख्येयगुणा, सातिरेकयोजनसहस्रप्रमाणत्वात्, ततोऽपि वैक्रियशरीरस्योत्कृष्टावगाहना सङ्ख्येयगुणा, सातिरेकयोजनलक्षमानत्वात्,

तैजसकार्मणयोरुत्कृष्टावगाहना द्वयोरपि परस्परं तुल्या वैक्रियशरीरोत्कृष्टावगाहनातोऽसङ्ख्येयगुणा, चतुर्दशरज्वात्मकत्वात्, जघन्योत्कृष्टावगाहनचिन्तायां आहारकशरीरस्य 'जहन्नियाहिंतो ओगाहणाहिंतो तस्स चेव उक्कोसिया ओगाहणा विसेसाहिया' इति, देशेन समधिकत्वात्, शेषं सुगमं, अनन्तरमेव भावितत्वात् ।।

पदं – २१ – समाप्तम्

मुनि दीपरत्नसागरेण संशोधिता सम्पादिता प्रज्ञापनाउपाङ्गसूत्रे एकविंशतितमपदस्य मलयगिरिआचार्येण विरचिता टीका परिसमाप्ता ।

पदं – २२ – क्रिया

वृ. तदेवं व्याख्यातमेकविंशतितमं पदं, अधुना द्वाविंशतितममारभ्यते, तस्य चायमभिसम्बन्धः, इहानन्तरपदे गतिपरिणामविशेषरूपं शरीरावगाहनादि चिन्तितं, इह तु नारकादिगतिपरिणामेन परिणातानां जीवानां प्राणातिपातादिरूपाःक्रियाविशेषाश्चिन्त्यन्ते, तत्रेदमादिसूत्रम्–

मू. (५२५) *कति णं भंते ! किरियाओ पन्नत्ताओ ?, गो० ! पंच किरियाओ पन्नत्ताओ,*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तं०– काइया १ अहिगरणिया २ पादोसिया ३ पारियावणिया ४ पाणाइवायकिरिया,

काइया णं भंते ! किरिया कतिविहा पं० ?, गो० ! दुविहा पं०, तं०–अनुवरयकाइया य दुप्पउत्तकाइया य, अहिगरणिया णं भंते ! किरिया कइविहा पं० ?, गो० ! दुविहा पं०, तं०–संजोयणाहिकरणिया य निव्वत्तणाधिगरणिया य,

पादोसिया णं भंते ! किरिया कतिविहा पं० ?, गो० ! तिविहा पं०, तं०–जेणंअप्पणो वा परस्स वा तदुभयस्स वा असुभं मनं संपधारेति, सेत्तं पादोसिया किरिया,

पारियावणिया णं भंते ! किरिया कतिविहा पं० ?, गो० ! तिवि० तं०–जेणं अप्पणो वा परस्स वा तदुभयस्स वा अस्यसायं वेदणं उदीरेति, सेत्तं पारियावणिया किरिया,

पाणातिवायकिरिया णं भंते ! कतिविहा पं० ?, गो० ! ति० पं०, तं०–जेणं अप्पाणं वा परं वा तदुभयं वा जीवियाओ ववरोवेइ, से तं पाणाइवायकिरिया ।

वृ. 'कइ णं भंते !' किरियाओ पं०' इत्यादि, करणं क्रिया, कर्मबन्धनिबन्धनचेष्टा इत्यर्थः, सा पञ्चधा, तद्यथा– 'काइया' इत्यादि, चीयते इति कायः–शरीरं, काये भवा कायेन निर्वृत्ता वा कायिकी १,

तथा अधिक्रियंते–स्थाप्यते नरकादिष्वात्माऽनेनेति अधिकरणं–अनुष्ठानविशेषो बाह्यं वा वस्तु चक्रखङ्गादि तत्र भवा तेन वा निर्वृत्ता आधिकरणिकी, 'पाउसिया' इति प्रद्वेषो–मत्सरः कर्मबन्धहेतुरकुशलो जीवपरिणामविशेष इत्यर्थः तत्र भवा तेन वा निर्वृतता स एव वा प्राद्वेषिकी ३,

'पारियावणिया' इति परितापनं परितापः पीडाकरणमित्यर्थः तस्मिन् भवा तेन वा निर्वृत्ता परितापनमेव वा पारितापनिकी ४,

'पाणाइवायकिरिया' इति प्राणा–इन्द्रियादयस्तेषामतिपातो–विनाशस्तद्विषया प्राणातिपात एव वा क्रिया प्राणातिपातक्रिया, तत्र कायिकी द्विभेदा, तद्यथा–अनुपरतकायिकी दुष्प्रयुक्तकायिकी च, उपरतो–देशतः सर्वतो वा सावद्ययोगाद्विरतः नोपरतोऽनुपरतः कुतश्चिदप्यनिवृत्त इत्यर्थः तस्य कायिकी अनुपरतकायिकी क्रियेति वर्त्तते, इयं प्रतिप्राणिनि वर्त्तते, इयमविरतस्य वेदितव्या, न देशविरतस्य सर्वविरतस्य वा, तथा दुष्टं प्रयुक्तं–प्रयोगः कायादीनां यस्य स दुष्प्रयुक्तस्तस्य कायिकी दुष्प्रयुक्तकायिकी, इयं प्रमत्तसंयतस्यापि भवति, प्रमत्ते सति कायदुष्प्रयोगसम्भवात्,

आधिकरणिक्यपि द्विभेदा, तद्यथा संयोजनाधिकरणिकी निर्वर्त्तनाधिकरणिकी च, तत्र संयोजनं–पूर्वनिर्वर्त्तितानां हलगरविषकूटयन्त्राद्यङ्गानां मीलनं तदेव संसारहेतुत्वादाधिकरणिकी संयोजनाधिकरणिकी, इयं हलाद्यङ्गानि पूर्वनिर्वर्त्तितानि संयोजयितुर्भवति, तथा निर्वर्त्तनं–असिशक्तिकुन्ततोमरादीनां मूलतो निष्पादनं तदेवाधिकरणिकी निर्वर्त्तनाधिकरणिकी, पञ्चविधस्य वा शरीरस्य निष्पादनं निर्वर्त्तनाधिकरणिकी, देहस्यापि दुष्प्रयुक्तस्य संसारवृद्धिहेतुत्वात् ।

प्राद्वेषिकी त्रिभेदा, तद्यथा– 'जेण अप्पणो' इत्यादि, येन प्रकरेण जीवा आत्मनो वा–स्वस्य वा अन्यस्य वा–आत्मव्यतिरिक्तस्य उभयस्य वा–स्वपरलक्षणस्योपरि अशुभं–अकुशलं मनः–अन्तःकरणं प्रधारयति–प्रकर्षाणं धारयति करोतीत्यर्थः तेन कारणेन विषयस्य त्रैविध्यात् त्रिविधा प्राद्वेषिकी क्रिया, तथाहि–कश्चित् कस्मिन् प्रयोजने स्वयमनुष्ठिते पर्यन्ते विपाकदारुणे संवृते सति अविवेकादात्मन एवोपरि अकुशलं मनः सम्प्रधारयति, एवं कश्चित् परस्य, कश्चित् स्वप-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रयोरपीति।

पारितापनिक्यपि त्रिविधा, तद्यथा–'जेणं अप्पणो' इत्यादि, येन प्रकारेण कश्चित् कुतश्चित् हेतोरविवेकत आत्मन एवासातां–दुःखरूपां वेदनामुत्पादयति, कश्चित्परस्य कश्चित्तदुभयस्य, ततः स्वपरतदुभयभेदातभवति त्रिधा पारितापनिकी क्रिया, आह–एवं सति लोचाकरणतपोऽनुष्ठानकरणप्रसङ्गः, यथायोगं स्वपरोभयासातवेदनाहेतुत्वात्, तदयुक्तं, विपाकहितत्वेन चिकित्साकरणवत् लोचकरणादेरसातवेदनाहेतुत्वायोगात् अशक्यतपोऽनुष्ठानप्रतिषेधाच्च, उक्तं च–

॥१॥ "सो हु तवो कायव्वो जेण मनो मंगुलं न चिंतेइ।
जेण न इंदियहाणी जेण य जोगा न हायंति॥"

॥ २॥ "कायो न केवलमयं परिपालनीयो, मृष्टै रसैर्बुहुविधैर्न च लालनीयः।
चितेन्द्रियामि न चरन्ति यथोत्पथेषु, वश्यानि येन च तथाऽऽचरितं जिनानाम॥" इति,

प्राणातिपातक्रियाऽपि त्रिविधा, तद्यथा–'जेण अप्पणो' इत्यादि, येन प्रकारेण कश्चिदविवेकी भैरवप्रपातादिनाऽऽत्मानं जीविताद् व्यपरोपयति कश्चित् प्रद्वेषादिना परं कश्चिदुभयमपीत्यतः प्राणातिपातक्रियाऽपि त्रिविधा, अत एव कारणाद्भगवद्भिरकालमरणमि प्रतिषिद्धं, प्राणातिपातक्रियादोषसम्भवात्। तदवेमुक्ताः क्रियाः, सम्प्रत्येताः किमविशेषेण सर्वेषां जीवानां सन्ति किं वा नेति जिज्ञासुरिदमाह–

मू. (५२६) *जीवा णं भंते ! किं सकिरिया अकिरिया ?, गो० ! जीवा सकिरियावि अकिरियावि, से केणट्ठेणं भंते ! एवं वु०–जीवा सकिरियावि अकिरियावि ?, गो० ! जीवा दुविहा पं०, तं०–संसारसमावण्णगा य असंसारसमावण्णगा य,*

तत्थ णं जे असंसारसमावण्णगा ते णं सिद्धा, सिद्धा णं अकिरिया, तत्थ णं जे ते संसारसमावण्णगा ते दुविहा पं०, तं०–सेलेसिपडिवण्णगा य असेलेसिपडिव०, तत्त णं जे ते सेलेसिप० ते णं अकिरिया, तत्थ णं जे ते असलेसिपडि० ते णं सकिरिया

से तेणट्ठेणं गो० ! एवं वु०–जीवा सकिरियावि अकिरियावि।

अत्थि णं भंते ! जीवाणं पाणाइवाएणं किरिया कज्ञति ?, हंता ! गो० ! अत्थि, कम्हिं णं भंते ! जीवाणं पाणातिवाएणं किराय कज्ञति ?, गो० ! छसु जीवनिकाएसु, अत्थि णं भंते ! नेरइयाणं पाणाइवाएणं किरिया कज्ञति ?, गो० ! एवे चेव, एवं जाव निरंतर वेमाणियाणं,

अत्थि णं भंते ! जीवाणं मुसावाएणं किरिया कज्ञति ?, हंता ! अत्थि, कम्हिं णं भंते ! जीवाणं मुसावाएणं किरिया कज्ञति ?, गो० ! सव्वदव्वेसु, एवं निरंतरं नेरइयाणं जाव वेमाणियाणं, अत्थि णं भंते ! जीवाणं अदिन्नादाणेणं किरिया कज्ञति ?, हंता अत्थि,

कम्हिं णं भंते ! जीवाणं अदिन्नादाणेणं किरिया कज्ञति ?, गो० ! गहणधारणिज्ञेसु दव्वेसु, एवं नेरइयाणं निरंतर जाव वेमाणियाणं,

अत्थि णं भंते ! जीवाणं मेहुणेणं किरिया कज्ञति ?, हंता अत्थि, कम्हिं णं भंते ! जीवाणं मेहुणेणं किरिया कज्ञति ?, गो० ! रूवेसु वा रूवसहगतेसु वा दव्वेसु, एवं नेर० निरं० जाव वेमाणियाणं, अत्थि णं भंते ! जीवाणं परिग्गहेणं किरिया कज्ञति ?, हंता अत्थि कम्हिं णं भंते ! परिग्ग- हेणं किरि० ?, गो० ! सव्वदव्वेसु, एवं नेर० जाव वेमाणियाणं,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवं कोहेणं माणेणं मायाए लोभेणं पेज्जेणं दोसेणं कलहेणं अब्भक्खाणेणं पेसुन्नेणं परपरिवाएणं अरतिरतीते मायामोसेणं मिच्छादंसणसल्लेणं, सव्वेसु जीवा नेरइयभेदेणं भाणितव्वा, निरंतरं जाव वेमाणियाणंति, एवं अट्ठारस एते दंडगा १८ ।

वृ. 'जीवा णं भंते!' इत्यादि सुगमं, नवरं 'संसारसमावण्णगा' इति संसारं–चतुर्गतिभ्रमणरूपं सम्यग्–एकीभावेनापन्नाः संसारसमापन्नाः संसारसमापन्ना एव संसारसमापन्नकाः, प्राकृतत्वात् स्वार्थे कप्रत्ययः, तद्विपरीता असंसासमापन्नकाः, चशब्दौ स्वगतानेकभेदसूचकौ, तत्र ये असंसार-समापन्नकास्ते सिद्धाः, सिद्धाश्च देहमनोवृत्त्यभावतोऽक्रियाः, ये तु संसारसमापन्नकास्ते द्विविधाः–शैलेशीप्रतिपन्नका अशैलेशीप्रतिपन्नकाश्च, शैलेशी नामायोग्यवस्था तां प्रतिपन्नाः शलेशीप्रतिपन्नाः, ततः पूर्ववत् स्वार्थिकः कप्रत्यतः, शैलेशीप्रतिपन्नकाः, तद्व्यतिरिक्ताः अशैलेशीप्रतिपन्नकाः, तत्र ये शैलेशीप्रतिपन्नकास्ते सूक्ष्मबादरकायवाड्मनोयोगनिरोधादक्रियाः, ये त्वशैलेशीप्रतिपन्नकास्ते सयोगित्वात् सक्रियाः, 'से एएणट्ठेण' मित्याद्युपसंहारवाक्यं ।

तदेवं ये सक्रिया ये चाक्रियास्ते उक्ताः, सम्प्रति यथा प्राणातिपातक्रिया न भवति तथा दर्शयति–'अत्थि णं भंते!' इत्यादि, अस्त्येतत्, णमिति वाक्यालङ्कारे, भदन्त! जीवानां प्राणाति-पातेन–प्राणातिपाताध्यवसायेन क्रिया सामर्थ्यात् प्राणातिपातक्रिया क्रियते ?, कर्मकर्त्तर्ययं प्रयोगो, भवतीत्यर्थः, अनतीतनयाभिप्रायात्मकोऽयं प्रश्नः कतमोऽत्र नयो यमध्यवसायपृष्टमिति चेत्, उच्यते, ऋजुसूत्रस्तथाहि–ऋजुसूत्रस्य हिंसापरिणतिकाल एव प्राणातिपातक्रियोच्यते, पुण्य-पापकर्मोपादानानुपादानयोरध्यवसायानुरोधित्वात्, न अन्यथा परिणताविति, भगवानपि तं ऋजुसूत्रनयमधिकृत्य प्रत्युत्तरमाह–'हंता! अत्थि' हन्तेति प्रेषणप्रत्यवधारणविषादेषु, अत्र प्रत्यव-धारणे, अस्त्येतप्रमाणातिपाताध्यवसायेन प्राणातिपातक्रिया भवति, 'परिणामियं पमाणं निच्छय-मवलंबमाणाण' मित्याद्यागमवचनस्य स्थितत्वाद्, अमुमेव वनचनमधिकृत्याऽऽवश्यकेऽपीदं सूत्रं प्रावर्त्तिष्ट–'आया चेव अहिंसा आया हिंसत्ति निच्छओ एस' तदेवं यथा प्राणातिपातक्रिया भवति तथोक्तम्, सम्प्रति कस्मिन् विषये सा प्राणातिपातक्रिया भवतीत्येतन्निरूपयति–

'कम्हिं णं भंते' इत्यादि, सुगमम्, नवरं मारणाध्यवसायो जीवविषयो भवति नाजीविषयो, योऽपि रज्ज्वादौ सर्प्पादिबुध्या मारणाध्यवसायः सोऽपि सर्पोऽयमिति बुध्या प्रवर्त्तमानत्वात् जीवविषये एव, न खलु रज्ज्वादौ रज्ज्वादितया परिच्छिन्ने कश्चित्तद्विषयं मारणाध्यवसायं विदधाति, ततः प्राणातिपातक्रिया षट्सु जीवनिकायेषूक्ताएतामेव प्राणातिपातक्रियामुक्तप्रकारेण नैयरि-कादिकं चतुर्विंशतिदण्डकमधिकृत्य चिन्तयति–'अत्थि णं भंते' इत्यादि, नवरमेवंसूत्रपाठः 'अत्थि णं भंते! नेरइयाणं पाणाइवाएणं किरिया कज्जइ ?, हंता अत्थि, कम्हिं णं भंते! पाणाइवाएणं किरिया कज्जइ ?, गोयमा! छसु जीवनिकाएसु', एवं तावद् वाच्यं यावद्वैमानिकविषयं सूत्रं। तदेवं यथा प्राणातिपातक्रिया भवति यद्विषया च तत्प्रतिपादितं, सम्प्रति एवमेव मृषावादादिविषयाण्यपि सूत्राण्याह–

'अत्थि णं भंते! मुसावाएण' मित्यादि सुगमं, नवरं 'किरिया कज्जइ' इति यथायोगं प्राणाति-पातादिक्रिया भवतीत्यर्थः, तथा सतोऽपलापोऽसतश्च प्ररूपणं मृषावादः, स च लोकालोक-गतसमस्तवस्तुविषयोऽपि घटते, तत उक्तं मृषावादसूत्रम्–'सव्वदव्वेसु' इति, द्रव्यग्रहणमुपलक्षणं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तेन पर्यायेष्वपीत्यपि द्रष्टव्यं, तथा यद्वस्तु ग्रहीतं धारयितुं वा शक्यते तद्विषयमादानं भवति न शेषविषयमतोऽदत्तादानसूत्रे 'गहणधारणिज्जेसु दव्वेसु' इत्युक्तम्, मैथुनाध्यवसायोऽपि चित्रलोपकाष्ठादिकर्मगतेषु रूपेषु रूपसहगतेषु वा-स्त्र्यादिषु ततो मैथुनसूत्रे उक्तम्-'रूवेसु वा रूवसहगएसु वा' इति, तथा परिग्रहः-स्वस्वामिभावेन मूर्च्छा, सा च प्राणिनामतिलोभात्सकल-वस्तुविषयाऽपि प्रादुर्भवति ततः परिग्रहसूत्रे उक्तम्-'सव्वदव्वेसु' इति, अत एवान्यत्रापि प्रथमव्रतं सर्वजीवविषय मुक्तं द्वितीयचरमे सर्ववस्तुविषये तृतीयचतुर्थे तदेकदेशविषये इति, उक्तं च-

॥१॥ "पढमम्मि सव्वजीवा बीए चरिमे य सव्वदव्वाइं।
सेसा महव्वया खलु तदेकदेसम्मि नायव्वा ॥"

क्रोधादयः सुप्रतीता, नवरं कलहो-राटिः, अभ्याख्यानं-असद्दोषारोपणं यथा-अचौरेऽपि चौरस्त्वमपारदारिकेऽपि पारदारिकस्त्वमित्यादि, इदं मृषावादेऽप्यन्तर्गतं परमुत्कृष्टोऽयं दोष इति पृथगुपात्तं, पैशून्यं-परोक्षे सतोऽसतो वा दोषस्योद्घाटनं, परपरिवादः प्रभूतजनसमक्षं परदोषविकत्थनं, अरतिरती प्रतीते, इदमेकं समुदितं पापस्थानं, 'मायामोसेण'मिति माया च मृषा च समाहारो द्वन्द्वः, द्वन्द्वैकत्वे नपुंसकत्वमिति 'क्लीबे' इति ह्रस्वत्वं तेन इह समुदायो विवक्षितो, महाकर्मबन्धहेतुश्चेति मृषावादमायाभ्यां पृथगुपात्तं,

'मिच्छादंसणसल्लेणं'ति मिथ्यादर्शनं-मिथ्यात्वं तदेव शल्यं मिथ्यादर्शनशल्यं तेन, 'अट्ठारस एए दंडगा' इति एतेऽनन्तरोदितपदोल्लेखोपदर्शिताः सर्वसङ्ख्ययाऽष्टादश दण्डका भवन्ति।

प्राणातिपातादीनां पापस्थानानामष्टादशत्वात्तदेवमष्टादशपापस्थानान्यधिकृत्य जीवानां क्रिया विषयश्चोपदर्शितः, साम्प्रतं तान्येवाधिकृत्य जीवानामेकपृथक्त्वाभ्यां कर्मबन्धत्वमुप-दिदर्शयिषुराह-

मू. (५२७) *जीवे णं भंते! पाणातिवाएणं कति कम्मपगडीओ बंधति?, गो०! सत्तविहबंधए वा अट्ठविबंधए वा, एवं नेरइए जाव निरंतरं वेमाणिते, जीवा णं भंते! पाणातिवाएणं कति कम्मपगडीओ बंधति?, गो०! सत्तविहबंधगावि अट्ठविहबंधगावि,*

नेरइया णं भंते! पाणातिवाएणं कइ कम्मपगडीओ बंधंति?, गो०! सव्वेवि ताव होज्जा सत्तविहबंधगा अहवा सत्तविहबंधगा य अट्ठविहबंधए य अहवा सत्तविहबंधगा य अट्ठविहबंधगा य, एवं असुरकुमारावि जाव थणियकुमारा

पुढविआउतेउवाउवणप्फइकाइया य, एए सव्वेवि जहा ओहिया जीवा, अवसेसा जहा नेरइया, एवं ते जीवेगिंदियवज्जा तिन्नि तिन्नि भंगा सव्वत्थ भाणियव्वत्ति, जाव मिच्छादंसणसल्ले, एवं एगत्तपोहत्तिया छत्तीसं दंडगा होंति।

मू. (५२८) *जीवे णं भंते! नाणावरणिज्जं कम्मं बंधमाणे कति किरिए?, गो०! सिय तिकिरिए सिय चउकिरियए सिय पंचकिरिए, एवं नेरइए जाव वेमाणिए, जीवा णं भंते! नाणावरणिज्जं बंधमाणा कतिकिरिया०?, गो०! सिय तिकिरिया सिय चउकिरिया सिय पंचकिरियावि, एवं नेरइया निरंतरं जाव वेमाणिया, एवं दरिसणावरणीयं वेदणिज्जं मोहणिज्जं आउयं नामं गोत्तं अंतराइयं च अट्ठविहकम्मपगडीतो भाणितव्वाओ, एगत्तपोहत्तिया सोलस दंडया भवंति, जीवे णं भंते! जीवातो कतिकिरिए?, गो०! सिय तिकिरिए सिय चउकिरिए*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सिय पंचकिरिए सिय अकिरिए, जीवे णं भंते ! नेरइयाओ कतिकिरिए ?, गो० ! सिय तिकिरिए सिय चउकिरिए सिय अकिरिए, एवं जाव थणियकुमाराओ,

पुढविकाइयातो आउक्काइयातो तेउक्काइयातो वाउक्काइयवणप्फइकाइयबेइंदियतेइंदियचउरिंदियपंचिंदियतिरिक्खजोणियमणुस्सातो जहा जीवातो, वाणमंतरजोइसियवेमाणियातो जहा नेरइयातो,

जीवे णं भंते ! जीवेहिंतो कतिकिरिए ?, गो ! सिय तिकिरिए सिय चउकिरियए सिय पंचकिरिते सिय अकिरिए, जीवे णं भंते ! नेरइएहिंतो कतिकिरिए ?, गो० ! सिय तिकिरिए सिय चउकिरिते सिय अकिरिए, एवं जहेव पढमो दंडतो तहा एसो बितिओ भाणितव्वो जाव वेमाणियत्ति, जीवा णं भंते ! जीवातो कतिकिरिया ?, गो० ! सिय तिकिरियावि सिय चउकिरियावि सिय पंचकिरियावि सिय अकिरियावि, जीवा णं भंते ! नेरइयातो कति किरिया ?, गो० ! जहेव आदिल्लदंडतो तहेव भाणितव्वो, जाव वेमाणियत्ति, जीवा णं भंते ! जीवेहिंतो कतिकिरिया ?, गो० ! तिकिरियावि चउकिरियावि पंचकिरियावि अकिरियावि, जीवा णं भंते ! नेरइएहिंतो कतिकिरिया ?, गो० ! तिकिरिया चउकिरिया अकिरिया, असुरकुमारेहिंतोवि एवं चेव जाव वेमाणितेहिंतो, ओरालियसरीरेहिंतो जहा जीवेहिंतो ।

नेरइए णं भंते ! जीवातो कतिकिरिए ?, गो० ! सिय तिकिरिए सिय चउकिरिए सिय पंच०, नेरइए णं भंते ! नेरइयातो कतिकिरिए ?, गो० ! सिय तिकिरए सिय च०, एवं जाव वेमाणिएहिंतो, नवरं नेरइयस्स नेरइएहिंतो देवेहिंतो य पंचमा किरिया नत्थि, नेरइया णं भंते ! जीवातो कतिकिरिया ?, गो० ! सिय तिरकि० सिय चउकि० सिय पंचकि०, एवं जाव वेमाणियातो, नवरं नेरइयाओ देवाओ य पंचमा किरिया नत्थि, नेरइया णं भंते ! जीवेहिंतो कतिकिरिया ?, गो० ! तिकिरियावि चउकि० पंचकि०, नेरइया णं भंते ! नेरइएहिंतो कतिकिरिया ?, गो० ! तिकि० चउकिं०, एवं जाव वेमाणिएहिंतो, नवरं ओरालियसरीररेहिंतो जहा जीवेहिं,

असुरकुमारे णं भंते ! जीवातो कतिकिरिए ?, गो० ! जहेव नेरइए चत्तारि दंडगा तहेव असुरकुमारेवि चत्तारि दंडगा भाणितव्वा, एवं च उवउज्झिऊणं भावेयव्वंति, जीवे मणूसे य अकिरिए वुच्चति सेसा अकिरिया न वुच्चंति, सव्वजीवा ओरालियसरीरेहिंतो पंचकिरिया नेरइय देवेहिंतो पंचकिरिया ण वुच्चंति, एवं एक्केक्कजीवपदे चत्तारि २ दंडगा भाणितव्वा,

एवं एतं दंडगसयं सव्वेवि य जीवादीया दंडगा ।

वृ. 'जीवे णं भंते !' इत्यादि सुगमं, नवरं सप्तविधबन्धकत्वं आयुर्बन्धविरहकाले आयुर्बन्धकाले चाष्टविधबन्धकत्वं, पृथकत्वचिन्तायां सामान्यतो जीवपदे सप्तविधबन्धका अपि अष्टविधबन्धका अपि सदैव बहुत्वेन लभ्यन्ते तत उभयत्रापि बहुवचनमित्येवंरूप एक एव भङ्गः, नैरयिकसूत्रे सप्तविधबन्धका अवस्थिता एव, हिंसापरिणामपरिणतानां सदैव बहुत्वेन लभ्यमानानां सप्तविधबन्धकत्वस्यावंश्यंभावित्वात्, ततो यदा एकोऽप्यष्टविधबन्धको न लभ्यते तदैष भङ्गः सर्वेऽपि तावद्भवेयुः सप्तविधबन्धका इति, यदा पुनरेकोऽष्टविधबन्धकः शेषाः सर्वे सप्तविधबन्धकास्तदा द्वितीयो भङ्गः सप्तविधबन्धकाश्च अष्टविधबन्धकश्च, यदा त्वष्टविधबन्धका अपि बहवो लभ्यन्ते तदा उभयगतबहुवचनरूपस्तृतीयो भङ्गः सप्तविधबन्धकाश्च अष्टविधबन्धकाश्च,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवं भङ्गत्रयेणासुरकुमारादयोऽपि तावद्वक्तव्याः यावत् स्तनितकुमाराः,

पृथिव्यप्तेजोवायुवनस्पतिकायिका यथा सामान्यतो जीवा उक्तास्तथा वक्तव्याः, उभयत्रापि बहुवचनेनैक एव भङ्गो वक्तव्य इति भावः, पृथिव्यादीनां हिंसापरिणामपरिणातानां प्रत्येकं सप्तविधबन्धकानामष्टविधबन्धकानां च सदैवं बहुत्वेन लभ्यमानत्वात्, शेषा द्वित्रिचतुरिन्द्रियतिर्यक्पञ्चेन्द्रियमनुष्यव्यन्तरज्योतिष्कवैमानिका यथा नैरयिका भङ्गत्रिकेणोक्तास्तथा वक्तव्याः, यथा च प्राणातिपातेनैकत्वपृथकत्वाभ्यां द्वौ दण्दकावुक्तावेवं सर्वपापस्थानैरपि प्रत्येकं द्वौ द्वौ दण्डकौ वक्तव्यौ, तथा चाह– "जाव मिच्छादंसणसल्लेणं' ति सर्वसङ्ख्यया कियन्तो दण्डका भवन्तीति चेत्, अत आह–'एवं एगत्तपोहत्तिया छत्तीसं दंडगा होंति' अष्टादशानां द्वाभ्यां गुणने षट्त्रिंशद्भावात्, ।

'जीवे णं भंते' इत्यादि, अथ कोऽस्य सूत्रस्यापि सम्बन्धः ?, उच्यते, इह प्रागुक्तं जीवः प्राणातिपातेन सप्तविधमष्टविधं वा कर्म बध्नाति, स तु तमेव प्राणातिपातं ज्ञानावरणीयादि कर्म बध्नन् कतिभिः क्रियाभिः समापयतीति प्रतिपाद्यते, अपिच–कार्येण ज्ञानावरणीयाख्येन कर्मणा कारणस्य प्राणातिपाताख्यस्य निवृत्तिभेद उपदर्श्यते, तद्भेदाच्च बन्धविशेषोऽपीति, उक्तं च–

॥१॥ "तिसृभिश्चतृभिरथ पञ्चभिश्च हिंसा समाप्यते क्रमशः ।
बन्धोऽस्य विशिष्टः स्याद्योगप्रद्वेषसाम्यं चेत् ॥" इति,

तमेव प्राणातिपातस्य निवृत्तिभेदं दर्शयति–'सिय तिकिरिए' इत्यादि, स्यात्–कदाचित्त्रिक्रियः कदाचिच्चतुष्क्रिय; कदाचित् पञ्चक्रियः, तत्र त्रिक्रियता कायिक्याधिकरणिकीप्राद्वेषिकीभिः क्रियाभिः, कायिकी नाम हस्तपादादिव्यापारणं आधिकरणिकी खड्गादिप्रगुणीकरणं प्रादेषिकी मारयाम्येनमित्यशुभमनःसम्प्रधारणमिति, चतुष्क्रियता कायिक्याधिकरणिक्रीप्राद्वेषिकीपारितापनिकीभिः, पारितापनिकी नाम खड्गादिधातेन पीडाकरणं, पञ्चक्रियता यदा प्राणातिपातक्रियाऽपि पञ्चमी भवति, प्राणातिपातक्रिया जीविताद् व्यपरोपणं, एवं नैरयिकादारभ्य चतुर्विंशतिदण्डकक्रमेण तावद् वक्तव्यं यावद्वैमानिकसूत्रं, सूत्रपाठस्तेववम्–

'नेरइए णं भंते ! नाणावरणिज्जं कम्मं बंधमाणे कइकिरिए पं०' इत्यादि, तदेवमेकत्वेन दण्डक उक्तः, सम्प्रति बहुत्वेनाह–'जीवा णं भंते !' इत्यादि, प्रश्नसूत्रं सुगमं, भगवानाह–गौतम जीवास्त्रिक्रिया अपि चतुष्क्रिया अपि पञ्चक्रिया अपि, किमुक्तं भवति ?–

जीवाज्ञानावरणीयं कर्म बध्नन्तः सदैव बहव इति त्रिक्रिया अपि चतुष्क्रिया अपि पञ्चक्रिया अपि लभ्यन्ते इत्येक एव भङ्गः, यथा च सामान्यतो जीवपदेऽभङ्गकं तथा नैरयिकादिषु चतुर्विंशतौ स्वस्थानेषु प्रत्येकमभ्गकं द्रष्टव्यं, नैरयिकादीनामपि ज्ञानावरणीयकर्म बध्नतः सदैव त्रिक्रियाणामपि चतुष्क्रियाणामपि पञ्चक्रियाणामपि बहुत्वेन लभ्यमानत्वात्, यथा च ज्ञानावरणीयं कर्माधिकृत्य एकत्वपृथकत्वाभ्यां द्वौ दण्डकावुक्तौ तथा दर्शनावरणीयादीन्यपि कर्माण्यधिकृत्य प्रत्येकं द्वौ द्वौ दण्डकौ वक्तव्यौ, तत एवं सति सर्वसङ्ख्यया षोडश दण्डका ।

'जीवे णं भंते ! जीवातो कतिकिरिए पं०' इति, अथ कोऽस्य सूत्रस्य सम्बन्धः ?, उच्यते, इह न केवलं वर्त्तमानभववर्त्तिनो जीवस्य ज्ञानावरणीयादिकर्मबन्धभेदप्ररूपणे कायिक्यादिक्रियाविशेषणः प्राणातिपादभेदो भवति, किन्त्वतीतभवकायसम्बन्धः कायिक्यादिक्रियाविशेष-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

णोऽपि, तत एतस्यार्थस्य प्रतिपादनार्थमिदं सूत्रम्, अस्य चेयं पूर्वाचार्योपदर्शिता भावना–'इह संसारअडवीए परिब्भमंतेहिं सव्वजीवेहिं तेसु तेसु ठाणेसु सरीरोवहाइणो विप्पमुक्का तेहि य सत्थभूएहिं जया कस्सइ स्वतः परितापनादयो भवंति तया तस्सामिणो भवंतरगयस्सवि तत्रानिवृत्तत्वात् किरियासम्भव इति, व्युत्सृष्टेषु तु न भवति निवृत्तत्वात्,

एत्थ उदाहरणं–वसंतपुरे नयरे अजियसेनस्स रन्नो पडिचारगा दुवे कुलपुत्तगा, तत्थेगो समणसड्ढो इयरो मिच्छद्दिट्ठी, अन्नया रयणीए रन्नो निस्सरणं संभमतुरंताण तेसिं घोडगारूढाणं खग्गा पब्भट्ठा, सड्ढेण जनकोलाहलो मग्गिओ न लहइ, इयरेण हसियं–किमण्णं न होहि ?, सड्ढेण अहिगरणंतिकट्टु वोसिरियं, इयरे च खग्गग्गाहिणो बंदिग्गहसाहसिएहिं लद्धा, गहिओ अन्नेहिं रायवल्लहो पलयमाणो वावाइओ, तओ आरक्खिएहिं गहिऊण रायसमीवं नीया, कहिओ वुत्तंतो, कुविओ राया, पुच्छियं चणेण–कस्स तुब्भो ? तेहिं कहियं–अणाहा–कल्लं चिय, कप्पडिया एए तुम्हा खग्गा कहिं लद्धत्ति, पुच्छिएहिं कहियं पडिया इति, तओ सामरिसेण रण्णा भणियं–गवेसह तुरियं मम अणबद्धवेरिणं ईसरपुत्ताणं महापमत्ताणं केसिं इमे खग्गेत्ति ?, तओ तेहिं निउणं गवेसिऊण विण्णत्तं रण्णो–सामि ! गुणचंदबालचंदाणमिति, ततो रण्णा पिहं पिहं सद्दावेऊण भणिया–लेह नियखग्गे, एक्केण गहियं, पुच्छिओ रण्णा–कहं ते पणट्ठंति ?, तेण कहियं जहावित्तं, कीस न गविट्ठं ?, भणइ–सामि ! तुम्ह पसाएणं एद्दहमेत्तमवि गवेसामि ?, सड्ढो नेच्छइ, रण्णा पुच्छिओ– कीस न गेण्हसि ?, तेण भणियं–सामि ! अम्हाणमेस ठिई चेव नत्थि जमेवं गेण्हिज्जइ अहिगरणत्तणओ, परं संभमेण मग्गंतेणवि न लद्धंति वोसि यं अतो न कप्पइ मे गिण्हिउं, तओ रन्ना पमायकारी अनुसासिओ, इयरो विमुक्को, एस दिट्ठंता इमो य से अत्थोवणओ–जहा सो पमायगब्भेण अवोसिरियदोसेण अवराहं पत्तो एवं जीवोवि जम्मंतरत्थं देहोवहाइ अवोसिरंतो अनुमयभावतो पावेइ दोसं ?, श्रूयते च जातिस्मरणादिना विज्ञाय पूर्वदेहमतिमोहात् (केचित्) सुरनदीं प्रत्यस्थिशकलानि नयन्तीति । इतानमीं सूत्रव्याख्या–

जीवो भदन्त ! जीवमधिकृत्य कतिक्रियः प्रज्ञप्तो ?, भगवानाह–गौतम ! स्यात्–क्वचित् त्रिक्रियः कायिक्याधिकरणिकीप्राद्वेषिकीभावात्, तत्र वर्त्तमानभवमधिकृत्य भावना प्राग्वत् भावनीया, अतीतभवमधिकृत्यैवं–कायिकी तत्सम्बन्धिनः कायस्य कार्येकदेशस्य वा व्याप्रियमाणत्वात्, आधिकरणिकी तत्संयोजितानां हलगरकूटयन्त्रादीनां तन्निर्वर्त्तितानां वा असिकुन्ततोमरादीनां परोपघाताय व्याप्रियमाणत्वात्, यदिवा देहोऽप्यधिकरणमित्याधिकरणिक्यपि, प्राद्वेषिकी तद्विषयाऽकुशलपरिणामप्रवृत्तेरप्रत्याख्यातत्वात्, स्याच्चतुष्क्रियः पारितापनिक्यपि कायेन कायैकदेशेनाधिकरणेन वा तत्सम्बन्धिना क्रियमाणत्वात्, स्यात्पञ्चक्रियो यदा तेन जीवितादपि व्यपरोपणमाधीयते, स्यादक्रियो यदा पूर्वजन्मभावि शरीरमधिकरणं वा त्रिविधं त्रिविधेन व्युत्सृष्टं भवति, न चापि तज्जन्मभाविना शरीरेण काञ्चिदपि क्रियां करोति, इदं चाक्रियत्वं मनुष्यापेक्षया द्रष्टव्यं, तस्यैव सर्वविरतिभावात्, सिद्धापेक्षया वा, तस्य देहमनोवत्त्यभावेनाक्रियत्वात्, अमुमेवार्थं चतुर्विंशतिदण्डकक्रमेण निरूपयति–

'जीवे णं भंते ! नेरइयाओ कइकिरिए' इत्यादि सुगमं, नवरमयं भावार्थः–देवनारकान् प्रति चतुष्क्रिय एव, तेषां जीविताद् व्यपरोपणस्यासम्भवाद् 'अनपवर्त्त्यायुषो नारकदेवा' इति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वचनात्, शेषान् सङ्ख्येयवर्षायुषः प्रति पञ्चक्रियोऽपि, तेषामवर्त्त्यायुष्कतया जीविताद् व्यपरोपणस्यापि सम्भवात्, तदेवमेकस्य जीवस्य एकं जीवं प्रति क्रियाश्चिन्तिताः, सम्प्रत्येकस्यैव जीवस्य बहून् जीवान् प्रति क्रियाश्चिन्तयति–

'जीवे णं भंते ! जीवेहिंतो कइकिरिए पन्नत्ते' इत्यादि, एषोऽपि दण्डकः प्राग्वद्भावनीयः, अधुना बहूनां जीवानामेकं जीवमधिकृत्य क्रियाश्चिन्तयति– 'जीवा णं भंते ! जीवातो कइकिरिया पं०' इत्यादि, एषोऽपि दण्डकः प्रथमदण्डकवदवसेयः, अधुना बहूनां जीवानां बहून् जीवानधिकृत्य सूत्रमाह–

'जीवा णं भंते ! जीवेहिंतो कइकिरिया पं० ?' इत्यादि, अत्र प्रश्नः पाठसिद्धो, निर्वचनमिदं–गौतम ! त्रिक्रिया अपि चतुष्क्रिया अपि पञ्चक्रिया अपि अक्रिया अपि, कस्यापि जीवस्य कमपि जीवं प्रति त्रिक्रियत्वात् कसल्यापि चतुष्क्रियत्वात् कस्यापि पञ्चक्रियत्वात् कस्यापि मनुष्यस्य सर्वोत्तमचारित्रिणः सिद्धस्य वा शेषस्याक्रियत्वात् इति सर्वत्र बहुवचनरूप एक एव भङ्गः, एवं नैरयिकादिक्रमेण तावद् वक्तव्यं यादद्वैमानिकसूत्रं, नवरं नैरयिकान् दैवांश्च प्रति त्रिक्रिया अपि चतुष्क्रिया अपि अक्रिया अपीति वक्तव्यं, शेषान् सङ्ख्येयवर्षायुषः प्रति पञ्चक्रिया अपीति, तदेवं सामान्यतो जीवपदमधिकृत्य दण्डकचतुष्टयमुक्तं, सम्प्रति नैरयिकपदमधिकृत्याह–

'नेरइए णं भंते ! जीवातो कतिकिरिए पं०' इत्यादि 'एवं जाव वेमाणिएहिंतो' इति, अत्र यावत्करणात् 'नैयरिको जीवान् प्रति कतिक्रिय' इति इत्यादिरूपो द्वितीयोऽपि दण्डक उक्तो द्रष्टव्यः, सर्वत्र औदारिकशरीरान् सङ्ख्येयवर्षायुषः प्रति स्यात् त्रिक्रियः स्यात् चतुष्क्रियः स्यात् पञ्चक्रिय इति वक्तव्यं, नैरयिकस्य देवान् प्रति पञ्चमी जीविताद् व्यपरोपणरूपा क्रिया नास्ति, तेषामनपवर्त्यायुष्कत्वात्, ततस्तान् प्रति स्यात् त्रिक्रियः स्याच्चतुष्क्रिय इति वक्तव्यं, नैरयिको देवान् प्रति कथं चतुष्क्रिय इति चेत्, उच्यते, इह भवनवास्यादयो देवास्तृतीयां पृथिवींयावत् गता गमिष्यन्ति च, किमर्थं गता गमिष्यन्तीति चेत् ?, उच्यते, पूर्वसाङ्गतिकस्य वेदनामुपशमयितुं पूर्ववैरिणो वेदनामुदीरयितुं (वा) तत्र गच्छन्ति, तदानीमनन्तकालादेतदपि भवति (यद्) तद्गताः सन्तो नारकैर्बध्यन्ते इति, आह च मूलटीकाकारोऽपि–

"तत्र गता नारकैर्बध्यन्ते इत्यप्यनन्तकाल एव कथञ्चित्सम्भवमात्र"मिति, अत्रापर आह–ननु नारकस्य द्वीन्द्रियादीनधिकृत्य कथं कायिक्यादिक्रियासम्भवः ?, उच्यते, इह नारकैर्यस्मात् पूर्वभवशरीरं न व्युत्सृष्टं विवेकाभावात्, तदभावश्च भवप्रत्ययात्, ततो यावत् शरीरं तेन जीवेन निर्वर्त्तितं सत् तं शरीरपरिणामं सर्वथा न परित्यजति तावद् देशतोऽपि तं परिणामं भजमानं पूर्वभावप्रज्ञापनया तस्येति व्यपदिश्यते घृतघटवत्, यथा हि घृतपूर्णो घटो घृते अपगतेऽपि घृतपट इति व्यपदिश्यते, तथा तदपि शरीरं तेन निर्वर्त्तितमिति तस्येति व्यपदेशमर्हति, ततस्यस्य शरीरस्य एकदेशेनास्थ्यादिना योऽन्तः प्राणातिपातं करोति, ततः पूर्वनिर्वर्त्तितशरीरजीवोऽपि कायिक्यादिक्रियाभिर्युज्यते, तेन तस्याव्युत्सृष्टत्वात्,

तत्रेयं पञ्चानामपि क्रियाणां भावनातत्कायस्य व्याप्रियमाणत्वात् कायिकी कायोऽधिकरणमपि भवतीत्युक्तं प्राक् तत आधिकरणिकी, प्राद्वेषिक्यादयस्त्वेवं–यदा तमेव शरीरैकदेशं अभिघातादिसमर्थमन्यः कश्चनापि प्राणातिपातोद्यतो दृष्ट्वा, तस्मिन् घात्ये द्वीन्द्रियादौ

Jain Education International   For Private & Personal Use Only   www.jainelibrary.org

समुत्पन्नक्रोधादिकारणोऽभिधातादिसमर्थमिदं शस्त्रमिति चिन्तयन् अतीवक्रोधादिपरिणामं भजते पीडां चोत्पादयति जीविताच्च व्यपरोपयति तदा तत्सम्बन्धिप्राद्वेषिक्यादिक्रियाकारणत्वान्नैगमनयाभिप्रायेण तस्यापि प्राद्वेषिकी पारितापनिकी प्राणातिपातक्रिया च यथायोगं,

यथा च नैरयिकपदे चत्वारो दण्डका उक्ताः तथा असुरकुमारादिष्वपि शेषेषु त्रयोविंशतौ स्थानेषु चत्वारःचत्वारो दण्डका वक्तव्याः, नवरं जीवपदे मनुष्यपदे चाक्रिया इत्यपि वक्तव्यं, विरतिप्रतिपत्तौ व्युत्सृष्टत्वेन तन्निमित्तक्रियाया असम्भवात्, शेषां अक्रिया नोच्यन्ते, विपत्यभावतःस्वशरीरस्य भवान्तरगतस्याव्युत्सृष्टत्वेनावश्यं क्रियासम्भवात्, तदेवं सामान्यतो जीवपदे एकं शेषाणि तु नैरयिकादीनि स्थानानि चतुर्विंशतिरिति सर्वसङ्ख्यया पञ्चविंशतिरेकैकस्मिंश्च स्थाने चत्वारो दण्डका इति सर्वसङ्कलनया दण्डकशतं ।

अथ केषां जीवानां कति क्रिया इति निरूपणार्थं प्रागुक्तमेव सूत्रं पठति–

मू. (५२९) कति णं भंते! किरियाओ पन्नत्ताओ?, गोयमा! पंच किरियाओ पन्नत्ताओ, तं०–कातिया जाव पाणातिवातकिरिया, नेरइया णं भंते ! कति किरियातो प०, गो० ! पंच किरियातो प०तं० कातिया जाव पाणातिवायकि०, एवं जाव वेमाणियाणं,

जस्स णं भंते ! जीवस्स कातिया किरिया कज्जइ तस्स अहिगरणिया किरिया कज्जति जस्स अहिगरणिया किरिया कज्जति तस्स कातिया कज्जति ?, गो० ! जस्स णं जीवस्स कातिया किरिया कज्जति तस्स अहिगरणी किरिया नियमा क०, जस्स अहिगरणी किरिया क० तस्सवि काइया किरिया नियमा कज्जति,

जस्स णं भंते ! जीवस्स काइया किं० तस्स पादोसिया कि० जस्स पादोसिया कि० तस्स काइया किं० क० ?, गो० ! एवं चेव, जस्स णं भंते ! जीवस्स काइया किरिया कज्जइ तस्स पारियावणिया किरिया कज्जइ जस्स पारियावणिया किरिया कज्जइ तस्स कातिया किरिया कज्जइ गो० ! जस्स णं जीवस्स काइया किं० कं० तस्स पारितावणिया सिय कज्जइ सिय नो कज्जइ, जस्स पुण पारियावणिया कि० क० तस्स काइया नियमा कज्जति, एवं पाणाइवायकिरियावि,

एवं आदिल्लाओ परोप्परं नियमा तिन्नि कज्जंति, जस्स आइल्लाओ तिन्नि कज्जंति तस्स उवरिल्लाओ दोन्नि सिय कज्जंति सिय नो कज्जंति, जस्स उवरिल्लाओ दोन्नि कज्जंति तस्स आइल्लाओ नियमा तिन्नि कज्जंति, जस्स णं भंते ! जीवस्स पारियावणिया किरिया कज्जति तस्स पाणातिवायकिरिया कज्जति, जस्स पाणातिवायकिरिया कज्जति तस्स पारियावणिया किरिया कज्जति गो० ! जस्स णं जीवस्स पारियावणिया कि० तस्स पाणातिवातकिरिया सिय कज्जति सिय नो कज्जति, जस्स पुण पाणातिपातकिरियाकज्जति तस्स पारियावणिया किरिया नियमा कज्जति, जस्स णं भंते ! नेरइयस्स काइया किरिया कज्जति तस्स अधिगरणिया किरिया कज्जति ?, गो० ! जहेव जीवस्स तहेव नेरइयस्सवि, एवं निरंतरं जाव वेमाणियस्स ।

जं समयं णं भंते ! जीवस्स काइया कि० क० तं समयं अधिगरणिया कि० जं समयं अधिगरणिया कि० क० तं समयं काइया कि०, एवं जहेव आइल्लओ दंडओ तहेव भाणितव्वो, जाव वेमाणियस्स । जंदेसेणं भंते ! जीवस्स काइया कि० तंदेसेणं अधिगरणिया किं० तहेव जाव वेमाणियस्स । जंपएसेणं भंते ! जीवस्स काइया किं० तं पदेसं आधिगरणिया कि० एवं तहेव

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जाव वेमाणियस्स, एवं एते जस्स जंसमयं जंदेसं जंपएसेणं चत्तारि दंडगा होंति ।

कति णं भंते! आतोजितातो किरियाओ पन्नत्तातो?, गो० ! पंच आओजियाओ किरियाओ पन्नत्ताओ, तं०—काइया जाव पाणातिवातकिरिया, एवं नेरइयाणं जाव वेमाणियाणं, जस्स णं भंते! जीवस्स काइया आतोजिया किरिया अत्थि तस्स अधिगरणिया किरिया आतोजिता अत्थि जस्स अधिगरणिया आतोजिता किरिया अत्थि तस्स काइया आतोजिया किरिया अत्थि एवं एतेणं अभिलावेणं ते चेव चत्तारि दंडगा भाणितव्वा, जस्स जंसमयं जंदेसं जं जाव वेमाणियाणं

जीवे णं भंते ! जंसमयं काइयाए अधिगरणियाए पादोसियाते किरियाए पुट्ठे तंसमयं पारियावणियाते पुट्ठे पाणातिवातकिरियाते पुट्ठे?, गो० ! अत्थेगतिते जीवे एगतियाओ जीवओ जंसमयं काइयाए अधिगरणियाए पाओसियाए किरियाए पुट्ठे तं समयं पारियावणियाए किरियाए पुट्ठे पाणाइवायकिरियाए पुट्ठे १ अत्थेगतिते जीवे एगतियाओ जीवाओ जंसमयं कायइयाए अधिगरणियाए पादोसियाते किरियाए पुट्ठे तं समयं पारितावणियाए किरियाए पुट्ठे पाणाइवायकिरियाए अपुट्ठे २ अत्थेगइए जीवे एगइयाओ जीवाओ जंसमयं काइयाए अहिगरणियाए पाओसियाए पुट्ठे तंसमयं पारि० किरि० अपुट्ठे पाणाइवायकि० अपुट्ठे ३

वृ. 'कइ णं भंते ! किरियाओ पन्नत्ताओ' इत्यादि प्राग्वत्, एता एव क्रियाः चतुर्विंशति-दण्डकक्रमेण चिन्तयति—'नेरइया णं भंते !' इत्यादि पाठसिद्धं, सम्प्रत्यासामेव क्रियाणामेकजीवा-श्रयेण परस्परमविनाभावित्वं चिन्तयति—'जस्स णं भंते !' इत्यादि, इह कायिकी क्रिया औदारिकादिक्रियाश्रिता प्राणातिपातनिर्वर्त्तन- समर्था प्रतिविशिष्टा परिगृह्यते न या काचन कार्मणकायाश्रिता वा, तत आद्यानां तिसृणां क्रियाणां परस्परं नियम्यनियामकभावः, कथमिति चेत्, उच्यते, कायोऽधिकरणमपि भवतीत्युक्तं प्राक्, ततः कायस्याधिकरणत्वात् कायिक्यां सत्यामवश्यमाधिकरणिकी आधिकरणिक्यामवश्यं कायिकी, सा च प्रतिविशिष्टा कायिकी क्रिया प्रद्वेषमन्तरेण न भवति ततः प्राद्वेषिक्याऽपि सह परस्परमविनाभावः, प्रद्वेषऽपि च काये स्फुटलिङ्ग एव वक्ररूक्षत्वादेस्तदविनाभाविनः प्रत्यक्षत एवोपलम्भात्, उक्तं च—

॥१॥ "रूक्षयति रुष्यतो ननु वक्त्रं स्निह्यति च रज्यतः पुंसः ।
औदारिकोऽपि देहो भाववशात् परिणमत्येवम् ॥"

परितापनस्य प्राणातिपातस्य चाद्यक्रियात्रयसम्भवेऽप्यनियमः, कथमिति चेत्, उच्यते, यद्यसौ घात्यो मृगादिर्घातकेन धनुषा क्षिप्तेन बाणादिनविध्यते ततस्तस्य परितापनं मरणं वा भवति, नान्यथा, ततो नियमाभावः, परितापनस्य प्राणातिपातस्य च भावे पूर्वक्रियाणामवश्यं भावस्तासामभावे तयोरभावात्, ततोऽमुमेवार्थं परिभाव्य कायिकी शेषामिशचतसृभि; क्रियाभिः सह आधिकरणिकी तिसृभिः क्रियाभिः सह प्राद्वेषिकी द्वाभ्यां सूत्रतः सम्यक् चिन्तनीया, पारितापनिकी प्राणातिपातक्रिययोस्तु सूत्रं साक्षादाह—

'जस्स णं भंते ! जीवस्स पारियावणिया किरिया कज्जति' इत्यादि, पारितापनिक्या; सद्भावे-प्राणातिपातक्रिया स्याद् भवति, यदा बाणाद्यभिधातेन जीविताद् च्याव्यते तदा भवति शेषकालं न भवतीत्यर्थः, यस्य पुनः प्राणातिपातक्रिया तस्य नियमात् पारितापनिकी, परितापनमन्तरेण प्राणव्यपरोपणासम्भवात् ! सम्प्रति नैरयिकादिचतुर्विंशतिदण्डकक्रमेण परस्परमविनाभावं

Jain Education International   For Private & Personal Use Only   www.jainelibrary.org

चिन्तयति– 'जस्स णं भंते ! नेरइयस्स काइयाकिरिया कज्ञति' इत्यादि प्रतीतं, भावितत्वात् । तदेवमेको दण्डक उक्तः, सम्प्रति कालमधिकृत्योक्तप्रमारेणैव द्वितीयदण्डकमाह–

'जं समयं णं भंते ! जीवस्स काइया किरिया कज्जइ तं समयं अहिगरणिया कज्जइ जं समयं अहिगरणिया कज्जइ' इत्याद्यारभ्य सर्वं पूर्वोक्तं तदवस्थं तावद्वक्तव्यं यावद्वैमानिकसूत्रं, तथा चाह–'एवं जहेव आइल्लतो दंडओ तहेव भाणियव्वो जाव वेमाणियस्स' इति, समयग्रहणेन चेह सामान्यतः कालो गृह्यते, न पुनः परमनिरुद्धो यथोक्तस्वरूपो नैश्चयिकः समयः, परितापनस्य प्राणातिपातस्य वा बाणादिक्षेपजन्यतया कायिक्याः प्रथमसमये एवासम्भवात्, एष द्वितीयो दण्डकः, सम्प्रति द्वौ दण्डकौ क्षेत्रमधिकृत्याह–

'जंदेसेणं भंते ! जीवस्स' इत्यादि, अत्रापि सूत्रं पूर्वोक्तं तदवस्थं तावद्वक्तव्यं यावद्वैमानिकसूत्रं, तथा चाह–'तहेव जाव वेमाणियस्स' एष तृतीयदण्डकः,

'जंपएसेणं भंते ! जीवस्स काइया किरिया कज्जइ' इत्यादिकश्चतुर्थः, अत्रापि सूत्रं प्रागुक्तक्रमेण तावद् वक्तव्यं यावद्वैमानिकसूत्रं, यथा चाह–'एवं तहेव जाव वेमाणिए' इति, दण्डकसङ्कलनामाह–'एवमेते' इत्यादि, एताश्च यथा ज्ञानावरणीयादिकर्मबन्धकारणं तथा संसारकारणमपि, ज्ञानावरणीयादिकर्मबनधस्य संसारकारणतया तद्धेतुत्वेन तासामपि संसारकारणत्वोपचारात्, तथा चाह– 'कइ णं भंते ! आजोजियाओ किरियाओ पन्नत्ताओ' इत्यादि, आयोजयन्ति जीवं संसारे इत्यायोजिकाः–कायिक्यादिकाः शेषं सर्वं सुगमं, सूत्रपाठस्तु पूर्वोक्तप्रकारेण तावद् वक्तव्यो यावत् यस्येति यं समयमिति यं देशमिति यं प्रदेशमिति परिपूर्णाश्चत्वारो दण्डकाः, 'यं समय' मित्यादौ, तु 'कालाध्वनोव्याप्ता' वित्यधिकरणे द्वितीया, ततो यस्मिन् समये यस्मिन् देशे यस्मिन् प्रदेशे इति व्याख्येयं,

'जीवे णं भंते ! जं समयं काइयाए अहिगरणियाए' इत्यादि, अत्रापि समयग्रहणेन सामान्यतः कालो गृह्यते, प्रश्नसूत्रं सुगमं, निर्वचनसूत्रे भङ्गत्रयी–कश्चिज्जीवमधिकृत्य कश्चिज्जीवो यस्मिन् समये–काले क्रियात्रयेण स्पृष्टस्तस्मिन् समये पारितापनिक्याऽपि स्पृष्टः प्राणातिपातक्रियया चेत्येको भङ्गः, पारितापनिक्या स्पृष्टः प्राणातिपातेनास्पृष्ट इति द्वितीयः, पारितापनिक्या प्राणातपातक्रियया चास्पृष्ट इति तृतीयः, एष च तृतीयो भङ्गो बाणादेर्लक्षात्परिभ्रंशेन घात्यस्य मृगादेः परितापनाद्यसम्भवे वेदितव्यः, यस्तु यस्मिन् समये यं जीवमधिकृत्याद्यक्रियात्रयेणास्पृष्टः स तस्मिन् समये तमधिकृत्य नियमात् पारितापनिक्या प्राणातिपातक्रियया चास्पृष्टः, कायिक्याद्यभावे परितापनादेरभावात्

तदेवमुक्ताः क्रियाः, साम्प्रतं प्रकारन्तरेण क्रिया निरूपयति–

मू. (५३०) *कति णं भंते ! किरियाओ पन्नत्ताओ ?, गो० ! पंच किरियाओ पं०, तं०–आरंभिया परिग्गहिया मायावत्तिया अपच्चक्खाणकिरिया मिच्छादंसणवत्तिया,*

आरंभिया णं भंते ! किरिया कस्स कज्ञति ?, गो० ! अन्नयरस्सवि पमत्तसंजयस्स, परिग्गहिया णं भंते ! किरिया कस्स कज्जइ ?, गो० ! अन्नयरस्सवि संजयासंजयस्स,

मायावत्तिया णं भंते ! किरिया कस्स कज्ञति ?, गो० ! अन्नयरस्सावि अपमत्तसंजयस्स, अपच्चक्खाणकिरिया णं भंते ! कस्स कज्ञति ?, गो० ! अन्नयरस्सवि अपच्चक्खाणिस्स,

मिच्छादंसणवत्तिया णं भंते ! किरिया कस्स कज्ञति ?, गो० ! अन्नयरस्सावि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मिच्छादंसणिस्स।

नेरइयाणं भंते ! कति किरियातो पं० ?, गो० ! पंच किरियातो पं०, तं०–आरंभिया जाव मिच्छादंसणवत्तिया, एवं जाव वेमाणियाणं। जस्स णं भंते ! जीवस्स आरंभिया किरिया क० तस्स परिग्गहिया किं कज्जति ? जस्स परिग्गहिया कि० तस्स आरंभिया कि० ?, गो० ! जस्स णं जीवस्स आरंभिया कि० तस्स परिग्गहिया सिय कज्जति सिय नो कज्जति, जस्स पुण परिग्गहिया किरिया क० तस्स आरंभिया कि० नियमा क०, जस्स णं भंते ! जीवस्स आरंभियाकि० क० तस्स मायावत्तिया कि० क० पुच्छा, गो० ! जस्स णं जीवस्स आरंभिया कि० क० तस्स मायावत्तिया कि० नियमा क० जस्स पुण मायावत्ति० कि० क० तस्स आरंभिया कि० सिय कज्जति सिय नो क०, ।

जस्स णं भंते ! जीवस्स आरंभिया कि० तस्स अपच्चक्खाणकिरिया पुच्छा ?, गो० ! जस्स जीवस्स आरंभिया कि० तस्स अपच्चक्खाणकिरिया सिय कज्जति सिय नो० क० जस्स पुण अपच्चक्खाणकिरिया क० तस्स आरंभिया किरिया नियमा क०, एवं मिच्छादंसणवत्तियाएवि समं, एवं पारिग्गहियावि तिहिं उवरिल्लाहिं समं संचारेतव्वा, जस्स मायावत्तिया कि० तस्स उवरिल्लाओ दोवि सिय कज्जंति सिय नो कज्जंति, जस्स उवरिल्लाओ दो कज्जंति तस्स मायावत्तिया नियमा कज्जति, जस्स अपच्चक्खाणकि० क० तस्स मिच्छादंसणवत्तिया किरिया सिय कज्जति सिय नो कज्जति, जस्स पुण मिच्छादंसणवत्तिया कि० तस्स अपच्चक्खाणकिरिया नियमा कज्जति

नेरइयस्स आइल्लियातो चत्तारि परोप्परं नियमा कज्जति, जस्स एताओ चत्तारि कज्जंति तस्स मिच्छादंसणवत्तिया कि० भइज्जति, जस्स पुण मिच्छादंसणवत्तिया किरिया कज्जति तस्स एतातो चत्तारि नियमा कज्जंति, एवं जाव थणियकुमारस्स, पुढविकाइयस्स जाव चउरिंदियस्स पंचवि परोप्परं नियमा कज्जंति, ।

पंचिंदियतिरिक्खजोणियस्स आतिल्लियातो तिन्निवि परोप्परं नियमा कज्जंति, जस्स एयाओ कज्जंति तस्स उवरिल्लिया दोन्नि भइज्जंति, जस्स उवरिल्लातो दोन्नि कज्जंति तस्स एतातो तिन्निवि नियमा कज्जंति, जस्स अपच्चक्खाणकिरिया तस्स मिच्छादंसणवत्तिया सिय कज्जति सिय नो क०, जस्स पुण मिच्छादंसणवत्तिया किरिया क० तस्स अपच्चक्खाणकिरिया नियमा क०, मणूसस्स जहा जीवस्स, । वाणमंतरजोइसियवेमाणियस्स जहा नेरइयस्स, जं समयण्णं भंते ! जीवस्स आरंभिया कि० क० तं समयं पारिग्गहिया कि० क० ?, एवं एते जस्स जं समयं जं देसं जं पदेसेण य चत्तारि दंडगा नेयव्वा, जहा नेरइयाणं तहा सव्वदेवाणं नेतव्वं जाव वेमाणियाणं।

• वृ. 'कइ णं भंते !' इत्यादि, आरम्भः–पृथिव्याद्युपमर्द्दः, उक्तं च–

॥१॥ "संरंभो संकप्पो परितावकरो भवे समारंभो।
आरंभो उद्दवतो सुद्धनयाणं तु सव्वेसिं ॥"

आरम्भः प्रयोजनं–कारणं यस्याः सा आरम्भिकी, 'परिग्गहिय'त्ति परिग्रहो–धर्मोपकरण-वर्ज्जवस्तुस्वीकारः धर्म्मोपकरणमूर्च्छा च परिग्रह एव पारिग्रहिकी परिग्रहेण निर्वृत्ता वा पारिग्राहिकी, 'मायावत्तिया' इति माया–अनार्जमुपलक्षणत्वात् क्रोधोदेरपि परिग्रहः माया प्रत्ययः–कारणं यस्याः सा मायाप्रत्यया 'अपच्चक्खाणकिरिया' इति अप्रत्याख्यानं–मनागपि विरतिपरिणामा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भावस्तदेव क्रिया अप्रत्याख्यानक्रिया, 'मिच्छादंसणवत्तिया' इति मिथ्यादर्शनं प्रत्ययो–हेतुर्यस्याः सा मिथ्यादर्शनप्रत्यया,

एतासां क्रियाणां मध्ये यस्य या सम्भवति तस्य तां निरूपयति–'आरंभिया णं भंते !' इत्यादि, 'अन्नयरस्सवि पमत्तसंजयस्स' इति अत्रापिशब्दो भिन्नक्रमः प्रमत्तसंयतस्याप्यन्यतरस्य–एकतरस्य कस्यचित् प्रमादे सति कायदुष्प्रयोगभावतः पृथिव्यादेरुपमर्द्दसम्भवात्, अपिशब्दोऽन्येषामधस्तनगुणस्थानवर्त्तिनां नियमप्रदर्शनार्थः, प्रमत्तसंयतस्याप्यारम्भिकी क्रिया भवति किं पुनः शेषाणां देशविरतिप्रभृतीनामिति ?, एवमुत्तरत्रापि यथायोगमपिशब्दभावना कर्त्तव्या, पारिग्रहिकी संयतासंयतस्यापि देशविरतस्यापीत्यर्थः, तस्यापि परिग्रहधारणात्, मायाप्रत्यया अप्रमत्तसंयतस्यापि, कथमिति चेत्, उच्यते, प्रवचनोड्डाहप्रच्छादनार्थं वल्लीकरणसमुद्देशादिषु, अप्रत्याख्यानक्रिया अन्यतरस्याप्यप्रत्याख्यानिनः, अन्यतरदपि–न किञ्चिदपीत्यर्थः यो न प्रत्याख्याति तस्येति भावः, मिथ्यादर्शनक्रिया अन्यतरस्यापि सूत्रोक्तमेकमप्यक्षरमरोचयमानस्येत्यर्थः मिथ्यादृष्टेर्भवति ।

एता एव क्रियाश्चतुर्विंशतिदण्डकक्रमेण निरूपयति–'नेरइयाणं भंते' इत्यादि सुगमं । सम्प्रत्यासां क्रियाणां परस्परमविनाभावं चिन्तयति–तद्यथा–यस्यारम्भिकी क्रिया तस्य पारिग्रहिकी स्याद्भवति स्यान्न भवति, प्रमत्तसंयतस्य न भवति शेषस्य भवतीत्यर्थः, तथा यस्यारम्भिकी क्रिया तस्य मायाप्रत्यया नियमाद्भवति, यस्य मायाप्रत्यया तस्यारम्भिकी क्रिया स्याद्भवति स्यान्न भवति, अप्रमत्तसंयतस्य न भवति शेषस्य भवतीत्यर्थः, तथा यस्यारम्भिकी क्रिया तस्याप्रत्याख्यानक्रिया स्याद्भवति स्यान्न भवति, प्रमत्तसंयतस्य देशविरतस्य च न भवति, शेषस्य अविरतसम्यग्दृष्ट्यादेर्भ- वतीति भावः, यस्य पुनरप्रत्याख्यानक्रिया तस्यारम्भिकी नियमात्, अप्रयाख्यानिनोऽवश्यमारम्भ- सम्भवात्, एवं मिथ्यादर्शनप्रत्ययापि सहाविनाभावो भावनीयः,

तथाहि–यस्यारम्भिकी क्रिया तस्य मिथ्यादर्शनप्रत्यया स्याद्भवति स्यान्न भवति, मिथ्यादृष्टेर्भवति शेषस्य न भवतीत्यर्थः, यस्य तु मिथ्यादर्शनक्रिया तस्य नियमादारम्भिकी, मिथ्यादृष्टेरविरतत्वेनावश्यमारम्भसम्भवात्, तदेवमारम्भिकी क्रिया पारिग्राहिक्यादिभिश्चतसृभिरुपरितनीभिः क्रियाभिः सह परस्परमविनाभावेन चिन्तिता, एवं पारिग्राहिकी तिसृभिर्मायाप्रत्यया द्वाभ्यामप्रत्याख्यानक्रिया एकया मिथ्यादर्शनप्रत्यया चिन्तनीया, तथा चाह–'एवं पारिग्गहियावि तिहिं उवरिल्लाहिं समं संचारेयव्वा' इत्यादि सुगमं, भावनायाः सुप्रतीतत्वात् ।

अमुमेवार्थं चतर्विंशतिदण्डकक्रमेण निरूपयति–'नेरइयस्स आइल्लातो चत्तारि' इत्यादि, नैरयिकाद्युत्कर्षतोऽप्यविरतसम्यग्दृष्टिगुणस्थानकं यावन्न परतःततो नैरयिकाणामाद्याश्चतस्रः क्रियाः परस्परमविनाभाविन्यः, मिथ्यादर्शनक्रियां प्रति स्याद्वादः, तमेमाह–'जस्स एयाओ चत्तारि' इत्यादि, मिथ्यादृष्टेर्मिथ्यादर्शनक्रिया भवति शेषस्य न भवतीति भावः'', यस्य पुनर्मिथ्यादर्शनक्रिया तस्याद्याश्चतस्रो नियमात्, मिथ्यादर्शने सत्यारम्भिक्यादीनामवश्यंभावात्, एवं तावद्वक्तव्यं यावत्स्तनितकुमारस्य ।

पृथिव्यादीनां चतुरिन्द्रियपर्यवसानानां पञ्च क्रियाः परस्परमविनाभाविन्यो वक्तव्याः, पृथिव्यादीनां मिथ्यादर्शनक्रियाया अप्यवश्यंभावात्, तिर्यक्पञ्चेन्द्रियस्याद्यास्तिस्रः परस्परमविना-

Jain Education International   For Private & Personal Use Only   www.jainelibrary.org

भूता देशविरतिं यावदासामवश्यंपभावात्, उत्तराभ्यां तु द्वाभ्यां स्याद्वादः, तमेव दर्शयति–'जस्स एयाओ कज्जंति' इत्यादि, देशविरतस्य न भवतः शेषस्य भवत इति भावः, यस्य पुनः उपरितन्यौ द्वेक्रिये तस्याद्यास्तिस्रो नियमाद्भवन्ति, उपरितन्यौ हि क्रिये अप्रत्याख्यानक्रिया मिथ्यादर्शनप्रत्यया च, तत्राप्रत्याख्यानक्रिया अविरतसम्यग्दृष्टिं यावत् मिथ्यादर्शनक्रिया मिथ्यादृष्टेः आद्याश्वतस्रो देशविरतिं यावत् अत उपरितन्योर्भावेऽवश्यमाद्यानां तिसृणां भावः, सम्प्रति अप्रत्याख्यानक्रियया मिथ्यादर्शनक्रिययास्तिर्यक्पञ्चेन्द्रियस्य परस्परमविनाभावं चिन्तयति–

'जस्स अपच्चक्खाणकिरिया' इत्यादि भावितं, मनुष्ये यथा जीवपदे तथा वक्तव्यं, व्यन्तरज्योतिष्कवैमानिकानां यथा नैरयिकस्य, एवमेव एको दण्डकः, 'एवमेव जं समयं णं भंते जीवस्से'त्यादिको द्वितीयः, 'जं देसण्ण'मित्यादिकः तृतीयः, 'जं पएसण्ण'मित्यादिकश्चतुर्थः। अथ षट् कायाःप्राणातिपातक्रियाहेतव एव भवन्ति किं वा तद्विरमणहेतवोऽपीति पृच्छति–

मू. (५३१) *अत्थि णं भंते! जीवाणं पाणातिवायवेरमणे कज्जति?, हंता! अत्थि, कम्हिं णं भंते! जीवाणं पाणातिपातवेरमणे क० ?, गो० ! छसु जीवनिकाएसु, अत्थि णं भंते! नेरइयाणं पाणातिवातवेरमणे क० ?, गो० ! नो इणट्ठे समट्ठे, एवं जाव वेमाणियाणं, नवरं मणूसाणं जहा जीवाणं, एवं मुसावाएणं जाव मायामोसेणं,*

जीवस्स य मणूसस्स य, सेसाणं नो तिणट्ठे समट्ठे, नवरं अदिन्नादाणे गहणधारणिज्जेसु दव्वेसु, मेहुणे रूवेसु वा रूवसहगएसु वा दव्वेसु, सेसाणं सव्वेसु दव्वेसु,

अत्थि णं भंते! जीवाणं मिच्छादंसणसल्लवेरमणे कज्जति?, हंता! अत्थि, कम्हिं णं भंते जीवाणं मिच्छादंसणसल्लवेरमणे कज्जति?, गो० ! सव्वदव्वेसु, एवं नेरइयाणं जाव वेमाणियाणं, नवरं एगिंदियविगलेंदियाणं नो तिणट्ठे समट्ठे

वृ. 'अत्थि णं भंते!' इत्यादि, सर्वत्र क्रियते कर्मकर्त्तरिप्रयोगः ततो भवतीति द्रष्टव्यः, प्राणातिपातादिविरमणविषयाश्च षट् कायादयः प्रागेव भाविता इति न भूयो भाव्यन्ते, विरतिश्च प्राणातिपातादीनां मायामृषापर्यन्तानां जीवपदे मनुष्यपदे वक्तव्या, शेषेषु स्थानेषु नायमर्थः समर्थ इति वक्तव्यं, तेषां भवप्रत्ययतःसर्वविरत्यसम्भवात्, मिथ्यादर्शनविरमणविषयचिन्तायां सर्वद्रव्येष्विति उपलक्षणमेतत् सर्वपर्यायेष्वपि, अन्यथा एकस्मिन् द्रव्ये पर्याये वा मिथ्यात्वभावे मिथ्यादर्शनविरमणासम्भवात्,

॥१॥ "सूत्रोक्तस्यैकस्याप्यरोचनादक्षरस्य भवति नरः।
मिथ्यादृष्टिः सूत्रं हि नः प्रमाणं जिनाभिहितम्॥"

इति वचनात्, मिथ्यादर्शनशल्यविरमणं च एकेन्द्रियविकलेन्द्रियवर्जेषु स्थानेषु, शेषेषु एकेन्द्रियादिषु न भवति, कस्मादिति चेत्, उच्यते, पृथिव्यादिषु 'उभयाभावो पुढवाइएसु' प्रतिपद्यमानप्रतिपन्नाभावः पृथिव्यादिषु इति वचनात्, द्वीन्द्रियादीनां तु यद्यपि करणापर्याप्तावस्थायां केषाचित् सासादनसम्यकत्वं भवति तथापि तत् मिथ्यात्वाभिमुखानां तत्प्रतिकूलानामतस्तेषामपि मिथ्यादर्शनशल्यविरमणप्रतिषेधः, आह च– 'अत्थि णं भंते! जीवाणं मिच्छादंसणसल्लवेरमणे कज्जइ' इत्यादि, अथवा प्राणातिपातवि-रतस्य कर्मबन्धो भवति किं वा नेति चेत्, उच्यते, भवत्यपि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न भवत्यपि, तथा च एतदेव प्रश्नसूत्र- पूर्वकमाह-

मू. (५३२) *पाणातिपातविरए णं भंते ! जीवे कइ कम्मपगडीतो बंधति ?, गो० ! सत्तविहबंधए वा अट्ठविहबंधए वा छव्विहंधए वा एगविहबंधए वा अबंधए वा, एवं मणूसेवि भाणितव्वे, पाणातिपातविरया णं भंते ! जीवा कति कम्मपगडीतो बंधंति ?, गो० ! सव्वेवि ताव होज्ञा सत्तविहबंधगा य एगविहबंधगा य १ अहवा सत्तविहबं० एगविहबं० अट्ठविहबंधगे य २ अहवा सत्तविहबं० एगविहबं० अट्ठविहबंधगा य ३ अहवा सत्तविहबं० एगविहबं० छव्विहबंधगे य ४, अहवा सत्तविहबं० एगवि० छव्विहबंधगा य ५ अहवा सत्तविहबं० एगविहबं० अबंधए य ६ अहवा सत्तविहबं० एगविहबं० अबंधगा य ७*

-अहवा सत्तवि० एगवि० अट्ठविधंबधगे य छव्विहबंधए य १ अहवा सत्तविहबंधगा य एगविहबं० अट्ठविहबंधए य छव्विहबंधगा य २ अहवा सत्तविहबं० एगवि० अट्ठविहबंधगा य छव्विहबंधए य ३ अहवा सत्तविहबंधगा य एगविहबंधगा य अट्ठविहबंधगा य छव्विहबंधगा य ४

-अहवा सत्तविहबंधगा य एगविहबंधगा य अट्ठविहबंधए य अबंधए य १ अहवा सत्तविहबं० एगविहबं० अट्ठविहबंधए य अबंधगा य २ अहवा सत्तविहबं० एगवि० अट्ठविहबंधगा य अबंधए य ३ अहवा सत्तविहबंधगा य एगविहबंधगा य अट्ठविहबंधगा य अबंधगा य ४,

-अहवा सत्तविहबंधगा य एगविहबंधगा य छव्विहबंधगे य अबंधए य १ अहवा सत्तविहबं० एगविहबंधगा य छव्विहबंधए य अबंधगा य २, अहवा सत्तविहबंधगा य एगवि० छव्विह० अबंधए य ३ अहवा सत्तविहबंधगा य एगवि० छव्विह० अबंधगा य ४

-अहवा सत्तविहबंधगा य एगवि० अट्ठविहबंधगे य छव्विहबंधए य अबंधए य १ अहवा सत्तविहबंधगा य एगवि० अट्ठविहबंधए य छव्विहबंधए य अबंधगा य २ अहवा सत्तविहबंधगा य एगविह० अट्ठविहबंधए य छव्विहबंधगा य अबंधए य ३ अहवा सत्तविहबंधगा य एगविह० अट्ठविधबंधए य छव्विहबंधगा य अबंधगा य ४, अहवा सत्तवि० एगवि० अट्ठवि० छव्विहबंधगे य अबंधए य ५, अहवा सत्तविहबंधगा य एगवि० अट्ठविह० छव्विहबंधगे य अबंधगा य ६, अहवा सत्तवि० एगविह- अट्ठवि० छव्विहबंधगा य अबंधए य ७ अहवा सत्तविहबंधगा य एग० अट्ठवि० छव्विहबं० अबंधगा य ८ एवं एते अट्ठभंगा,

सव्वेवि मिलिया सत्तावीसं भंगा भवंति, एवं मणूसाणवि एते चेव सत्तावीसं भंगा भाणितव्वा,

एवं मुसावायविरयस्स जाव मायामोसविरयस्स जीवस्स य मणूसस्स य, मिच्छादंसण-सल्लविरए णं भंते ! जीवे कति कम्मपगडीतो बंधति ?, गो० ! सत्तविहबंधए वा अट्ठविहबंधए छव्विहबंधए वा एगवि० अबंधए वा,

मिच्छादंसणसल्लविरए णं भंते ! नेरइए कति कम्मपगडीतो बंधति ?, गो० ! सत्तविहबंधए वा अट्ठवि० जाव पंचिंदियतिरिक्खजोणिय०, मणूसे जहा जीवे, वाणमंतरजोइसितवेमाणिते जहा नेरइते, मिच्छादंसणसल्लविरया णं भंते ! जीवा कति कम्मपगडीतो बंधंति ?, गो० ! ते चेव सत्तावीसं भंगा भाणि० मिच्छादंसणसल्लविरया णं भंते ! नेरइया कति कम्मपगडीतो बंधंति ?, गो० ! सव्वेवि ताव होज्ञा सत्तविहबंधगा अहवा सत्तविहबंधगा य अट्ठविहबंधगे य अहवा सत्तविहबंधगा य अट्ठवि० एवं जाव वेमाणिया, नवरं मणूसाणं जहा जीवाणं।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ. 'पाणाइवायविरए णं भंते! जीवे' इत्यादि सुगमं, बहुवचने प्रश्नसूत्रं सुगमं, निर्वचनसूत्रे सर्वेऽपि तावद्भवेयुः सप्तविधबन्धकाश्च एकविधबन्धकाश्च, इह प्रमत्ताप्रमत्तापूर्वकरणानिवृत्तबादरसम्परायाः सप्तविधबन्धकाः प्रमत्ता अप्रमत्ताश्चायुर्बन्धकालेऽष्टविधबन्धकाः, आयुषोऽपि बन्धनात्, आयुर्बन्धश्च कादाचित्क इति कदाचित्सर्वथा न लभ्यतेऽपि, प्रमत्ताश्चाप्रमत्ताश्च सदैव बहुत्वेन लभ्यन्ते, अपूर्वकरणा अनिवृत्तिबादराश्च कदाचिन्न भवन्त्यपि, विरहस्यापि तेषामागमे प्रतिपादनात्, एकविधबन्धका उपशान्तमोहक्षीणमोहसयोगिकेवलिनः, तत्र उपशान्तमोहाः क्षीणमोहाश्च कदाचिल्लभ्यन्ते कदाचिन्न लभ्यन्ते, तेषामन्तरस्यापि सम्भवात्, सयोगिकेवलिनस्तु सदा प्राप्यन्तेऽ- न्यान्यभावेन तेषामव्यवच्छेदात्,

ततः सप्तविधबन्धका एकविधबन्धकाश्चावस्थिता इत्यष्टविधबन्धकाद्यभावे एको भङ्गः,अथवा सप्तविधबन्धका एकविधबन्धकाश्च बहव एकोऽष्टविधबन्धक इति द्वितीयः, अष्टविधबन्धकानां बहुत्वे तृतीयः, षड्बिधबन्धका अपि कदाचिल्लभ्यन्तेकदाचिन्न, उत्कर्षतः षण्मासविरहभावात्, यदापि लभ्यन्ते तदापि जघन्यपदे एको द्वौ वा उत्कर्षपदेऽष्टोत्तरं शतं ततोऽष्टविधबन्धकपदाभावे षड्विधबन्धकपदेनापि द्वौ भङ्गौ,

अबन्धका अयोगिकेवलिन्स्तेऽपि कदाचिदवाप्यन्ते कदाचिन्न, तेषामप्युत्कर्षतः षण्मासविरहभावात्, यदाऽप्यवाप्यन्ते तदापि जघन्यपदे एको द्वौ वा उत्कर्षतोऽष्टाधिकं शतं, ततोऽष्टविधबन्धकपदाभावेऽबन्धकपदेनापि द्वौ भङ्गौ, तदेवमेक आद्यो भङ्ग एककसंयोगे च षडिति सप्त भङ्गाः, इदानीं द्विकसंयोगे भङ्ग दर्श्यन्ते, तत्र सप्तविधबन्धका एकविधबन्धकाश्चावस्थिताः, उभयेषामपि सदा बहुत्वेन लभ्यमानत्वात्, ततोऽष्टविधबन्धकपदे षड्विधबन्धकपदे च प्रत्येकमेकवचनमिति एको भङ्गः,

अष्टविधबन्धकपदे एकवचनं षड्विधबन्धकपदे बहुवचनं इति द्वितीयः, एतौ द्वौ भङ्गावष्टविधबन्धकपदस्यैकवचनेन लब्धौ, एतावेव द्वौ भङ्गौ बहुवचनेनेति चत्वारः, एवमेव चत्वारो भङ्गाः अष्टविधबन्धकाबन्धकपदाभ्याम्, एवमेव चत्वारः षड्विधबन्धकाबन्धकपदाभ्यामिति, सर्वसङ्ख्यया द्विकसंयोगे द्वादश भङ्गाः, त्रयाणामष्टविधबन्धकषड्विधबन्धकरूपाणां पदानां संयोगे प्रत्येकमेकवचनबहुवचनाभ्यामष्टौ भङ्गाः, सर्वसङ्कलनया सप्तविंशतिर्भङ्गाः, अत्रापर आह–

ननु विरतस्य कथं बन्धो ?, न हि विरतिर्बन्धहेतुर्भवति, यदि पुनर्विरतिरपि बन्धहेतुः स्यात् ततो निर्मोक्षप्रसङ्गः, उपायाभावात्, उच्यते, न हि विरतिर्बन्धहेतुः, किन्तु विरतस्य ये कषायायोगास्ते बन्धकारणं, तथाहि–सामायिकच्छेदोपस्थानपरिरविशुद्धिकेष्वपि संयमेषु कषायाःसंज्वलनरूपा उदयप्राप्ताः सन्ति योगाश्च, ततो विरतस्यापि देवायुष्कादीनां शुभप्रकृतीनां तत्प्रत्ययो बन्धः, यथा च प्राणातिपातविरतस्य सप्तविंशतिर्भङ्गा उक्ताः तथा मृषावादविरतस्य यावत् मायामृषाविरतस्य, मिथ्यादर्शनशल्यविरतमधिकृत्य सूत्रमाह–

'मिच्छादंसणसल्लविरह णं भंते!' इत्यादि सुगमं, नवरं सप्तविधबन्धकत्वमष्टविधबन्धकत्वं षड्विधबन्धकत्वमेकविधबन्धकत्वमबन्धकत्वं च, मिथ्यादर्शनशल्यविरतेरविरतसम्यग्दष्टेरारभ्यायोगिकेवलिनं यावद्भावात्, नैरयिकादिचतुर्विंशतिदण्डकचिन्तायां मनुष्यवर्जेषु शेषेषु सर्वेष्वपि स्थानेषु सप्तविधबन्धकत्वं अष्टविधबन्धकत्वं वा, न षड्विधबन्धकत्वादि, श्रेणिप्रतिपत्त्यसम्भवात्,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मनुष्यपदे च यथा जीवपदे तथा वक्तव्यं, मनुष्येषु सर्वभावसम्भवात्, बहुवचनेनैतद्विषयं सूत्रमाह–

'मिच्छादंसणसल्लविरया णं भंते ! जीवा' इत्यादि, अत्रापि त एव पूर्वोक्ताः सप्तविंशतिर्भङ्गाः, नैरयिकपदे भङ्गत्रिकं, तत्र सर्वेऽपि तावद्भवेयुः सप्तविधबन्धका इत्येको भङ्गः, अयं च यदैकोऽप्यष्टविधबन्धको न लभ्यते तदा भवति, यदा पुनरेकोऽष्टविधबन्धको लभ्यते तदाऽयं द्वितीयो भङ्गः सप्तविधबन्धकाश्चाष्टविधबन्धकश्च, यदा पुनरष्टविधबन्धका अपि बहवो लभ्यन्ते तदा तृतीयः सप्तविधबन्धकाश्चाष्टविधबन्धकाश्च, एवं भङ्गत्रिकं तावद् वाच्यं यावद्वैमानिकसूत्रं, नवरं मनुष्यपदे सप्तविंशतिर्भङ्गका यथा जीवपदे इति ।

मू. (५३३) *पाणातिवायविरयस्स णं भंते ! जीवस्स किं आरंभिया किरिया कज्जति जाव मिच्छादंसणवत्तिया किरिया कज्जति ?, गो० ! पाणातिवायविरयस्स जीवस्स आरंभिया किरिया सिय कज्जति सिय नो कज्जति,*

पाणातिवायविरयस्स णं भंते ! जीवस्स परिग्गहिया किरिया कज्जति ?, गो० ! नो इणट्ठे समट्ठे, पाणातिवायविरयस्स णं भंते ! जीवस्स मायावत्तिया किरिया कज्जति ?, गो० ! सिय कज्जति सिय नो कज्जति,

पाणातिपातविरयस्स णं भंते ! जीवस्स अपच्चक्खाणवत्तिया किरिया कज्जति ?, गो० ! नो इणट्ठे समट्ठे, मिच्छादंसणवत्तियाए पुच्छा, गो० ! नो इणट्ठे समट्ठे, एवं पाणातिपातविरयस्स मणूसस्सवि, एवं जाव मायामोसविरयस्स जीवस्स मणूसस्स य,

मिच्छादंसणसल्लविरयस्स णं भंते ! जीवस्स किं आरंभिया किरिया क० जाव मिच्छादंसणवत्तिया कि० क० ?, गो० ! मिच्छादंसणसल्लविरतस्स जीवस्स आरंभिया कि० सिय क० सिय नो क०, एवं जाव अपच्चक्खाणकिरिया, मिच्छादंसणवत्तिया न क०,

मिच्छादंसणसल्लविरयस्स णं भंते ! नेरइयस्स किं आरंभिया किरिया क० जाव मिच्छादंसणवत्तिया कि० क० ?, गो० ! आरंभिया कि० क० जाव अपच्चक्खाणकिरियावि क०, मिच्छादंसणवत्तिया किरिया नो क०, एवं जाव थणियकुमारस्स,

मिच्छादंसणसल्लविरयस्स णं भंते ! पंचिंदियतिरिक्खजोणियस्स एवमेव पुच्छा, गो० ! आरंभिया कि० क० जाव मायावत्तिया कि० क०, अपच्चक्खाणकि० सिय क० सिय नो क०, मिच्छादंसणवत्तिया कि० नो क० । मणूस्स जहा जीवस्स ।

वाणमंतरजोइसियवेमा० जहा नेरइयस्स । एतासि णं भंते ! आरंभियाणं जाव मिच्छादंसणवत्तियाण य कतरे २ हिंतो अप्पा वा ४ ?, गो० ! सव्वत्थोवाओ मिच्छादंसणवत्तियाओ किरियाओ, अपच्चक्खाणकिरियाओ विसे०, परिग्गहियातो विसे० आरंभियातो किरियातो विसे०, मायावत्तियातो विसेसाहियातो ॥

वृ. अथारम्भिक्यादीनां क्रियाणां मध्ये का क्रिया प्राणातिपातविरतस्येति चिन्तयति– 'पाणाइवायविरयस्स णं भंते !' इत्यादि, आरम्भिकी क्रिया स्याद्भवति स्यान्न भवति, प्रमत्तसंयतस्य भवति शेषस्य न भवतीति भावः, पारिग्रहिकी निषेध्या, सर्वथा परिग्रहान्निवृत्तत्वात्, अन्यथा सम्यक्प्राणातिपातविरत्यनुपपत्तेः, मायाप्रत्यया स्याद्भवति स्यान्न भवति, अप्रमत्तस्यापि हि कदाचित् प्रवचनमालिन्यरक्षणार्थं भवति, शेषकालं तु न भवति, अप्रत्याख्यानक्रिया

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मिथ्यादर्शनप्रत्यया च सर्वथा निषिध्यते, तदभावे प्राणातिपातविरत्ययोगात्, प्राणातिपातविरतेश्च द्वे पदे, तद्यथा–

'जीवो मनुष्यश्च, तत्र यथा सामान्यतो जीवमधिकृत्योक्तं तथा मनुष्यमधिकृत्य वक्तव्यं, तथा चाह–'एवं पाणाइवायविरयस्स मणूसस्सवि' इति, एवं तावद्वाच्यं यावन्मायामृषाविरतस्य जीवस्य मनुष्यस्य च, मिथ्यादर्शनशल्यविरतमधिकृत्य सूत्रं 'मिच्छादंसणसल्लविरयस्स णं भंते ! जीवस्स' इत्यादि, आरम्भिकी स्याद्भवति स्यान्न भवति, प्रमत्तसंयतान्तस्य भवति शेषस्य न भवतीति भावार्थः, पारिग्रहिकी देशविरतिं यावद्भवति, परतो न भवति, मायाप्रत्ययाऽप्य-निवृत्तबादरसम्परायं यावद्भाविनी परतो न भवति, अप्रत्याख्यानक्रियाऽपि अविरतसम्यग्दृष्टिं यावन्न परतः, तत एता अपि क्रिया अधिकृत्य 'सिय कज्जइ सिय नो कज्जइ' इति वक्तव्यं, तथा चाह–'एवं जाव अपच्चक्खाणकिरिया' इति, मिथ्यादर्शनप्रत्यया पुनर्निषेध्या, मिथ्यादर्शनविरतस्य तस्या असम्भवात्,

चतुर्विंशतिदण्डकचिन्तायां नैरयिकादीनां स्तनितकुमारपर्यन्तानां चतस्रः क्रिया वक्तव्याः, मिथ्यादर्शनप्रत्यया निषेध्या, तिर्यक्पञ्चेन्द्रियस्याद्यास्तिस्रः क्रिया नियमतो वक्तव्याः, अप्रत्याख्यानक्रिया भाज्या, देशविरतस्य न भवति शेषस्य भवतीत्यर्थः, मिथ्यादर्शनप्रत्यया निषेध्या, मनुष्यस्य यथा सामान्यतो जीवस्य, व्यन्तरदीनां यथा नैरयिकस्य ।

सम्प्रत्यासामेवारम्भिक्यादीनां क्रियाणां परस्परमल्पबहुत्वमाह–'एएसि णं भंते !' इत्यादि, सर्वस्तोका मिथ्यादर्शनप्रत्यया क्रिया, मिथ्यादृष्टीनामेव भावात्, ततोऽप्रत्याख्यानक्रिया विशेषाधिका, अविरतसम्यग्दृष्टीनां मिथ्यादृष्टीनां च भावात्, ताभ्योऽपि पारिग्राहिक्यो विशेषाधिकाः, देशविरतानां पूर्वेषां च भावात्, आरम्भिक्यो विशेषाधिकाः, प्रमत्तसंयतानां पूर्वेषां च भावात्, ताभ्योऽपि मायाप्रत्यया विशेषाधिकाः अप्रमत्तसंयतानामपि भावात् ।।

पदं – २२ – समाप्तम्

मुनि दीपरत्नसागरेण संशोधिता सम्पादिता प्रज्ञापनाउपाङ्गसूत्रे द्वाविंशतितमापदस्य मलयगिरिआचार्येण विरचिता टीका परिसमाप्ता ।

पदं – २३ – कर्मप्रकृतिः

वृ. तदेवमुक्तं द्वाविंशतितमं पदं, सम्प्रति त्रयोविंशतितममारभ्यते, अस्य चायमभि-सम्बन्धः–इहानन्तरपदे नारकादिगतिपरिणामेन परिणतानां जीवानां प्राणातिपातादिक्रियाविशेष-श्चिन्तितः, सम्प्रति पुनः कर्मबन्धादिपरिणामविशेषश्चिन्त्यते–तत्र चेयमधिकारद्वारगाथा–

–ः पदं – २३ – उद्देशकः– १ ः–

मू. (५३४) *कति पगडी १ कह बंधति २ कइहिवि ठाणेहिं बंधए जीवो ३ ।*
कति वेदेइ य पयडी ४ अनुभावो कइविहो कस्स ५ ।।

वृ. 'कइ पगडी' इत्यादि, कति प्रकृतयो भवन्तीत्यादि प्रथमोऽधिकारः, तथा कथं–केन प्रकारेण ताः प्रकृतीर्बध्नातीति द्वितीयःस कतिभिः स्थानैर्बध्नातीति तृतीयः, कति प्रकृतीर्वेदयते इति चतुर्थः, कस्य कर्मणः कतिविधोऽनुभागः पञ्चमः । तत्र प्रथमाधिकारनिरूपणार्थमाह–

मू. (५३५) *कति णं भंते ! कम्मपगडीओ पन्नत्ताओ, गो० ! अट्ठ कम्मपगडीओ पन्नत्ताओ,*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तं०–नाणावरणिज्जं १ दंसणावरणिज्जं २ वेदणिज्जं ३ मोहणिज्जं ४ आउयं ५ नामं ६ गोयं ७ अंतराइयं ८० ।

नेरइयाणं भंते ! कइ कम्मपगडीओ पं० ?, गो० ! एवं चेव, एवं जाव वेमाणियाणं ।। १

वृ. 'कति णं भंते ! कम्मपयडीओ पन्नत्ताओ' इति, ननूक्तमेव क्रियापदे कति कर्मप्रकृतय इति ततः किमर्थमिह प्रकृतिमसङ्ख्यार्थः प्रश्नः ?, उच्यते, विशेषप्रतिपादनार्थः, स चायं विशेषः–पूर्वं ज्ञानावरणीयादि कर्म बध्नन् कतिभिः क्रियाभिर्युज्यते इत्युक्तं, क्रियाश्च प्राणातिपात-हेतवः,प्राणातिपातश्च बाह्यं ज्ञानावरणीयादिकर्मबन्धकारणं, कर्मबन्धः कार्यं, इह तु ज्ञानावरणीयादिकर्म एवान्तरं कर्मबन्धकारणं प्रतिपाद्यमिति, भगवन्निर्वचनमाह–

'गौतम अष्टौ कर्मप्रकृतयः प्रज्ञप्ताः, एता एव नामग्राहं दर्शयति–'ज्ञानावरणीयं दर्शना-वरणीयं' इत्यादि, ज्ञायते–परिच्छिद्यते वस्त्वनेनेति ज्ञानं–सामान्यविशेषात्मके वस्तुनि विशेष-ग्रहणात्मको बोधः, आव्रियते–आच्छाद्यते अनेनेत्यावरणीयं 'कृद्बहुल'मिति वचनात् करणेऽनी-यप्रत्ययः, ज्ञानस्यावरणीयं त्रानावरणीयं, दृश्यतेऽनेनेति दर्शनं–सामान्यविशेषात्मके वस्तुनि सामान्यग्रहणात्मको बोधः, उक्तं च–

॥ १ ॥ "जं सामन्नग्गहणं भावाणं नेय कट्टु आगारं ।
अविसेसिऊण अत्थे दंसणमिइ वुच्छइए समए ।।"

तस्यावरणीयं दर्शनावरणीयं, तथा वेद्यते–गाह्यादादिरूपेण यदनुभूयते तद्वेदनीयं, अत्र कर्मण्यनीयः, यद्यपि च सर्वं कर्म वेद्यते तथापि पङ्कजादिशब्दवत् वेदनीयशब्दस्य रूढिविषयत्वात् सातासातरूपमेव कर्म वेदनीयमित्युच्यते, न शेषं, तथा मोहयति–सदसद्विवेकविकलं करोति आत्मानमिति मोहनीयं, अत्र बहुलवचनात् कर्त्तर्य्यनीयः, तथा एति आगच्छति प्रतिबन्धकतां स्वकृतकर्मबद्धनरकादिकुगतेर्निष्क्रमितुमनसो जन्तोरित्यायुः, अथवा आ समन्तादेति–गच्छति भवाद् भवान्तरसङ्क्रान्तौ विपाकोदयमित्यायुः, उभयत्राप्यौणादिक उस्प्रत्ययः,

तथा नामयति–गत्यादिपर्यायानुभवनं प्रति प्रवणयति जीवमिति नाम, तथा गूयते–शब्द्यते उच्चावचैः शब्दैर्यत् तद् गोत्रं–उच्चनीयचकुलोत्पत्तिलक्षणः पर्यायविशेषः तद्विपाकवेद्यं कर्मापि गोत्रं, कार्ये कारणोपचारात् यद्वा कर्मणोऽपादानविवक्षा गूयते–शब्द्यते उच्चावचैः शब्दैरात्मा यस्मात् कर्मणः उदयाद् गोत्रं, तथा जीवं दानादिकं चान्तरा व्यवधानापादनाय एति–गच्छत्यन्तरायं,

जीवस्य दानादि कर्त्तुमुद्यतस्य विघातकृद् भवतीत्यर्थः, अत्राह–नन्वित्थं ज्ञानावरणी-याद्युपन्यासे किञ्चिदस्ति प्रयोजनमुत यथाकथञ्चिदेव प्रवृत्तिरिति ?, अस्तीति ब्रूमः, किं तदिति चेत्, उच्यते, इह ज्ञानं दर्शनं च जीवस्य स्वतत्त्वभूतं, तदभावे जीवत्वस्यैवाभावात्, चेतनालक्षणो हि जीवस्ततः स कथं ज्ञानदर्शनाभावे भवेत् ?,

ज्ञानदर्शनयोरपि च मध्ये प्रधानं ज्ञानं, तद्वशादेव सकलशास्त्रादिविषयविचार-सन्ततिप्रवृत्तेः, अपिच–सर्वा अपि लब्धयो जीवस्य साकारोपयोगोपयुक्तस्योपजायन्ते, न दर्शनोप-योगोपयुक्तस्य, 'सव्वाओ लद्धीओ सागरोवउत्तस्स नो अनागारोवओगोवउत्तस्से' ति वचन-प्रमाण्यात्, अन्यच्च– यस्मिन् समये सकलकर्मविनिर्मुक्तस्वरूपो जीवः सम्पद्यते तस्मिन् समये ज्ञानोपयोगोपयुक्त एव न दर्शनोपयुक्तो, दर्शनोपयोगस्य द्वितीयसमये भावात्, ततो ज्ञानं प्रधानं,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तदावारकं च ज्ञानावरणीयं कर्म तत्तत्प्रथममुक्तं, ततस्तदनन्तरं दर्शनावरणीयं ज्ञानोपयोगाच्च्युतस्य दर्शनोपयोगेऽवस्थानात्, एते च ज्ञानदर्शनावरणीये स्वविपाकमुपदर्शयतो यथायोगमवश्यं सुखदुःखरूपवेदनीयकर्मविपाकोदयनिमित्ते भवतः

तथाहि—ज्ञानावरणमुपचयोत्कर्षमधिरूढं विपाकतोऽनुभवन् सूक्ष्म २ तरवस्तुविचारा-समर्थमात्मानं जानानः खिद्यते भूरिलोकः, ज्ञानावरणकर्मक्षयोपशमपाटवोपेतश्च सूक्ष्मसूक्ष्मतराणि वस्तूनि निजप्रज्ञया भिन्दानो बहुजनातिशायिनमात्मानं पश्यन् सुखं वेदयते, तथाऽतिनिबिड-दर्शनावरणविपाकोदये जात्यन्धादिरनुभवति दुःखमद्युतं, दर्शनावरणकर्मक्षयोपशमपटिष्ट-तापरिकरितश्च स्पष्टचक्षुराद्युपेतो यथावद् वस्तूनि पश्यन् वेदयते प्रमोदम्, तत एतदर्शप्रतिपत्त्यर्थ दर्शनावरणीयानन्तरं वेदनीयग्रहणं, वेदनीयं च सुखदुःखे जनयत्यभीष्टानभीष्टविषयसम्बन्धात्,

अभीष्टानभीष्टविषयसम्बन्धे चावश्यं संसारिणां रागद्वेषौ तौ च मोहनीयहेतुकौ तत एतदर्थ-प्रतिपत्त्यर्थं वेदनीयानन्तरं मोहनीयग्रहणं, मोहनीयमूढाश्च जन्तवो बह्वारम्भपरिग्रहाद्यासक्ता नरकाद्यायुष्कमाबध्नन्ति ततो मोहनीयानन्तरमायुष्कग्रहणं, नरकाद्यायुष्कोदये चावश्यं नरकगत्यादीनि नामान्युदयमायान्ति तत आयुष्कानन्तरं नामग्रहणं, नामकर्मोदये च नियमादुच्चनीयचान्यतरगोत्रकर्मविपाकोदयेन भवितव्यमतो नामग्रहणा- नन्तरंगोत्रग्रहणं,

गोत्रोदये चोच्चैःकूलोत्पन्नस्यप्रायो दानलाभान्तरायादिक्षयोपशमो भवति, राजप्रभृतीनां प्राचुर्येण दानलाभादिदर्शनात्, नीचैःकुलोत्पन्नस्य तु दानलाभान्तरायाद्युदयोऽन्त्यजातीनां तथादर्शनातात्, तत एतदर्थप्रतिपत्त्यर्थं गोत्रानन्तरमन्तरायग्रहणं । तदेवमुक्तं प्रथमं द्वारम्,

मू. (५३६) *कहन्नं भंते ! जीवे अट्ठ कम्मपगडीतो बंधति ?, गो० ! नाणावरणिज्रस्स कम्मस्स उदएणं दरिसणावरणिज्रं कम्मं नियच्छति, दंसणावरणिज्रस्स कम्मस्स उदएणं दंसणमोहणिज्रं कम्मं नियच्छति, दंसणमोहणिज्रस्स कम्मस्स उदएणं मिच्छत्तं नियच्छति, मिच्छत्तेणं उदिएणं गो० ! एवं खलु जीवो अट्ठ कम्मपगडीतो बंधति,*

कहण्णं भंते ! नेरइए अट्ठ कम्मपगडीओ बंधति ?, गो० ! एवं चेव, एवं जाव वेमाणिते कहण्णं भंते ! जीवा अट्ठ कम्मपगडीतो बंधंति, गो० ! एवं चेव जाव वेमाणिया ॥

वृ. अधुना कथं बध्नातीति द्वितीयद्वारप्रतिपादनार्थमाह—'कहन्नं भंते !' इत्यादि, कथं—केन प्रकारेण णमिति वाक्यालङ्कारे जीवोऽष्टौ प्रकृतीर्बध्नाति ?, भगवानाह—गौतम ! ज्ञानावरणीय-मुत्कर्षप्राप्तमुदयेन अनुभवन् दर्शनावरणीयमुदयेन वेदयते, दृश्यन्ते हि खलु शून्यवादिप्रभृतयः कुवादिनः कुज्ञानवासितान्तःकरणा विपरीतं पश्यन्त इति,

दर्शनावरणीयस्य च कर्मण उदयेन दर्शनमोहनीयं कर्म निर्गच्छति, विपाकावस्थोदयेन प्रतिपद्यते इति भावः, तस्य दर्शनमोहनीयस्य कर्मण उदयेन मिथ्यात्वं निर्गच्छति, अतत्त्वं तत्त्वमध्यवस्यति तत्त्वं चातत्त्वमिति भावः, तत एवं मिथ्यात्वोदयेन जीवोऽष्टौ प्रकृतीर्बध्नाति,

खलुशब्दः प्रायोवृत्तिदर्शनार्थः, प्रायस्तावदेवमन्यथा सम्यग्दृष्टिरपि कश्चिदष्टौ प्रकृतीर्बध्नाति, केवलं कश्चित् न बध्नत्यपि यथा सूक्ष्मसम्परायादिरिति स प्रकारो नोक्तः, एष चात्र तात्पर्यार्थः—पूर्वकर्मपरिणामसामथ्यात् उत्तरकर्मणः सम्भवो, यथा बीजादङ्कुकपत्रनालादीनां, उक्तं च—

Jain Education International   For Private & Personal Use Only   www.jainelibrary.org

॥ १ ॥ "जीवपररिणामहेउं कम्मत्ता पुग्गला परिणमंति ।
पुग्गलकम्मनिमित्तं जीवोवि तहेव परिणमइ ॥" इति

उक्तमेवार्थं चतुर्विंशतिदण्डकक्रमेण निरूपयति–'कहण्णं भंते ! नेरइए' इत्यादि सुगमं, तदेवमुक्त एकत्वेन दण्डकः, सम्प्रति बहुत्वेनाह–'कहण्णं भंते ! नेरइया' इत्यादि पाठसिद्धं ।

उक्तं द्वितीयद्वारमपि, अधुना कतिभिः स्थानैर्बध्नातीति तृतीयद्वारमभिधित्सुराह–

मू. (५३७) *जीवे णं भंते ! नाणावरणिज्जं कम्मं कतिहिं ठाणेहिं बंधति ?, गो० ! दोहिं ठाणेहिं, तं०–रागेण य दोसेण य, रागे दुविहे पं०, तं०–माया य लोभे य, दोसे दुविधे पं०, तं०–कोहे य माणे य, इच्चेतेहिं चउहिं ठाणेहिं विरितोवग्गहिएहिं एवं खलु जीवे नाणावरणिज्जं कम्मं बंधति, एवं नेरतिते जाव वेमाणिते, जीवा णं भंते ! नाणावरणिज्जं कम्मं कतिहिं ठाणेहिं बंधंति ?, गो० ! दोहिं ठाणेहिं एवं चेव, एवं नेरइया जाव वेमाणिया, एवं दंसणावरणिज्जं जाव अंतराइज्जं, एवं एते एगत्तपोहत्तिया सोलस दंडगा ॥ ३*

वृ. 'जीवे णं भंते !' इत्यादि प्रश्नसूत्रं सुगमं, भगवानाह–द्वाभ्यां स्थानाभ्यां, त एव स्थाने नामग्राहमाह–तद्यथा–रागेण द्वेषेण च, अथ कोऽसौ रागः को वा द्वेष इति ?, उच्यते, प्रीतिलक्षणो रागोऽप्रीत्यात्मको द्वेषः, एतौ च प्रीत्यप्रीत्यात्मकौ रागद्वेषौ नात्यन्तं क्रोधादिभ्यो व्यतिरिच्येते, किन्तु तेष्वेवान्तर्भवतः, स चान्तर्भावो नयभेदाद्विचित्र इति विनयजनानुग्रहाय प्रदर्शयते,

तत्र सङ्ग्रहो मन्यते–क्रोधोऽप्रीत्यात्मकः प्रतीत एव, मानोऽपि परगुणासहनात्मकत्वादप्रीत्यात्मकः, ततोऽप्रीत्यात्मकत्वादेतौ द्वावपि द्वेषः लोभोऽभिष्वङ्गात्मकत्वात् प्रीतिरूपः सुप्रसिद्धो, मायामपि परवञ्चनात्मिकां किञ्चिदभिलषनं प्रयुङ्क्ते अभिलाषश्च प्रतिस्वभाव इति साऽपि प्रीत्यात्मिका, तत एतौ मायालोभौ प्रीत्यात्मकत्वात् रागः उक्तं च–

॥ १ ॥ "कोहं माणं चापीइजाइतो बेइ संगहो दोसं ।
मायाए लोभेण य स पीइसामण्णतो रागं ॥"

अत्र उत्तरार्द्धस्याक्षरयोजन–मायया लोभेन सह प्रीतिजातिसामान्यात् स मानप्रीतिजातिभावात् द्वावपि मायालोभौ स सङ्ग्रहो रागमाचष्टे इति । व्यवहारः पुर्बूते–माया खलु परोपघाताय प्रयुज्यते परोपघातपरिणामश्च द्वेष इति मायाया अपि द्वेषेऽन्तर्भावः, या तु न्यायोपादानेनार्थे मूर्च्छा स परोपधातरहितः शुद्धो लोभ इति रागः, एवं चेदमस्य मतेन वस्तु व्यवस्थितं–क्रोधमानमाया द्वेषो लोभो राग इति, आह च–

॥ १ ॥ "मायंपि दोसमिच्छइ ववहारो जं परोवघायाय ।
नायोवायाणे च्चिय मुच्छ मुच्छा लोभेत्ति तो रागो ॥"

ऋजुसूत्रः पुनराह–क्रोधो नियमादप्रीत्यात्मकः, ततः स परोपघातात्मकत्वत् द्वेषः ये तु मानमायालोभास्ते द्विधाऽपि सम्भवन्ति–प्रीत्यात्मका अप्रीत्यात्मकाश्च, तथाहि–मानः स्वाहङ्कारोपयोगकाले प्रीत्यात्मकः स्वगुणबहुमानभावात्, परगुणद्वेषोपयोगवेलायामप्रीत्यात्मको मात्सर्यादिभावात्, मायाऽपि परवञ्चनोपयोगप्रवृत्तो परोपधातरूपत्वात्, अप्रीत्यात्मिका परगतद्रव्योपादानचिन्तायां त्वभिष्वङ्गात्मकत्वात् प्रीतिरूपा, लोभोऽपि क्षत्रियादीनां परिचिन्त्यमानः प्रीत्यप्रीत्यात्मकः सुप्रतीतः, तथाहि–क्षत्रिया एवं मन्यन्ते परविषयापहारोऽस्माकं न्यायो 'वीरभोग्या

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वसुन्धरा' इति न्यायात्, ततो यदा परविषयापहाराय तेषामत्यर्थमभियोगस्तदाऽसौ अप्रीत्यात्मकः, परोपघातहेतुत्वात्, यदा तु परविषयजिघृक्षोपयोगस्तदा सोऽभिष्वङ्गात्मकत्वात प्रीत्यात्मकः, तत एवं मानमायालोभा उभयरूपा अपि संवेद्यन्ते, यदा च प्रीत्युपयोगो न तदाऽप्रीत्युपयोगः, यदा चाप्रीत्युपयोगो न तदा प्रीत्युपयोगः, एकस्मिन् समये उपयोगद्वयाभावात्, ततो मानमायालोभाःप्रीत्युपयोगकाले रागोऽप्रीत्युपयोगकाले द्वेषः, उक्तं च–

॥१॥ "उज्जुसुवमयं कोहो दोसो सेसाणमयमनेगंतो।
रागोत्ति य दोसोत्ति य परिणाम वसेण उ विसेसो॥
॥२॥ मानो रागोत्ति मओ साहंकारोवओगकालंमि।
सो चेव होइ दोसो परगुणदोसोवयोगंमि॥
॥३॥ मायालोभा चेवं परोवघाओवओगतो दोसो।
मुच्छोवओगकाले रागोऽभिस्संगलंगोत्ति॥"

शब्दादयस्त्रयः पुनरेवमाहुः–इह द्वावेव कषायौ–क्रोधो लोभश्च, ये तु मानमाये ते क्रोधलोभयोरन्तर्भवतः, तथाहि–माने मायायां च ये परोपघातहेतवोऽध्यवसायास्ते क्रोधोऽप्रीत्यात्मकत्वात् ये तु स्वगुणोत्कर्षरद्रव्यमूर्च्छात्मकास्ते लोभोऽभिष्वङ्गरूपत्वात्, लोभोऽपि च लोकप्रसिद्धो द्विधा–परोपघातात्मको मूर्च्छात्मकश्च, तत्र पोरपघातात्मको यथा क्षत्रियाणां परराष्ट्रापहारे, मूर्च्छात्मको नायायोपात्ते निजद्रव्ये, तत्र यः परोपघातात्मकः स क्रोधो भवति, क्रोधश्च सर्वोऽपि यथोक्तस्वरूपो द्वेषोऽप्रीत्यात्मकत्वात्, केवलस्तु मूर्च्छात्मकोऽध्यवसायो लोभः स च रागः तथा चोक्तम्–

॥१॥ "सद्दाइमयं माने मायाए य सगुणोवरागा य।
उवओगो लोहो च्चिय जंतो स तत्थेव उवरद्धो॥
॥२॥ सेसंसा कोहो च्चिय सपरोवधायमइओत्ति तो दोसो।
तल्लक्खणो य लोभो अह मुच्छा केवलो रागो॥" इति,

तत्र सङ्ग्रहनयमतेनाह–'रागे दुविहे पन्नत्ते' इत्यादि सुगमं, भावितत्वात्, उपसंहारमाह–'इच्चतेहिं चउहिं ठाणेहिं' इत्यादि, एवं खलु इत्येनैरयन्तरोक्तैश्चतुर्भिःस्थानैः, कथंभूतैरित्याह–वीर्योपगूहीतैर्जीववीर्योपस्थापितैरित्यर्थः, ज्ञानावरणीयं कर्म जीवो बध्नाति, अमुमेवार्थं चतुर्विंशतिदण्डकक्रमेण चिन्तयति–'एवं नेरइए जाव वेमाणिए' सुगमं, नवरमेवं सूत्रपाठः

'नेरइए णं भंते! नाणावरणिज्जं कम्मं कइहिं ठाणेहिं बंधइ' इत्यादि। तदेवमेकत्वेन चिन्ता कृता, सम्प्रति बहुत्वेन तां कुर्वन्नाह–'जीवा णं भंते!' इत्यादि सुगमं, यथा च ज्ञानावरणीयमेकत्वबहुत्वाभ्यां दण्डकद्वयेन चिन्तितं तथा दर्शनावरणीयादीन्यपि चिन्तनीयानि, सर्वसङ्ख्यया षोडश दण्डकाः। तदेवमुक्तं तृतीयं द्वारम्, सम्प्रति कति प्रकृतिर्वेदयते इति चतुर्थं द्वारमभिधित्सुराह–

मू. (५३८) जीवे णं भंते! नाणावरणिज्जं कम्मं वेदेति?, गो०! अत्थेगइए वेदेति अत्थेगइए नो वेएइ, नेरइए णं भंते! नाणावरणिज्जं कम्मं वेदेति?, गो०! नियमा वेदेति, एवं जाव वेमाणिते, नवरं मणूसे जहा जीवे।

जीवा णं भंते! नाणावरणिज्जं कम्मं वेदेंति?, गो०! वेदेंति एवं चेव, एवं जाव वेमाणिया,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवं जहा नाणावरणिज्जं तहा दंसणावरणिज्जं मोहणिज्जं अंतराइयं च, वेयनिज्जाउनामगोताइं एवं चेव, नवरं मणूसेवि नियमा वेदेति, एवं एते एगत्तपोहत्तिया सोलस दंडगा ।। ४

वृ. 'जीवे णं भंते !' इत्यादि, अस्त्येककः कश्चित् यो वेदयतेऽस्त्येककः कश्चिद् यो न वेदयते अक्षीणघातिकर्मा वेदयते क्षीणघाकतिकर्मा तु न वेदयते इति भावः, अमुमेवार्थं चतुर्विंशति-दण्डकक्रमेण चिन्तयति– 'नेरइए णं भंते !' इत्यादि सुगमं, मनुष्यं मुक्त्वा शेषेषु सर्वेष्वपि स्थानेषु नियमाद्वेदयते इति वक्तव्यं, सर्वेषामक्षीणघातिकर्मत्वात्, मनुष्ये यथा जीवपदेऽभिहितं तथाऽभिधातव्यं, क्षीणघातिकर्मणोऽपि मनुष्यस्य लभ्यामान्त्वात्, एवमेष एकत्वेन दण्डक उक्तः, एवं बहुत्वेनापि वक्तव्यः,

यथा च ज्ञानावरणीयमेकत्वपृथकत्वाभ्यां भावितं एवं दर्शनावरणीयमोहनीयान्तरायाण्यपि भावनीयानि, वेदनीयायुर्नामगोत्राणि तु जीववपदे भजनीयानि, यतः–सिद्धा न वेदयन्ते शेषा वेदयन्ते इति, शेषास्तु नैरयिकादयो मनुष्या अपि च नियमाद्वेदयन्ते, आसंसारचरमसमय-मवश्यममीषामुदयसम्भवात्, सर्वसङ्ख्यया चास्मिन्नप्यधिकारे एकत्वपृथकत्वाभ्यां षोडश दण्डका भवन्ति ।

गतं चतुर्थद्वारम्, इदानीं तु अनुभावः कस्य कर्मणः कतिविध इति पञ्चमद्वारमभिधित्सुराह–

मू. (५३९) *नाणावरणिज्जस्स णं भंते ! कम्मस्स जीवेणं बद्धस्स पुट्ठस्सबद्धफासपुट्ठस्स संचियस्स चियस्स उवचियस्स आवागपत्तस्स विवागपत्तस्स फलपत्तस्स उदयपत्तस्स जीवेणं कयस्स जीवेण निव्वत्तियस्स जीवेणं परिणामियस्स सयं वा उदिण्णस्स परेण वा उदीरियस्स तदुभएण वा उदीरिज्जमाणस्स गतिं पप्प ठितिं पप्प भवं पप्प पोग्गलपरिणामं पप्प कतिविधे अनुभावे पन्नत्ते ?,*

गो० ! नाणावरिणिज्जस्स णं कम्मस्स जीवेणं बद्धस्स जाव पोग्गलपरिणामं पप्प दसविधे अनुभावे पं०, तं०–सोतावरणे सोयविन्नाणावरणे नेत्तावरणे नेत्तविन्नाणावरपणे घाणावरणे घाणविन्नाणावरणे रसावरणे रसविन्नाणावरणे फासावरणे फासविन्नाणावरणे, जं वेदेति पोग्गलं वा पोग्गले वा पोग्गलपरिणामं वा वीससा वा पोग्गलाणं परिणामं तेसिं वा उदएणं जाणियव्वं न जाणति जाणिउकामे न याणति जाणित्ताविन याणति उच्छन्ननाणीयावि भवति नानावरणिज्जस्स कम्मस्स उदएणं एस णं गोयमा ! नाणावरणिज्जे कम्मे एस णं गोयमा ! नाणावरणिज्जस्स कम्मस्स जीवेणं बद्धस्स जाव पोग्गलपरिणामं पप्प दसविधे अनुभावे पं० ।

दरिसणावरणिज्जस्स णं भंते ! कम्मस्स जीवेणं बद्धस्स जाव पोग्गलपरिणामं पप्प कतिविधे अनुभावे पं० ?, गो० ! दरिसाणवरणिज्जस्स कम्मस्स जीवेणं बद्धस्स जाव पोग्गलपरिणामं पप्प नवविधे अणुभावे पं०, तं०–निद्दा निद्दा २ पयला पयला २ थीणद्धी चक्खुदंसणावरणे अचक्खुदंसणावरणे ओहिदंसणावरणे केवलदंसणावरणे, जं वेदेति पोग्गलं वा पोग्गले वा पोग्गलपरिणामं वा वीससा वा पोग्गलाणं परिणामं तेसिं वा उदएणं पासियव्वं वा न पासति पासिउकामेवि न पासति पासित्ता वि नं पासति, उच्छन्नदंशसणी यावि भवति दरिसणावरणिज्जस्स कम्मस्स उदएणं, एस णं गो० ! दरिसणावरणिज्जे कम्मे एस णं गोयमा ! दरिसणावरणिज्जस्स कम्मस्स जीवेणं बद्धस्स जाव पोग्गलपरिणामं पप्प नवविधे अनुभावे पन्नत्ते,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सायावेयणिज्जस्स णं भंते! कम्मस्स जीवेणं बद्धस्स जाव पोग्गलपरिणामं पप्प कतिविधे अनुभावे पं० ?, गो० ! सातावेदणिज्जस्स णं कम्मस्स जीवेणं बद्धस्स जाव अट्ठविधे अनुभावे पं० तं०–मणुण्णा सद्दा १ मणुण्णा रूवा २ मणुण्णा गंधा ३ मणुण्णा रसा ४ मणुण्णा फासा ५ मणोसुहता ६ वयसुहया ७ कायसुहता ८ जं वेदेति पोग्गलं वा पोग्गले वा पोग्गलपरिणामं वा वीससा वा पोग्गलाणं परिणामं तेसिं वा उदएणं सातावेदणिज्जं कम्मं वेदेति, एस णं गो० ! साया-वेयणिज्जे कम्मे एस णं गो० ! सातावेयणिज्जस्स जाव अट्ठविधे अनुभावे पं० ! असातावेयणिज्जस्स णं भंते ! कम्मस्स जीवेणं तहेव पुच्छा, उत्तरं च, नवरं अमणुण्णा सद्दा जाव कायदुहया एस णं गो० ! असायावेयणिज्जे कम्मे एस णं गो० ! असातावेदणिज्जस्स जाव अट्ठविधे अनुंभावे पं० ।

मोहणिज्जस्स णं भंते ! कम्मस्स जीवेणं बद्धस्स जाव कतिविधे अनुभावे पं० ?, गो० ! मोहणिज्जस्स कम्मस्स जीवेणं बद्धस्स जाव पंचविधे अणुभावे पं०, तं०–सम्मत्तवेयणिज्जे मिच्छत्तवेयणिज्जे सम्मामिच्छत्तवेयणिज्जे कसायवेयणिज्जे नोकसायवेयणिज्जे जं वेदेति पोग्गलं वा पोग्गले वा पोग्गलपरिणामं वा वीससा वा पोग्गलाण परिणामं तेसिं वा उदएणं मोहणिज्जं कम्मं वेएइ वा एस णं गोयमा ! मोहणिज्जस्स कम्मस्स जाव पंचविधे अनुभावे पं० ।

आउस्स णं भंते ! कम्मस्स जीवेणं तहेव पुच्छा, गो० ! आउयस्स णं कम्मस्स जीवेणं बद्धस्स जाव चउविहे अणुभावे पं०, तं०–नेरइयाउते तिरियाउते मनुयाउए देवाउए, जं वेदेति पोग्गलं वा पोग्गले वा पोग्गलपरिणामं वा वीससा वा पोग्गलाणं परिणामं तेसिं वा उदएणं आउयं कम्मं वेदेति वा एस णं गो० ! आउए कम्मे एस णं गो० ! आउकम्मस्स जाव चउव्विहे अनुभावे पन्नत्ते।

सुहनामस्स णं भंते ! कम्मस्स जीवेणं पुच्छा, गो० ! सुहनामस्स णं कम्मस्स जीवेणं चउद्दसविधे अनुभावे पं० तं०–इट्ठा सद्दा १ इट्ठा रूवा २ २ इट्ठा गंधा ३ इट्ठा रसा ४ इट्ठा फासा ५ इट्ठा गती ६ इट्ठा ठिती ७ इट्ठे लावण्णे ८ इट्ठा जसोकित्ती ९ इट्ठे उट्ठाणकम्मबलबीरियपुरिसक्कारपरक्कमे १० इट्ठस्सरया ११ कंतस्सरया १२ पियस्सरया १३ मणुण्णस्सरया १४ जं वेदेति पोग्गलं वा पोग्गले वा पोग्गलपरिणामं वा वीससा वा पोग्गलाणं परिणामं तेसिं वा उदएणं सुभनामंकम्मं वेएइ एस णं गो० ! सुहनामकम्मे एस णं गो० ! सुभनामस्स कम्मस्स जाव चउद्दसविधे अणुभावे पं०,

दुहनामस्य णं भंते ! पुच्छा, गो० ! एवं तचेव, नवरं अनिट्ठा सद्दा जाव हीणस्सरया दीणस्सरया अकंतस्सरया जं वेदेति सेसं तं चेव जाव चउद्दसविधे अनुभावे पन्नत्ते ।

उच्चागोतस्स णं भंते ! कम्मस्स जीवेणं पुच्छा, गो० ! उच्चागोतस्स कम्मस्स जीवेणं बद्धस्स जाव अट्ठविहे अनुभावे पं० तं०–जातिविसिट्ठया १ कुलविसिट्ठया २ बलविसिट्ठया ३ रूववि० ४ तववि० ५ सुयवि० ६ लाभवि० ७ इस्सरियवि० ८ जं वेदेति पोग्गलं वा पोग्गले वा पोग्गलपरिणामं वा वीससा वा पोग्गलाणं परिणामं तेसिं वा उदएणं जाव अट्ठविधे अनुभावे पं०,

नीयागोयस्स णं भंते ! पुच्छा, गो० ! एवं नवरं जातिविहीणया जाव इस्सरियविहीणया जं वदेति पुग्गलं वा पोग्गले वा पोग्गलपरिणामं वा वीससा वा पोग्गलाणं परिणामं तेसिं वा उदएणं जाव अट्ठविधे अनुभावे पन्नत्ते,

अंतरायस्स णं भंते ! कम्मस्स जीवेणं पुच्छा, गो० ! अंतराइयस्स कम्मस्स जीवेणं बद्धस्स जाव पंचविधे अनुभावे पं०, तं०–दानंतराए लाभंतराए भोगंतराए उवभोगंतराए विरियंतराए,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जं वेदेति पोग्गलं जाव वीससा वा० तेसिं वा उदएणं अंतराइयं कम्मं वेदेति, एस णं गो० ! अंतराइए कम्मेस, एस णं गो० ! जाव पंचविधे अनुभावे पं०

वृ. 'नाणावरणिज्जस्स णं भंते !' इत्यादि, ज्ञानावरणीयस्स णमिति वाक्यालङ्कारे भदन्त ! जीवेन बद्धस्य-रागद्वेषपरिणामवशतः कर्मरूपतया परिणमितस्य स्पृष्टस्य-आत्मप्रदेशैः सह संश्लेषमुपगतस्य 'बद्धफासपुट्ठस्से'ति पुनरपि गाढतरं बद्धस्यातीव स्पर्शेन स्पृष्टस्य च, किमुक्तं भवति ? – आवेष्टनपरिवेशष्टनरूपतायऽतीव सोपचयं गाढतरं च बद्धस्येति, 'सञ्चितस्य' आबाधाकालातिक्रमेणोत्तरकालवेदनयोग्यतया निषिक्तस्य 'चितस्य' उत्तरोत्तरस्थितिषु प्रदेशहान्या रसवृध्याऽवस्थापितस्य 'उपचितस्य' समानजातीयप्रकृत्यन्तरदलिकसङ्क्रमेणोपचयं नीतस्य 'आपाकप्राप्तस्य' ईषत्पाकाभिमुखीभूतस्य 'विपाकप्राप्तस्य' विशिष्टपाकमुपगतस्य अत एव 'फलप्राप्तस्य' फलं दातुमभिमुखीभूतस्य ततःसामग्रीवशादुदयप्राप्तस्य, एते चापाकप्राप्तत्वादयःकर्मधर्माः यथा आम्रफलस्य, तथाहि-आम्रफलं प्रथमत ईषत्पाकाभिमुखं भवति, ततो विशिष्टं पाकमुपागतं तदनन्तरं तृप्तिप्रमोदादि फलं दातुमुचितं ततः सामग्रीवशादुपभोगप्राप्तं भवति, एवं कर्मपीति, तत् पुनर्जीवेन कथं बद्धमित्यत आह-

'जीवेण कयस्स' जीवेन कर्मबन्धनबद्धेनेति गम्यते 'कृतस्य' निष्पादितस्य जीवो ह्युपयोगस्वभावस्ततोऽसौ रागादिपरिणतो भवति, न शेषो, रागादिपरिणतश्च सन् कर्म करोति, सा च रागादिपरिणतिःकर्मबन्धबद्धस्य भवति, न तद्वियोगे, अन्यथा मुक्तानामप्यवीतरागत्वप्रसक्तेः, ततः कर्मबन्धनबद्धेन सता जीवेन कृतस्येति द्रष्टव्यं, उक्तं च-

॥ १ ॥ "जीवस्तु कर्मबन्धबद्धो वीरस्य भगवतः कर्त्ता ।
सन्तत्याऽनाद्यं च तदिष्टं कर्मात्मनः कर्त्तुः ॥" इति,

तथा जीवेन निर्वर्त्तितस्य, इह बन्धसमये जीवः प्रथमोऽविशिष्टान् कर्मवर्गणान्तःपातिनः पुद्गलान् गृह्णन् अनाभोगिकेन वीर्येण तस्मिन्नेव बन्धसमये ज्ञानावरणीयादितया व्यवस्थापत्याहारमिव रसादिसप्तधातुरूपतया यच्च ज्ञानावरणीयादितया व्यवस्थापनं तन्निर्वर्त्तनमित्युच्यते, तथा जीवेन परिणामितस्य-विशेषप्रत्ययैः प्रद्वेषनिह्नवादिभिस्तं तमुत्तरोत्तरं परिणामं प्रापितस्य, स्वयं वा विपाकप्राप्ततया परनिरपेक्षमुदीर्णस्य-उदयप्राप्तस्य परेण वा उदीरितस्य-उदयमुपनीतस्य तदुभयेन-स्वपररूपेणोभयेन उदीर्यमाणस्य-उदयमुपनीयमानस्य गतिं प्राप्य किञ्चिद्धि कर्म काञ्चिद् गतिं प्राप्य तीव्रानुभावं भवति,

यथा नरकगतिं प्राप्यसातवेदनीयं, असातोदयो हि यथा नारकाणां तीव्रो भवति न तथा तिर्यगादीनामिति, तथा स्थितिं प्राप्य सर्वोत्कृष्टामिति शेषः, सर्वोत्कृष्टां हि स्थितिमुपगतमशुभं कर्म तीव्रानुभावं भवति, यथा मिथ्यात्वं भवं प्राप्य, इह किमपि कर्म कञ्चिद्भवमाश्रित्य स्वविपाकदर्शनसमर्थं यथा निद्रा मनुष्यभवं तिर्यग्भवं वा प्राप्य ततो भवं प्राप्येत्युक्तं, एतावता किल स्वत उदयस्य कारणानि दर्शितानि, कर्म हि तां तां गतिं स्थितिं भवं वा प्राप्य स्वयमुदयमागच्छतीति, सम्प्रति परत उदयमाह-पुद्गलं काष्ठलेष्टुखङ्गादिलक्षणं प्राप्य, तथाहि परेणं क्षिप्तं काष्ठलेष्टुखङ्गादिकमासाद्य भवत्यसातवेदनीयक्रोधादीनामुदयः, तथा पुद्गलपरिणामं प्राप्य-इह किञ्चित्कर्म कमपि पुद्गलमाश्रित्य विपाकमायाति, यथाऽभ्यवहृतस्याहारस्याजीर्णत्वपरिणाममाश्रित्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

असातवेदनीयं ज्ञानावरणीयं सुरापानमति, ततः पुद्गलपरिणामं प्राप्येत्युक्तं,

कतिविधोऽनुभावः प्रज्ञप्त इत्येष प्रश्नः, अत्र निर्वचनं– दशविधोऽनुभावः प्रज्ञप्तः कतदेव दशविधमनुभावं दर्शयति–सोयावरणे' इत्यादि, इह श्रोत्रशब्देन श्रोत्रेन्द्रियविषयः क्षयोपशमः परिगृह्यते 'सोयविन्नाणावरणे' इति श्रोत्रविज्ञानशब्देन श्रोत्रेन्द्रियोपयोगो, यत्तु निर्वृत्त्युपकरणलक्षणं द्रव्येन्द्रियं तदङ्गोपाङ्गनामकर्मनिर्वर्त्त्यं न ज्ञानावरणविषय इति न श्रोत्रशब्देन गृह्यत्ते, एवं नेत्रावरणे इत्याद्यपि भावनीयं, तच्चैकेन्द्रियाणां रसनघ्राणचक्षुःश्रोत्रविषयाणं लब्ध्युपयोगानां प्राय आवरणं, प्रायोग्रहणं च बकुलादिव्यवच्छेदार्थं, बकुलादीनां हि यथायोगं पञ्चानामपीन्द्रियाणां लब्ध्युपयोगाः फलतोऽस्पष्टा उपलक्ष्यन्ते, आगमेऽपि च प्रोच्यन्ते–

॥१॥ "पंचिंदियोवि बउलो नरोव्व पंचिंदिओवओगाओ।
तहवि न भण्णइ पंचिंदिओत्ति दव्विंदियाभावा ॥"

–तथा

॥२॥ "जह सुहुमं भाविंदयनाणं दव्विंदियावरोहेवि।
दव्वसुयाभावंमिवि भावसुयं पत्थिवाईणं ॥" इति

ततः प्राय इत्युक्तं, द्वीन्द्रियाणां घ्राणचक्षुःश्रोत्रेन्द्रियविषयाणां लब्ध्युपयोगानां त्रीन्द्रियाणांचक्षुःश्रोत्रविषयाणां चतुरिन्द्रियाणां श्रोत्रेन्द्रियलब्ध्युपयोगावरणं सर्वेषामपि स्पर्शनेन्द्रियलब्ध्युपोगावरणं कुष्ठादिव्याधिभिरुपहतदेहस्य द्रष्टव्यं, पञ्चेन्द्रियाणामपि जात्यन्धादीनां पश्चाद्वा अन्घबधिरीभूतानां चक्षुरादीन्द्रियलब्ध्युपयोगावरणं भावनीयं, कथमेवमिन्द्रियाणां लब्ध्युपयोगावरणमिति चेत्, उच्यते, स्वयमुदीर्णस्य परेण वा उदीरितस्य ज्ञानावरणीयकर्मण उदयेन, तथा चाह– 'जं वेएइ' इति, यद्वेदयते परेण क्षिप्तं काष्ठलेष्टुखङ्गादिलक्षणं पुद्गलं तेनाभिधातजननसमर्थेन 'पुग्गले वा' इति यावद्बहून् पुद्गलान् काष्ठादिलक्षणान् परेण क्षिप्तान् वेदयते, तैरभिघातजननसमर्थैः, 'पुद्गलपरिणामं वा' इति यं वा पुद्गलपरिणाममभ्यवहृताहारपरिणामरूपं पानीयरसादिकमति- दुःखजनकं वेदयते तेन वा ज्ञानपरिणत्युपहननात् तथा–'वीससा वा पोग्गलाणं परिणाम'मिति विस्रसया यःपुद्गलानां परिणामः शीतोष्णातपादिरूपस्तं वेदयते यदा तदा तेनेन्द्रियोपघातजननद्वारेण ज्ञानपरिणतावुपहतायां ज्ञातव्यमेवैन्द्रियकमपि सद्वस्तु न जानाति, ज्ञानपरिणतेरुपहतत्वात्, अयं सापेक्ष उदय उक्तो, निरपेक्षस्य तु विषये सूत्रमिदम्–

'तेसिं वा उदएणं'ति तेषां वा ज्ञानावरणीयकर्मपुद्गलानां विपाकप्राप्तानामुदयेन ज्ञातव्यं न जानाति 'जाणिउकामेवि न याणइ' इति ज्ञानपरिणामेन परिणंतुमिच्छन्नपि ज्ञानपरिणत्युपघातान्न जानाति, 'जाणित्तावि न याणइ' इति, प्राक् ज्ञात्वाऽपि पश्चान्न जानीते, तेषामेव ज्ञानावरणीयकर्मपुद्गलानामुदयात्, 'उच्छन्ननाणी यावि भवइ' इत्यादि, ज्ञानावरणीयस्य कर्मण उदयेन जीव उच्छन्नज्ञान्यपि भवति, उच्छन्नं च तद् ज्ञानं च उच्छन्नज्ञानं तस्यास्तीति उच्छन्नज्ञानी, सर्वधनादिपाठाभ्युपगमादिन्, यावत्शक्तिप्रच्छादितज्ञान्यपि भवतीत्यर्थः, 'एस णं गोयमा ! नाणावरणिज्जे कम्मे' इत्याद्युपसंहारवाक्यं कण्ठ्यं,

'दंसणावरणिज्जस्स णं भंते !' इत्यादि प्रश्नसूत्रं पूर्ववत्, निर्वचनमाह–गौतम ! नवविधः प्रज्ञप्तः, तदेव नवविधत्वं दर्शयति– 'निद्रा' इत्यादि, निद्राशब्दार्थमग्ने वक्ष्यामो, भावार्थस्त्वयम्–

Jain Education International   For Private & Personal Use Only   www.jainelibrary.org

॥ १ ॥ "सुहपडिवोहा निद्दा दुहपडिबोहा य निद्दनिद्दा य।
पयला होइ ढियस्स उ पयलपयला य चंकमतो ॥
॥ २ ॥ थीणगिद्धी पुण अइसंकिलिट्ठकम्मणुवेयणे होइ।
महनिद्दा दिनचिंतियवावारपसाहणी पायं ॥"

चक्षुर्दर्शनावरणं–चक्षुःसामान्योपयोगावरणं, एवं शेषेष्वपि भावनीयं, 'जं वेयइ' इत्यादि, यं वेदयते पुद्गलं मृदुशयनादिकं 'पुग्गले वा' इति यान् पुद्गलान् बहून् मृदुशयनीयादीन् वेदयते पुद्गपरिणामं माहिषदध्याद्यभ्यवहताहारपरिणाममित्यर्थः, 'वीससा पोग्गलाण परिणाम'मिति वर्षास्वभ्रमसम्भृतनभोरूपं धाराम्बुनिपातरूपं वा यं वेदयते तेन निद्राद्युदयापेक्षया दर्शनपरिणत्युपघाते एतावता परत उक्तः सम्प्रति स्वत उदयमाह–'तेसिं वा उदएणं' ति तेषां वा दर्शनावरणीयकर्मपुद्गलानामुदयेन परिणतिविधातेन द्रष्टव्यं न पश्यति, तथा कश्चित् दर्शनपरिणामेन परिणन्तुमिच्छन्नपि जात्यन्धत्वादिना दर्शनपरिणत्युपघातान्न पश्यति, प्राग् दृष्ट्वापि पश्चान्न पश्यति, दर्शनावरणीयकर्मपुद्गलानामुदयात्, किं बहुना ?, दर्शनावरणीयस्य कर्मण उदयेन जीव उच्छन्नदर्शन्यपि यावच्छक्तिप्रच्छादितदर्शन्यपि भवति, 'एस णं गोयमा ! दरिसणावरणिज्जे कम्मे' इत्याद्युपसंहारवाक्यं।

'सायावेयणिज्जस्स णं भंते ! कम्मस्स' इत्यादि प्रश्नसूत्रं प्राग्वत्, निर्वचनमाह–गौतम ! अष्टविधोऽनुभावः प्रज्ञप्तः, अष्टविधत्वमेव दर्शयति–'मणुन्ना सद्दा' इत्यादि, मनोज्ञाः शब्दा आगन्तुका वेणुवीणादिसम्बन्धिनः, अन्ये आत्मीया इत्याहुस्तदयुक्तं, आत्मीयशब्दानां वाक्सुखेनेत्यनेनैव गृहीतत्वात्, मनोज्ञा रसा–इक्षुरसप्रभृतयः, मनोज्ञा गन्धाः–कर्पूरादिसम्बन्धिः, मनोज्ञानि रूपाणि–स्वगतस्वस्त्रीगतचित्रादिगतानि मनोज्ञाः स्पर्शा–हंसतूल्यादिगता 'मनोसुहया' इति मनसि सुखं यस्यासौ मनःसुखस्तस्य भावो मनःसुखता, सुखितं मन इत्यर्थः, वाचि सुखं यस्यासौ वाक्सुखस्तस्य भावो वाक्सुखता, सर्वेषां श्रोत्रमनःप्रल्हादकारिणी वागिति तात्पर्यार्थः, काये सुखं यस्यासौ कायसुखस्तद्भावः कायसुखता, सुखितःकाय इत्यर्थः,एते चाष्टौ पदार्थाः सातावेदनीयस्योदयेन प्राणिनामुपतिष्ठन्ते तत उक्तोऽष्टविध; सातवेदनीयस्यानुभावः

परतःसातावेदनीयस्योदयमुपदर्शयति–'जं वेएइ पुग्गल'मित्यादि, यद्वेदयते पुद्गलं स्रक्चन्दनादि यान् वेदयते पुद्गलान् बहून् स्रक्चन्दनादीन् यं वा वेदयते पुद्गलपरिणामं देशकालवयोऽवस्थानुरूपाहारपरिणामं, 'वीससा वा पुग्गलाण परिणामं' विस्रसया वा यं पुद्गलानां परिणामं कालेऽभिलषितं शीतोष्णादिवेदनाप्रतीकाररूपं, तेन मनसः समाधानसम्पादनात् सातवेदनीयं कर्मानुभवति, सातवेदनीयकर्मफलं सातं वेदयते इत्यर्थः, उक्तः परत उदयः, सम्प्रति स्वत उदयमाह–'तेसिं वा उदएणं' ति तेषां वा सातवेदनीयकर्मपुद्गलानामुदयेन मनोज्ञशळब्दादिव्यतिरिकेणापि कदाचित् सुखं वेदयते, यथा नैरयिकास्तीर्थकरजन्मादिकाले 'एस णं गोयमा !' इत्याद्युपसंहारवाक्यं,

'असायावेयणिज्जस्स णं भंते !' इत्यादि प्रश्नसूत्रं सुगमं, निर्वचनं पूर्ववत्, तथा तथा चाह–'तहेव पुच्छा उत्तरं च' नवरमित्यादिना पूर्वसूत्रादस्य विशेषमुपदर्शयति, 'अमणुण्णा सद्दा' इत्यादि, अमनोज्ञाः शब्दाः–खरोष्ट्राश्वादिसम्बन्धिन आगन्तुका अमनोज्ञा रसाः–स्वस्याप्रतिभासिनो दुःखजनकाः अमनोज्ञा गन्धा–गोमहिषादिमृतकडेवरादिगन्धा अमनोज्ञानि रूपाणि–स्वगतस्व-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्त्रीगतादीनि अमनोज्ञाः स्पर्शाः–कर्कशादयः, 'मणोदुहिया' इति दुःखितं मन इति 'वइदुहिया' इति अभव्या वाक् इति भावार्थः, 'कायदुहिया' इति काये दुःखं यस्यासौ कायदुःशस्तद्भावः कायदुःखिता दुःखितकाय इत्यर्थः, 'जं वेएइ' इत्यादि, यं वेदयते पुद्गलं–विषशस्त्रकण्डकादि 'पुग्गले वा' इति यान् वा पुद्गलान् बहून् विषशस्त्रकण्डकादीन् वेदयते पुद्गलुपरिणाम-मपथ्याहारलक्षणं, विस्रसया वा यं वेदयते पुद्गलपरिणामं अकालेऽभिलषितं शीतोष्णादिपरिणामं, तेन मनसोऽसमाधानसम्पादनात्, असातवेदनीयं कर्मानुभवति, असातवेदनीयकर्मफलमसातं वेदयते इति भावः, एतेन परत उदय उक्तः, सम्प्रति स्वत उदयमाह–'तेसिं वा उदएणं' ति तेषां वा असातवेदनीयकर्मपुद्गलानामुदयेनासातं वेदयते, 'एस णं गोयमा !' इत्याद्युपसंहारवाक्यं ।

'मोहणिज्जस्स णं भंते !' इत्यादि प्रश्नसूत्रं प्राग्वत्, निर्वचनं पञ्चविधोऽनुभावः प्रज्ञप्तः, तदेव पञ्चविधत्वं दर्शयति–'सम्यकत्ववेदनीय'मित्यादि, सम्यकत्वरूपेण यद्वेद्यं तत्सम्यकत्ववेदनीयं, एवं शेषपदेष्वपि शब्दार्थो भावनीयः, भावार्थस्त्वयं–यदिह वेद्यमानं प्रशमादिपरिणामं करोति तत्सम्यकत्ववेदनीयं, यत्पुनरदेवादिबुद्धिहेतुस्तन्मिथ्यात्ववेदनीयं, मिश्रपरिणामहेतुः सम्यग्मिथ्यात्ववेदनीयं, क्रोधादिपरिणामकारणं कषायवेदनीयं हास्यादिपरिणामकारणं नोकषायवेदनीयं, 'जं वेएण पुग्गल'मित्यादि, यं वेदयते पुद्गगलविषयं प्रतिमादिकं पुद्गलान् वा यान् वेदयते बहून् प्रतिमादीन् यं वा पुद्गलपरिणां देशाद्यनुरूपाहारपरिणामं कर्मपुद्गलविशेषो-पादानसमर्थं भवति, आहारपरिणाम विशेषादपि कदाचित्कर्मपुद्गलविशेषोस यथा ब्राह्मयौषध्याद्याहारपरिणामात् ज्ञानावरणीयकर्मपुद्गलानां प्रतिविशिष्टः क्षयोपशमः, उक्तं च–

॥१॥ "उदयखयखओवसमोवसमावि य जं च कंमुणो भणिया।
दव्वं खेत्तं कालं भावं च भवं च संपप्प ॥"

विस्रसया वा यं पुद्गलानां परिणामं अभ्रविकारादिकं यद्दर्शनादेव विवेक उपजायते,

॥१॥ "आयुः शरज्जलधरप्रतिमं नराणां, सम्पत्तयः कुसुमितद्रुमसारतुल्याः ।
स्वप्नोपभोगसदृशा विषयोपभोगाः, सङ्कल्पमात्ररमणीयमिदं हि सर्वम् ॥" इत्यादि,

अन्यं वा प्रशमादिपरिणामनिबन्धनं वं वेदयते तत्सामध्यात् मोहनीयं सम्यकत्ववेदनी-यादिकं वेदयते, सम्यकत्वेदनीयादिकर्मफलं प्रशमादि वेदयते इति भावः, एतावता परत उदय उक्तः, सम्प्रति स्वतस्तमाह–'तेसिं वा उदएणं' ति तेषां च सम्यकत्ववेदनीयादिकर्मपुद्गलानामुदयेन प्रशमादि वेदयते, 'एस णं' इत्याद्युपसंहारवाक्यं ।

'आउस्स णं भंते ! इत्यादि, प्रश्नसूत्रं प्राग्वत्, निर्वचनं चतुर्विधोऽनुभावः प्रज्ञप्तः, तदेव चतुर्विधत्वं दर्शयति–'नेरइयाउए' इत्यादि सुगमं, 'जं वेएइ पुग्गलं वा' इत्यादि, यं वेदयते पुद्गलं शस्त्रादिकमायरपवर्त्तनसमर्थं बहून् पुद्गलान् शस्त्रादिरूपान् यान् वेदयते यं वा पुद्गलपरिणामं विषान्नादिपरिणामरूपं विस्रसया वा यं पुद्गलपरिणामं शीतादिकमेवायुरपवर्त्तनक्षमं, तेनोपयुज्य-मानमूवायुषोऽवर्त्तनात्, नारकाद्यायुःकर्म वेदयते, एतानवता परत उदयोऽभिहितः, स्वत उदयस्य सूत्रमिदं–'तेसं वा उदएणं' ति तेषां वा नारकाद्यायुःपुद्गलानामुदयेन नारकाद्यायुर्वेदयते 'एस ण'मित्याद्युपसंहारवाक्यं ।

नामकर्म द्विधा–शुभनामकर्म अशुभनामकर्म च, तत्र शुभनामकर्माधिकृत्य सूत्रमाह–

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'सुभनामकम्मस्स णं भंते !' इत्यादि प्रश्नसूत्रं प्राग्वत्, निर्वचनं चतुर्दशविधोऽनुभावः प्रज्ञप्तः, तदेव च चतुर्दशविधत्वं दर्शयति–'इट्ठा सद्दा' इत्यादि, एते शब्दादय आत्मीया एव परिगृह्यन्ते, नामकर्मविपाकस्य चिन्त्यमानत्वात्, तत्र वादित्राद्युत्पादिता इत्येके, तयुक्तं, तेषामन्यकर्मोदयनिष्पाद्यत्वात्, इष्टा गतिर्मत्तावारणाद्यनुकारिणी शिबिकाद्यारोहणतश्चेत्येके, इष्टा स्थितिः सहजा सिंहासनादौ चान्ये, इष्टं लावण्यं–छायाविशेषलक्षणं कुङ्कुमाद्यनुलेपनजमित्यपरे इष्टा यशःकीर्त्तिः यशसा युक्ता कीर्त्तिः २, यशःकीर्त्योश्चायं विशेषः–'दानपुण्यरकृता कीर्त्तिः, पराक्रमकृतं यशः' 'इट्ठे उट्ठाणकम्मबलवीरियपुरिसक्कारपरक्कमे' इति उत्थानं–देहचेष्टाविशेषः कर्म–आरेचनभ्रमणादिबलं–शारीरसामर्थ्यविशेषः वीर्यं–जीवप्रभवःस एव पुरुषकारः–अभिमानविशेषः स एव निष्पादितस्वविषयः पराक्रमः इष्टस्वरता–वल्लभस्वरता, तत्र इष्टाःशब्दा इति सामान्योक्ताविषयं विशेषोक्तिस्तदन्यबहुतमत्वापेक्षाऽवगन्तव्या, 'कांतस्वरते'ति कान्तः–कमनीयः सामान्यतोऽभिलषणीय इत्यर्थः, कान्तः स्वरो यस्य स तथा तद्भावःकान्तस्वरता, 'प्रियस्वरते'ति प्रियो–भूयोऽभिलषणीयःप्रियः स्वरो यस्य स तथा तद्भावः प्रियस्वरता, 'मणुण्णस्सरता' इति उपरतभावोऽपि स्वालम्बन्प्रीतिजनको मनोज्ञः स स्वरो यस्य स मनोज्ञस्वरस्तद्भावो मनोज्ञस्वरता,

'जं वेएइ' इत्यादि, यं वेदयते पुद्गलं वीणावर्णकगन्धताम्बूलपट्टशिबिकासिंहासनकुङ्कुमदानराजयोगगुलिकादिलक्षणं, तथा च वीणादिसंम्बन्धाद् भवन्तीष्टाः शब्दादय इति परिभावनीयमेतत्सूक्ष्मधिया मार्गप्रहर्षमनसोऽनुसारिण्या, 'पुग्गले वा' इति यतो बहून् पुद्गलान् वेणुवीणादिकान् वेदयते यं पुद्गलपरिणामं ब्राह्मौषध्याहारपरिणामं विस्रसया वा यं पुद्गलानां परिणामं–शुभजलदादिकं तथा चोन्नतान् कज्जलसमप्रभान् मेघानवलोक्य गायन्ति मत्तयुवतयो रेल्लुकानिष्टस्वरानित्यादि, तत्प्रभावात्, शुभनामकर्म वेदयते, शुभनामकर्मफलमिष्टस्वरतादिकमनुभवतीति भावः, एतावता परत उक्तः,इदानीं स्वतस्तमाह–'तेसिं वा उदएणं'ति तेषां वा शुभानां कर्मपुद्गलानामुदयेन इष्टशब्दादिकं वेदयते, 'एस णं गो० !' इत्याद्युपसंहारवाक्यं,

'दुहनामस्स णं भंते !' इत्यादि प्रश्नसूत्रं प्राग्वत्, निर्वचनसूत्रं प्रागुक्तार्थवैपरीत्येन भावनीयं,

गोत्रं द्विधा–उच्चैर्गोत्रं नीचैर्गोत्रं च, तत्रोच्चैर्गोत्रविषयं सूत्रमाह–'उच्चागोयस्स णं भंते !' इत्यादित प्रश्नसूत्रं प्राग्वत्, निर्वचनमष्टविधोऽनुभावः प्रज्ञप्तः, तदेवाष्टविधत्वं दर्शयति–'जाइविसिट्ठया' इत्यादि, जात्यादयः सुप्रतीताः, शब्दार्थस्त्वेवम्–जात्या विशिष्टो जातिविशिष्टस्तद्भावो जातिविशिष्टता इत्यादि 'जं वेएइ पुग्गलं वा' इत्यादि यं वेदयते पुद्गलं बाह्यद्रव्यादिलक्षणं, तथाहि–द्रव्यसम्बन्धाद्राजादिविशिष्टपुरुशम्परिग्रहाद्वा नीचजातिकुलोत्पन्नोऽपि जात्यादिसम्पन्न इव जनस्य मान्य उपजायते, बलविशिष्टताऽपि मल्लानामिव लकुटिभ्रमणवशात् रूपविशिष्टता प्रतिविशिष्टताद्दग्वस्त्रालङ्कारसम्बन्धात् तपोविशिष्टता गिरिकूट्याद्यारोहणेनातापनां कुर्वतः श्रुतविशिष्टता मनोत्रभूदेसम्बन्धात् स्वाध्यायं कुर्वतः लाभविशिष्टता प्रतिविशिष्टरत्नादियोगात् ऐश्वर्यविशिष्टता धनकनकादिसम्बन्धादिति, 'पुग्गले वा' इति यान् बहून् पुद्गलान् वेदयते पुद्गलपरिणामं–दिव्यफलाद्याहारपरिणामरूपं विस्रसया वा यंपुद्गलानां परिणामंअकस्मादभिहितजलदागमलसंवादादिलक्षणं तत्प्रभावादुच्चैर्गोत्रं वेदयते–उच्चैर्गोत्रकर्मफलं जातिविशिष्टत्वादिकं वेदयते, एतेन परत उदय उक्तः,सम्प्रति स्वतस्तमाह–'तेसिं वा उदएणं'तेषां वा उच्चैर्गोत्रकर्मपुद्गलानां उदयेन जातिविशिष्टत्वादिकं, भवति,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'एस णं गोयम' इत्याद्युपसंहारवाक्यं, 'नीयागोयस्स णं भंते !' इत्यादिस प्रश्नसूत्रं प्राग्वत्, निर्वचनमष्टविधोऽनुभावः, तमेवाष्टविधमनुभावं दर्शयति–'जाइविहीणया' इत्यादि, सुप्रतीतं, 'जं वेएइ पुग्गल'मिति यं वेदयते पुद्गलं नीचकर्मोसेवनरूपं नीचपुरुषसम्बन्धलक्षणं वा, तथाहि–उत्तमजातिसम्पन्नोऽपि उत्तमकुलोत्पन्नोऽपि यदि नीचैःकर्मवशात् यथा (अधम) जीविकारूपमासेवते चाण्डालीं वा गच्छति तदा भवति चाण्डालादिरिव जनस्य निन्द्यः, बलहीनता सुखशयनीयादिसम्बन्धतः रूपविहीनता कुत्सितवस्त्रादिसम्बान्धात् तपोविहीनता पार्श्वस्थादिसंसर्गात् श्रुतविहीनता विकथापरसाध्वाभासादिसंसर्गात् लाभविहीनता देशकालानुचितकुक्रयाणकसम्पर्कतः ऐश्वर्यविहीनता कुग्रहकुकलत्रादिसम्पर्कत इति 'पुग्गले'इति यान् बहून् पुद्गलान् वेदयते यं वा पुद्गलपरिणामं वृन्ताकीफलाद्याहारपरिणामरूपं, वृन्ताकीफलं ह्यभ्यवहृतं कण्डूत्युत्पादनेन रूपविहीनतामापादयतीत्यादि, विश्रसया वा पुद्गलानां परिणामं अभिहितजलदागमविसंवादलक्षणं वेदयते, तत्प्रभावात्, नीचैःकर्म वेदयते, नीचैःकर्मफलं जात्यादिविहीनतारूपं वेदयते इत्यर्थः, एतावता परत उदय उक्तः, सम्प्रति स्वत उदयमाह–'तेसिं वा उदए णं'ति तेषां वा–नीचैर्गोत्रकर्मपुद्गलानामुजयेन जात्यादिविहीनतामनुभवति, 'एस णं गोयमा !' इत्याद्युपसंहारवाक्यं,

'अतरायस्स णं भंते !' इत्यादि प्रश्नसूत्रं प्राग्वत्, निर्वचनं पञ्चविधोऽनुभावः प्रज्ञप्तः, तदेव पञ्चविधत्वं दर्शयति–'दानंतराए' इत्यादि, दानस्यान्तरायो–विघ्नः दानान्तरायः, एवं सर्वत्र भावनीयं, तत्र दानान्तरायो दानान्तरायस्य कर्मणः फलं लाभान्तरायादयो लाभान्तरायादिकर्मणामिति 'जं वेएइ पुग्गलं वा' इत्यादि, यं वेदयते पुद्गलं तथाविधविशिष्टरत्नादिलक्षणं, तथाहि–प्रतिविशिष्टरत्नादिसम्बन्धात् दृश्यते तद्विषये एव दानान्तरायोदयः सन्धिच्छेदनाद्युपकरणसम्बन्धाल्लाभान्तरायकर्मोदयः प्रतिविशिष्टाहारसम्बन्धादनर्धार्थसम्बन्धाद्वा लोभतो भोगान्तरायोदयः एवमुपभोगान्तरायकर्मोदयोऽपि भावनीयः, तथा लकुटादिअभिघाताद्वीर्यान्तरायकर्मोदय इति,

'पुग्गले वा' बहून् तथाविधान् यान् पुद्गलान् वेदयते यं वा पुद्गलपरिणामं तथाविधाहारौषध्यादिपरिणामरूपं, तथाहि–दृश्यते तथाविधाहारौषधपरिणामाद्वीर्यान्तरायकर्मोदयः मन्त्रापसिक्तवासादिगन्धपुद्गलपरिणामात्, भोगान्तरायादयो यथा सुबन्धुसचिवस्य, विस्रसया वा यं पुद्गलानां परिणामं चित्रं शीतादिलक्षं, तथाहि–दृश्यन्ते वस्त्रादिकं दातुकामा अपि शीतादि निपतन्तमालोक्य दानान्तरायादयात् तस्यादातार इति तत्प्रभावात्, एष परत उदय उक्तः,-स्वतस्तमाह–'तेसिं वा उदएणं'ति तेषां वा–अन्तरायकर्मपुद्गलानामुदयेन अन्तरायकर्मफलं दानान्तरायादिकं वेदयते–'एस णं'मित्याद्युपसंहारवाक्यम् ।

पदं – २३, उद्देशकः– समाप्तम्

–: पदं – २३, उद्देशकः– २ :–

वृ. व्याख्यातः प्रथमोद्देशकः, इदानीं द्वितीयो व्याख्येयः, तस्य चायमभिसम्बन्धः,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इहानन्तरोद्देशके ज्ञानावरणीयादीनामनुभाव उक्तः, इह तु तेषामेव ज्ञानावपरणीयादीनामुत्तर-प्रकृतिविभाग उच्यते, तत्र विशेषपरिज्ञानार्थं भूयोऽपि मूलप्रकृतिविषयं प्रश्ननिर्वचनसूत्रमाह-

मू. (५४०) *कति णं भंते ! कममपगडीओ पन्नत्ताओ, गो० ! अट्ठकम्मपगडीओ पं०, तं०-नानावरणिज्जं जाव अंतराइयं, । नाणावरणिज्जे णं भंते ! कम्मे कतिविधे पं० ?, गो० ! पंचविधे पं०, तं०-आभिनिबोहियनाणावरणिज्जे जाव केवलनाणावरणिज्जे,*

दंसणावरणिज्जे णं भंते ! कम्मे कतिविधे पं० ?, गो० ! दु० पं० तं०-निद्दापंचए य दंसणचउक्के य, निद्दापंचए णं भंते ! कतिविधे पं० ?, गो० ! पंचविहे पं०, तं०-निद्दा जाव थिणद्धी, दंसणचउक्कए णं पुच्छा, गो० ! चउव्विधं पं०, तं०-चक्खुदंसणावरणिज्जे जाव केवलदंसणावरणिज्जे, वेयणिज्जे णं भंते! कम्मे कतिविधे पं० ?, गो० ! दुविहे पं०, तं०-सायवेयणिज्जे य असायावेयणिज्जे य, सातावेयणिज्जे णं भंते ! कम्मे पुच्छा, गो० ! अट्ठविधे पं०, तं०-मणुण्णा सद्दा जाव कायसुहया, असायावेदणिज्जे णं भंते ! कम्मे कतिविधे पं० ?, गो० ! अट्ठविधे पं०, तं०-अमणुण्णा सद्दा जाव कायदुहया,

मोहणिज्जे णं भंते ! कम्मे कतिविधे पं० ?, गो० ! दु० पं०, तं०-दंसणमोहणिज्जे य चरित्तमोहणिज्जे य, 'दंसणमोहणिज्जे णं भंते ! कम्मे कतिविधे पं० ?, गो० ! तिविहे पं०, तं०-सम्मत्तवेदणिज्जे मिच्छत्तवेयणिज्जे सम्मामिच्छत्तवेयणिज्जे,

चरित्तमोहणिज्जे णं भंते ! कम्मे कतिविधे पं० ?, दुविधे पं०, तं०-कसायवे० नोकसायवेद०, कसायवेदणिज्जे णं भंते ! कतिविधे पं० ?, गो० ! सोसलसविधे पं०, तं०-अनंतानुबंधी कोहे अनंताणुबंधी माने अ० माया अ० लोभे, अपच्चक्खाणे कोहे एवं माणे माया लोभे, पच्चक्खाणावरणे कोहे एवं माणे माया लोभे, संजलणकोहे एवं माणे माया लोभे, नोकसायवेयणिज्जे णं भंते ! कम्मे कतिविधे पं० ?, गो० ! नविहे पं०, तं०-इत्थीवेयणिज्जे पुरिसवे० नपुंसगवे० हासे रती अरती भए सोगे दुगुंछा,

आउए णं भंते ! कम्मे कतिविधे पं० ?, गो० ! चउव्विधे पं०, तं०-नेरइयाउए जाव देवाउए,

नामे णं भंते ! कम्मे कतिविधे पं० ?, गो० ! बायालीसतिविहे पन्नत्ते, तं०-गतिनामे १ जातिनामे २ सरीरनामे ३ सरीरोवंगनामे ४ सरीरबंधणनामे ५ सरीरसंघयणनामे ६ संघायणनामे ७ संठाणनामे ८ वण्णणनमे ९ गंधनामे १० रसनामे ११ फासनामे १२ अगुरुलघुनामे १३ उवघायनामे १४ पराघायनामे १५ आणुपुव्विनामे १६ उस्सासनामे १७ आयवनामे १८ उज्जोयनामे १९ विहायगतिनामे २० तसनामे २१ थावरनामे २२ सुहुमनामे २३ बादरनामे २४ पज्जत्तनामे २६ अपज्जत्तनामे २६ साहारणसरीरनामे २७ पत्तेयसरीरनामे २८ थिरनामे २९ अथिरनामे ३० सुभनामे ३१ असुभनामे ३२ सुभगनामे ३३ दुभगतनामे ३४ सूसरनामे ३५ दूसरनामे ३६ आदेज्जनामे ३७ अणादेज्जनामे ३८ जसोकित्तिनामे २९ अजसोकित्तिनामे ४० निम्माणना० ४१ तित्थगरना० ४२ ।

गतिनामे णं भंते ! कतिविहे पं० १, गो० ! चउव्विहे पं०, तं०-निरय० तिरिय० मणु० देवगतिनामे, जातिनामे णं भंते ! कम्मे पुच्छा, गो० ! पंच० पं०, तं०-एगिंदियजातिनामे जाव

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पंचिंदियजातिना०, सरीरनामे णं भंते! कम्मे कतिविधे पं० ?, गो० ! पंच० पं०, तं०–ओरालिय-सरीरनामे जाव कम्मसरीरनामे, सरीरोवंगनामे णं भंते ! कतिविधे पं० ?, गो० ! तिविधे पं०, तं०–ओरालियसरीरोवंगनामे वेउव्वियसरीरोवंग० आहारगसरीरोवं०,

सरीरबंधणनामे णं भंते ! कतिविहे पन्नत्ते ?, गो० ! पंचविधे पं० तं०–ओरालियसरीर-बंधननामे जाव कम्मसरीरबंधणनामे, सरीरसंघायननामे णं भंते ! कति० ?, गो० ! पंचविधे पं०, तं०–ओरालियसरीरसंघायननामे जाव कम्मगसरीरसंघायननामे, संघयणनामे णं भंते ! कतिविधे पं० ?, गो० ! छव्विहे पं०, तं—वइरोसभनारायसंघयणनामे उसहनारायसं० नारायसंघ० अद्धनारायसं– कीलियासंघ० छेवट्ठसंघयणनामे, संठाणनामे णं भंते ! कतिविधे पं० ?, गो० ! छव्विहे पं०, तं०–समचउरंससंठाणनामे निग्गोहपरिमंडलसंठा० साइसं० वामणसं० खुज्जसं० हुंडसंठाणनामे,

वण्णनामे णं भंते ! कम्मे कतिविधे पं० ? गो० ! पंचविधे पं०, –कालवण्णनामे जाव सुक्किल्लवण्णनामे, गंधनामे णं भंते ! कम्मे पुच्छा, गो० ! दु० पं०, तं०–सुरभिगंधनामे दुरभिगंधनामे, रसनामे णं पुच्छा, गो० ! पंचविधे पं०, तं०–तित्तरसनामे जाव महुररसनामे, फासनामे णं पुच्छा, गो० ! अट्ठविहे पं०, तं०–कक्खडफासनामे जाव लहुयफासनामे, अगुरुलहुयनामे एगागारे पं०. उवघायनामे एगागारे पं०, पराघातनामे एगागारे पं०, आनुपुव्विनामे चउव्विहे पं०, तं०–नेरइयआणुपुव्वीनामे जाव देवाणुपुव्वीनामे, उस्सासनामे एगागारे पं०,

सेसाणि सव्वाणि एगागाराइं पन्नत्ताइं जाव तित्थगरनामे,

नवरं विहायगतिनामे दुविधे पं०, तं०–पसत्थविहायगइनामे अपसत्थविहायगतिनामे य । गोए णं भंते ! कम्मे कइविहे पं० ?, गो० ! दुविहे पं०, तं०–उच्चागोए य नीयागोए य, उच्चागोए णं भंते ! कइविधे पं० ?, गो० ! अट्ठविधे पं०, तं०–जाइविसिट्ठया जाव इस्सरियविसिट्ठया, एवं नीयागोएवि, नवरं जातिविहीणता जाव इस्सरियविहीणया ।

अंतराए णं भंते ! कम्मे कतिविधे पं० ?, गो० ! पंचविधे पं०, तं०–दाणतराइए जाव वीरियंतराइए ।

वृ. 'कइ णं भंते!' इत्यादि पूर्ववत्, सम्प्रति 'यथोद्देशं तथा निर्देश' इति न्यायात् ज्ञानावरणी-योत्तरप्रकृतिविषयं सूत्रमाह–

'नाणावरणिज्जे णं भंते !' इत्यादि, इह आभिनिबोधिकादि इत्यादिशब्दार्थ उपयोगपदे वक्ष्यते, विग्रहभावना त्वियम्–आभिनिबोधिकज्ञानस्यावरणीयं आभिनिबोधिकज्ञानावरणीयं, एवं श्रुतज्ञानावरणीयमित्यादिष्वपि भावनीयं ।

दर्शनावरणीयोत्तरप्रकृतीराह–'दरिसणावरणिज्जे णं भंते !' इत्यादि, 'द्रा कुत्सायां' नियतं द्रातिकुत्सितत्वमविस्पष्टत्वं गच्छति चैतन्यं यस्यां स्वापावस्थायां सा निद्रा, यदिवा 'द्रै स्वप्ने' निद्राणं निद्रा, नखच्छोटिकामात्रेण यस्यां प्रबोध उपजायते सा स्वापावस्था निद्रा, तद्विपाकवेद्या कर्मप्रकृतिरपि निद्रा कारणे कार्योपचारात्, 'निद्दानिद्द' त्ति निद्रातोऽतिशायिनी निद्रानिद्रा, शाकपा-र्थिवादिदर्शनात् 'मयूरव्यंसकादय' इति मध्यमपदलोपी समासः, तस्यां हि चैतन्यस्यात्यन्त-मस्फुटीभूतत्वात्, बहुभिर्घोलनाप्रकारैः, प्रबधो भवति, ततः सुखप्रबोधहेतुनिद्रातोऽस्या अति-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शायिनीत्वं, तद्विपाकवेद्या कर्मप्रकृतिरपि निद्रानिद्रा उपचारात्, तथा उपविष्ट ऊर्ध्वस्थितो वा प्रचलयति–धूर्णयति यस्यां स्वापावस्थायां सा प्रचला, तद्विपाकवेद्या कर्मप्रकृतिरपि प्रचला, 'पयलापयला' इति प्रचलातोऽतिशायिनी प्रचलापारचला, पूर्ववत् मध्यमपदलोपी समासः, सा हि चङ्क्रमणादिकमपि कुर्वत उदयमधि गच्छति, ततः स्थानस्थितस्वप्त प्रभवप्रचलोपक्षया तस्या अतिशायिनीत्वं, 'थीणद्धीः' इति स्त्याना–पिण्डीभूता ऋद्धिः–आत्मशक्तिरूपा यस्यां स्वापावस्थायां सा स्त्यानर्द्धिः, तद्भावे हि प्रथमसंहननस्य केशवार्द्धबलसदृशी शक्तिरूपजायते, तथा च श्रूयते प्रवचने–क्वचित् प्रदेशे कोऽपि प्राप्तः क्षुल्लकः स्त्यानर्द्धिनिद्रासहितो द्विरदेन दिवा खलीकृतः, ततस्तस्मिन् द्विरदे बद्धाभिनिवेशो रजन्यां स्त्यानध्युदये प्रवर्त्तमानःसमुत्थाय तद्दन्तमुशलमुत्पाटय स्वोपाश्रयद्वारि च प्रक्षिप्य पुनः प्रसुप्तवानित्यादि,

तथा चक्षुषा दर्सनं चक्षुर्दर्शनं तस्यावरणीयं चक्षुर्दर्शनावरणीयं अचक्षुषा–चक्षुर्वर्जशेषेन्द्रिय-मनोभिर्दर्शनमचक्षुर्दर्शनं तस्यावरणीयमचक्षुर्दर्शनावरणीयं अवधिरेव दर्शनमवधिदर्शनं तस्यावरणीयमधिदर्शनावरणीयं केवलमेव दर्शनं केवलदर्शनं तस्यावरणीयं केवलदर्शनावरणीयं, इह निद्रापञ्चकं प्राप्ताया दर्शनलब्धेरुपघातकृद् दर्शनावरणचतुष्टयं तु मूलत एव दर्शनलब्धिमुपहन्ति, आह च गन्धहस्ती–"निद्रादयः समधिगताया दर्सनलब्धेरुपघाते वर्त्तन्ते, दर्शनावरणचतुष्टयं तदुद्गमोच्छेदित्वात् समूलघातं हन्ति दर्शनलब्धि" मिति,

वेदनीयं द्विधा–सातवेदनीयसातवेदनीयं च, सातरूपेण यद्वेद्यते तत्सातवेदनीयं, तद्विपरीतमसातवेदनीयं, किमुक्तं भवति ?–यस्योदयात् शारीरं मानसं च सुखं वेदयते तत्सावदेनीयं, यस्योदयात्, पुनः शरीरे मनसि च दुःखसमनुभवति तदसातवेनीयं, एकैकमष्टविधं, मनोज्ञामनोज्ञ-शब्दादिविषयभेदात्, मोहनीयं द्विधादर्शनमोहनीयं चारित्रमोहनीयं च, दर्शनं–सम्यकत्वं तन्मोहयतीति दर्शनमोहनीयं, चारित्रं–सावद्येतरयोगनिवृत्तिप्रवृत्तिगम्यं शुभात्मपरिणामरूपं तन्मोहयतीति चारित्रमोहनीयं, चशब्दौ स्वगतानेकभेदसूचकौ,

दर्शनमोहनीयं त्रिविधं, तद्यथा–सम्यकत्ववेदनीयं मिथ्यात्ववेदनीयं मिश्रवेदनीयं, तत्र जिनप्रणीततत्त्वश्रद्धानात्मकेन सम्यकत्वरूपेणं यद्वेद्यते तत्सम्यकत्ववेदनीयं, यत्पुनर्जिनप्रणीत-तत्त्वाश्रद्धानात्मकेन मिथ्यात्वरूपेण वेद्यते तन्मिथ्यात्ववेदनीयं, यत्तु मिश्ररूपेण–जिनप्रणीततत्त्वेषु न श्रद्धानं नापि निन्देत्येवंलक्षणेन वेद्यते तन्मिश्रवेदनीयं, आह–सम्यकत्ववेदनीयं कथं दर्शनमोहनीयं न हि तद्दर्शनं मोहयति, तस्य प्रशमादिपरिणामहेतुत्वात्, उच्यते, इह सम्यकत्ववेदनीयं मिथ्यात्वप्रकृतिः, ततोऽतिचारसम्भवात्, औपशमिकक्षायिकदर्शनमोहनाच्चेदं दर्शनमोहनी-यमित्युच्यते, चारित्रमोहनीयं द्विविधं–कषायवेदनीयं नोकषायवेदनीयं च, तत्र यत्क्रोधादिक-षायरूपेण वेद्यते तत्कषायवेदनीयं, यत्पुनः स्त्रीवेदादिनोकषायरूपेण वेद्यते तन्नोकषायवेदनीयं, चशब्दौ स्वगतानेकभेदसूचकौ, तत्र कषायवेदनीयं षोडशविधं, क्रोधमानमायालोभानां प्रत्येकमनन्तानुबन्ध्यप्रत्याख्यानप्रत्याख्यानावरणसञ्ज्वलनरूपत्वात्, तत्रानन्तं संसारमनुबध्नन्ती-त्येवंशीला अनन्तानुबन्धिनः, उक्तं च–

॥१॥ "अनन्तान्यनुबध्निन्ति, यतो जन्मानि भूतये ।
ततोऽनन्तानुबन्धाख्या, क्रोधाद्येषु नियोजिता ॥"

Jain Education International	For Private & Personal Use Only	www.jainelibrary.org

एषां संयोजना इति द्वितीयमपि नाम, तत्रायमन्वर्थः–संयुज्यन्ते–सम्बध्यन्तेऽनन्त-सङ्ख्यैर्भवैर्जन्तवो यैस्ते संयोजनाः, उक्तं च–

॥१॥ "संयोजयन्ति यन्नरमनन्तसङ्ख्यैयर्भवैः कषायास्ते।
संयोजनताऽनन्तानुबन्धिता वाप्यतस्तेषाम्॥"

सर्वं प्रत्याख्यानं देशप्रत्याख्यानं च येषामुदये न लभ्यते ते भवन्त्यप्रत्याख्यानाः, सर्वनिषेधवचनोऽयं नञ्, उक्तं च–

॥१॥ "स्वल्पमपि नोत्सहेद्येषां, पत्याख्यानमिहोदयात्।
अप्रत्याख्यानसंज्ञाऽतो, द्वितीयेषु निवेशिता॥"

तथा प्रत्याख्यानं–सर्वविरतिरूपमाव्रियते यैस्ते प्रत्याख्यानावरणाः, आह च–

॥१॥ "सर्वसावद्यविरतिः, प्रत्याख्यानमुदाहृतम्।
तदावरणसंज्ञाऽतस्तृतीयेषु निवेशिता॥"

तथा परीषहोपसर्गनिपाते सति चारित्रिणमपि सम्–ईषत् ज्वलयन्तीति सञ्ज्वलनाःस उक्तं च–

॥१॥ "संज्वलयन्ति यतिं यत्संविज्ञं सर्वपापविरतमपि।
तस्मात् सञ्ज्वलना इत्यप्रशमकरा निरुध्यतन्ते॥"

–अन्यत्राप्युक्तम्–

॥१॥ "शब्दादीन् विषयान् प्राप्य, सञ्ज्वलयन्ति यतो मुहुः।
ततः सञ्ज्वलनाह्वानं, चतुर्थानामिहोच्यते॥"

–स्वरूपं च पश्चानुपूर्व्याऽमीषामिंदं–

॥१॥ "जलरेणुपुढविपव्वयराईसरिसो चउव्विहो कोहो।
तिणिसलयाकट्ठट्ठियसेलत्थंभोवमो माणो॥
॥२॥ मायावलेहीगोमुत्तिमिंढसिंगधणवंसमूलसमा।
लोहो हलिद्दखंजणकद्दमकिमिरागसारित्थो॥
॥३॥ पक्खचउम्मासवच्छरजावज्जीवाणुगामि नो कमसो।
देवनरतिरियनारयगइसाहणहेयवो भणिया॥"

'इत्थीवेए' इति वेद्यते इति वेदः स्त्रिया वेदःस्त्रीवेदः, स्त्रियाः पुमांसे प्रत्यभिलाष इत्यर्थः, तद्विपाकवेद्यं कर्मापि स्त्रीवेदः, पुरुषस्य वेदः पुरुषवेदः, पुरुषस्य स्त्रियं प्रत्यभिलाष इत्यर्थः, तद्विपाकवेद्यं कर्मापि पुरुषवेदः, नपुंसकस्य वेदो नपुंसकवेदः, नपुंसकस्य स्त्रियं पुरुषं च प्रत्यभिलाष इत्यर्थः, तद्विपाकवेद्यं कर्मापि नपुंसकदेवः,

तथा यदुदयात् सनिमित्तमनिमित्तं वा हसति स्म हासयते वा तत् हास्यमोहनीयं, यदुदयाद्बाह्याभ्यन्तरेषु वस्तुषु प्रमोदमाधत्ते तत् रतिमोहनीयं, यदुदयवशात् पुनर्बाह्याभ्यन्तरेषु वस्तुषु अप्रीतिं करोति तदरतिमोहनीयं, यदुदयात् प्रियविप्रयोगादौ सोरस्ताडमाक्रन्दति परिदेवते भूपीठे च लुठति दीर्घं च निःश्वसिति तत् शोकमोहनीयं, यदुदयवशात् सनिमित्तमनिमित्तं वा तथारूप-वस्वसङ्कल्पतो बिभेति तद्भयमोहनीयं, यदुदयवशात् पुनः शुभमशुभं वा वस्तु जुगुप्सते तत्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जुगुप्सामोहनीयं, जुगुप्साजनकं मोहनीयं जुगुप्सामहनीयं, एवं सर्वपदेष्वपि विग्रहो भावनीयः, नोकषायता चामीषां हास्यादीनां कषायसहचारित्वात्, कैः कषायैःसहचारितेति चेत्, उच्यते, आद्यैर्द्वादशभिः, तथाहि–

नाद्येषु द्वादशकषायेषु क्षीणेषु हास्यादीनामवस्थानसम्भवस्तदनन्तरमेव तेषामपि क्षपणाय प्रवृत्तिः, अथवा एते प्रादुर्भवन्तोऽवश्यं कषायादीनुद्दीपयन्ति ततः कषायसहचारिणः, एवं नोशब्दः साहचर्ये द्रष्टव्यः, कषायैः सहचारिणो नोकषाया इति, उक्तं च–

॥ १ ॥ "कषायसहवर्त्तित्वात्, कषायप्रेरणादपि।
हास्यादिनवकस्योक्ता, नोकषायकषायता ॥"

आयुःकर्मसूत्रं पाठसिद्धं, नामकर्म द्विचत्वारिंशद्विधं, तानेव द्वाचत्वारिंशतं भेदनाह–'गतिनामे' त्यादि, गम्यते– तथाविधकर्मचिवैः प्राप्यते इति गतिः–नारकत्वादिपर्यायपरिणतिः, सा चतुर्धा, तद्यथा– नरकगतिस्तिर्यग्गतिर्मनुष्यगतिर्देगतिस्तज्जनकं नाम गतिनाम, तदपि चतुर्द्धा, 'नरकगतिनामे' त्यादि, तथा एकेन्द्रियादीनामेकेन्द्रियत्वादिरूपसमानपरिणामलक्षणमेकेन्द्रियादिशब्दव्यपदेशभाक् यत्सामान्यं सा जातिस्तज्जनकं नाम जातिनाम, इदमत्र तात्पर्यं–

द्रव्यरूपमिन्द्रियमङ्गोपाङ्गनामेन्द्रियपर्याप्तिनामसामर्थ्यसिद्धं, भावरूपं तु स्पर्शनादीन्द्रियावरणक्षयोपशमसामर्थ्यात्, 'क्षायोपशमिकाणीन्द्रियाणी'ति वचनात्, यत्पुनरेकेन्द्रियादिशब्दप्रवृत्तिनिबन्धनं तथारूपसमानपरिणतिलक्षणं सामान्यं तदनन्यासाध्यत्वाज्जातिनिबन्धनमिति,

तच्च जातिनाम पञ्चधा, तद्यथा–एकेन्द्रियजातिनाम यावत्पञ्चेन्द्रयजातिनाम, तथा शीर्यते इति शरीरं, तत्पञ्चधा, तद्यथा–औदारिकं वैक्रियमाहारकं तैजसं कार्मणं, एतानि प्रागेव व्याख्यातानि, तन्निबन्धनं नामापि पञ्चधा, तद्यथा–औदारिकनाम वैक्रियनाम इत्यादि, तत्र यदुदयादौदारिकशरीरप्रायोग्यान् पुद्गलानादाय औदारिकशरीररूपतया परिणमयति परिणमय्य च जीवप्रदेशैः सह परस्परानुगमरूपतया सम्बन्धयति तदौदारिकशरीरनाम, एवं शेषशरीरनामान्यपि भावनीयानि,

'सरीरोपाङ्गनामे'ति शरीरस्याङ्गान्यष्टौ शिरःप्रभृतीनि, उक्तं च–'सीसमुरोयरपिट्ठी दो बाहूऊरूया य अट्ठंगा इति, उपाङ्गानि अङ्गावयवभूतान्यङ्गुल्यादीनि शेषाणि तत्प्रत्यवयभूतान्यङ्गुलिपर्वरेखादीनि अङ्गोपाङ्गानि अङ्गानि च उपाङ्गानि च अङ्गोपाङ्गानि च २

अङ्गोपाङ्गानि "स्यादवसङ्ख्येय" इत्येकशेषः, तन्निमित्तं नाम शरीरोपाङ्गनाम, तच्च त्रिधा, तद्यथा–औदारिकाङ्गोपाङ्गनाम वैक्रियाङ्गोपानाम आहारकाङ्गोपाङ्गनाम, तत्र यदुदयवशादौदारिकशरीरत्वेन परिणतानां पुद्गलानामङ्गोपाङ्गविभागपरिणतिरुपजायते तदौदारिकाङ्गोपाङ्गनाम, एवं वैक्रियाहारकाङ्गोपाङ्गनाम्नी अपि वाच्ये, तैजसकार्मणयोस्तु जीवप्रदेशसंस्थानानुरोधित्वान्नास्त्यङ्गोपाङ्गसम्भवः, तथा बध्यतेऽनेनेति बन्धनं, यदौदारिकपुद्गलनानां गृहीतानां गृह्यमाणानां च परस्परं तैजसादिपुद्गलैर्वा सह सम्बन्धजनकं तद्बन्धननाम, आह च मूलटीकाकारः–

"विद्यते तत्कर्म यन्निमित्ता द्व्यादिसंयोगापत्तिराविर्भवति, यथा काष्ठद्वयभेदैक्यस्य करणे जतु कारण''मिति, तच्च पञ्चधा, तद्यथा–औदारिकबन्धननाम वैक्रियबन्धननाम आहारकबन्धननाम तैजसबन्धननाम कार्मणबन्धननाम, तत्र यदुदयवशात् औदारिकपुद्गलानां गृहीतानां गृह्यमाणानां च परस्वपरं तैजसादिपुद्गलैश्च सह सम्बन्ध उपजायते तदौदारिकबन्धनं,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यदुदयाद्वैक्रियापुद्गलानां गृहीतानां गृह्यमाणानां च परस्परं तैजसकार्मणपुद्गलैश्च सह सम्बन्धः तद्वैक्रियबन्धनं, यदुदयादाहारकशरीरपुद्गलानां गृहीतानां गृह्यमाणानां च परस्परं तैजस-कार्मणपुद्गलैश्च सह सम्बनधस्तदाहारकबन्धनं, यदुदयात्तैजसपुद्गलानां गृहीतानां गृह्यमाणानां च परस्परं कार्मणपुद्गलैश्च सह सम्बन्धस्तत्तैजसमबन्धननाम, यदुदयात् कार्मणपुद्गलानां गृ हीतानां गृह्यमाणानां च परस्परं सम्बन्धस्तत्कार्मणबन्धननमा, तथा सङ्घात्यन्ते-पिण्डीक्रियन्ते औदारिकादिपुद्गला येन तत्सङ्घातं तच्च तन्नाम च सङ्घातनाम, तदपि पञ्चधा, तद्यथा-

औदारिकसङ्घातनाम वैक्रियसङ्घातनाम आहारकसङ्घातनाम तैजससङ्घातनाम कार्मणसङ्घातनाम, तत्र यदुदयवशादौदारिकशरीररचनाऽनुकारिसङ्घातरूपा जायते तदौदारिक-सङ्घातनाम, एवं वैक्रियादिशरीरसङ्घातनामस्वपि भावनीयं,

'संघयण नामे' इति संहनननाम, संहननं-अस्थिरचनाविशेषः, आह च मूलटीकाकारः- "संहननमस्थिरचनाविशेषः" इति, तेन यः प्राह सूत्रे शक्तिविशेष एव संहननमिति, तथा च तद्ग्रन्थः-'सुत्ते सत्तिविसेसो संघयण'मिति स भ्रान्तः, मूलटीकाकारेणापि सूत्रानुयायिना संहननस्यास्थिरचनाविशेषात्मकस्य प्रतिपादितत्वात्, यत्त्वेकेन्द्रियाणां सेवार्त्तसंहननमन्यत्रोक्तं तत् टीकाकारेणसमाहितं, औदारिकशरीरत्वादुपचारत इदमुक्तं द्रष्टव्यं न तु तत्त्वृत्त्येति, यदि पुनः शक्तिविशेषः, स्यात् ततो देवानां नैरयिकाणं च संहननमुच्यते अथ च ते सूत्रे साक्षादसंहननिन उक्ता इत्यलं उत्सूत्रप्ररूपकविस्पन्दितेषु स चास्थिरचनाविशेष औदारिकशरीर एव नान्येषु तेषामस्थिरहितत्वात्, तच्च षोढा, तद्यथा-

वज्रर्षभनाराचं ऋषभनाराचं नाराचं अर्द्धनाराचं कीलिका सेवार्त्त च, तत्र वज्रं-कीलिका ऋषभः-परिवेष्टनपट्टः नाराचं-उभयतो मर्कटबन्धः, उक्तं च-

॥१॥ "रिसहो य होइ पट्टो वज्जं पुण कीलिया मुणेयव्वा।
उभओ मक्कडबंधो नारायं तं वियाणाहि॥"

ततश्च द्वयोरस्थ्नोरुभयतो मर्कटबन्धनबद्धयोः पट्टाकृतिना तृतीयेनास्था परिवेष्टितयोरुपरि तदस्थित्रयभेदि कीलिकाख्यं वज्रनामकमस्थि यत्र भवति तद्वर्ज्रर्षभनाराचसंहननं, यत्पुनः कीलिकारहितं संहननं तत् ऋषभनाराचं, यत्र त्वस्थ्नां मर्कटबन्ध एव केवलो भवति तत्संहननं नाराचं, यत्र त्वेकपार्श्वेन मर्कटबन्धो द्वितीयपार्श्वे च कीलिका तदर्द्धनाराचसंहनन, यत्रास्थीनि कीलिकामात्रबद्धान्येव भवन्ति तत्संहननं कीलिकाख्यं, यत्र पुनः परस्परर्यन्तमात्रसंस्पर्शलक्षणां सेवामागतानि अस्थीनि नित्यमेव स्नेहाभ्यङ्गादिरूपां परिशीलनामाकाङ्क्षन्ति तत्सेवार्त्तसंहननं,

एतन्निबन्धनं संहनननामापि षोढा, तद्यथा-वर्ज्रर्षभनाराचसंहनननाम ऋषभनाराचनाम नाराचनाम अर्धनाराचनाम कीलिकानाम सेवार्त्तनाम, तत्र यदुदयात् वज्रर्षभनाराचसंहननं भवति तत् वज्रर्षभनाराचसंहनननाम, एवं शेषसंहनननामस्वपि भावनीयं, तथा संस्थानं-आकारविशेषस्तेष्वेव गृहीतसङ्घातितबद्धेषु औदारिकादिषु पुद्गलेषु संस्थानविशेषो यस्य कर्मण उदयाद् भवति तत्संस्थानं, एतच्च षोढा, तद्यथा-

समचतुरस्रसंस्थानाम न्यग्रोधपरिमण्डलसंस्थाननाम सादिसंस्थानाम वामनसंस्थाननाम कुब्जसंस्थाननाम हुण्डसंस्थान नाम च, तत्र यदुदयादसुमतां समचतुरस्रसंस्थानमुपजायते तत्सम-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चतुरस्रसंस्थानाम, यदुदयात्तु न्यग्रोधपरिमण्डलं संस्थानं तन्न्यग्रोधपरिमण्डलसंस्थानाम, एवं शेषाण्यपि वाच्यानि, तथा वर्ण्यते-अलङ्क्रियते शरीरमनेनेति वर्णः, स च पञ्चप्रकारः श्वेतपीत-रक्तनीलकृष्णभेदात् तन्निबन्धनं नामापि पञ्चधा, तद्यथा-श्वेतवर्णनाम पीतवर्णनाम रक्तवर्णनाम नीलवर्णनाम कृष्णवर्णनाम, तत्र यदुदयाज्जन्तुशरीरेषु श्वेतवर्णप्रादुर्भावो यथा बिशकण्ठिकानां तत् श्वेतवर्णनाम, एवं शेषवर्णनामान्यपि भावनीयानि,

तथा 'गन्ध अर्द्दने' गन्ध्यते-आघ्रायते इति गन्धः, स द्विधा-सुरभिगन्धो दुरभिगन्धश्च, तन्निबन्धनं गन्धनामापि द्विधा, तद्यथा-सुरभिगन्धनाम दुरभिगन्धनाम च, तत्र यदुदयाज्जन्तुशरीरेषु सुरभिगन्ध उपजायते यथा शतपत्रमालतीकुसुमादीनां तत्सुरभिगन्धानाम, यदुदयाद् दुरभिगन्धः शरीररेषूपजायते यथा लशुनादीनां तत् दुरभिगन्धनाम,

-तथा 'रस आस्वादनस्नेहनयोः' रस्यते आस्वाद्यते इति रसः, स पञ्चधा तिक्तकटुकषा-याम्ललमधुरभेदात्, तन्निबन्धनं रसनामापि पञ्चधा, तद्यथा-तिक्तनाम कटुनाम कषायनाम अम्लनाम अधुरनाम, तत्र यदुदयात् जन्तुशररेषु तिक्तो रसो भवति यथा मरिचादीनां तत्तिक्त-रसनाम्, एवं शेषाण्यपि रसनामानि भावनीयानि,

तथा 'स्पृश संस्पर्शे' स्पृश्यते इति स्पर्शः, 'अकर्त्तरी'ति धञ्प्रत्ययः, स च कर्कशमृदुलघु-गुरुस्निग्धरूक्षशीतोष्णभेदादष्टप्रकारःस, तन्निबन्धनं स्पर्शनामाप्यष्टप्रकारं, तत्र यदुदयाज्जन्तु-शरीरेषु कर्कशः स्पर्शो भवति यथा पाषाणविशेषादीनां तत्कर्कशस्पर्शनाम,

एवं शेषाण्यपि स्पर्शनामानिं भावनीयानि, तथा यदुदयात् प्राणिनां शरीराणि न गुरूणि नापि लघूनि किन्त्वगुरुलघुरूपाणि भवन्ति तदगुरुलघुनाम, तथा यदुदयात् स्वशरीरावयवैरेव शरीरान्तः परिवर्द्धमानैः प्रतिजिह्वागलवृन्दलम्बकचोरदन्तादिभिरुपहन्यते यद्वा स्वयंकृतोद्बन्ध-नभैरवप्रपातादिभिस्तदुपघातनाम, यदुदयात् पुनरोजस्वी दर्शनमात्रेण वाक्सौष्ठवेन वा महानृप-सभामपि गतः सभ्यानामपि त्रासमापादयति प्रतिवादिनश्च प्रतिभाविघातं करोति तत्पराघातनाम,

तथा कूर्प्परलाङ्गलगोमूत्रिकाकारेण यथाक्रमं द्वित्रिचतुःसमयप्रमाणेन विग्रहेण भवान्तरो-त्पत्तिस्थानं गच्छतो जीवस्यानुश्रेणिनियता गमनपरिपाटी आनुपूर्वी, तद्विपाकवेद्यं नामकर्मापि कारणे कार्योपचारात्, आनुपूर्वी नाम, तच्च चतुर्द्धा, तद्यथा-नैरयिकानुपूर्वीनाम तिर्यगानुपूर्वीनाम मनुष्यानुपूर्वीनाम देवानुपूर्वीना,

-तथा यदुदयवशादात्मन उच्छ्वासनिः-श्वासलब्धिरूपजायते तदुच्छ्वासनाम, आह-यद्येवमुच्छावसपर्याप्तिनाम्नः क्वोपयोगः ?, उच्यते, उच्छ्वासनाम्न उच्छावसनिःश्वासयोग्य-पुद्गलग्रहणमोक्षविषया लब्धिरुपजायते, सा च लब्धिनोच्छ्वासपर्याप्तिमन्तरेण स्वफलं साधयति, न खलु इषुक्षेपणशक्तिमानपि धनुर्ग्रहणशक्तिमन्तरेण क्षेप्तुमलं, तत् उच्छ्वासपर्याप्तिनिष्पाद-नार्थमुच्छ्वासपर्याप्तिनाम्न उपयोगः, एवम्यत्रापि यथायोगं भिन्नविषयता सूक्ष्मधिया भावनीया,

तथा यदुदयात् जन्तुशरीराणि स्वरूपेणानुष्णान्यपि उष्णप्रकाशलक्षणमतपं कुर्वन्ति तदातपनाम, तद्विपाकश्च भानुमण्डलगतेषु पृथिवीकायिकेष्वेवव न वह्नौ, प्रवचनेऽपि निषेधात्, तत्रोष्णत्वमुष्णस्पर्शनामोदयात् उत्कटलोहितवर्णनामोदयाच्च प्रकाशकत्वमिति, तथा यदुदयाज्जन्तुशरीराण्यनुष्णप्रकाशरूपमुद्योतं कुर्वन्ति यथा यतिदेवोत्तरवैक्रियचन्द्रनक्षत्राताराविमान-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रत्नौषधयस्तदुद्योतनाम,

तथा विहायसा गतिः–गमनं विहायोगतिः, ननु सर्वगतत्वात्, विहायसस्ततोऽन्यत्र गतिर्न सम्भवतीति किमर्थं विशेषणं ?, व्यवच्छेद्याभावातच्, सत्यमेतत्, किन्तु यदि गतिरेवोच्यते ततो नाम्नः प्रथमप्रकृतिरपि गतिरस्तीति पौनरुक्त्याशङ्का स्यात्, अतस्तद्वयवच्छेदार्थं विहायसा गतिः, न तु नारकादिपर्यायपरिणतिरूपेति विहायोगतिः, सा द्विविधा–प्रशस्ता अप्रशस्ता च, तत्र प्रशस्ता हंसगजवृषभादीनां अप्रशस्ता खरष्ट्रमहिषादीनां, तद्विपाकवेद्यं विहायोगतिनामकर्म द्विधा–प्रशस्तवहायोगतिनाम अप्रशस्तविहायोगतिनाम चेति,

तथा त्रसन्ति–उष्णाद्यभितप्ताः सन्तो विवक्षितस्थानादुद्विजन्ते गच्छन्ति च छायाद्यासेवनार्थं स्थानान्तरमिति त्रसा–द्वीन्द्रियादयस्तत्पर्यायपरिणतिवेद्यं नामकर्मापि त्रसनाम, तथा यदुदयादुष्णाद्यभितापेऽपि तत्स्थानपरिहारासमर्थाः पृथिव्यप्तेजोवायुवनस्पतयः स्थावरा जायन्ते तत् स्थावरनाम,

तथा बादरनाम यदुदयाज्जीवा बादरा भवन्ति, बादरत्वं परिणामविशेषः, यद्वशात् पृथिव्यादेरेकैकस्य जन्तुशरीरस्य चक्षुर्ग्राह्यत्वाभावेऽपि बहूनां समुदाये चक्षुषा ग्रहणं भवति, तद्विपरीतं सूक्ष्मनाम, यदुदयाद्बहूनामपि समुदितानां जन्तुशरीराणां चक्षुर्गाह्यता न भवति, उक्तं च श्रावकप्रज्ञप्तिमूलटीकायां–"सूक्ष्मनाम यदुदयात् सूक्ष्मो भवति, अत्यन्तसूक्ष्मोऽतीन्द्रिय इत्यर्तः" इति,

पर्याप्तकनाम यदुदयात् स्वयोग्यपर्याप्तिनिर्वर्त्तनसमर्थो भवति तत्पर्याप्तिनाम–आहारादिपुद्गलग्रहणपरिणमनहेतुरात्मनः शक्तिविशेषः, एतच्च प्रागेवोक्तमिति, तद्विपरीतमपर्याप्तकनाम, तथा यदुदयात् जीवं जीवं प्रति भिन्नं शरीरं तत्प्रत्येकनाम, यदुदयवशात् पुनरनन्तानां जीवानामेकं शरीरं भवति तत्साधारणनाम,

तथा यदुदयवशात् शरीरावयवानां शिरोऽस्थिदन्तानां स्थिरता भवति तत्स्थिरनाम, तद्विपरीतमस्थिरनाम, यदुदयवशाज्जिह्वादीनामवयवानामस्थिरता भवति तदूस्थिरनाम, तथा यदुदयान्नाभेरुपरितना अवयवाः शुभा जायन्ते तत् शुभनाम, यदुदयवशात् नाभेरधस्तना पादादयोऽवयवा अशुभा भवन्ति तदशुभनाम, तथाहि–शिरसा स्पृष्टस्तुष्यति पादेन तु रुष्टति, कामिन्या पादेनापि स्पृष्टः तोषमुपयाति ततो व्यभिचार इति चेत्, न तस्य परितोषस्य मोहनीयनिबन्धनत्वात्, वस्तुस्थितिश्चेह चिन्त्यते इत्यदोषः, तथा यदुदयवशादनुपकृदपि सर्वस्य मनःप्रियो भवति तत्सुभगनाम, तद्विपरीतं दुर्भगनाम, यदुदयादुपकारकृदपि जनस्य द्वेष्यो भवति, उक्तं च–

॥१॥ "अणुवकएवि बहूणं जो हु पिओ तस्स सुभगनामुदओ ।
उवगारकारगो वि हु न रुच्चए दुब्भगस्सुदए ॥
॥२॥ सुभगुदएवि हु कोई किंची आसज्ज दुब्भगो जइवि ।
जायइ तद्दोसाओ जहा अभव्वाण तित्थयरो ॥"

तथा यदुदयवशात् जीवस्य स्वरः श्रोतृणां प्रीतिहेतुरुपजायते तत्सुस्वरनाम, तद्विपरीतं दुःस्वरनाम यदुदयात् स्वरः श्रोतृणामप्रीतये भवति, तथा यदुदयवशात् यच्चेष्टे भाषते तत्सर्वं लोकः प्रमाणीकरोति दर्शनसमनन्तरमेव च जनोऽभ्युत्थानादि समाचरति तदादेयनाम, तद्विपरीतमनादेयं, यदुदयवशादुपपन्नमपि ब्रुवाणो नोपादेयवचनो भवति नाप्युपक्रियमाणोऽपि जनस्तस्याभ्युत्थानादि समाचरति,

Jain Education International   For Private & Personal Use Only   www.jainelibrary.org

तथा तपःशौर्यत्यागादिना समुपार्जितेन यशसा कीर्त्तनं-संशब्दनं यशःकीर्तितः,यद्वा यशः-सामान्येन ख्यातिः कीर्त्तिः-गुणोत्कीर्त्तनरूपा प्रशंसा अथवा सर्वदिग्गामिनी पराक्रमकृता वा सर्वजनोत्कीर्त्तनीयगुणता यशः एकदेशगामिनी पुण्यकृता वा कीर्त्तिः ते यदुदयवशाद्भवतस्त-द्यशःकीर्त्तिनाम, यदुदयवशात् मध्यस्थस्यापि जनस्याप्रशस्यो भवति तदयशःकीर्त्तिनाम,

तथा यदुदयवशाज्जन्तुशरीरेषु स्वस्वजात्यनुसारेणाङ्गप्रत्यङ्गानां प्रतिनियतस्थानवर्त्तिता भवति तन्निर्माणनाम, तच्च सूत्रधारकल्पं, तदभावे हि तच्च तककल्पैरङ्गोपाङ्गनामादिभिर्निर्वर्त्तिता-नामपि शिरउरउरदरादीनां स्थानवृत्तेरनियमः स्यात्, तथा यदुदयवशात् अष्टमहाप्रातिहार्य-प्रमुखाश्चतुस्त्रिंशदतिशयाः प्रादुष्ष्यन्ति तत्तीर्थकरनाम, तदेवमुक्ताः नामकर्मणो द्विचत्वारिंशद्भेदाः, सम्प्रत्येतेषामेव गत्यादीनामवान्तरभेदप्रति- पादनार्थमाह-

'गइनामे णं भंते ! कम्मे कइविहे पं०' इत्यादि, समस्तमपि निगदसिद्धम्, उक्ता नामकर्मणो भेदाः, सम्प्रति गोत्रकर्मभेदानाह-

'गोए णं भंते !' इत्यादि, यदुदयवशादुत्तमजातिकुलबलतपोरूपैश्वर्यश्रुतसत्काराभ्युत्था-नामसनप्रदानाञ्जलिप्रग्रहादिसम्भवस्तदुच्चैर्गोत्रं, यदुदयवशात् पुनर्ज्ञानादिसम्पन्नोऽपि निन्दां लभते हीनजात्यादिसम्भवं च तत् नीचैर्गोत्रं, उक्तौ गोत्रभेदौ, सम्प्रति तयोरेव भेदानाह-'उच्चगोए णं भंते ! कम्मे कइविहे पं०' इत्यादि सुगमं, सम्प्रति अन्तरायभेदानाह-

'अंतराए णं भंते ! कम्मे कइविहे' इत्यादि, तत्र यदुदयवशात् सति विभवे समागते च गुणवति पात्रे दत्तमस्मै महाफलमिति जानन्नपि दातुं नोत्सहते तद्दानान्तरायं, तथा यदुदयवशाद्दान-गुणेन प्रसिद्धद्दपि दातुर्गृहे विद्यमानमपि देयमर्थजातं याञ्चाकुशलोऽपि गुणवानपि याचको न लभते तल्लाभान्तरायं, तथा युददयवशात् सत्यपि विशिष्टाहारादिसम्भवेऽसति च प्रत्याख्यानपरिणामे वैराग्ये वा केवलकार्पण्यान्नोत्सहते भोक्तुं तद्भोगान्तरायमेवमुपभोगान्तरायमपि भावनीयं, नवरं भोगोपभोगयोरयं विशेषः-सकृद् भुज्यते इति भोगः-आहारमाल्यादि, पुनः पुनर्भुज्यते इत्युपभोगो-वस्त्रालङ्कारादि, उक्तं च-

॥१॥ "सइ भुञ्जइत्ति भोगो सो पुण आहारपुप्फमाईओ ।
उवभोगो उ पुणो पुण उवभुञ्जइ वत्थविलयाइ ॥"

तथा यदुदयात् सत्यपि नीरुजि शरीरे यौवनिकायामपि वर्त्तमानोऽल्पप्राणो भवति यद्वा बलवत्यपि शरीरे साध्येऽपि प्रयोजने हीनसत्त्वतया न प्रवर्त्तते तद्वीर्यान्तरायं, उक्तो मूलोत्तर-प्रकृतिविभागः, सम्प्रति उत्तरप्रकृतीनां जघन्योत्कृष्टस्थितिप्रतिपादनं चिकीर्षुः प्रथमतो ज्ञानावरणी-यस्य पञ्चप्रकारस्यापि विषये प्रश्नसूत्रमाह-

मू. (५४१) *नाणावरणिज्जस्स णं भंते ! कम्मस्स केवतितं कालं ठिती पं० ?, गो० ! जहन्नेणं अंतोमुहुत्तं उक्कोसेणं तीसं सागरोवमकोडाकोडीतो तिन्नि य वाससहस्साइं अबाहा, अबाहूणिया कम्मठिती कम्मनिसेगो,*

निद्दापंचगस्स णं भंते ! कम्मस्स केवतितं कालं ठिती पं० ?, गो० ! जह० सागरोवमस्स तिन्नि सत्तभागा पलितोवमस्स असंखेज्जतिभागेणं ऊणिया, उक्कोसेणं तसं सागरोवमरकोडा-कोडीतो, तिन्नि य वाससहस्साइं अबाहा, अबाहूणिया कम्मट्ठिती कम्मनिसेगो,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दंसणचउक्कस्स णं भंते ! कम्मस्स केवइयं कालं ठिती पं० ?, गो० ! जहन्ने० अंतो० उ० तीसं सागरोवमकोडाकोडीतो, तिन्नि य वाससहस्साइं अबाहा०,

सायावेयणिज्जस्स ईरियावहियं बंधगं पडुच्च अजहन्नमनुक्कोसेणं दो समया संपराइयबंधगं पडुच्च ज० बारस मुहुत्ता, उ० पन्नरस सागरोवमकोडाकोडीतो, पन्नरस वाससयाइ अबाधा०, असातावेदणिज्जस्स जह० सागरोवमस्स तिन्नि सत्तभागा पलितोवमस्स असंखेज्जतिभागेणं ऊणया उ० तीसं सागरोवमकोडाकोडीतो, तिन्नि य वाससहस्साइं अबाहा,

सम्मत्तवेयणिज्जस्स पुच्छा, गो० ! ज० अंतो० उ० छावट्ठिं सागरोवमाइं सातिरेगातिं, मिच्छत्तवेयणिज्जस्स जह० सागरोवमं पलितोवमस्स असंखेज्जतिभागेण ऊणगं उ० सत्तरि कोडाकोडीतो, सत्त य वाससहस्साइं अबाहा, अबाहूणिया०, सम्मामिच्छत्तवेयणिज्जस्स ज० अंतो० उ० अंतो०, कसायबारसगस्स ज० सागरोवमस्स चत्तारि सत्तभागा पलितोवमस्स असंखेज्जइभागेणं ऊणया, उक्को० चत्तालीसं सागरोवमकोडीकोडीतो, चत्तालीसं वाससताइं अबाहा जाव निसेगो,

कोहसंजलणे पुच्छा, गो० ! जह० दो मासा उक्को० चत्तालीसं सागरोवमकोडाकोडीतो चत्तालीसं वाससताइं अबाहा जाव निसेगो, मानसंजलणाते पुच्छा, गो० ! ज० मासं उ० जहा कोहस्स, मायासंजलणाते पुच्छा, गो० ! ज० अद्धं मासं उ० जहा कोहस्स, लोहसंजलणाए पुच्छा, गो० ! ज० अंतो० उ० जहा कोहस्स,

इत्थिवेयस्स पुच्छा, गो० ! जहन्नेणं सागरोवमस्स दिवड्ढं सत्तभागं पलितोवमस्स असंखेज्जइभागेण ऊणयं उक्को० पन्नरस सागरोवमकोडाकोडीतो पन्नरस वाससताइं अबाहा०, पुरिसवेदस्स णं पुच्छा, गो० ! जह० अट्ठ संवच्छरातिं० उक्को० दस सागरोवमकोडाकोडीतो दस वाससताइं अबाहा जाव निसेगो, नपुंसगवेदस्स णं पुच्छा, गो० ! जह० सागरोवमस्स दोन्नि सत्तभागा पलितोवमस्स असंखेज्जइभागेणं ऊणया, उक्कोसेणं वीसं सागरोवमकोडाकोडीतो वीस य वाससताइं अबाहा०, हासरतीणं पुच्छा गो० ! जह० सागरोवमास्स एक्कं सत्तभागं पलितोवमस्स असंखेज्जतिभागेणं ऊणं उक्को० दस सागरोवमकोडाकोडीओ दस वाससातइं अबाहा, अरतिभयोसागदुगुंछाणं पुच्छा, गो० ! जह० सागरोवमस्स दोन्नि सत्तभागा पलितोवमस्स असंखेज्जतिभागेणं उणया, उक्को० वीसं सागरोवमकोडाकोडीतो वीसं वाससताइं अबाहा०,

नेरइयाउयस्स णं पुच्छा, गो० ! जह० दस वाससहस्साइं अंतोमुहुत्तमब्भहियाइं उक्को० तेत्तीसं सागरोवमाइं पुव्वकोडीतिभागमब्भहियातिं, तिरिक्खजोणियाउयस्स पुच्छा, गो० ! जह० अंतो० उक्को० तिन्नि पलितोवमाइं पुव्वकोडितिभागमब्भहियाइं, एवं मणूसाउयस्सवि, देवाउयस्स जहा नेरइयाउयस्स ठितित्ति, निरयगतिनामए णं पुच्छा गो० ! जह० सागरोपमसहस्सस्स दो सत्तभागा पलितोवमस्स असंखिज्जतिभागेणं ऊणया, उक्कोसेणं वीसं सागरोवमकोडाकोडीतो वीसं वाससताइं अबाहा ।

तिरियगतिनाए जहा नपुंसगदेवस्स, मणुयगतिनामते पुच्छा, ज० सागरोवमस्स दिवड्ढं सत्तभागं पलितोवमस्स असंखेज्जतिभागेणं ऊणगं उक्को० पन्नरस सागरोवमकोडाकोडीतो पन्नरसवाससताइं अबाहा । देवगतिनाए णं पुच्छा, गो० ! जह० सागरोवमसहस्सस्स एगं सत्तभागं पलितोवमस्स असंखेज्जतिभागेणं ऊणयं उक्को० जहा पुरिसवेदस्स,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एगिंदियजातिनामए णं पुच्छा, गो० ! जह० सागरोवमस्स दोन्नि सत्तभागा पलितोवमस्स असंखेज्ञतिभागेणं ऊणया उक्कोसेणं वीसं सागरोवमकोडाकोडीतो वीसति वाससताइं अबाहा, बेइंदियजातिनामेणं पुच्छा, गो० ! जह० सागरोवमस्स नव पणतीसतिभागा पलितोवमस्स असंखेज्ञइभागेणं ऊणया उ० अट्ठारस सागरोवमकोडाकोडीतो अट्ठारस य वाससयाइं अबाहा, तेइंदियजातिनामए णं जहन्नेणं एवं चेव, उक्को० अट्ठारसागरोवमकोडाकोडीतो अट्ठारस वाससताइं अबाहा, चउरिंदियजातिनामाए पुच्छा, गो० ! अह० सागरोवमस्स नव पणतीसतिभागा पलितोवमस्स असंखेज्ञइभागेणं ऊणया उक्को० अट्ठारस सागरोवमकोडाकोडीतो अट्ठारस वाससताइं अबाहा,

पंचिंदियजातिनामाए पुच्छा, गो० ! जह० सागरोवमस्स दोन्नि सत्तभागा पलितोवमस्स असंखेज्ञतिभागेणं ऊणया उक्कोसेणं वीसं सागरोवमकोडाकोडीतो वीस य वाससताइं अबाहा, ओरालियसरीरएवि एवं चेव,

वेउव्वियसरीरनामाए णं भंते ! पुच्छा, गो० ! जह० सागरोवमस्सहस्स दो सत्तभागा पलितोवमस्स असंखेज्ञइभागेणं ऊणया, उक्को० वीसं सागरोवमकोडाकोडीओ वीसइ वाससयाइं अबाहा, आहारगसरीरनामे जह० अंतोसागरोवमकोडाकीडोओ उक्को० अंतोसागरकोडोकेडीओ,

तेयाकम्मसरीरनामाए जहन्नेणं दोन्नि सत्तभागा पलितोवमस्स असंखेज्ञतिभागेणं ऊणया उक्को० वीसं सागरोवमकोडाकोडीओ वीस य वाससताइं अबाहा, ओरालियवेउव्वियआहारगसरीरोवंगनामाए तिन्निवि एवं चेव, सरीरबंधणामाएवि पंचण्हवि एवं चेव, सरीरसंघायनामाए पंचण्हवि जहा सरीरनामाए कम्मस्स ठिइत्ति,

वइरोसभनारायसंघयणनामाए जहा रइनामाए, उसमनारायसंघयणनामाए पुच्छा, गो० सागरोवमस्स छ पणतीसतिमागा पलितोवमस्स असंखेज्ञइभागेणं ऊणया, उक्को० बारस सागरोवमकोडीकोडीओ, बारस वाससताइं अबाहा०, नारायसंघयणनामस्स जह० सागरोवमस्स सत्त पणतीसतिभागा पलितोवमस्स असंखेज्ञतिभागेणं ऊणया उक्को० चोद्दस सागरोवमकोडाकोडीतो चउद्दस वाससताइं अबाहा०, अद्धनारायसंघयणनामस्स जह० सागरोवमस्स अट्ठ पणतीसतिभाहा पलितोवमस्स असंखेज्ञतिभागेणं ऊणया उक्को० सोलस सागरोवमकोडाकोडीतो सोलस वाससताइं अबाहा०, खीलियासंघयणे णं पुच्छा, गो० ! ज० सागरोवमस्स नव पणतीसतिभागा पलितोवमस्स असंखेज्ञतिभागेणं ऊणया, उक्कोसेणं अट्ठारस सागरोवमकोडाकोडीओ अट्ठारस वाससताइं अबाहा, छेवट्ठसंघयणनामस्स पुच्छा, गो० ! जह० सागरोवमस्स दोन्नि सत्तभागा पलितोवमस्स असं० ऊणया, उक्को० वीसं सागरोवमको० वीस य वाससताइं अबाहा,

एवं जहा संघयणनामाते छब्भणिया एवं संठाणावि छब्भाणितव्वा,

सुक्किल्लवण्णनामते पुच्छा, गो० ! जह० सागरोवमस्स एगं सत्तभागं पलितो० असं० ऊणगं, उक्को० दस सागरोपमकोडीकोडीतो, दस वाससताइं अबाहा, हालिद्दवण्णनामए णं पुच्छा, गो० ! ज० सागरोवमस्स पंच अट्ठावीससतिभागा पलितोवमस्स अ० भा० ऊ० उ० अद्धतेरससागरोवमकोडाकोडी, अद्धतेरस वाससयाइं अबाहा, लोहितवण्णनामए णं पुच्छा, गो० ! जह० सागरोवमस्स छ अट्ठावीसतिभागा पलितोवमस्स असं० भागेहिं ऊणया, उ० पन्नरस सागरोवमकोडाकोडीओ पन्नरस वाससयातिं अबाहा, नीलवण्णनामाए पुच्छा, गो० ! ज०

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सागरोवमस्स सत्त अट्ठावीसतिभागा पलितोवमस्स असंखेज्जतिभागेणं ऊणया, उक्को० अद्धाट्ठरस सागरोवमकोडाकोडीतो अद्धट्ठारस वाससताइं अबाहा, कालवण्णनामाए जहा छेवट्ठसंघय०, सुब्भिगंधनामाते पुच्छा, गो० ! जह सुक्किल्लवण्णनामस्स, दुब्भिगंधनामाए जहा छेवट्ठसंघयणस्स, रसाणं महुरादीणं जहा वण्णाणं भणितं तहेव परिवाडीते भाणितव्वं, फासा जे अपसत्था तेसिं जहा छेवट्ठस्स, जे पसत्था तेसिं जहा सुक्किल्लवण्णनामस्स,

अगुरुलहुनामाते जहा छेवट्ठस्स, एवं उवघातनामाएवि, पराघायनामाएवि एवं चेव, निरयाणुपुव्वीनामाए पुच्छा, गो० ! जह० सागरोवमसहस्सस्स दो सत्तभागा पलितोवमस्स असंखेज्जतिभागेणं ऊणया, उक्को० वीसं सागरोवमकोडाकोडीओ, वीसं वाससताइं अबाहा०,

तिरियाणुपुव्वीए पुच्छा, गो० ! जह० सागरोवमस्स दो सत्तभागा पलितोवमस्स असंखेज्जतिभागेणं ऊणया उक्कोसेणं वीसं सागरोवमकोडाकोडीओ वीसति वाससताइं अबाधा०,

मणुयाणुपुव्वीनामाए णं पुच्छा, गो० ! जह० सागरोवमस्स दिवड्ढं सत्तभगं पलितोवमस्स असंखेज्जतिभागेणं ऊणयं, उक्को० पन्नरस सागरोवमकोडाकोडीओ पन्नरस वाससताइं अबाहा०, देवाणुपुव्वीनामाते पुच्छा, गो० ! जह० सागरोवमसहस्सस्स एगं सत्तभागं पलितोवमस्स असंखेज्जतिभागेणं ऊणयं, उक्को० दस सागरोवमकोडाकोडीओ दस य वाससताइं अबाहा०,

ऊसासनामाते पुच्छा, गो० ! जहा तिरियाणुपुव्वीए, आयवनामाए वि एवं चेव, उज्जोयनामाएवि,

पसत्थविहायोगतिनामाएवि पुच्छा, गो० ! जह० एगं सागरोवमस्स सत्तभागं उ० दस सागरोवमकोडाकोडीओ, दस वाससताइं अबाहा०, अपसत्थविहायोगतिनामस्स पुच्छा, गो० ! ज० सागरोवमस्स दोन्नि सत्तभागा पलितोवमस्स असंखेज्जतिभागेणं ऊणया उ० वीसं सागरोवमकोडाकोडीओ वीस य वाससताइं अबाहा०,

तसनामाए थावरनामाए य एवं चेव, सुहुमनामाए पुच्छा, गो० ! जह० सागरोवमस्स नव पणतीसतिभागा पलितोवमस्स असंखेज्जतिभागेणं ऊणया, उक्को० अट्ठारस सागरोवमकोडाकोडीतो अट्ठारस वा वाससताइं अबाहा०, बादरनामाए जहा अप्पसत्थविहायोगतिनामस्स एवं पज्जत्तनामाएवि, अपज्जत्तनामाए जहा सुहुमनामस्स,

पत्तेयसरीरनामाएवि दो सत्तभागा, सहारणसरीरनामाए जहा सुहुमस्स, थिरनामाए एगं सत्तभागं अथिरनामाए दो सुभनामाए एगो असुभनामाए दो सुभगनामाए एगो दूभगनामाए दो सूसरनामाए एगो दूसरनामाए दो आदिज्जनामाए एगो अणाइज्जनामाए दो जसोकित्तिनामाए जह० अट्ठ मुहुत्ता उक्को० दस सागरोवमकोडाकोडीतो दस वाससताइं अबाहा०, अजसोकित्तिनामाए पुच्चा, गो० ! जहा अप्पसत्थविहायोगतिनामस्स, एवं निम्माणनामाएवि,

तित्थगरनामाए णं पुच्छा, गो० ! जह० अंतोसागरोवमकोडाकोडीओ उक्कोसेणवि अंतो० कोडाकोडीओ, एवं जत्थ एगो सत्तभागो तत्थ उक्कोसेणं दस सागरोवमकोडाकोडीओ दस, वाससताइं अबाहा०, जत्थ दो सत्तभागा तत्थ उक्को० वीसं सागरोवमकोडीकोडीओ वीस य वाससयाइं अबाहा, उच्चागोयस्स णं पुच्छा, गो० ! जहन्नेणं अट्ठ मुहुत्ता उ० दस सागरोवमकोडाकोडीओ, दस य वाससताइं अबाहा०, नीयागोत्तस्स पुच्छा, गो० ! जहा अप्पसत्थविहायोगतिनामस्स,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अंतराए णं पुच्छा, गो० ! जह० अंतो० उक्को० तीसं सागरोवमकोडीकोडीओ तिन्नि य वाससहस्साइं अबाहा, अबाहूणिया कम्मट्ठिती कम्मनिसेगो ।

वृ. 'नाणावरणिज्जस्स णं भंते ! कम्मस्स केवइयं कालं ठिती पं०' इति ज्ञानावरणीयस्य मतिश्रुतावधिमनःपर्यायकेवलावरणभेदतः पञ्चप्रकारस्य कर्णो भदन्त ! कियन्तं कालं यावत् स्थितिः प्रज्ञप्ता ?, एवमुक्ते भगवनाहा—गौतम ! जघन्येनान्तर्मुहूर्त्तं, तच्च सर्वलघु सूक्ष्मसम्परायस्य क्षपकस्य स्वगुणस्थानकचरमसमये वर्त्तमानस्य वेदितव्यं, उत्कर्षतस्त्रिंशत्सागरोपमकोटीकोट्यः, सा च मिथ्यादृष्टेरुत्कृष्टे सङ्क्लेशे वर्त्तमानस्यावसातव्या, तदेवं नियता प्रागुक्तस्य प्रश्नोत्तरसिद्धिः, इदमपृष्टव्याकरणं त्रीणि वर्षसहस्राणि अबाधा अबाधा अबाधोना कर्मस्थितिः कर्मदलिकनिषेक इति, किमर्थमिति चेत्, उच्यते, स्थितिद्वैविध्यप्रदर्शनार्थं, तथाहि—

द्विविधा स्थितिः—कर्मरूपातवस्थानलक्षणा अनुभवयोग्या च, तत्र कर्मरूपताऽवस-अथानलक्षणां स्थितिमधिकृत्येदमुक्तं त्रिंशत्सागरोपमकोटाकोट्य इति, अनुभवयोग्या च वर्षसहस्रत्रयोना यतः, आह च—'त्रीणि वर्षसहस्राणि अबाधा' किमुक्तं भवति ?—ज्ञानावरणीयं कर्म उत्कृष्टसत्थितिकं बद्धं सत् बन्धसमयादारभ्या त्रीणि वर्षसहस्रणि यावत् न किञ्चिदपि स्वोदयतो जीवस्य बाधामुत्पादयति, तावत्कालमध्ये दलिकनिषेकस्याभावात्, तत् ऊर्ध्वं हि दलिकनिषेकः, तथा चाह—अबाधोना—अबाधाकालपरिहीना अनुभवयोग्या कर्मस्थितिः, किमुक्तं भवति ?—कर्मनिषेकः, स चैवं—प्रथमस्थितौ प्रभूतो द्वितीयस्थितौ विशेषहीनः तृतीयस्थितौ विशेषहीनः एवं विशेषहीनो विशेषहीनश्च तावद् वक्तव्यो यावत्स्थितिचरमसमयः, एतावता च यदुक्तमग्रायणीयाख्ये द्वीतीयपूर्वे कर्मप्रकतिप्राभृते बन्धविधाने स्थितिबन्धाधिकारे—

"चत्वार्यनुयोगद्वाराणि, तद्यथा स्थितिबन्धस्थानप्ररूपणा अबाधाकण्डकप्ररूपणा उत्कृष्टनिषेकप्ररूपणा अल्पबहुत्वप्ररूपणा चे"ति, तत्रोत्कृष्टाऽबाधकण्डकप्ररपणा उत्कृष्टनिषेकप्र-रूपणा च दर्शिता भवति, अबाधाकालपरिज्ञानोपायश्चायं—यस्य यावत्यः, सागरोपमकोटीकोट्य-स्तस्य तावन्ति वर्षशतान्यबाधा, यस्य पुनः सागरोपमकोटीकोट्या मध्ये स्थितिस्तस्यायुर्वर्जस्या-न्तर्मुहूर्त्तमायुषस्तु जघन्यतोऽन्तर्मुहूर्त्तमबाधा उत्कर्षतः पूर्वकोटीत्रिभागः, तत एवमबाधाकालं परिभाव्याबाधाविषयाणि सूत्राणि स्वयं भावनीयानि,

निद्रापञ्चकविषयं सूत्रमाह—'निद्दापंचसगस्स णं भंते !' इत्यादि, अत्र जघन्यतः स्थितिः त्रयः सागरोपमस्य सप्तभागाः पल्योपमासङ्ख्येयभागोनाः, काऽत्र भावनेति चेत्, उच्यते, पञ्चानां ज्ञानावरणप्रकृतीना चतसृणां दर्शनावरणप्रकृतीनां चक्षुर्दर्शनावरणादीनां सञ्ज्वलनलोभस्य पञ्चानामन्तरायप्रकृतीनां च जघन्या स्थितिरन्तर्मुहूर्त्तं,

सातवेदनीयस्य सकषायिकस्य द्वादश मुहूर्त्ता, इतरस्य तु द्वौ समयौ, प्रथमसमये बन्धो द्वितीयसमये वेदनं तृतीयसमये त्वकर्मीभवनमिति, यशःकीर्त्युच्चैर्गोत्रयोरष्टौ मुहूर्त्ताः, पुरुषवेदस्याष्टौ संवत्सराणि, सञ्ज्वलनक्रोधस्य द्वौ मासौ, सञ्ज्वलनमानस्यैको मासः, सञ्ज्वलनमायाया अर्द्धमासः, शेषाणां तु प्रकृतीनां या या स्वकीया उत्कृष्टा स्थितिस्तस्या उत्कृष्टयाः सप्ततिसागरोपमकोटीको-टीप्रमाणाया मिथ्यात्वस्थित्या भागे हृते यल्लभ्यते तत्पल्योपमासङ्ख्येयभागहीनं जघन्यस्थितिपरिमाणं, तत्र निद्रापञ्चकस्योत्कृष्टा स्थितिस्त्रिंशत्सागरोपमकोटीकोट्यः, तासां मिथ्यात्वस्थित्या सप्तति-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सागरोपमकोटीकोटीप्रमाणया भागे ह्रियमाणे 'शून्यं शून्येन पातये'दिति वचनात् लब्धास्त्रियः सागरोपमस्य सप्तभागाः, ते पल्योपमासङ्ख्येयभागहीनाः क्रियन्ते, ततो भवति यथोक्तं जघन्यस्थिति-परिमाणमिति, सायावेयणिज्जस्स ईरियावहियबंधगं पडुच्च अजहन्नमणुक्कोसेणं दो समया संपराइयबंधगं पडुच्च जहन्नेणं बारस मुहुत्ता' इति प्रागेव भावितं,

असातावेदनीयस्य जघन्यतस्त्रयः सप्तभागाः पल्योपमासङ्ख्येयभागेना निद्रापञ्चकवद् भावनीयाः, तस्याप्युत्कर्षतः स्थितेस्त्रिंशत्सागरोपमकोटीकोटीप्रमाणत्वात्,

सम्यकत्ववेदनीयस्य यत् जघन्यतः स्थितिपरिणाममन्तर्मुहूर्त्त उत्कर्षतः षट्षष्टिःसाग-रोपमाणि सातिरेकाणि तद्वेदनमधिकृत्य वेदितव्यं न बन्धमाश्रित्य, सम्यकत्वसम्यग्मिथ्यात्वयोर्बन्धा-भावात्, मिथ्यात्वपुद्गला एव हि जीवेन सम्यकत्वानुगुणविशोधिबलतस्त्रिधा क्रियन्ते, तद्यथा—सर्वविशुद्धाः अर्धविशुद्धाः अविशुद्धाश्च, तत्र ये सर्वविशुद्धास्सेत सम्यकत्ववेदनीयव्यपदेशं लभन्ते येऽर्द्धविशुद्धास्ते सम्यग्मिथ्यात्ववेदनीयव्यपदेशं अविशुद्धा मिथ्यात्ववेदनीयव्यपदेशमतो न तयोर्बन्धसम्भवः, यदा तु तेषां सम्यकत्वसम्यग्मिथ्यात्वपुद्गलानां स्वरूपतः स्थितिश्चिन्त्यते तदाऽन्तर्मुहूर्त्तोनसप्ततिसागरोपमकोटीकोटीप्रमाणा वेदितव्या, सा च तावती यथा भवति तथा कर्म्मप्रकृतिटीकायां सङ्क्रमकरणे भावितेति ततोऽवधार्यं,

मिथ्यात्ववेदनीयस्य जघन्या स्थितिरेकं सागरोपमं पल्योपमासङ्ख्येयभागोनमुत्कर्षत-स्तस्योत्कृष्टस्थितेः सप्ततिसागरोपमकोटीकोटीप्रमाणत्वात्, सम्यग्मिथ्यात्ववेदनीयस्य जघन्यत उत्कर्षतो वा अन्तर्मुहूर्त्तं वेदनापेक्षया, पुद्गलानां त्ववस्थानमुत्कर्षतःप्रागेवोक्तं, कषायद्वादशकस्या-नन्तानुबन्धिनचतुष्टयाप्परत्याख्यानचतुष्टयप्रत्याख्यानावरणचतुष्टरूपस्य प्रत्येकं जघन्या स्थितिश्चत्वारः सागरोपमसप्तभागा पल्योपमासङ्ख्येयभागोनाः, उत्कर्षतस्तेषां स्थितश्चत्वारिंश-त्सागरोपमकोटीकोटीप्रमाणत्वात्, सञ्ज्वलनानां च जघन्या स्थितिर्मासद्वयादिप्रमाणा क्षपकस्य स्वबन्धचरमसमयेऽवसातव्या,

स्त्रीवेदस्य जघन्या स्थितिर्द्व्यर्द्धसागरोपमस्य सप्तभागाः पल्योपममासङ्ख्येयभागोनाः, कथमिति चेत्, उच्यते, त्रैराशिककरणवशात्, तथाहि—यदि दशानां सागरोपमकोटीकोटीनां एकः सागरोपमसप्तभागो लभ्यते ततः पञ्चदशभिः सागरोपमकोटीकोटीभिः किं लभ्यते ?, अत्रान्त्येन राशिना पञ्चदशलक्षणेन मध्यो राशिरेकलक्षणो गुण्यते, जाताः पञ्चदशैव, 'एकस्य गुणने तदेव भवती'ति वचनात्, तेषामाद्येन राशिना दशकलक्षणेन भागहरणं लब्धा सार्द्धाः सप्तभागा इति,

'हासरइअरइभयसोगदुगुंछाणं जहन्नुक्कोसठिई भाणियव्वा' इति हास्यरतिअरतिभय-शोकजुगुप्सानां जघन्या उत्कृष्ट च स्थितिर्वक्तव्या, सा च सुप्रसिद्धत्वान्नोक्ता, कथं वक्तव्येति चेत्, उच्यते, 'हासरईणं पुच्छा गो० ! जहन्नेणं एगो सागरोवमस्स सत्तभागो पलिओवमस्स असंखेज्जभागेण ऊणो उक्को० दस सागरोवमकोडीकोडीओ दस वाससयाइं अबाहा जाव निसेगो, अरइ भयसोगदुगुंछाणं पुच्छा, गो० ! जहन्नेणं सागरोवमस्स दोन्नि सत्तभागा पलिओवमस्स असंखेज्जइभागेण ऊणगा उक्कोसेणं वीसं सागरोवमकोडाकोडीओ वीससयाइं अबाहा जाव निसेगो' इति ज्ञेयं, तिर्यगायुषि मनुष्यायुषि च त्रीणि पल्योपमानि पूर्वकोटित्रिभागाभ्यधिकानि इति यदुक्तं तत् पूर्वकोट्यायुषस्तिर्यग्मनुष्यान् बन्धकानधिकृत्य वेदितव्यं, अन्यत्रैतावत्याःस्थितेः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पूर्वकोटित्रिभागरूपाया अबाधायाश्चालभ्यमानत्वात्,

'तिरियगइनामाए जहा नपुंसगवेयस्स' इति, जघन्यतो द्वौ सागरोपमस्य सप्तभागौ पल्योपमासङ्ख्येयभागहीनौ, उत्कर्षतो विंशतिः सागरोपमकोटीकोट्य इत्यर्थः, मनुष्यगतिनाम्नि 'जहन्नेणं सागरोवमस्स दिवड्ढसत्तभागं पलिओवमस्स असंखेज्जइभागेण ऊणगं' ति अत्र भावना स्त्रीवेदवद् भावनीया, 'दिवड्ढसत्तभाग' मित्यादौ तु नपुंसकनिर्देशः प्राकृतत्वात्, नरकगतिनाम्नो जघन्यतः सागरोपमसहस्रस्य द्वौ सप्तभागौ, किमुक्तं भवति ? –सागरोपमस्य द्वौ सप्तभागौ सहस्रेण गुणिताविति, तदुत्कृष्टस्थितेर्विंशतिसागरोपमकोटाकोटीप्रमाणत्वात्, तद्बन्धस्य च सर्वजघन्यस्यासंज्ञिपञ्चेन्द्रियस्य भावात्,

असंज्ञिपञ्चेन्द्रियकर्मबन्धस्य च जघन्येनैकेन्द्रियजघन्यकर्मबन्धापेक्षया सहस्रगुणत्वात्, भावयिष्यते चायमर्थो वैक्रियचिन्तायां, देवगतिनाम्नो जघन्यतः सागरोपमसहस्रस्यैकः सप्तभागः,- एकः सागरोपमस्य सप्तभागः सहस्रगुणित इति भावः तस्य हि उत्कृष्टा स्थितिदर्श सागरोपमकोटीकोट्यः, ततः प्रागुक्तकरणवशादेकः सागरोपमस्य सप्तभागो लब्धः, बन्धोऽपि चास्य जघन्यतोऽसंज्ञिपञ्चेनद्रियस्येति सहस्रगुणितः, देवगतिनामसूत्रे 'उक्कोसेणं जहा पुरिसवेयस्स' इति 'दस सागरोवमकोडीओ दसवाससयाइं अबाहा, अबाहूणिया कम्मठिई कम्मनिसेगो' इति वक्तव्यमिति भावः,

द्वीन्द्रियजातिनामसूत्रे 'जहन्नेणं नव पणतीसइभागा पलिओवमस्स असंखेज्जइभागेण ऊणगा' इति, द्वीन्द्रियजातिनाम्नो ह्युत्कृष्टा स्थितिरष्टादश सागरोपमकोटीकोट्यः,

'अट्ठारस सुहुमविगलतिगे'त्ति वचनात्, ततोऽष्टादशानां सागरोपमकोटीकोटीनां मिथ्यात्वस्योत्कृष्टया स्थित्या सप्ततिसागरोपमकोटाकोटीप्रमाणया भागो ह्रिते, भागश्च न पूर्यते, ततः शून्यं शून्येन पात्यते, जाता उपरि अष्टादश अधस्तात् सप्ततिस्तयोर्द्धेनापवर्त्तनाल्लब्धा नव पञ्चत्रिंशद्भागास्ते पल्योपमासङ्ख्येयभागोनाः क्रियन्ते, आगतं सूत्रोक्तं परिमाणमिति, एवं त्रिचतुरिन्द्रियजातिनामसूत्रे अपि भावनीये,

वैक्रियशरीरनामसूत्रे 'जहन्नेणं सागरोवमस्स दो सत्तभागा पलिओवमस्स असंखेज्जइभागेणं ऊणगा' इति, इह वैक्रियशरीरनाम्न उत्कृष्टा विंशतिः सागरोपमकोटीकोट्यः स्थितिस्ततः प्रागुक्तकरणवशेन जघन्यस्थितिचिन्तायां तस्यां द्वौ सागरोपमस्य सप्तभागौ लभ्येते, परं वैक्रियषट्कमेकेन्द्रिया विकलेन्द्रियाश्च न बध्नन्ति, किन्त्वसंज्ञिपञ्चेन्द्रियादयः, असंज्ञिपञ्चेन्द्रियाश्च जघन्यतोऽपि बन्धं कुर्वाणा एकेन्द्रिबन्धापेक्षया सहस्रगुणं कुर्वन्ति, 'पणवीसा पन्नासा सयं सहस्सं च गुणकारो' इति वचनात्, ततो यौ द्वौ सागरोपमस्य सप्तभागौ प्रागुक्तकरणवशाल्लब्धौ तौ सहस्रेण गुण्येते ततःसूत्रोक्तं परिमाणं भवति, सागरोपमस्य द्वौ सहस्रौ सप्तभागानां सागरोपमसहस्रस्य द्वौ सप्तभागाविति ह्येकोऽर्थः, आहारशरीरनाम्नोः जघन्यतोऽप्यन्तःसागरोपमकोटीकोटी उत्कर्षतोऽप्यन्तःसागरोपमकोटीकोटी, नवरं जघन्यादुत्कृष्टं सङ्ख्येयगुणां द्रष्टव्यं, अन्ये त्वाहारकचतुष्कस्य जघन्यतोऽप्यन्तर्मुहूर्त्तमिच्छन्ति, (तथा च) तद्ग्रन्थः

॥१॥ "परुंवेयअट्ठवासा, अट्ठमुहुत्ता जसुच्चगोयाणं।
साए बारस आहारविग्घावरणाण किंचूणं ॥"

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अत्र 'किंचूण'मिति अन्तर्मुहूर्त्तमित्यर्थः, तदत्र तत्वं केवलिनो विदन्ति, यथा शरीरपञ्चकस्य जघन्यत उत्कर्षतश्च स्थितिपरिमाणमुक्तं तेनैव क्रमेण शरीरबन्धपञ्चकस्य शरीरसंघातपञ्चकस्य च वक्तव्यं, तथा चाह- 'सरीरबन्धननामाएवि पंचण्हवि एवं चेव, सरीरसंघायणनामाए पंचण्हवि' इति 'वइरोसभनारायसंघयणनामाए जहा रइनामाए' इति,

वज्रर्षभनाराचसंहनननाम्नो यथा प्राक् रतिनाम्नो मोहनीयस्योक्तं तथा वक्तव्यं, तद्यथा- 'वइरोसभनारायसंघयणनामाए भंते ! कम्मस्स केवइयं कालं ठिती पं० ? ,गो० ! जह० एक्कं सत्तभागं पलिओवमस्स असंखेज्जइभागेण ऊणं, उक्को० दस सागरोवमकोडाकोडीओ' इति, ऋषभनाराचसूत्रे 'सागरोवमस्स छप्पन्नतीसभागा पलिओवमस्स असंखिज्जइभागेण ऊणगा' इति, ऋषभनाराचसंहननस्य ह्युत्कृष्टा स्थितिर्द्वादश सागरोपमकोटीकोट्यः, तासां मिथ्यात्वस्थित्या सप्ततिसागरोपमकोटीकोटीप्रमाणया भागो ह्रिते, तत्र भागहारासम्भवात्, शून्यं शून्येन पातयित्वा छेद्यच्छेदकराश्योरद्धथेनापवर्त्तनाल्लब्धाः सागरोपमस्य षट् पञ्चत्रिंशद्भागाः, ते पल्योपमासङ्ख्येयभागहीना; क्रियन्ते, एवं नाराचसंहनननाम्नो जघन्यस्थितिचिन्तायां सप्त पञ्चत्रिंशद्भागाः पल्योपमासङ्ख्येयभागहीनाः, उत्कृष्टस्थितेश्चतुर्दशसागरोपमकोटीकोटीप्रमाणत्वात्, अर्द्धनाराचसंहननाम्नः अष्टौ पञ्चत्रिंशद्भागाः पल्योपमासङ्ख्येयभागोनाः, उत्कृष्टस्थितेः षोडशसागरोपमकोटीकोटीप्रमाणत्वात्, कीलिकासंहनननाम्नो नव पञ्चत्रिंशद्भागाः पल्यो मासङ्ख्येयभागहीनाः, उत्कृष्टस्थितेरष्टादशसागरोपमकोटीकोटीप्रमाणत्वात्, परिभावनीयाः, सेवार्त्तसंहननसूत्रं तु सुगमं, यथा संहननषट्कस्य स्थितिपरिमाणमुक्तं तेनैव क्रमेण संस्थानषट्कस्यापि वक्तव्यं,

तथा चाह- 'एवं जहा संघयणनामा छब्भणिया एवं संठाणा छब्भाणियव्वा' उक्तश्चायमर्थोऽन्यत्रापि 'संघयणे संठाणे पढमे दस उवरिसेसु दुगवुड्डी' इति

हारिद्रवर्णनामसूत्रे 'जहन्नेणं सागरोवमस्स पंच अट्ठावीसइभागा पलिओवमस्स असंखेज्जइभागेण ऊणगा' इति, हारिद्रवर्णनाम्नो हि सार्द्धद्वादशसागरोपमकोटीकोटयः, तथा चोक्तमन्यत्रापि-

॥१॥　"सुक्किल्लसुरभिमहुराण दस उ तहा सुभगउण्हफासाणं ।
अड्डाइज्जपवुड्डी अंबिलहालिद्दपुव्वाणं ॥"

तासां मिथ्यात्वस्थित्या सप्ततिसागरोपमकोटीकोटीप्रमाणया भागो ह्रियते, तत्र शून्येन शून्यस्य पातनात्तेन उपरितनो राशिः सांश इति सामस्त्येन चतुर्भागकरणार्थं चतुर्भिर्गुण्यते जाताः पञ्चाशत्, अधस्तनोऽपि सप्ततिलक्षणच्छेदराशिश्चतुर्भिर्गुण्यते जाते द्वे शते अशीत्यधिके, ततो भूयोऽपि शून्यं शून्येन पातनाल्लब्धाः पञ्च अष्टाविंशतिभागाः" ते पलस्योपमासङ्ख्येयभागहीनाः क्रियन्ते, आगतं सूत्रोक्तं परिमाणं, अनेनैव गणितक्रमेणं लोहितवर्णनाम्नो जघन्यस्थितौ षट् अष्टाविंशतिभागाः पल्योपमासङ्ख्येयभाहीनाः, उत्कर्षतस्तस्य स्थितेः पञ्चदशसागरोपमकोटीकोटीप्रमाणत्वात्, नीलवर्णनाम्नः सप्ताष्टाविंशतिभागाः पल्योपमसाङ्ख्येयभागहीनाः, उत्कर्षतस्तस्य स्थितेः सार्द्धसप्तदशसागरोपमकोटीकोटीप्रमाणत्वात्, 'कालवण्णनामाए जहा सेवट्टसंघयणस्से'ति

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

सेवार्त्तसंहननस्येव जघन्यतो द्वौ सागरोपमस्य सप्तभागौ पल्योपमासङ्ख्येयभागहीनौ उत्कर्षतो विंशतिसागरोपमकोटीकोटयः कृष्णवर्णनाम्नोऽपि वक्तव्या इति भावः,

सुरभिगन्धनाम्नः शुक्लवर्णनाम्न इव, 'सुक्किल्लसुरभिमहुराण दस उ' इति वचनात्, दुरभिगन्धनाम्नो यथा सेवार्त्तसंहननस्य तच्चानन्तरमेवोक्तमिति न पुनरुच्यते,

'रसाणं महुरादीणं जहा वण्णाणं भणियं तहा परिवाडीए भाणियव्व' मिति, रसानां मधुरादीनां परिपाट्या–क्रमेण तथा वक्तव्यं यथा वर्णानामुक्तं, तच्चैवं–मधुररसनाम्नो जघन्या स्थितिरेकः सागरोपमस्य सप्तभागः पल्योपमासङ्ख्येयभागहीनः, उत्कर्षतो दश सागरोपमकोटीकोटीयो दश वर्षशतान्यबाधा, अबाधारहिता कर्मस्थितिः कर्मदलिकनिषेकः;, अम्लरसनाम्नो जघन्यतः पञ्च सागरोपमस्याष्टाविंशतिभागाः पल्योपमासङ्ख्येयभागहीनाः, उत्कर्षतोऽर्द्धत्रयोदशसागरोपमकोटीकोटयो अर्द्धत्रयोदश शतान्यबाधा, कषायरसनाम्नो जघन्यतः षट् अष्टाविंशतिभागाः सागरोपमस्य पल्योपमासङ्ख्येयभागोनाः, उत्कर्षतः पञ्चदश सागरोपमकोटीकोटयः, पञ्चदश वर्षशतान्यबाधा, कटुकरसनाम्नो जघन्यतः सागरोपमस्य सप्ताष्टाविंशतिभागाः पल्योपमासङ्ख्येयभागहीनाः, उत्कर्षतः सार्द्धसप्तदश सागरोपमकोटीकोटयः सार्द्धसप्तदश शतान्यबाधा, तिक्तरसनाम्नो जघन्यतः-सागरोपमस्य द्वौ सप्तभागौ पल्योपमासङ्ख्येयभागहीनौ, उत्कर्षतो विंशतिः सागरोपमकोटीकोटयो विंशतिर्वर्षशतान्यबाधा अबाधाकालहीना च कर्मस्थितिः कर्मदलिकनिषेक इति,

स्पर्शा द्विविधाः, तद्यथा–प्रशस्ता अप्रशस्ताश्च, तत्र प्रशस्ता मृदुलघुस्निग्धोष्णरूपाः अप्रशस्ताः कर्कशगुरुरूक्षशीतरूपाः, प्रशस्तानां जघन्यतः स्थितिरेकः सागरोपमस्य सप्तभागः पल्योपमासङ्ख्येयभागहीनः, उत्कर्षतो दश सागरोपमकोटीकोटयो दश वर्षशतान्यबाधा अबाधाकालहीना कर्मस्थितिः कर्मदलिकनिषेकः, अप्रशस्तानां जघन्यतो द्वौ सागरोपमस्य सप्तभागौ पल्योपमासङ्ख्येयभागहीनौ उत्कर्षतो विंशतिः सागरोपमकोटीकोटयो विंशतिर्षर्षशतान्यबाधा अबाधाकालोना कर्मस्थितिः कर्मदलिकनिषेकः,

तथा चाह–'फासा जे अप्पसत्था तेसिं जहा सेवट्टस्स जे पसत्था तेसिं जहा सुक्किल्लवण्णनामस्स' इति, नरकानुपूर्वीनाम्नो जघन्यतः सागरोपमसहस्रस्य द्वौ सप्तभागौ, द्वौ सागरोपमस्य सप्तभागौ सहस्रगुणिताविति भावः, भावना नरकगतिवद् भावयितव्या, मनुष्यानुपूर्वीनामसूत्रे ''जहन्नेणं सागरोवमस्स दिवड्ढं सत्तभागं पलिओवमस्स असंखिजाजइभागेणं ऊणगं' ति, तदुत्कृष्टस्थितेः पञ्चदशसागरोपमकोटीकोटीप्रमाणत्वात्, उक्तं चान्यत्रापि–

॥१॥ ''तीसं कोडाकोडी असायआवरणअंतरायाणं।
मिच्छे सयरी इत्थीमणुदुगसायाण पन्नरस॥''

देवानुपूर्वीनाम्नोऽपि जघन्यतः एकः सागरोपमस्य सप्तभागः सहस्रगुणितः पल्योपमासंख्येयभागहीनः उत्कर्षतो हि तत्स्थितेः दशसागरोपमकोटीकोटीप्रमाणत्वात्, तथा चोक्तम्–

॥१॥ ''पुंहासरईउच्चे सुभखगतिथिराइछक्कदेवदुगे।
दस सेसाणं वीसा एवइयाऽबाह वाससया॥''

बन्धश्चास्य जघन्यतोऽसंज्ञिपञ्चेन्द्रियेषु इति, तथा सूक्ष्मनामसूत्रे जघ्यतो नव सागरोपमस्य पञ्चत्रिंशद्भागाः पल्योपमासङ्ख्येयभागहीना द्वीन्द्रियजातिनाम्न इव भावनीया, सूक्ष्मनाम्नो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ह्युत्कर्षतः स्थितेरष्टादशसागरोपमकोटीकोटीप्रमाणत्वात्, 'अट्ठारस सुहुमविगलतिगे' इति वचनात्, एवमपर्याप्तसाधारणनाम्नोरपि भावनीयं, बादरपर्याप्तप्रत्येकनाम्नां तु जघन्यतो द्वौ सागरोपमस्य सप्तभागौ पल्योपमसाङ्ख्येयभागहीनौ, उत्कर्षतो विंशतिः सागरोपमकोटीकोटयः, तथा चाह०

'बायरनामाए जहा अपसत्थविहायोगइनामाए, एवं पज्जत्तनामाएवि' इत्यादि, स्थिरशुभसुभगसुस्वरादेयरूपाणां पञ्चानां नाम्नां जघन्यतः स्थितिरेकः सागरोपमस्य सप्तभागः पल्योपमासङ्ख्येयभागोनः, यशःकीर्त्तिनाम्नस्तु जघन्यतोऽष्टौ मुहूर्त्ताः, 'अट्ठ मुहुत्ता जसुच्चगोयाण'मिति वचनात्, उत्कृष्टा पुनः षण्णामपि दश सागरोपमकोटीकोटयः 'थिराइछक्कदेवदुगे दसे'ति वचनात्, अस्थिराशुभदुर्भगदुःस्वरानादेयायशःकीर्त्तिनाम्नां तु जघन्यतो द्वौ सागरोपमस्य सप्तभागौ पल्योपमासङ्ख्येयभागहीनौ, उत्कर्षतो विंशतिः सागरोपमकोटीकोट्यः एवं निर्माणनाम्नोऽपि वक्तव्यं, तीर्थकरनाम्नो जघन्यतोऽप्यन्तःसागरोपमकोटीकोटी उत्कर्षतोऽप्यन्तः सागरोपमकोटीकोटी, ननु यदि जघन्यतोऽपि तीर्थकरनाम्नोऽन्तः सागरोपमकोटीकोटीप्रमाणा स्थितिः तर्हि तावत्याः स्थितेः तिर्यग्भवभ्रमणमन्तरेण पूरयितुमशक्यत्वात् कियन्तं कालं तीर्थकरनामसत्कर्मापि तिर्यग्भवेत्, अथ चासावागमे निषिद्धः, तथा चोक्तम्—

॥१॥ "तिरिएसु नत्थि तित्थयरनाम संतंति देसियं समए।
कह य तिरिओ न होही अयरोवमकोडीकोडीओ ॥" इति ?,

ततः कथमेतदिति चेत्, उच्यते, इह यन्निकाचितं तीर्थकरनामकर्म तत्तिर्यग्गतौ सत्तायां निषिद्धं, यत्पुनरुद्धर्त्तनापवर्त्तनासाध्यं तद्भवेदपि तिर्यग्गतौ न विरोधमास्कन्दति, तथा चोक्तम्—

॥१॥ "जमिह निकाइय तित्थं तिरियभवे तं निसेहियं संतं।
इयरंमि नत्थि दोसो उव्वट्टणवट्टणासज्झो ॥" इति,

गोत्रान्तरायसूत्राणि सुप्रतीतानि, नवरं 'अंतराइयस्स णं पुच्छा' इति, पञ्चप्रकारस्यापीति वाक्यशेषः, निर्वचनमपि पञ्चप्रकारस्यापि द्रष्टव्यं। तदेवमुक्तं जघन्यत उत्कर्षतश्च सामान्यतः सर्वासां प्रकृतीनां स्थितिपरिमाणं, साम्प्रतमेकेन्द्रियानाधिकृत्य तासां तदभिधित्सुराह—

मू. (५४२) *एगिंदिया णं भंते ! जीवा नाणावरणिज्जस्स कम्मस्स किं बंधंति ?, गो० ! जह० सागरोवमस्स तिन्नि सत्तभागा पलितोवमस्स असंखेज्जइभागेणं ऊणया उक्कोसेणं ते चेव पडिपुन्ने बंधंति, एवं निद्दापंचगस्सवि, दंसणचउक्कस्सवि,*

एगिंदिया णं भंते ! सातावेदणिज्जस्स कम्मस्स किं बंधंति ?, गो० ! ज० सागरोवमदिवड्ढं सत्तभागं पलिओवमस्स असंखेज्जगिभागेणं ऊणयं उ० तं चेव पडिपुन्नं बंधंति, असायवेयणिज्जस्स जहा नाणावरणिज्जस्स,

एगिंदियाण णं भंते ! जीवा सम्मत्तवेयणिज्जस्स कम्मस्स किं बंधंति ?, गो० ! नत्थि किंचि बंधंति, एगिंदिया णं भंते ! जीवा मिच्छत्तवेदणिज्जस्स कम्मस्स किं बंधंति ?, गो० ! ज० सागरोवमं पलितोवमस्स असंखेज्जतिभागेणं ऊणं उ० तं चेव पडिपुण्णं बंधंति, एगिंदिया णं भंते जीवा सम्मामिच्छत्तवेयणिज्जस्स किं बंधंति ?, गो० ! नत्थि किंचि बधंति,

एगिंदिया णं भंते !, जीवा कसायबारसगस्स किं बंधंति ?, गोयमा ! जह० सागरोवमस्स चत्तारि सत्तभागे पलितोवमस्स असंखेज्जतिभागेणं ऊणते उ० ते चेव पडिपुन्ने बंधंति, एवं जाव

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कोहसंजलणाएवि जाव लोभसंजलणाएवि,

इत्थिवेदस्स जहा सातावेदणिज्जस्स, एगिंदिया पुरिसवेदस्स कम्मस्स जह० सागरोवमस्स एगं सत्तभागं पलितोवमस्स असंखेज्जतिभागेणं ऊणयं उक्को० तं चेव पडिपुन्नं बंधंति, एगिंदिया नपुंसगवेदस्स कम्मस्स जह० सागरोवमस्स दो सत्तभागे पलितोवमस्स असंखेज्जतिभागेणं ऊणए उक्को० ते चेव पडिपुन्नं बंधंति, हासरतीते जहा पुरिसवेदस्स, अरतिभयसोगदुगुंछाए उक्को० ते चेव पडिपुन्ने बंधंति, हासरतीते जहा पुरिसवेदस्स अरतिभयसोगदुगुंछाए जहा नपुंसगवेयस्स,

नेरइयाऊ देवाऊ य निरयगतिनाम देवगतिनाम वेउव्वियसरीरनाम आहारगसरीरनाम नेरइयानुपुव्विनाम देवानुपुव्विनाम तित्थगरनाम एताणि पदाणि न बंधंति, तिरिक्खजोणियाउयस्स जह० अंतो० उक्कोसेणं पुव्वकोडी सत्तहिं वाससहस्सेहिं वाससहस्सतिभागेण य अहियं बंधंति, एवं मणुस्साउयस्सवि, तिरियगतिनामाए जहा नपुंसगवेदस्स, मणुयगतिनामाए जहा सातावेदणिज्जस्स,

एगिंदियनामाए पंचिंदियजातिनामाए य जहा नपुंसगवेदस्स, बेइंदियतेइंदियजातिनामाए पुच्छा, जह० सागरोवमस्स नव पणतीसतिभागे पलितोवमस्स असंखेज्जतिभागेणं ऊणए उक्को० ते चेव पडिपुण्णे बंधंति, चउरिंदियनामाएवि जह० सागरोवमस्स नव पणतीसतिभागे पलितोवमस्स असंखेज्जतिभागेणं ऊणए उ० ते चेव पडिपुण्णे बंधंति, एवं जत्थत्थि जहन्नगं दो सत्तभागा तिन्नि वा चत्तारि वा सत्तभागा अट्ठावीसतिभागा भवंति, तत्थ णं जहन्नेणं ते चेव पलितोवमस्स असंखेज्जतिभागेणं ऊणगा भाणितव्वा, उ० ते चेव पडिपुन्ने बंधंति, तत्थ णं जहन्नेणं एगो वा दिवड्ढो वा सत्तभागो तत्थ जह० तं चेव भाणितव्वं उ० तं चेव पडिपुन्नं बंधंति,

जसोकित्तिउच्चागोताणं ज० सागरोवमस्स एगं सत्तभागं पलितोवमस्स असं० ऊणं उ० तं चेव पडिपुन्नं बंधंति, अंतराइयस्स णं भंते ! पुच्छा, गो० ! जहा नाणावरणिज्जं उ० ते चेव पडिपुन्ने बंधंति ।

वृ. 'एगिंदिया णं भंते ! जीवा णं नाणावरणिज्जस्स कम्मस्स किं बंधंति ?' इत्यादि, अत्रेयं परिभाषा-यस्य यस्य कर्मणो या या उत्कृष्टा स्थितिः प्रागभिहिता तस्याः २ मिथ्यात्वस्थित्या सप्ततिसागरोकोटीकोटीप्रमाणया भागे हृते यल्लभ्यते तत्पल्योपमासङ्ख्येयभागहीनं जघन्या स्थितिः, सैव पल्योपमासङ्ख्येयभागसहिता उत्कृष्टेति, एतत्परिभाव्य सकलमप्येकेन्द्रियगतं सूत्रं स्वयं परिभावनीयं, तथापि विनेयजनानुग्रहाय किञ्चिल्लिख्यते-

ज्ञानावरणपञ्चकदर्शनावरणनवकासातवेदनीयान्तरायपञ्चकानां जघन्यत एकेन्द्रियाणां स्थितिबन्धस्त्रयः सागरोपमस्य सप्तभागाः पल्योपमासङ्ख्येयभागहीनाः, उत्कृष्टतस्त एव परिपूर्णस्त्रयः सागरोपमस्य सप्तभागाः,सातवेदनीयस्त्रीवेदमनुष्यगतिमनुष्यानुपूर्वीणां जघन्यतः सार्द्ध सागरोपमस्य सप्तभागः पल्योपमासङ्ख्येयभागहीनः, उत्कर्षतस्तु स एव सार्द्धः सप्तभागः परिपूर्णः, मिथ्यात्वस्य जघन्यत एकं सागरोपमं पल्योपमासङ्ख्येयभागहीनमुत्कर्षतः तदेव परिपूर्णं,

सम्यकत्ववेदनीयस्य सम्यग्मिथ्यात्ववेदनीयस्य च न किञ्चिदपि बध्नन्ति, न किञ्चिदपि वेद्यमानतयाऽऽत्मप्रदेशैः सम्बन्धयन्तीति भावः, एकेन्द्रियाणां सम्यकत्ववेदनीयस्य सम्यग्मिथ्यात्व-वेदनस्य चासम्भवात्, यस्तु साक्षाद्बन्धः स सम्यकत्वसम्यग्मिथ्यात्वयोर्न घटत एवेति प्रागेवाभिहितं,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कषायषोडशकस्य जघन्यतश्चत्वारः सागरोपमस्य सप्तभागाः पल्योपमासङ्ख्येयभागोना उत्कर्षतस्त एव परिपूर्णाः, पुरुषवेदहास्यरतिप्रशस्तविहायोगतिस्थिरादिषट्कप्रथमसंस्थानप्रथमसंहननशुक्लवर्णसुरभिगन्धमधुररसोच्चैर्गोत्राणां जघन्यत एकः सागरोपमस्य सप्तभागः पल्योपमासङ्ख्येयभागहीनः उत्कर्षतः स एव परिपूर्णः,

द्वितीयसंस्थानसंहननयोः जघन्यतः षट् पञ्चत्रिंशद्भागाः पल्योपमासङ्ख्येयभागहीना उत्कर्षतस्त एव परिपूर्णाः, तृतीयसंस्थानसंहननयोर्जघन्यतः सप्त सागरोपमस्य पञ्चत्रिंशद्भागाः पल्योपमासङ्ख्येयभागहीना उत्कर्षतस्त एव परिपूर्णाः,

लोहितवर्णकषायरसयोर्जघन्यतः षट् सागरोपमस्याष्टाविंशतिभागाः पल्योपमासङ्ख्येयभागहीना उत्कर्षतस्त एव परिपूर्णाः, हारिद्रवर्णाम्लरसयोर्जघन्यतः पञ्च सागरोपमस्याष्टाविंशतिभागाः पल्योपमासङ्ख्येयभागहीनाः उत्कर्षतस्त एव परिपूर्णाः, नीलवर्णकटुरसयोः सप्त सागरोपमस्याष्टाविंशतिभागाः पल्योपमासङ्ख्येयभागोनाः उत्कर्षतस्त एव परिपूर्णाः,

नपुंसकवेदभयजुगुप्साशोकारतितिर्यगौदारिकद्विकचरमसंस्थानचरमसंहननकृष्णवर्णतिक्तरसागुरुलघुपराघातोच्छ्वासोपघातत्रसबादरपर्याप्तप्रत्येकासअथिराशुभदुर्भगदुःस्वरानादेयायशः कीर्त्तिस्थावरातपोद्योताशुभविहायोगतिनिर्माणैकेन्द्रियजातिपञ्चेन्द्रियजातितैजसकार्मणानां जघन्यतो द्वौ सागरोपमस्य सप्तभागौ पल्योपमासङ्ख्येयभागहीनौ उत्कर्षतस्तावेव परिपूर्णाविति,

नरकद्विकदेवद्विकवैक्रियचतुष्टयाहारकचतुष्टयतीर्थङ्करनाम्नां त्वेकेन्द्रियाणां न बन्धः, आयुश्चिन्तायामपि एकेन्द्रिया देवायुर्नैरयिकायुर्वा न बध्नन्ति, तथा भवस्वाभाव्यात्, किन्तु तिर्यगायुर्मनुष्यायुर्वा, तदपि बध्नन्तो जघन्यतोऽन्तर्मुहूर्तं बध्नन्ति, उत्कर्षतः पूर्वकोटिप्रमाणं साधिकं, केवलमुत्कृष्टं चिन्त्यते इत्येकेन्द्रिया द्वाविंशतिवर्षसहस्रप्रमाणायुषः स्वायुषश्च त्रिभागावशेषे परभवायुर्बध्नन्तः परिगृह्यन्ते इति सप्तवर्षसहस्राणि वर्षसहस्रत्रिभागोत्तराण्यधिकानि लभ्यन्ते, ततो भवति तिर्यगायुर्मनुष्यायुश्चिन्तायां सूत्रोक्तं परिमाणमिति ।

उक्तमेकेन्द्रियबन्धकानधिकृत्य जघन्यत उत्कर्षतश्च स्थितिपरिमाणं, सम्प्रति द्वीन्द्रियानधिकृत्य तमभिधित्सुराह–

मू. (५४३) *बेइंदिया णं भंते ! जीवा नाणावरणिज्जस्स कम्मस्स किं बंधंति ?, गो० ! जह० सागरोवमपणवीसाते तिन्नि सत्तभागा पलितोवमस्स असं० ऊणया उ० ते चेव पडिपुन्ने बंधंति, एवं निद्दापंचगस्सवि, एवं जहा एगिंदियाणं भणितं तहा बेइंदियाणवि भाणितव्वं, नवरं सागरोवमपणवीसाए सह भाणितव्वा पलितोवमस्स असंखेज्जतिभागेणं ऊणा सेसा (उ०) तं चेव पडिपुन्नं बंधंति, जत्थ एगिंदिया न बंधंति तत्थ एतेवि न बंधंति,*

बेइंदिया णं भंते ! जीवा मिच्छत्तवेयणिज्जस्स किं बंधंति ?, गो० !, जह० सागरोवमयणुवीसं पलिओवमस्स असंखेज्जइभागेण ऊणयं उक्कोसेणं तं चेव पडिपुण्णं बंधंति, तिरिक्खजोणियाउयस्स जह० सागरोवमयणुवीसं पलिओवमस्स असंखेज्जइभागेण ऊणयं उक्कोसेणं तं चेव पडिपुण्णं बंधंति, तिरिक्खजोणियाउयस्स जह० अंतो० उक्को० पुव्वकोडिं चउहिं वासेहिं अहियं बंधंति, एवं मणुयाउयस्सवि, सेसं जहा एगिंदियाणं जाव अंतराइयस्स ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तेइंदिया णं भंते ! जीवा नाणावरणिज्जस्स किं बंधंति ?, गो० ! जह० सागरोवमपन्नसाए तिन्नि सत्तभागा पलितोवमस्स असंखेज्जइभागेणं ऊणया उ० ते चेव पडिपुन्ने बंधंति, एवं जस्स जतिभागा ते तस्स सागरोवमपन्नासाए सह भाणितव्वा,

'तेइदिंया णं भंते ! मिच्छत्तवेदणिज्जस्स कम्मस्स किं बंधंति ?, गो० ! ज० सागरोवमपन्नासं पलितोवमस्सासंखेज्जतिभागेणं ऊणयं उ० तं चेव पडिपुण्णं बंधंति, तिरिक्खजोणियाउयस्स जह० अंतो० उक्को० पुव्वकोडिं सोलसेहिं राइंदियतिभागेण य अहियं बंधंति, एवं मणुस्साउयस्सवि, सेसं जहा बेइंदियाणं जाव अंतराइयस्स ।

चउरिंदिया णं भंते ! जीवा नाणावरणिज्जस्स किं बंधंति ?, गो० ! जह० सागरोवमसयस्स तिण्णि सत्तभागे पलितोवमस्स असंखेज्जतिभागेणं ऊणए उक्को० ते चेव पडिपुन्ने बंधंति, एवं जस्स जति भागा तस्स सागरोवमसतेण सह भाणितव्वा, तिरिक्खजोणियाउयस्स कम्मस्स जह० अंतो० उ० पुव्वकोडिं दोहिं मासेहिं अहियं, एवं मणुस्साउयस्सवि, सेसं जहा बेइंदियाणं, नवरं मिच्छत्तवेदणिज्जस्स जह० सागरोवमसतं पलितोवमस्स असंखेज्जतिभागेणं ऊणयं उ० तं चेव पडिपुन्नं बंधति, सेसं जहा बेइंदियाणं जाव अंतराइयस्स ।

असण्णी णं भंते ! जीवा पंचिंदिया नाणावरणिज्जस्स कम्मस्स किं बंधंति ?, गो० ! जह० सागरोवमसहस्सस्स तिन्नि सत्तभागे पलितोवमस्सासंखेज्जतिभागेणं ऊणए उक्को० ते चेव पडिपुण्णे, एवं सो चेव गमो जहा बेइंदियाणं, नवरं सागरोवमसहस्सेणं समं भाणितव्वं जस्स जति भागत्ति, मिच्छत्तवेदणिज्जस्स जह० सागरोवमसहस्सं पलितोवमासंखेज्जतिभागेणं ऊणयं उ० तं चेव पडिपुण्णं, नेरइयाउयस्स जह० दस वाससहस्साइं अंतोमुहुत्तमब्भहियाइं उक्कोसेणं पलितोवमस्स असंखेज्जतिभागं पुव्वकोडितिभागब्भहियं बंधंति, एवं तिरिक्खजोणियाउयस्सवि, नवरं जह० अंतो०, मणुयाउयस्सवि देवाउयस्स जहा नेरइयाउयस्स,

असण्णी णं भंते ! जीवा पंचिंदियनिरयगतिनामाए कम्मस्स किं बंधंति ?, गो० ! जह० सागरोवमसहस्सस्स दो सत्तभागे पलितोवमस्स असंखेज्जतिभागेणं ऊणया उक्को० ते चेव पडिपुण्णे, एवं तिरियगतितेवि, मणुयगतिनामाएति एवं चेव, णवरं जह० सागरो वमसहस्सस्स दिवड्ढं सत्तभागं पलितोवमस्सासंखेज्जइभागेण ऊणं उक्को० तं चेव पडिपुण्णं बंधंति, एवं देवगतिनामाए, नवरं ते सागरोवमसहस्सस्स एगं सत्तभागं पलिओवमस्सासंखे० ऊणं उ० तं चेव पडिपुन्नं वेउव्वियसरीरनामाए पुच्छा, गो० ! ज० सागरोवमसहस्सस्स दो सत्तभागे पलितोवमस्सासंखेज्जतिभागेण ऊणे उक्को० दो पडिपुन्ने बंधंति, सम्मत्तसम्मामिच्छत्तआहारगसरीरनामाते तित्थगरनामाए न किंचि बंधंति, अवसिट्ठं जहा बेइंदियाणं, नवरं जस्स जत्तिया भागा तस्स सा सागरोवमसहस्सेणं सह भाणियतव्वा, सव्वेसिं आणुपुव्वीए जाव अंतराइयस्स ।

सण्णी णं भंते ! जीवा पंचिंदिया नाणावरणिज्जस्स कम्मस्स किं बंधंति ?, गो० ! ज० अंतोमु० उ० तीसं सा० कोडोकोडीओ तिन्नि वाससहस्साइं अबाहा,

सण्णी णं भंते ! पंचिंदिया निद्दापंचगस्स किं बंधंति ?, गो० ! जह० अंतो० सागरोवमकोडाकोडीओ उ० तीसं सागरोवमकोडाकोडीओ तिन्नि य वाससहस्साइं अबाहा, दंसणचउक्कस्स जहा नाणावरणिज्जस्स, सायावेदणिज्जस्स जहा ओहिया ठिती भणिता तहेव भाणितव्वा, ईरियाव-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

हियबंधयं पडुच्च संपराइयबंधयं च, असायावेयणिज्जस्स जहा निद्दापंचगस्स, सम्मत्तवेदणिज्जस्स सम्मामिच्छत्तवेदणिज्जस्स जा ओहिया ठिती भणिता तं बंधंति, मिच्छावेदणिज्जस्स ज० अंतोसागरोवमकोडाकोडीओ उक्को० सत्तरिं सागरोवमकोडाकोडीओ, सत्तरि य वाससहस्साइं अबाहा, कसायबारसगस्स जह० एवं चेव उक्को० चत्तालीसं सागरोवमकोडाकोडीओ, चत्तालीस य वाससयातिं अबाहा, कोहमानामायालोभसंजलणाए य दो मासा मासो अद्धमासो अंतोमुहुत्तो, एवं जहन्नगं, उक्कोसगं पुण जहा कसायबारसगस्स, चउण्हवि आउयाणं जा ओहिया ठिती भणिता तं बंधंति, आहारगसरीरस्स तित्थगरनामाए य जहन्नेणं अंतोसुगरोवमकोडाकोडीतो उ० अंतोसोगरोवमकोडाकोडीओ, पुरिसवेदणिज्जस्स ज० अट्ठ संवच्छराइं उ० दस सागरोवमकोडाकोडीओ दस य वाससताइं अबाहा,

जसोकित्तिनामाए उच्चागोत्तस्स एवं चेव, नवरं जह० अट्ठ मुहुत्ता, अंतराइयस्स जहा नाणावरणिज्जस्स, सेसएसु सव्वेसु ठाणेसु संघयणेसु संठाणेसु वण्णेसु गंधेसु य जह० अंतोसागरोवमकोडाकोडीओ उक्को० जा जस्स ओहिया ठिती भणिता तं बंधंति, नवरं इमं नाणत्तं अबाहा अबाहूणिया ण वुच्चति, एवं आणुपुव्वीते सव्वेसिं, जाव अंतरायस्स ताव भाणितव्वं

वृ. 'बेइंदिया णं भंते ! जीवा' इत्यादि, अत्रेयं परिभाषा—यस्य २ कर्मणो या या स्थितिरुत्कृष्टा प्रागभिहिता तस्याः तस्याः मिथ्यात्वस्थित्या सप्ततिसागरोपमकोटीकोटीप्रमाणया भागे हृते यल्लभ्यते तत्पञ्चविंशत्या गुण्यते गुणितं च सत् यावद्भवति तावत्पल्योपमासङ्खयेयभागहीनं द्वीन्द्रियाणां बन्धकानां जघन्यस्थितिपरिमाणं तदेव परिपूर्णमुत्कृष्टस्थितिपरिमाणं, तद्यथा—ज्ञानावरणपञ्चकदर्शनावरणनवकासातवेदनीयान्तरायपञ्चकानां त्रयः सागरोपमस्य सप्तभागाः पञ्चविंशत्या गुणिताः, वस्तुवृत्त्या पञ्चविंशतेः सागरोपमाणां त्रयः सप्तभागाः पल्योपमासङ्खयेयभागहीना जघन्यस्तितिबन्धपरिमाणं, त एव परिपूर्णा उत्कृष्टमित्यादि ।

त्रीन्द्रियबन्धचिन्तायां तदेव भागलब्धं पञ्चाशता गुण्यते चतुरिन्द्रियबन्धचिन्तायां शतेन असंज्ञिपञ्चेन्द्रियचिन्तायां सहस्रेण, आह च कर्मप्रकृतिसङ्ग्रहणिकारः— "पणवीसा पन्नासा सयं सहस्सं च गुणकारो । कमसो विगलअसन्नीण"मिति तत एतदनुसारेण सूत्रं स्वयं निगमनीयं सुगमत्वात् नवरं 'सागरोवमपण्णवीसाए तिन्नि सत्तभागा पलिओवमस्स असंखेज्जइभागेणं ऊणगा' इति, अत्रेयं गणितभावना—पञ्चविंशतेः सागरोपमाणां सप्तभिर्भागे ह्रियमाणे यल्लभ्यते तत्रिगुणीकृत्य पल्योपमासङ्खयेयभागहीनं क्रियते इति, एवं सर्वत्रापि यथायोगं गणितभावना कर्त्तव्या ।

संज्ञिपञ्चेन्द्रियबन्धकसूत्रे ज्ञानावरणीयादिकर्मणां जघन्यतः स्थितिबन्धोऽन्तर्मुहूर्तादिपरिमाणः क्षपकस्य स्वस्वबन्धचरमसमये प्रतिपत्तव्यः, निद्रापञ्चकासातवेदनीयमिथ्यात्वकषायद्वादशकादीनां तु क्षपणादर्वाक् बन्ध इति तेषां जघन्यतोऽप्यन्तः सागरोपमकोटीकोटीप्रमाणः उत्कृष्टो मिथ्यादृष्टेः सर्वसङ्क्लिष्टस्य, नवरं तिर्यग्मनुष्यदेवायुषां स्वस्वबन्धकेष्वतिविशुद्धस्येति । इह संज्ञिपञ्चेन्द्रियसूत्रे ज्ञानावरणीयादिकर्म्मणां जघन्यस्थितिबन्धोऽन्तर्मुहूर्त्तादिपरिमाण उक्तः, स कस्मिन् स्वमिनि लभ्यते इति जिज्ञासुः पृच्छति—

मू. (५४४) *नाणावरणिज्जस्स णं भंते ! कम्मस्स जहन्नट्ठितीबंधए के० ?, गो० ! अन्नयरे सुहुमसंपरायते उवसामए वा खवगे वा एस णं गो० ! नानावरणिज्जस्स कम्मस्स जहन्नठितीबंधते,*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तव्वइरित्ते अजहन्ने, एवं एएणं अभिलावणं मोहाउयवज्ञाणं सेसकम्माणं भाणितव्वं,

मोहणिज्ञस्स णं भंते ! कम्मस्स जहन्नठितीबंधते के० ?, गो० ! अन्नयरे बादरसंपराए उवसाए वा खवए वा एस णं गो० ! मोहणिज्ञस्स कम्मस्स जहन्नठितीबंधते, तव्वतिरित्ते अजहन्ने,

आउयस्स णं भंते ! कम्मस्स जहन्नठितीबंधते के० ?, गो० ! जे णं जीवे असंखेप्पद्धापविठे सव्वनिरुद्धे से आउते, सेसे सव्वमहंतीए आउयबंधद्धाए, तीसे णं आउयबंधद्धाए चरिमकाल-समयंसि सव्वजहन्नियं ठिइ अपज्जत्तापज्ञत्तियं निव्वत्तेति, एस णं गोयमा ! आउयकम्मस्स जहन्नठितीबंधते, तव्वइरित्ते अजहन्ने

वृ. 'नाणावरणिज्ञस्स णं भंते ! कम्मस्स जहन्नटिइबंधए के० ?' इत्यादि सुगमं, नवरमन्यतर-सूक्ष्मसंपराय इति यदुक्तमय व्याख्यानं क्षपक उपशमको वा सूक्ष्मसम्परायः, इह ज्ञानावरणस्य बन्धः क्षपकस्य उपशमकस्य च जघन्यतोऽन्तर्मुहूर्त्तप्रमाणस्ततोऽन्तर्मुहूर्त्तत्वाविशेषात् उपशमको वा क्षपको वा इत्युक्तम्, अन्य(थाऽ)त्रापि क्षपकापेक्षया उपशमकस्य बन्धो द्विगुणो वेदितव्यो, यत आह कर्मप्रकृतिसङ्ग्रहणिकारः-'खवगुवसामगपडिवयमाणो दुगुणो तहिं तहिं बंधो' इति, ततो वेदनीयस्य साम्परायिकबन्धचिन्तायां जघन्यः स्थितिबन्धः क्षपकस्य द्वादश मुहूर्त्ता उपशमकस्य चतुर्विंशतिः, नामगोत्रयोर्जघन्यतः क्षपकस्याष्टौ मुहूर्त्ता उपशमकस्य षोडश, परं उपशमकस्यापि जघन्यतो बन्धः शेषबन्धापेक्षया सर्वजघन्य इति तत्सूत्रेष्वपि 'अन्नयरे सुहुम- संपराए उवसामए वा खवगे वा' इति वक्तव्यं, तथा च वक्ष्यति-

''एएणं अभिलावेणं मोहाउवज्ञाणं सेसकम्माणं भाणियव्वं'ति उपसंहारसूत्रे 'तव्वइरित्ते अजहन्ने'इति तदूव्यतिरिक्तः-क्षपकोपशमकसूक्ष्मसम्परायव्यतिरिक्तो जनोऽजघन्य-स्थितिबन्धकः, आयुर्बन्धकसूत्रे 'जे णं जीवे असंखिप्पद्धापविट्ठे'इत्यादि, इह द्विविधा जीवाः-सोपक्रमायुषो निरुपक्रमायुषश्च, तत्र देवा नैरयिका असङ्ख्येयवर्षायुषस्तिर्यग्मनुष्याः सङ्ख्येयव-र्षायुषोऽप्युत्तमपुरुषा श्चक्रवर्त्यादयश्चरमशरीरिणश्च निरुपक्रमायुष एव, शेषास्तु सोपक्रमा अपि निरुपक्रमा अपि, उक्तं च-

॥१॥ ''देवा नेरइया वा असंखवासाउया य तिरिमणुया ।
उत्तमपुरिसा य तहा चरमरीरा य निरुवकमा ॥
॥२॥ सेसा संसारत्था भइया सोवक्कमा व इयरे वा ।
सोवक्कमनिरुवक्कमभेओ भणिओ समासेणं ॥''

तत्र देवा नैरयिका असङ्ख्येयवर्षायुषस्तिर्यग्मनुष्याश्च षण्मासावशेषायुषः पारभवि-कायुर्बन्धका एव, ये पुनस्तिर्यग्मनुष्याः संख्येयवर्षायुषोऽपि निरुपक्रमायुषस्ते नियमात्त्रिभागा-वशेषायुषः परभवायुर्बध्नन्ति, ये तु सोपक्रमायुषस्ते स्यात्त्रिभागावशेषायुषस्त्रिभाग-त्रिभागावशेषायुषो यावदसङ्ख्येयाद्धाप्रविष्टा इति, तत आह-

'जे णं जीवे' इत्यादि, यो णमिति वाक्यलङ्कारे जीवोऽसङ्ख्याद्धाप्रविष्टः त्रिभागादिना प्रकारेण या सङ्ख्येतुं न शक्यते सा असङ्ख्येया सा चासौ अद्धा च असङ्ख्येयाद्धा तां प्रविष्टः आयुर्बन्धनि-वर्त्तनमात्र एव कालः तस्यान्ति न परतो जीवनकाल इति भावः, एतदेव स्पष्टतरमाह-

'सेसे सव्वमहंतीए आउयबंधद्धाए' इह सर्वमहती आयुर्बन्धाद्धा अष्टाकर्षप्रमाणा तस्याः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शेषः—एकाकर्षप्रमाणा तावन्मात्रं सर्वनिरुद्धं तस्यायुर्वर्त्तते इति भावः ततोऽसङ्क्षेप्याद्धाप्रविष्टः स इत्थंभूतः तस्या—आयुर्बन्धाद्धायाश्चरमकालसमये—चरमकालावसरे एकाकर्षप्रमाणे, इहचरम-समयकालग्रहणेन न परमनिरुद्धः समयः परिगृह्यन्ते किन्तु यथोक्तरूपः कालस्ततो हीनेन कालेना-युर्बन्धस्यासम्भवात्, यत उक्तं प्राक् व्युत्क्रान्तिपदे

"जीवा णं भंते ! ठिइनामनिहत्ताउयं कइहिं आगरिसेहिं पकरेइ ?, गो० ! जह० एक्केणं उक्कोसेणं अट्ठहिं आगरिसेहिं' इति, एकेन चाकर्षेणायुर्निर्वर्त्तयति सर्वजघन्यं, यत आह—'सव्वजहन्नियं'मिति, सर्वजघन्यां—सर्वलध्वीं स्थितिमिति गम्यते, निर्वर्त्तयति बध्नातीति भावः, किंविशिष्टामित्याह—'पर्याप्तापर्याप्तिकां' शरीरेन्द्रियपर्याप्तिनिर्वर्त्तोन्च्छ्वासपर्याप्तयनिर्वर्त्तनसमर्थां, कथमेतत् अवसेयं यत्सर्वजघन्यामपि स्थितिं निर्वर्त्तयति जीवः शरीरेन्द्रियपर्याप्तिनिर्वर्त्तनसमर्थां न ततो हीनतरां इति चेत्, उच्यते युक्तिवशात्, तथाहि—इह सर्व एव देहिनः परभवायुर्बद्धा म्रियन्ते नान्यथा, परभवायुषश्च बन्ध औदारिके वैक्रिये आहारके वा योगे वर्त्तमानस्य न कार्मणे औदारिकादिमिश्रे वा, तथा चाह मूलटीकाकारः—

"जेणोरालियाईणं तिण्हं सरीराणं कायजोगे वट्टमाणो आउयबंधगो, न कम्मए ओरालिइमिस्से वा" इति, औदारिकादिकाययोगश्च विशिष्टो भवति शरीरेन्द्रियपर्याप्तया, न केवलं शरीरपर्याप्तया पर्याप्तस्य, तत एतत्सिद्धं—शरीरपर्याप्तया इन्द्रियपर्याप्तया च पर्याप्तस्य मरणं नान्यथेति, सर्वजघन्यापि स्थितिं निर्वर्त्तयति शरीरेन्द्रियपर्याप्तिनिर्वर्त्तनसमर्थां न ततोऽपि हीनतरामिति, 'एस णं गोयमे'त्याद्युपसंहारवाक्यम् ।

तदेवमुक्तो जघन्यस्थितिबन्धकः, सम्प्रत्युत्कृष्टस्थितिबन्धके पृच्छति—

मू. (५४५) *उक्कोसकालट्ठितीयं णं भंते ! नानावरणिज्जं किं नेरइओ बंधति तिरिक्खजोणिओ बंधइ तिरिक्खजोणिणी बंधइ मणुस्सो बंधइ मणुस्सिणी बंधइ देवो बंधइ देवी बंधइ ?, गो० ! नेरइओवि बंधइ जाव देवीवि बंधइ, केरिसए णं भंते ! नेरइए उक्कोसकालठिइयं णाणावरणिज्जं कम्मं बंधइ ?, गो० ! सण्णी पंचिंदिए सव्वाहिं पज्जत्तीहिं पज्जत्ते सागारे जागरे सुत्तो(तो)वउत्ते मिच्छादिट्ठी कण्हलेसे य उक्कोससंकिलिट्ठपरिणामे ईसिमज्झिमपरिणामे वा, एरिसए णं गो० ! नेरइए उक्कोसकालट्ठितियं णाणावरणिज्जं कम्मं बंधति, ।*

केरिसए णं भंते ! तिरिक्खजोणिए उक्कोसकालठितीयं णाणावरणिज्जं कम्मं बंधति ?, गो० ! कम्मभूमए वा कम्मभूमगपलिभागी वा सण्णी पंचेंदिए सव्वाहिं पज्जत्तीहिं पज्जत्तए सेसं तं चेव जहा नेरइयस्स, एवं तिरिक्खजोणिणीवि मणूसेवि मणूसीवि, देवदेवी जहा नेरइए, एवं आउयवज्जाणं सत्तण्हं कम्माणं ।

उक्कोसलकालठितीयं णं भंते ! आउयं कम्मं किं नेरइओ बंधति जाव देवी बं० ?, गो० ! नो नेरइओ बंधइ, तिरिक्खजोणि बंधति, नो तिरिक्खजोणिणी बंधति, मणुस्सेवि बंधति मणुस्सीवि बंधति, नो देवो बंधइ नो देवी बंधइ, केरिसए णं भंते ! तिरिक्खजोणिते उक्कोसठितीयं आउयं कम्मं बंधंति ?, गो० ! कम्मभूमए वा कम्मभूमगपलिभागी वा सण्णी पंचिंदिए सव्वाहिं पज्जत्तीहिं पज्जत्तए सागारे जागरे सुत्तोवउत्ते मिच्छद्दिट्ठी परमकण्हलेसे उक्कोससंकिलिट्ठपरिणामे, एरिसए णं गो० ! तिरिक्खजोणिते उक्कोसकालट्ठितीयं आउयं कम्मं बंधति,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

केरिसए णं भंते! मणूसे उक्कोसकालट्ठितीयं आउयं कम्मं बंधति?, गो० ! कम्मभूमए वा कम्मभूमगपलिभागी वा जाव सुत्तो(तो) वउत्ते सम्मदिट्ठी वा मिच्छद्दिट्ठी वा कण्हलेसे वा सुक्कलेसे वा नाणी वा अन्नाणी वा उ० संकिलिट्ठपरिणामे वा असंकिलिट्ठपरिणामे वा तप्पाउग्ग-विसुज्झमाणपरिणामे वा एरिसए णं गो० ! मणूसे उक्कोसकालट्ठितीयं आउयं कम्मं बंधति,

केरिसया णं भंते! मणुसी उक्कोसकालट्ठिइयं आउयं कम्मं बंधइ?, गो० ! कम्मभूमिया वा कम्मभूमगपलिभागी वा जाव सुत्तोवउत्ता सम्मद्दिट्ठी सुक्कलेसा तप्पाउग्गविसुज्झमाणपरिणामा, एरिसिया णं गोतमा! मणूसी उक्कोसकालट्ठिइयं आउयं कम्मं बंधिति, अंतराइयं जहा नाणावरणिज्जं

वृ. 'उक्कोसकालठिइयं णं भंते! नाणावरणिज्जं कम्मं किं नेरइओ बंधइ' इत्यादिस, सुगमं, नैरयिकसूत्रे 'सागार' इति साकारोपयुक्तः 'जागरे' इति जाग्रत् नारकाणामपि कियानपि निद्रानुभवोऽस्ति तत उक्तम्-'जाग्र'दिति 'सुत्तो(तो) वउत्ते' इति श्रुतोपयुक्तः साभिलापत्रा-नोपयुक्त इति भावः। तिर्यग्योनिकसूत्रे 'कम्मभूमगपलिभागी च;' कर्मभूमगाः- कर्मभूमिजातास्तेषां प्रतिभागः-साद्दश्यं तदस्यास्तीति कर्मभूमगप्रतिभागी कर्मभूमगसदश इत्यर्थः, कोऽसाविति चेत्, उच्यते, या कर्मभूमिजा तिर्यक्स्त्री गर्भिणी सती केनाप्यपहत्याकर्मभूमौ मुक्ता तस्या जातः कर्मभूमगसदश इत्यर्थः, अन्ये तु व्याचक्षते-कर्म्मभूमग एव यदा केनाप्यकर्मभूमौ नीतो भवति तदा स कर्मभूमगप्रतिभागी व्यपदिश्यते इति।

उत्कृष्टस्थितिकायुर्बन्धचिन्तायां नैरयिकतिर्यग्योनिकस्त्रीदेवदेवीनां प्रतिषेधः, तासामुत्कृष्टस्थितिषु नरकादिषूत्पत्त्यभावात्, मनुष्यसूत्रे 'सम्मद्दिट्ठी वा मिच्छादिट्ठी वा' इति, इह द्वे उत्कृष्टे आयुषी, तद्यथा-सप्तमनरकपृथिव्यायुर्बध्नाति तदा मिथ्याद्दष्टिः, या पुनरनुत्तरसुरायुस्तदा सम्यग्दष्टिः, 'कण्हलेसे वा' नारकायुर्बन्धकः 'सुक्कलेसे वा' इति अनुत्तरसुरायुर्बन्धकः सम्यग्द्दष्टि-प्रमत्तयतिः, उत्कृष्टसङ्क्लिष्टपरिणामो नारकायुर्बन्धकस्तात्रा योग्यविशुध्यमानपरिणामोऽ नुत्तरसुरायुर्बन्धकः,

मानुषी तु सप्तमनरकपृथिवीयोग्यमायुर्न बध्नाति अनुत्तरसुरायुस्तु बध्नातीति तत्सूत्रे सर्वं प्रशस्तं ज्ञेयं, इह अतिविशुद्ध आयुर्बन्धमेव न करोतीति तत्रायोग्यग्रहणं, शेषं कण्ठ्यम्॥

पदं - २३, उद्देशकः- २ समाप्तः

पदं - २३ - समाप्तम्

मुनि दीपरत्नसागरेण संशोधिता सम्पादिता प्रज्ञापनाउपाङ्गसूत्रे त्रयोविंशतितमपदस्य मलयगिरिआचार्येण विरचिता टीका परिसमाप्ता।

पदं - २४ कर्मबन्धः

वृ. व्याख्यातं त्रयोविंशतितमं पदं, सम्प्रति चतुर्विंशतितममारभ्यते-तस्य चायम-भिसम्बन्धः-इहानन्तरपदे कर्मबन्धादिरूपः परिणामविशेषश्चिन्तितः, स एव वक्ष्यमाणेष्वपि चतुर्षु पदेषु क्वचित् चिन्त्यते, तत्र चतुर्विंशतितमस्य पदस्येदमादि सूत्रम्-

मू. (५४६) *कति णं भंते! कम्मपगडीओ पन्नत्ताओ?, गो० ! अट्ठ कम्मपगडीओ*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पन्नत्ताओ, तं०-नाणावरणिज्जं जाव अंतराइयं, एवं नेरइयाणं जाव वेमाणियाणं।

जीवे णं भंते! नाणावरणिज्जं कम्मं बंधमाणे कति कम्मपगडीतो बंधइ ?, गो० ! सत्तविहबंधए वा अट्ठविह० छव्विहबंधते वा, नेरइए णं भंते ! नाणावरणिज्जं कम्मं बंधमाणे कति कम्मपगडीतो बंधति ?, गो० ! सत्तविहबंधए वा अट्ठविह०, एवं जाव वेमाणिते, नवरं मणुस्से जहा जीवे,

जीवा णं भंते ! नाणावरणिज्जं कम्मं बंधमाणा कति कम्मपगडीओ बंधंति ?, गो० ! सव्वेवि ताव होज्ञा सत्तविहबंधगा य अट्ठविहबंधगा य अहवा सत्तविहबंधगा य अट्ठविबंधगा य छव्विहबंधगे य अहवा सत्तविहबंधगा य अट्ठविहबंधगा य छव्विहबंधगा य, नेरइया णं भंते ! नाणावरणिज्जं कम्मं बंधमाणा कति कम्मपगडीतो बंधंति ? गो० ! सव्वेवि ताव होज्ञा सत्तविबंधगा अहवा सत्तविहबंधगा य अट्ठविहबंधगे य, अहवा सत्तविइबंधगा य अट्ठविहबंधगा य तिन्नि भंगा, एवं जाव थणियकुमारा,

पुढविकाइया णं पुच्छा, गो० ! सत्तविहबंधगावि अट्ठविहबंधगावि एवं जाव वणप्फइ-काइया, विगलाणं पंचिंदियतिरिक्खजोणियाणं तियभंगो सव्वेवि ताव होज्ञ सत्तविहबंधगा अहवा सत्तविहबंधगा य अट्ठविहबंधगे य अहवा सत्तविहबंधगा य अट्ठविहबंधगा य,

मणूसा णं भंते ! नाणावरणिज्ञस्स पुच्छा, गो० ! सव्वेवि ताव होज्ञा सत्तविहबंधगा १ अहवा सत्तविहबंधगा य अट्ठविहबंधगे य २ अहवा सत्तविहबंधगा य अट्ठविहबंधगा य ३ अहवा सत्तविहबंधगा य छव्विहबंधए य ४ अहवा सत्तविहबंधगा य छव्विहबंधगा य ५ अहवा सत्तवि-हबंधगा य अट्ठविहबंधगे य छव्विहबंधगे य ६ अहवा सत्तविहबंधगा य अट्ठविहबंधगे य छव्विहबंधगा य ७ अहवा सत्तविहबंधगा य अट्ठविहबंधगा य छव्विहबंधगे य ८ अहवा सत्तविहबंधगा य अट्ठविहबंधगा य छव्विहबंधगा य ९ एवं एते नव भंगा,

सेसा वाणमंतरादिया जाव वेमाणिता जहा नेरइया सत्तविहादिबंधगा भाणिता तहा भाणितव्वा, एवं जहा नाणावरणं बंधमाणा जहिं भणिता दंसणावरणंपि बंधमाणा तहिं जीवादीया एगत्तपोहुत्तेहिं भाणितव्वा, वेयणिज्जं बंधमाणे जीवे कति० ?, गो० ! सत्तविहबंधए वा अट्ठविहबंधए वा छव्विहबंधए वा एगविहबंधए वा, एवं मणूसेवि सेसा नारगादीया सत्तविह० अट्ठविहबंधगा जाव वेमाणिते,

जीवा णं भंते ! वेदणिज्जं कम्मं पुच्छा, गो० ! सव्वेवि ताव होज्ञा सत्तविहबंधगा य अट्ठविहबंधगा य एगविहबंधगा य छव्विहबंधए य अहवा सत्तविहबंधगा य अट्ठविहबंधगा य एगविहबंधगा य छव्विहबंधगा य अवसेसा, नारगादीया जाव वेमाणिता जहिं नाणावरणं बंधंति तहिं भाणिएवं मणूसा णं भंते ! वेदणिज्जं कम्मं बंधमाणा कति कम्मपगडीतो बंधंति ? गो० ! सव्वेवि ताव होज्ञा सत्तविहबंधगा य एगवि० १ अहवा सत्तविहबंधगा य एगवि० अट्ठविहबंधगे य २ अहवा सत्तविहबंधगा य गविहबंधगा य अट्ठवि० ३ अहवा सत्तविहबंधगा य एगविहबंधगा य छव्विहबंधगे य ४ अहवा सत्तविहबंधगा य एगविह० छव्विह० ५ अहवा सत्तविहबंधगा य एगवि० अट्ठविहबंधते य छव्विहबंधते य ६ अहवा सत्तविहबंधगा य एगविहबंधगा य अट्ठविहबंधते य छव्विहबंधगा य ७ अहवा सत्तविहबंधगा य एगवि० गा य अट्ठविहबं० छव्विहबंधगे य ८ अहवा सत्तविहबंधगा य एगवि० अट्ठवि० छव्विहबं० ९ एवं एए नव भंगा भाणियव्वा,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मोहणिज्जं बंधमाणे जीवे कति० ?, गो० ! जीवेगिंदियवज्जो तियभंगो, जीवेगिंदिया सत्तविहबंधगावि अट्ठविहबंधगावि, जीवे णं भंते ! आउयं कम्मं बंधमाणे कति कम्म० ? गो० ! नियमा अट्ठ, एवं नेरइए जाव वेमाणिए एवं पुहुत्तेणवि,

नामगोयअंतराइयं बंधमाणे जीवे कति० ?, गो० ! जीवा नाणावरणिज्जं बंधमाणे जाहिं बंधति ताहिं भाणितव्वो, एवं नेरइएवि, जाव वेमाणिए, एवं पुहुत्तेणवि भाणियव्वं ।। (पन्नवणाए भगवईए चउवीसतिमं पयं समत्तं)

वृ. 'कइ णं भंते ! कम्मपगडीओ पन्नत्ताओ' इत्यादि, प्रागुपन्यस्तस्यालापकस्येहोपन्यासो विशेषाभिधानार्थः, एवमुत्तरेष्वपि पदेषु भावनीयं, संप्रति किं कर्म बध्नन् कानि कर्माणि बध्नातीति बन्धसम्बन्धं चितिन्तयिषुः प्रथमतो ज्ञानावरणीयेन सह सम्बन्धं चिन्तयति–'जीवे णं भंते ! नाणावरणिज्जं कम्मं बंधमाणे कइ कम्मपगडीओ बंधइ' इत्यादि सुगमं, नवरं सप्तविधबन्धक आयुर्बन्धकाभावकाले अष्टविधबन्धक आयुरपि बध्नन् षड्विधबन्धको मोहायुरबन्धाभावे, स च सूक्ष्मसम्परायः, उक्तं च–

॥ १ ॥ ''सत्तविहबंधगा होंति पाणिणो आउवज्जगाणं तु ।
तह सुहुमसंपराया छव्विहबंधा विणिद्दिट्ठा ।।
मोहाउयवज्जाणं पयडीणं ते उ बंधगा भणिया ।।''

एकविधबन्धकस्तु न लभ्यते, एकविधबन्धका हि उपशान्तकषायादयः, तथा चोक्तम्–
''उवसंतखीणमोहा केवलिणो एगविहबंधा ।
ते पुणदुसमयट्ठिइयस्स बंधका न उण संपरायस्स ।।''

न चोपशान्तकषायादयो ज्ञानावरणीयं कर्मबध्नन्ति, तद्बन्धस्य सूक्ष्मसम्परायचरमसमय एव व्यवच्छेदात्, किन्तु केवलं सातवेदनीयमिति ।।

एतदेव नैरयिकादिदण्डकक्रमेण चिन्तयति–'नेरइए णं भंते !' इत्यादि, इह मनुष्यवर्जेषु शेषेषु पदेषु सर्वेष्वपि द्वावेव भङ्कौ द्रष्टव्यौ सप्तविधबन्धको वा अष्टविधबन्धको वा इति, न तु तृतीयः षड्विधबन्धक इति, तेषु सूक्ष्मसम्परायगुणस्थानासम्भवात्, मनुष्यपदेषु त्रयोऽपि वक्तव्याः, तत्र सूक्ष्मसम्परायत्वसम्भवात्, तथा चाह–'एवं जाव वेमाणिए, नवरं मणूसे जहा जीवे' इति । उक्त एकत्वेन दण्डकः, सम्प्रति बहुत्वेनाह–

'जीवा णं भंते' इत्यादि, इह जीवाः सप्तविधबन्धकाः अष्टविधबन्धकाश्च सदैव बहुत्वेन लभ्यन्ये, षड्विधबन्धकस्तु कदाचित्सर्वथा ना भवति, षण्मासान् यावत् उत्कर्षतस्तदन्तरस्य प्रतिपादनात्, यदापि लभ्यते तदापि जघन्यपदे एको द्वौ वा उत्कर्षतोऽष्टाधिकं शतं, त्रयदैकोऽपि न लभ्यते तदा प्रथमो भङ्गः, यदा त्वेको लभ्यते तदा द्वितीयो, बहूनां लाभे तु तृतीय इति, नैरयिकाः षड्विधबन्धका न भवन्ति अष्टविधबन्धका अपि कादाचित्काः, तत्र यदैकोऽप्यष्टविधबन्धको न लभ्यते तदा सर्वेऽपि तावद् भवेयुः सप्तविधबन्धका इति प्रथमो भङ्गः, यदा त्वेकोऽष्टविधबन्धकस्तदा द्वितीयो यदा तु बहवस्तदा तृतीय इति, एतदेव भङ्गत्रिकं दशस्वपि भवनपतिषु भावनीयं,

पृथिव्यादिषु पञ्चसु सप्तविधबन्धका अपि अष्टविधबन्धका अपीत्येक एव भङ्गोऽष्टविध-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बन्धकानामपि सदैव तेषु बहुत्वेन लभ्यमानत्वात्, द्वित्रिचतुरिन्द्रियतिर्यक्पञ्चेन्द्रियसूत्रेषु भङ्गत्रिकं नैरयिकवत्, मनुष्यसूत्रे भङ्गनवकमष्टविधबन्धकस्य षड्विधबन्धकस्य च कदाचित् सर्वथाप्यभावात्, तत्राष्टविधषड्विबन्धकाभावे सर्वेऽपि तावद् भवेयुः सप्तविधबन्धका इति प्रथमो भङ्गः, सप्तविधबन्धकानां सदैव बहुत्वेन प्राप्यमाणत्वात्, एकाष्टविधबन्धकभावे द्वितीयः सप्तविधबन्धकाश्चाष्टविधबन्धकश्च, बह्वष्टविधबंधकभावे तृतीयः सप्तवधबन्धकाश्चष्टविधबंधकाश्च, एवमेवाष्टविधबन्धकाभावे षड्विधबन्धकपादेनाप्यकत्वबहुत्वाभ्यां द्वौ भङ्गाविति द्विकसंयोगे चत्वारो भङ्गाः, त्रिकसंयोगेऽप्यष्टविधबन्धकषड्विधबन्धकपदयोः प्रत्येकमेकवचनबहुवचनाभ्यां चत्वार इति सर्वसङ्ख्यया नव, व्यन्तरज्योतिष्कवेमानिका नैरयिकवत्,

यथा ज्ञानावरणीयं चिन्तितं तथा दर्शनावरणीयमपि चिन्तयितव्यं, वेदनीयचिन्तायां एकविधबन्धक एव इति उपशान्तमोहादि, शेषं प्राग्वत्, मनुष्यपदविषयचिन्तायामपि त एव प्रागुक्ता नव भङ्गाः, सप्तविधबन्धकानामेकविधबन्धकानां च सदैव बहुत्वेनावस्थिततया भङ्गान्तरासम्भवात्,

मोहचिन्तायां जीवपदे पृथिव्यादिषु पदेषु च प्रत्येकं एक एव भङ्गः–सप्तविधबन्धका अपि अष्टविधवन्धका अपीति, उभयेषामपि सदैव बहुत्वेन लभ्यमानत्वात्, षड्विधबन्धकस्तु मोहनीयबन्धको न भवति, मोहनीयबन्धो ह्यनिवृत्तिबादरसम्परायगुणस्थानकं यावत्, षड्विधबन्धकस्तु सूक्ष्मसंपराय इति, आयुर्बन्धकसत् नियमादष्टविधबन्धक इति तच्चिन्ताययमेकवचने बहुवचने च सर्वत्राभङ्गकं, नामगोत्रान्तरायसूत्राणि ज्ञानावरणीयसूत्रवत् ॥

पदं – २४ – समाप्तम्

पदं – २५ – "कर्मवेदः"

वृ. सम्प्रति पञ्चविंशतितममारभ्यते, तत्र चेदमादिसूत्रम्–

मू. (५४७) *कति णं भंते ! कम्मपगडीओ पं० ?, गो० ! अट्ठ कम्मपगडीतो पन्नत्ताओ तं०–नानावरणिज्जं जाव अंतराइयं, एव नेरइयाणं जाव वेमाणियाणं,*

जीवे णं भंते ! नाणावरणिज्जं कम्मं बंधमाणे कति कम्मपगडीतो वेदेति ?, गो० ! नियमा अट्ठ कम्मपगडीतो वेदेति, एवं नेरइए जाव वेमाणिए, एवं पुहुत्तेणवि, एवं वेदणिज्जवज्जं जाव अंतराइयं । जीवे णं भंते ! वेदणिज्जं कम्मं बंधमाणे कति कम्मपगडीतो वेदेति ?, गो० ! सत्तविहवेदए वा अट्ठविहवेदए वा छउव्विहवेदए वा, एवं मणूसेवि, सेसा नेरइयाति एगत्तेण पुहुत्तेणवि नियमा अट्ठ कम्मपगडीओ वेदंति जाव वेमाणिया,

जीवा णं भंते ! वेदणिज्जं कम्मं बंधमाणा कति कम्मपगडीतो वेदेंति ?, गो० ! सव्वेवि ताव होज्जा अट्ठविहवेदगा य चउव्विहवेदगा य ? अहवा अट्ठविहवेदगा य चउव्विह० सत्तविहवेदगे य २ अहवा अट्ठावहवेदगा य चउव्वि० सत्तवि० ३, एवं मणूसावि भाणियव्वा ॥ (पन्नवणाए भगवईए कम्मवेदनामं पणवीसतिमं पयं समत्तं)

वृ. 'कइ णं भंते कम्मपगडीओ' इत्यादि गतार्थं, सम्प्रति किं कर्म बध्नन् कति कर्मप्रकृतीर्वेदयते इति चिन्तयति 'जीवे णं भंते !' इत्यादि सुगमं, वेदनीयसूत्रे 'सत्तविहवेयए वा अट्ठविहवेयए(या) वा' इति, सप्तविधवेदक उपशान्तमोहः क्षीणमोहो वा, तयोर्मोहनीयोदयाभावात्,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अष्टविधवेदका मिथ्यादृष्ट्यादयः सूक्ष्मसम्परायान्ताः, तेषामवश्यमष्टानमपि कर्मणामुदय-भावात्, चतुर्विधवेदकः सयोगिकेवली, तस्य घातिकर्मचतुष्टयोदयाभावात्, बहुवचने सप्तविधवेदकाः कादाचित्का इति भङ्गत्रयम् ।

पदं – २५ – समाप्तम्

पदं – २६-कर्म "वेद–बन्ध"

वृ. अधुना षड्विंशतितममारभ्ये, तत्र चेदमादिसूत्रम्–

मू. (५४८) *कति णं भंते ! कम्मपगडीओ पन्नत्ताओ, गो० ! अट्ठ कम्मपगडीओ पन्नत्ताओ, तं०–नाणा० जाव अंतराइयं, एवं नेरइयाणं जाव वेमाणियाणं,*

जीवे णं भंते ! नाणावरणिज्जं कम्मं वेदेमाणे कति कम्मपगडीओ बंधति ?, गो० ! सत्तविह-बंधए वा अट्ठविहबंधए वा छव्विहबंधए वा एगविहबंधए वा,

नेरइए णं भंते ! नाणावरणिज्जं कम्मं वेदेमाणे कति कम्म० बंधति ?, गो० ! सत्तविहबंधए वा अट्ठवि०, एवं जाव वेमाणिते, एवं मणूसे जहा जीवे, जीवा णं भंते ! नाणावरणिज्जं कम्मं वेदेमाणा कति० ! कममपगडीतो बंधंति !,

गो० ! सव्वेवि ताव होज्जा सत्तविहबंधगा य अट्ठविह० १ अहवा सत्तविहबंधगा य अट्ठविहबंधगा य छव्विहबंधगे य २ अहवा सत्तविहबंधगा य अट्ठविहबंधगा य छव्विहबंधगा य छव्विहबंधगा य ३ अहवा सत्तविहबंधगा य अट्ठविहबंधगा य एगविहबंधए य ४ अहवा सत्तवि-हबंधगा य अट्ठविहबंधगा य एगविहबंधगा य ५ अहवा सत्तविहबंधगा य अट्ठवि० छव्विहबंधए य एगविहबंधए य ६ अहवा सत्तविहबंधगा य अट्ठवि० छव्विहबंधए य एगविहबंधगा य ७ अहवा सत्तविहबंधगा य अट्ठवि० छव्विह० एगविहबंधए य ८, अहवा सत्तविहबंधगा य अट्ठ० छव्विह० एगविह० ९, एवं एते नव भंगा, अवसेसाणं एगिंदियमणूसवज्जाणं तियभंगो जाव वेमाणियाणं,

एगिंदियाण सत्तविहबंधगा य अट्ठविहबं०, मणूसाणं पुच्छा, गो० ! सव्वेवि ताव होज्जा सत्तविहबंधगा १ अहवा सत्तविहबंधगा य अट्ठविहबंधगे य २ अहवा सत्तविहबंधगा य अट्ठविहबंधगा य ३ अहवा सत्तविहबंधगा य छव्विहबंधए य ४, एवं छव्विहबंधएणवि समं दो भंगा, एगविहबंधएणवि समं दो भंगा, अहवा सत्तविहबंधगा य अट्ठविहबंधए य छव्विहबंधए य चउभंगो १ अहवा सत्तविहबंधगा य अट्ठविहबंधए य एगविहबंधगे य चउभंगो २, अहवा सत्तविहबंधगा य छव्विहबंधए य एगविहबंधए य चटउभंगो ३ अहवा सत्तविहबंधगा य अट्ठविहबंधए य छव्विहबंधए य एगविहबंधए य भंगा अट्ठ, एवं एते सत्तावीसं भंगा, एवं जहा नाणावरणिज्जं तहा दंसणावरणिज्जंपि अंतराइयंपि,

जीवे णं भंते ! वेदणिज्जं कम्मं वेदेमाणे कति कम्मपगडीतो बंधति ?, गो० ! सत्तविहबंधते वा अट्ठविहबंधते वा छव्विहबंधए वा एगविहबंधए वा अबंधे वा, एवं मणूसेवि, अवसेसा नारयादीया सत्तविहबं० अट्ठविहबं० एवं जाव वेमाणिता । जीवा णं भंते ! वेदणिज्जं कम्मं वेदेमाणा कति० बंधंति ?, गो० ! सव्वेवि ताव होज्जा सत्तविहबंधगा य अट्ठविहबंधगा य एगविहबंधगा य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अहवा सत्तविहबंधगा य अट्ठवि० एगवि० छव्विहबंधगे य, अहवा सत्तविहबंधगा य अट्ठविहबंध० एगविहबंध० छव्विहबंधगा य, अबंधगेणवि समं दो भंगा भाणितव्वा, अहवा सत्तविहबंधगा य अट्ठविहबंध० एगविहबंध० छव्विहबंधगे य अबंधगे य चउभंगो, एवं एए नव भंगा, एगिंदियाणं अभंगतं, नारगादीणं तियभंगा जाव वेमाणियाणं,

नवरं मणूसाणं पुच्छा, सव्वेवि ताव होज्जा सत्तविहबंधगा एगविहबंधगा य अहवा सत्तविहबंधगा य एगविहबंधगा य छव्विहबंधते य अट्ठविहबंधधते य अबंधते य, एवं एते सत्तावीसं भंगा भाणितव्वा, एवं जहा वेदणिज्जं तहा आउयं नामं गोयं च भाणितव्वं, मोहणिज्जं वेदेमाणे जहा णाणावरणिज्जं तहा भाणियव्वं ॥

वृ. 'कति णं भंते ! इत्यादि गतार्थं, सम्प्रति किं कर्म वेदयमानः काः कर्मप्रकृतीर्बध्नाती-त्युदयेन सह बन्धस्य सम्बन्धं चिचिन्तयिषुरिदमाह–

'जीवे णं भंते ! नाणावरणिज्जं कम्मं वेएमाणे कइ कम्मपगडीओ बंधइ' इत्यादि सुगमं, नवरं ज्ञानावरणीयं कर्म वेदयमान एकविधबन्धकः उपशान्तमोहः क्षीणमोहो वा न तु सयोगि-केवली, तस्य ज्ञानावरणीयोदयाभावात्, बहुवचनचिन्तायां षड्विधबन्धकाः सूक्ष्मसम्पराया एकविधबन्धका उपशान्तमोहक्षीणमोहाः कादाचित्का एकत्वादिना च भाज्या इत्युभयेषामप्यभावे सप्तविधबन्धका अपि अष्टविधबन्धका अपीत्येको भङ्गो, द्वयानामपि सदैव बहुत्वेन लभ्यमानत्वात्, ततः षड्विधबन्धकपदप्रक्षेपे एकवचनबहुवचनाभ्यां द्वौ भङ्गौ, एवमेव द्वौ भङ्गावेक विधबन्ध-कप्रक्षेपेऽपि, उभयोरपि युगपत् प्रक्षेपे पूर्ववच्चत्वार इति सर्वसङ्ख्यया नव,

नैरयिकादिषु तु पदेष्वकेन्द्रियमनुष्यवर्जेषु बहुवचनचिन्तायां भङ्गत्रिकं, अष्टविधबन्धकानां कादाचित्कतया एकत्वादिना भाज्यतया च लभ्यमानत्वात्, एकेन्द्रियेष्वभङ्गकं, सप्तविधबन्धका अष्टविधबन्धका अपीति, उभयेषामपि सदा बहुत्वेन प्राप्यमाणत्वात्, मनुष्येषु तु सप्तविंशतिर्भङ्गाः अष्टविधबन्धकषड्विधवन्धकएकविधबंधकानां कादाचित्कतया एकत्वादिना भाज्यमानतया लभ्यमानत्वात्, तत्रामीषामभावे सप्तविधबन्धका इत्येको भङ्गः, ततोऽष्टविधबन्धकपदप्रक्षेपे एकवचनबहुवचनाभ्यां द्वौ द्वौ, षट्विधबन्धकप्रक्षेपे द्वौ, एकविधबन्धकप्रक्षेपे सति सप्त, ततोऽष्टवि-धबन्धकषड्विधबन्धकपदप्रक्षेपे चत्वारः, अष्टविधबन्धकैकविधबन्धकपदप्रक्षेपे चत्वारः, षड्विधबन्धकएकविधबन्धकपदप्रक्षेपेऽपि चत्वारः, एकोनविंशतिः, ततोऽष्टविधबन्ध-कषड्विधबन्धकैकविधबन्धकपदानां युगपत् प्रक्षेपेऽष्टाविति सप्तविंशतिः,

वेदनीयसूत्रे एकविधबन्धकः सयोगिकेवल्यपि, तस्यापि वेदनीयोदयबन्धसम्भवात्, अबन्धकोऽयोगिकेवली, तस्य योगाभावतो वेदनीयं वेदयमानस्यापि तद्बन्धासम्भावाद्, वेदनीयसूत्रे एकवचनबहुवचनचिन्तायां जीवपदे नव भङ्गाः, तत्र सप्तविधबनअधकाष्टविधबन्ध-कैकविधबन्धकानां सदैव बहुत्वेन लभ्यमानत्वात् बहुवचनात्मके इतरपदद्वयाभावे एकः, ततः षड्विधबन्धकपदप्रक्षेपे एकवचनबहुवचनाभ्यां द्वौ एवमेव द्वावेकविधबन्धकपदप्रक्षेप चत्वार उभयपदप्रक्षेपे इति ।

मनुष्यपदे सप्तविंशतिः, तत्र हि सप्तविधबन्धका एकविधबनधका एकेन बहुत्वेन सदावस्थि-ता इतरे तु त्रयोऽप्यष्टविधबन्धकाः षड्विधबन्धकाः अबन्धकाश्च कादाचित्का एकत्वादिना च

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भाज्याः, ततस्तेषामभावे सप्तविधबन्धका अप्येकविधबन्धका अपीत्येको भङ्गः, ततोऽष्टविधबन्धकपदप्रक्षेपे एकवचनबहुवचनाभ्यां द्वौ द्वौ षड्विधबन्धकपदप्रक्षेपे द्वावेकविधबन्धकपदप्रक्षेपे इति षट्, तथा त्रयाणां पदानां त्रयो द्विकसंयोगा एकैकस्मिन् द्विकसंयोगे एकवचनबहुवचनाभ्यां चत्वार इति द्विकसंयोगे द्वादश त्रिकसंयोगेऽष्टाविति सर्वसङ्ख्यया सप्तविंशतिः एवमायुर्नामगोत्रसूत्राण्यपि भावनीयानि,

मोहवेदनीयं कर्म वेदयमानो जीवः सप्तविधबन्धकोऽष्टविधबन्धकः षड्विधबन्धको वा, सूक्ष्मसम्परायावस्थायामपि मोहनीयवेदनसम्भवात्, एवं मुष्यपदेऽपि वक्तव्यं, नरकादिषु तु पदेषु सप्तविधबन्धकोऽष्टविधबन्धको वेत्येवं वक्तव्यं, सूक्ष्मसम्परायत्वाभावतः षड्विधबन्धकत्वासम्भवात्, बहुवचनचिन्तायां जीवपदे भङ्गत्रिकं, तत्र सूक्ष्मसम्परायाः कादाचित्का इतरे च द्वये सदैव बहुत्वेन लभ्यन्ते, इति षड्विधबन्धकपदाभावे सप्तविधबन्धका अपि अष्टविधबन्धका अपीत्येको भङ्गः, ततः षड्विधबन्धकपदप्रक्षेपे एकवचनबहुवचनाभ्यां द्वावेतौ भङ्गाविति,

नैरयिकादिषु स्तनितकुमारपर्यवसानेषु सप्तविधबन्धकाः सदा बहुत्वेनावस्थिताः, अष्टविधबन्धकास्तु कादाचित्का एकत्वादिना च भाज्या इति, अष्टविधबन्धकपदाभावे सप्तविधबन्धका इत्येको भङ्गः, ततोऽष्टविधबन्धकपदप्रक्षेपे एकवचनबहुवचनाभ्यां द्वाविति, पृथिव्यादिषु तु पञ्चस्वप्यभङ्गकं सप्तविधबन्धका अपि अष्टविधबन्धका अपीति, उभयेषामपि तेषु सदा बहुत्वेन लभ्यमानत्वात्,

द्वित्रिचतुरिन्द्रियतिर्यक्पञ्चेन्द्रियेषु व्यन्तरज्योतिष्कवैमानिकषु च नैरयिकवत् भङ्गत्रिकं, मनुष्येषु नव भङ्गाः, तत्र सप्तविधबन्धका इत्येको भङ्गस्ततोऽष्टविधबन्धकपदप्रक्षेपे एकवचनबहुवचनाभ्यां द्वौ द्वौ षड्विधबंधकपदप्रक्षेपे एकवचनबहुवचनाभ्यां चत्वारः उभयपदप्रक्षेपे इति, तथा चाह–"मोहणिज्जं वेएमाणे जहा बंधे नाणावरणिज्जं तहा भणियव्व'मिति ॥

पदं – २६ – समाप्तम्

मुनि दीपरत्नसागरेण संशोधिता सम्पादिता प्रज्ञापनाउपाङ्गसूत्रे षड्विंशतितमपदस्य मलयगिरिआचार्येण विरचिता टीका परिसमाप्ता ।

पदं – २७ – "कर्मवेद वेद"

वृ. संप्रति सप्तविंशतितममारभ्यते, तत्रेदमादिसूत्रम्–

मू. (५४९) *कति णं भंते! कम्मपगडीओ पं० ?, गो० ! अट्ठ, तं०–नाणा० जाव अंतराइयं, एवं नेरइयाणं जाव वेमाणियाणं,*

जीवे णं भंते! नाणावरणिज्जं कम्मं वेदेमाणे कति कम्मपगडीतो वेदेति ?, गो० ! सत्तविहवेयए वा अट्ठविहवेयए वा, एवं मणूसेवि, अवसेसा एगत्तेणवि पुहुत्तेणवि नियमा अट्ठ कम्मपगडीतो वेदेंति जाव वेमाणिया, जीवा णं भंते ! नाणावरणिज्जं वेदेमाणा कति कम्मपगडीतो वेदेंति ?, गो० ! सव्वेवि ताव होज्जा अट्ठविहवेदगा, अहवा अट्ठविहवेदगा य सत्तविहवेदगे य अहवा अट्ठविहवेदगा य सत्तवि०, एवं मणूसावि,

दरिसणावरणिज्जं अंतराइयं च एवं चेव भाणितव्वं, वेदणिज्जं आउयनामगोत्तातिं वेदेमाणे

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कति कम्मपगडीओ वेएति ?, गो० ! जहा बंधगवेदगस्स वेयणिज्जं तहा भाणितव्वाणि,

जीवे णं भंते ! मोहणिज्जं वेदेमाणे कति कम्मपगडीतो वेदेति ?, गो० ! नियमा अट्ठ कम्मपगडीतो वेदेति, एवं नेरतिए जाव वेमाणिते, एवं पुहुत्तेणवि (पन्नवणाए भगवईए सत्तावीसइमं पयं समत्तं)

वृ. 'कइं णं भंते !' इत्यादि गतार्थं, सम्प्रति किं कर्म वेदयमानः कति कर्मप्रकृतिर्वेदयते इत्युदयस्योदयेन सह सम्बन्धं चिन्तयति–

'जीवे णं भंते ! नाणावरणिज्जं कम्मं वेएमाणे कइ कम्मपगडीओ वेएइ' इत्यादि, तत्र सप्तविधवेदक उपशान्तमोहः क्षीणमोहो वा, तयोर्मोहनीयोदयासम्भनवात्, शेषस्तु सूक्ष्मसंपरायादिरष्टविधवेदकः, एवं मनुष्यपदेऽपि वाच्यं, नैरयिकादयस्तु नियमादष्टविधवेदकाः बहुवचनचिन्तायां जीवपदे मनुष्यपदे च भङ्गत्रिकं, तत्र सर्वेऽपि तावतद् भवेयुः अष्टविधवेदका इत्येको भङ्गः, ततः सप्तविधवदकस्यैकस्य भावे द्वितीयो बहूनां भावे तृतीयः, शेषेषु तु नैरयिकादिषु पदेषु अभङ्गमष्टविधवेदका इति, सप्तविधवेदकत्वस्य तत्रासम्भवात्,

एवं दर्शनावरणीयान्तरायसूत्रेऽपि वक्तव्यं, वेदनीयसूत्रे जीवपदे मनुष्यपदे च प्रत्येकमष्टविधवेदको वा सप्तविधवेदको वा चतुर्विधवेदको वेति वक्तव्यं, शेषेषु तु नैरयिकादिषु अष्टविधवेदक इत्येकः तेषामुपशान्तमोहत्वाद्यवस्थासम्भवात्, तत्रैव वेदनीयसूत्रे बहुवचनचिन्तायां जीवपदे मनुष्यपदे च प्रत्येकं भङ्गत्रिकं, तत्राष्टविधवेदकाश्चेत्येको भङ्गः एष सर्वथा सप्तविधवेदकानामभावे, ततः सप्तविधवेदकपदप्रक्षेपे एकवचनबहुवचनाभ्यां द्वौ भङ्गाविति, शेषेषु तु नैरयिकादिषु स्थानेष्वभङ्गकं अष्टविधवेदका इति, एवमायुर्नामगोत्रसूत्राण्यपि भावनीयानि,

मोहनीयं कर्म वेदयमानो नियमादष्टविधवेदक इति, जीवादिषु पञ्चविंशतौ पदेष्वेकवचनचिन्तायां बहुवचनचिन्तायं च सर्वत्रापि अभङ्गकं–अष्टौ कर्मप्रकृतीर्वेदयते वेदयन्ते वा ॥

पदं – २७ – समाप्तम्

पदं – २८ – "आहारं"

वृ. तदेवमुक्तं वेदवेदाख्यं सप्तविंशतितमं पदं, सम्प्रपत्यष्टविंशतितममारभ्यते, तस्य चामभिसम्बन्धः–इहानन्तरपदे नारकादिगतिसमापन्नानां कर्मवेदनापरिणाम उक्तः, इह त्वाहारपरिणाम इति, तत्र चेमे सङ्ग्रहणिगाथे–

मू. (५५०) *सच्चित्ता १ हारट्ठी २ केवति ३ किं वावि ४ सव्वतो चेव ५ ।*
कतिभागं ६ सव्वे ७ खलु परिणामे ८ चेव बोद्धव्वे ॥

वृ. 'सचित्ताहारट्ठी' इत्यादि प्रथमोऽधिकारः सचित्तपदोपलक्षितः, स चैवम्–'नेरइया णं भंते ! किं सचित्ताहारा अचित्ताहारा इत्यादि १, द्वितीय आहारार्थिन इति २, तृतीयः 'केवइय'त्ति कियता कालेन आहारार्थः समुत्पद्यते इत्यादिरूपः ३, चतुर्थः किमाहारमाहारयन्तीतिपदोपलक्षितः ४ पञ्चमः सर्वत इतिपदोपलक्षितः, स चैवम्–'नेरइया णं सव्वतो परिणामंति'त्यादि ५ चेवशब्दः समुच्चये, 'कइभागं'ति गृहीतानां पुद्गलानां कतिभागमाहारयन्तीत्येवमादिः षष्ठोऽधिकारः ६, 'तथा सव्वे' इति यान् पुद्गलान् आहारतया गृह्णन्ति तान् किं सर्वान्–अपरिशेषान् आहारयन्ति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उतासर्वान् इत्येवमुपलक्षितः सप्तमोऽधिकारः ७, तथाऽष्टमोऽधिकारः परिणामः–परिणामरूपो बोद्धव्यः, स चैवम्–'नेरइया णं भंते ! जे पोग्गले आहारत्ताए गेण्हंति ते णं तेसिं पुग्गला कीसत्ताए भुज्जो २ परिणामंती'त्यादिरूपः ८,

मू. (५५१) *एगिंदियसरीररादी लोमाहारो तहेव मणभक्खी ।*
एतेसिं तु पदाणं विभावणा होंति कातव्वा ॥

वृ. नवमोऽर्थाधिकारः एकेन्द्रियानि शरीराणि, स चैवम्–'नेरइया णं भंते ! किं एगिंदियरीराइं आहारेंति जाव पंचिंदियसरीराइं आहारेंति ?' ९, दशमोऽधिकारो लोमाहारो–लोमाहारवक्तव्यतारूपः १०, एकादशो मनोभक्षितवक्तव्यतारूपः ११,

'एएसिं तु' इत्यादि, एतेषां–सामान्यतोऽनन्तरमुद्दिष्टानां पदानां–अर्थाधिकाराणां विभावना–विस्तरतः प्रकाशना नाम भवति कर्त्तव्यता, सूत्रकारवचनमेतत् । प्रतिज्ञातमेव निर्वाहयितुकामो 'यथोद्देशं निर्द्देश' इति न्यायात् प्रथमाधिकारं विभावयति–

–: पदं – २८, उद्देशकः– १ :–

मू. (५५२) *नेरइया णं भंते ! किं ! सचित्ताहारा अचित्ताहारा मीसाहारा ?, गो० ! नो सचित्ताहारा अचित्ताहारा नो मीसाहारा, एवं असुरकुमारा जाव वेमाणिया, ओरालियसरीरा जाव मणूसा सचित्ताहाराविं अचित्ताहाराविं मीसाहाराविं ।*

नेरइया णं भंते ! आहारट्ठी ?, हंता आहारट्ठी, नेरइयाणं भंते ! केवतिकालस्स आहारट्ठे समुप्पज्जति ? गो० ! नेरइयाणं दुविधे आहारे प० तं०–आभोगनिव्वत्तिते य अनाभोगनिव्वत्तित्ते य, तत्थ णं जे से अनाभोगनि० से णं अनुसमयमविरहिते आहारट्ठे समुप्पज्जति, तत्थ णं जे से आभोगनि० से णं असंखिज्जसमतिए अंतोमुहुत्तिते आहारट्ठे समुप्पज्जति,

नेरइया णं भंते ! किमहारमाहारेंति ?, गो० ! दव्वतो अनंतपदेसियातिं खेत्तओ असंखेज्जपदेसोगाढातिं कालतो अन्नयरट्ठिइयातिं भावओ वण्णमंतातिं गंधमंताइं रसमंताइं फासमंताइं, जाइं भावतो वण्णमंताइं आहारेंति ताइं किं एगवण्णातिं आहारेंति जाव किं पंचवण्णाइं आहारेंतिं ?, गो० ! ठाणमग्गणं पडुच्च एगवण्णाइंपि आहारेंति जाव पंचवण्णाइंपि आहारेंति, विहाणमग्गणं पडुच्च कालवण्णाइंपि आहारेंति जाव सुक्किल्लाइंपि आहारेंति, जातिं वण्णतो कालवणातिं आहारेंति ताइं किं एगगुणकालाइं आहारेंति जाव दसगुणकालाइं आ० संखिज्ज० असंखिज्जगुणकालाइं आ० जाव अनंतगुणकालाइं आ० ?, गो० ! एगगुणकालाइंपि आ० जाव अनंतगुणकालाइंपि आ० एवं जाव सुक्किल्लाइं, एवं गंधतोवि रसतोवि,

–जाइं भावओ फासमंताइं ताइं नो एगफासाइं आ० नो दुफासाइं आ० नो तिफासाइं आहारेंति चउफासाइं आहारेंति, जाव अट्ठफासाइंपि आ०, विभागमग्गणं पडुच्च कक्खडाइंपि आ० जाव लुक्खाइं, जातिं फासतो कक्खडातिं आ० ताइं किं एगगुणकक्खडाइं आ० जाव अनंतगुणकक्खडाइं आ० ?, गो० ! एगगुणकक्खडाइंपि आ० जाव अनंतगुणकक्खडाइंपि आ०, एवं अट्ठवि फासा भाणितव्वा, जाव अनंतगुणलुक्खाइंपि आ०, जातिं भंते ! अनंतगुणलुक्खाइं आ० ताइं किं पुट्ठाइं आ० अपुट्ठाइं आ० ?, गो० ! पुट्ठाइं आ० नो अपुट्ठाइं आ०, जहा भासुद्देसए जाव नियमा छद्दिसिं आ०,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

—ओसन्नं कारणं पडुच्च वण्णओ कालनीलातिं गंधओ दुब्भिगंधातिं रसओ तित्तरसकडुयाइं फासओ कक्खडगुरुयसीयलुक्खाइं तेसिं पोराणे वण्णगुणे गंधगुणे रसगुणे फासगुणे विपरिणामइत्ता परिपीलइत्ता परिसाडइत्ता परिविद्धंसइत्ता अन्ने अपुव्वे वण्णगुणे गंधगुणे रसगुणे फासगुणे उप्पाइत्ता आयसरीरखेत्तोगाढे पोग्गले सव्वप्पणयाए आहारं आहारेंति।

नेरइया णं भंते ! सव्वओ आहारेंति सव्वओ परिणामंति सव्वओ ऊससंति सव्वओ नीससंति अभिक्खणं आहारेंति अभिक्खणं परीणामंति अभिक्खणं ऊससंति अभिक्खणं नीससंति आहच्च आहारेंति आहच्च परणीमेंति आहच्च ऊससंति आहच्च नीससंति ?, हंता ! गो० ! नेरइया सव्वतो आहारेंति एवं तं चेव जाव आहच्च नी० ।

नेरइया णं भंते ! पोग्गले आहारत्ताते गिण्हतिं ते णं तेसिं पोग्गलाणं सेयालंसि कतिभागं आहारेंति कतिभागं आसाएंति ?, गो० ! असंखेज्जतिभागं आ० अनंतभागं अस्साएंति, नेरइया णं भंते ! जे पोग्गले आहारत्ताते गिण्हंति ते किं सव्वे आहारेंति नो सव्वे आहारेंति ?, गो० ! ते सव्वे अपरिसेसए आहारेंति। नेरइया णं भंते १ जे पोग्गले आहारत्ताए गिण्हंति ते णं तेसिं पोग्गलाकीसत्ताए भुज्जो २ परिणामेंति ?, गो० ! सोतिंदियत्ताते जाव फासिंदियत्ताते अनिट्ठत्ताते अकंतत्ताए अन्निट्ठत्ताए अमणुण्णत्ताए अमणामत्ताते अनिच्छियत्ताते अभिज्झित्ताए अहत्ताते नो उद्धत्ताए दुक्खत्ताते नो सुहत्ताते एतेसिं भुज्जो २ परिणमंति।

वृ. 'नेरइया णं भंते १' इत्यादि, नैरयिका भदन्त ! किं सचित्ताहाराः—सचित्तमाहारयन्तीति सचित्ताहाराः,एवमचित्ताहारा मिश्राहारा इत्यपि भावनीयं, भगवानाह—'गौतमे'त्यादि, इह वैक्रियशरीरिणो वैक्रियशरीरपरिपोषयोग्यान् पुद्गलानाहारयन्ति, ते चाचित्ता एव सम्भवन्ति न जीवपरिगृहीता इत्यचित्ताहारा न सचित्ताहारा नापि मिश्राहाराः, एवमसुरकुमारादय; स्तनितकुमारापर्यवसाना भवनपतयो व्यन्तरा ज्योतिष्का वेमानिकाश्च वेदितव्याः, औदारिकशरीरिणः पुनरौदारिकशरीरपरिपोषयोग्यान् पुद्गलानाहारयन्ति, ते च पृथिवीकायिकादिपरिणामपरिणता इति सचित्ताहारा अचित्ताहारा मिश्राहाराश्च घटन्ते, तथा चाह—'ओरालियसरीरा जाव मणूसा' इत्यादि, औदारिकशरीरिणः पृथिवीकायिकेभ्य आरभ्य यावन्मनुष्याः, किमुक्तं भवति ? —पृथिव्यप्तेदोवायुवनस्पतिरकूपा एकेन्द्रिया द्वित्रिचतुःपञ्चेन्द्रिया मनुष्याश्चच एते प्रत्येकं सचित्ताहारा अप्यचित्ताहारा अपि मिश्राहारा अपि वक्तव्याः । उक्तः प्रथमाधिकारः, सम्प्रति द्वितीयादीनष्टमपर्यन्तान् सप्ताधिकारान् चतुर्विंशतिदण्डकक्रमेण युगपदभिधित्सुः प्रथमतो नैरयिकाणामभिदधाति—

'नेरइया ण'मित्यादि, नैरयिकाणमिति वाक्यालङ्कारे, भदन्त ! आहारार्थिनः, काक्वाऽभिधानतः प्रश्नार्थत्वावगतिः,भगवानाह—'हंते'त्यादि, हन्तेत्यनुमतौ अनुमतमेतत्, गौतम आहारार्थिनो नैरयिका इति, यदि आहारार्थिनस्ततो भदन्त ! नैरयिका णमिति पूर्ववत् 'केवइकालस्स'त्ति प्राकृतत्वात् तृतीयार्थे षषअठी, कियता कालेन आहारार्थः—आहारलक्षणं प्रयोजनं आहाराभिलाष इतियावत् समुत्पद्यते ?, भगवानाह—'गौतम !' इत्यादि, नैरयिकाणां द्विविधो—द्विप्रकारः आहारः, तद्यथा—आभोगनिर्वार्त्तितोऽनाभोगनिर्वर्त्तितश्च, तत्र आभोगनमाभोगः—आलोचनमभिसन्धिरित्यर्थः आभोगेन निर्वर्त्तितः—उत्पादित आभोगनिर्वर्त्तित

Jain Education International   For Private & Personal Use Only   www.jainelibrary.org

आहारयामीतीच्छापूर्वं निर्मापित इतियावत्, तद्विपरीतोऽनाभोगनिर्वर्त्तितः, आहारयामीति विशिष्टेच्छामन्तरेण यो निष्पाद्यते प्रावृट्काले प्रचुरतरमूत्राद्यभिव्यङ्ग्यशीतपुद्गलाद्याङ्हारवत् सोऽनाभोगनिर्वर्त्तित इति भाव;,

'तत्थ ण'मित्यादि, तत्र-अनाभोगाभोगनिर्वर्त्तितयोर्मध्ये योऽसावनाभोगनिर्वर्त्तित आहारः 'से ण'मिति पूर्ववत् 'अनुसमयं' प्रतिसमयं समये २ इत्यर्थः, इह च दीर्घकालोपभोग्यस्याहारस्यैक-वारमपि ग्रहणे तावन्तं कालमनुसमयं भवति, तत आभवपर्यन्तं सातत्यग्रहणप्रतिपादनार्थमाह-अविरहित आहारार्थः, समुत्पद्यते, अथवा सततप्रवृत्ते आहारार्थेऽपान्तराले चुक्कस्खलितन्यायेन येन कथञ्चित् विरहभावेऽपि लोके तदगणनया अनुसमयमिति व्यवहारः प्रवर्त्तते ततोऽपान्तराले विरहाभावप्रतिपादनार्थमविरहित इत्युक्तं, अनुसमयमविरहितोऽनाभोगनिर्वर्त्तित आहारार्थः समुत्पद्यमानःओजआहारादिना प्रकारेणावसेयः,

'तत्थ ण'मित्यादि, तत्र-आभोगानाभोगनिर्वर्त्तितयोर्मध्ये योऽसावाभोगनिर्वर्त्तितः आहारार्थः सोऽसङ्ख्येयसामयिकः-असंख्येयैः समयैर्निर्विर्त्तितः, सच्चासङ्ख्येयसमनिर्वर्त्तितं तज्जधन्यपदेऽप्यन्तर्मुहूर्त्तिकं भवति न हीनमत आन्तर्मुहूर्त्तिक आहारार्थः समुत्पद्यते, किमुक्तं भवति ?,- अन्तर्मुहूर्त्त कालं यावत् प्रवर्त्तते न परतो, नैरयिकाणां हि योऽसावाहारयामीत्यभिलाषः स परिगृहीताहारद्रव्यपरिणामेन यज्जनितमतितीव्रतरं दुःखं तद्भावादन्तर्मुहूर्त्तान्निवर्त्तते तत आन्तर्मुहूर्त्तिको नैरयिकाणामाहारार्थः,

'नेरइया ण'मित्यादि, नैरयिका णमिति पूर्ववत् किंस्वरूपमाहारमाहारयन्ति ?, भगवान् द्रव्यादिभेदतस्तमाहारयन्तीति निरूपयितुकाम आह-'गोयमे'त्यादि, गौतम ! द्रव्यतो-द्रव्यस्वरूप-पर्यालोचनायां अनन्तप्रादेशिकानि द्रव्याणि, अन्यथा ग्रहणासम्भवात्, न हि सङ्ख्यातप्रदेशात्मका असङ्ख्यातप्रदेशात्मका वा स्कनधा जीवस्य ग्रहणयोग्या भवन्ति, क्षेत्रतोऽसङ्ख्येयप्ररदेशागाढानि कालतोऽन्यतरस्थितिकानि, जघन्यस्थितिकानि मध्यमस्थितिकानि उत्कृष्टस्थितिकानि चति भावार्थः, स्थितिरिति चाहारयोग्यस्कन्धपरिणामत्वेनावस्थानमवसेयं, भावतो वर्ण्णवन्ति गंधवन्ति रसवन्ति स्पर्शवन्ति च, प्रतिपरमाण्वेकैकवर्णगन्धरसस्पर्शभावात्,

'जाइं भावतो वण्णमंताइं' इत्यादि प्रश्नसूत्रं सुगमं, भगवानाहा-'गो० ! ठाणमग्गणं पडुच्चे'त्यादि, तिष्ठन्ति विशेषा अस्मिन्निति स्थानं-सामान्यमेकवर्णं द्विवर्णं त्रिवर्णमित्यादिरूपं तस्य मार्गणं-अन्वेषणं तत्प्रतीत्य सामान्यचिन्तामाश्रित्येति भावार्थः,एकवर्णान्यपि द्विवर्णादीन्यपि इत्यादि सूगमं, नवरं तेषामनन्तप्रादेशिकनां स्कन्धानामेकवर्णत्वं द्विवर्णत्वमित्यादि व्यवहार-नयमतापेक्षया, निश्चयनयमतापेक्षया त्वनन्तप्रादेशिकस्कन्धोऽणीयानपि पञ्चवर्ण एव प्रतिपत्तव्यः, 'विहाणमग्गणं पडुच्चे' त्यादि, विविक्तम्-इतरव्यवच्छिन्नं धानं-पोषणं स्वरूपस्य यत् तद्विधानं-विशेषःकृष्णो नील इत्यादिप्रतिनियतो वर्णादिविशेष इतियावत् तस्य मार्गणं प्रतीत्य तानि कालवर्णान्यपि आहारयन्तीत्यादि सुगमं, नवरमेतदपि व्यवहारतः प्रतिपत्तव्यं, निश्चयतः पुनरवश्यं तानि पञ्चवर्णान्येव,

'जाइं वण्णओ कालवण्णाइंपी'त्यादि सुगमं, यावद् 'अनन्तगुणसुक्किल्लाइंपि आहारेंति' एवं गंधरसस्पर्शविषयाण्यपि सूत्राणि भावनीयानि, 'जाइं भंते ! अनंतगुणलुक्खाइं' इत्यादि,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यानि भदन्त ! अन्तगुणरूक्षाणि, उपलक्षणमेतत् एकगुणकालादीन्यपि आहारयन्तीति, तानि च भदन्त ! किं स्पृष्टानि—आत्मप्रदेशविषयाण्याहारयन्ति उतास्पृष्टानि ?, भगवानाह—स्पृष्टानि नो अस्पृष्टानि 'जहा भासुद्देसए वा जाव नियमा छद्दिसिं' ति अत ऊर्ध्वं यथा भाषोद्देशके प्राक् सूत्रमभिहितं तथात्रापि द्रष्टव्यं, तत्र तावत् यावत् 'नियमा छद्दिसिं' ति पदं, तच्चैवम्,

'जाइं पुट्ठाइं' आहा० ! ताइं भंते ! किं ओगाढाइं आहा० अनेगाढाइं आहारेंति ?, गो० ओगाढाइं आहारेंति नो अणोगाढाइं आहारेंति, जाइं भंते ! ओगाढाइं आहारेंति ताइं किं अनंतरोगाढाइं आ० परंपरोगाढाइं आहारेंति ?, गो० ! अनंतरोगाढाइं आ० नो परंपरोगाढाइं आ०, जाइं भंते अनंतरोगाढाइं आ० ताइं भंते ! किं अणूइं आहारेंति बादराइं आ० ?, गो० ! अणूइंपि आ० बादराइंपि आहा०, जाइं भंते ! अणूइंपि आहारेंति बादराइंपि आ० ताइं किं उड्ढं आ० अहे आहा० तिरियं आहारेंति ?, गो० ! उड्ढंपि आ० अहेवि आ० तिरियंपि आहारेंति,

जाइं भंते ! उड्ढंपि आ० अहेवि आहा० तिरियंपि आहारेंति ताइं किं आदिं आ० मज्झे आ० पज्जवसाणे आ० ?, गो० ! आदिंपि आहारेंति मज्झेवि आ० पज्जवसाणेवि आहारेंति जाइं भंते ! आइंपि आहारेंति मज्झेवि आहारेंति पज्जवसाणेवि आहारेंति ताइं भंते ! किं सविसए आहारेंति अविसए आ० ?, गो० ! सविसए आ० नो अविसए आ० जाइं भंते ! सविसए आ० ताइं किं आनुपुव्वीए आहारेंति अनानुपुव्वीए आ० ?, गो० ! आणुपुव्वीए आ० नो अनानुपुव्वीए आ० जाइं भंते ! आनुपुव्विं आ० ताइं किं तिदिसिं आहारेंति चउदिसिं आहा० पंचदिसिं आहारेंति छद्दिसिं आहारेंति ?, गो० ! नियमा छद्दिसिं आ०, 'अस्य व्याख्या—इहात्मप्रदेशैः संस्पर्शनमात्म-परदेशावगाढक्षेत्राद्बहिरपि सम्भवति ततः प्रश्नयति—

'जाइं भंते' इत्यादि, यानि भदन्त ! स्पृष्टान्याहारयन्ति तानि किं अवगाढानि—आत्मप्रदेशैः सह एकक्षेत्रावस्थायीनि उत अनवगाढानि—आत्मप्रदेशावगाहक्षेत्राद्बहिरवस्थितानि ?, भगवानाह—गौतम ! अवगाढान्याहारयन्ति नानावगाढानि, यानि भदन्तावगाढान्याहारयन्ति तानि भदन्त ! किमनन्तरावगाढानि, किमुक्तं भवति ?—येष्वात्मप्रदेशेषु यान्यव्यवधानेनावगाढानि तैरात्मप्रदेशैस्तान्येवाहारयन्ति उत परम्परावगाढानि—एकद्वित्र्याद्यात्मप्रदेशव्यवहितानि ?, भगवानाह—गौतम ! अनन्तरावगाढानि आहारयन्ति नो परम्परावगाढानि, यानि भदन्तानन्तरा-वगाढान्याहारयन्ति तानि किमणूनि—स्तोकान्याहारयन्ति उत बादराणि—प्रभूतप्रदेशोपचितानि भगवानाह—गौतम ! अणून्यप्याहारयन्ति बादराण्यप्याहारयन्ति, इहाणुत्वबादरत्वे तेषामेवाहार-योग्यानां स्कन्धानां प्रदेशस्तोकत्वबाहुल्यापेक्षया वेदितव्ये इति,

यानि भदन्त ! अणुन्यप्याहारयन्ति तानि भदन्त ! किमूर्ध्वं—ऊर्ध्वप्रदेशस्थितान्याहारयन्ति अधस्तिर्यग्वा, इह ऊर्ध्वाधस्तिर्यकत्वं यावति क्षेत्रे नैरयिकोऽवगाढः तावत्येव क्षेत्रे तदपेक्षया परिभावनीयं, भगवानाह—गौतम ! ऊर्ध्वमप्याहारयन्ति—ऊर्ध्वप्रदेशावगाढन्यप्याहारयन्ति एवमधोऽपि तिर्यगपि, यानि भदन्त ! उर्ध्वमप्याहारयन्ति अधोऽप्याहारयन्ति तिर्यग्प्याहारयन्ति तानि किमादावाहारयन्ति मध्ये आहारयन्ति पर्यवसाने आहारयन्ति, अयमत्राभिप्रायः—

नैरयिका हि अनन्तप्रदेशिकानि द्रव्याण्यन्तर्मुहूर्त्त कालं यावत् उपभोगोचितानि गृह्णन्ति, ततः संशयः किमुपभोगोचितस्य कालस्यान्तर्मुहूर्त्तप्रमाणस्यादौ—प्रथमसमये आहारयन्ति उत

Jain Education International   For Private & Personal Use Only   www.jainelibrary.org

मध्ये-मध्येषु समयेषु आहोश्चित्पर्यवसाने-पर्यवसानसमये ?, भगवानाह-गौतम ! आदावपि मध्येऽपि पर्यवसानेऽप्याहारयन्ति, किमुक्तं भवति ?-उपभोगोचितस्य कालस्यान्तर्मुहूर्त्तप्रमाणस्यादिमध्यावसानेषु समयेष्वाहारयन्तीति, यानि भदन्त ! आदावपि मध्येऽपि पर्यवसानेऽप्याहारयन्ति तानि भदन्त ! किं स्वविषयाणिखोचिताहारयोग्यानि आहारयन्ति उत अविषयाणि-खोचिताहारायोग्यान्याहारयन्ति ?, भगवानाह-गौतम ! स्वविषयाण्याहारयन्ति नो अविषयाण्याहारयन्ति,

यानि भदन्त ! स्वविषयण्याहारयन्ति तानि भदन्त ! किमानुपूर्व्याआहारयन्ति अनानुपूर्व्या आनुपूर्वीनाम यथासन्नं यद्विपरता अनानुपूर्वी, भगवानाह-गौतम ! आनुपूर्व्या, सूत्रे द्वीतीय तृतीयार्थे वेदितव्या प्राकृतत्वात्, यथा आचाराङ्गे 'अगणिं च पुट्ठा' इत्यत्र, आहारयन्ति नो अनानुपूर्व्या, ऊर्ध्वमधस्तिर्यग्वा यथासन्नं नातिक्रम्याहारयन्तीति भावः, यानि भदन्त ! आनुपूर्व्या आहारयन्ति तानि किं 'तिदिसिं'ति तिस्रोदिशः समाहतास्त्रिदिक् तस्मिन् व्यवस्थितान्याहारयन्ति चतुर्दिशि पञ्चदिशि षड्दिशि वा, इह लोकनिष्कुटपर्यन्ते जघन्यपदे त्रिदिग्व्यवस्थितमेव प्राप्यते न द्विदिग्व्यवस्थितमेकदिग्व्यवस्थितं वा अतस्त्रिदिश आरभ्य प्रश्नःकृतः, भगवानाह-गौतम ! नियमात् षड्दिशि व्यवस्थितान्याहारयन्ति, नैरयिका हि त्रसनाड्या मध्ये व्यवस्थिताः, तत्र चावश्यं षड्दिक्संभव इति,

'ओसन्नकारणं पडुच्च'इत्यादि, ओसन्नशब्दो बाहुल्यावाची, यथा 'ओसन्नं देवा सायावेयणं वेदयन्ती'त्यत्र, ओसन्नकारणं-बाहुल्यकारणं प्रतीत्य, किं तद्वाहुल्यकारणमिति चेत्, उच्यते, अशुभानुभाव एव, तथापि प्रायो मिथ्यादृष्टयः कृष्णागदीन्याहारयन्ति न तु भविष्यत्तीर्तकरादयःतत ओसन्नेत्युक्तं, वर्णतः कालनीलानि गन्धतो दुरभिगन्धानि, रसतस्तिक्तकटुकानि स्पर्शतः कर्कशगुरुशीतरूक्षाणि इत्यादि, तेषामाहार्यमाणानां पुद्गलानां 'पुराणान्' अग्रेतनान् वर्णगुणान् गन्धगुणान् रसगुणान् स्पर्शगुणान् 'विपरिणामइत्ता परिवीलइत्ता परिसाडइत्ता परिविद्धसंइत्ता' एतानि चत्वार्यपि पदानि एकार्थिकानि विनाशार्थप्रतिपादकानि नानादेशजविनेयानुग्रहार्थमुपात्तानि, विनाश्य किमित्याह-अन्यान् अपूर्वान् वर्णगुणान् गन्धगुणान् रसगुणान् स्पर्शगणान् उत्पाद्य आत्मसरीरक्षत्रावगाढान् पुद्गलान् 'सव्वप्पणया' सर्वात्मना सर्वैरवात्मप्रदेशैराहारमाहाररूपान् आहारयन्ति,

'नेरइया णं भंते !' इत्यादि प्रश्नसूत्रं सुगमं, 'नेरइया णं भंते ! जे पोग्गला' इत्यादि, नैरयिका णमितिपूर्ववत्, भदन्त ! यान् पुद्गलान् आहारतया गृह्णन्ति नैरयिकाः तेषां गृहीतानां पुद्गलानां 'सेकालंसि' एष्यत्काले ग्रहणकालोत्तरकालमित्यर्थः 'कइभागं'ति कतिथं भागमाहारयन्ति-आहारतयोपभुञ्जते ?, तथा 'कतिभागं' कतिथं भागमाहार्यमाणपुद्गलानामास्वादं गृह्णन्ति, नहि सर्वे पुद्गला आहार्यमाणा आस्वादमायान्तीति पृथक् प्रश्नः, भगवानाह-गौतम असङ्ख्येयं भागमाहारयन्ति, अन्ये तु गवादिप्रथमबृहद्ग्रासग्रहण इव परिशटन्ति, आहार्यमाणानां पुद्गलानामनन्तभागमास्वादयन्ति, शेषास्त्वनासादिता एव शरीरपरिणाममापद्यन्ते इति,

'नेरइया णं भंते !' इत्यादि, नैरयिकाः णमिति पूर्ववत् यान् पुद्गलान् आहारतया गृह्णन्ति, इह ग्रहणं विशिष्टमवसेयं, ततो ये उज्झितशेषाः केवला आहारपरिणामयोग्य एवावतिष्ठन्ते तेऽत्रा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

हारतया गृह्यमाणाः पृष्ठा द्रष्टव्याः, अन्यथा निर्वचनसूत्रमपेक्ष्य पूर्वापरविरोधप्रसङ्गो, न च भगवद्वचने विरोधसम्भावनाऽप्यस्ति, तत इदमेव व्याख्यानं सम्यक्, अत एवंविधपूर्वापरविरोधाशङ्काव्युदासार्थं पूर्वसूरिभिः कालिकसूत्रस्यानुयोगः कृतः, उक्तं च–

॥१॥ "जं जह सुत्ते भणियं तहेव तं जइ वियालणा नत्थि।
किं कालियाणुजोगो दिट्ठो दिट्ठिप्पहाणेहिं ? ॥"

तान् किं सर्वान् आहारयन्ति उत नोसर्वान् सर्वैकदेशभूतान् ?, भगवानाह–तान् सर्वान्–अपरिशेषानाहारयन्ति, उज्झितशेषाणामेव केवलानामाहारपरिणामयोग्यानां गृहीतत्वात्, 'नेरइया ण'मित्यादि, नैरयिकाः णमितिपूर्ववत् यान् पुद्गलान् आहारतया गृह्णन्ति ते पुद्गलाः णमिति पूर्ववत् ते तेषां नेरयिकाणां कीदृक्तया–किंस्वरूपतया भूयो भूयः परिणमन्ते ?, भगवानाह–गौतम श्रोत्रेन्द्रियतया यावत्करणात् चक्षुरिन्द्रियतया घ्राणेन्द्रियतया जिह्वेन्द्रियतयेति परिग्रहः, स्पर्शनेन्द्रियतया, इन्द्रियरूपतयापि परिणममाना न शुभरूपाः किन्त्वेकान्ताशुभरूपाः, यत आह–

'अनिट्ठत्ताते' इत्यादि, इष्टा–मनसा इच्छाविषयीकृताः, यथा शोभनमिदं जातं यदित्थमिम् परिणता इति, तद्विपरीता अनिष्टास्तद्भावस्तत्ता तया, इह किञ्चित् परमार्थतः शुभमपि केषाञ्चिदनिष्टं भवति यथा मक्षिकाणां चन्दनकर्पूरादि तत आह–'अकंतत्ताए' न कान्ताः–कमनीया अकान्ता अत्यन्ताशुभव र्णोपेतत्वात्, अत एवाप्रियतया न प्रिया अप्रियाः, दर्शनापातकालेऽपि न प्रियबुद्धिमात्मन्युत्पादयन्तीति भावः, तद्भावोऽप्रियता तया, 'असुभत्ताए' इति न शुभा अशुभा अशुवर्णगन्धरसस्पर्शत्मकत्वात् तद्भावस्तत्ता तया, 'अमणुन्नत्ताए' इति न मनोज्ञा अमनोज्ञाः, विपाककाले दुःखजनकतया न मनःप्रह्लादहेतव इति भावः, तद्भावस्तत्ता तया, 'अमणामत्ताए' भोज्यतया मनः आप्नुवन्तीति मनआपाः, प्राकृतत्वाच्च पकारस्य मकारत्वे मणाम इति सूत्रे निर्देशः, न मनआपा अमनआपा, न जातुचिदपि भोज्यतया जन्तूना मनआपीभवन्तीति भावस्तद्भावस्तत्ता तया, अत एव 'अनिच्छियत्ताए' इति अनीप्सिततया भोज्यतया स्वादितुमीष्टा ईप्सिता न ईप्सिता अनीप्सिता- स्तद्भावस्तत्ता तया, 'अभिज्झियत्ताए' अभिध्यानमभिध्या, अभिलाष इत्यर्थः,

अभिध्या सञ्जाता एष्विति अभिध्यितास्तारकादिदर्शनादितप्रत्ययः तद्भावस्तत्ता तया, किमुक्तं भवति ?–ये गृहीता आहारतया पुद्गला न ते तृप्तिहेतवोऽभूवन्निति न पुनरभिलषणीयत्वेन परिणमन्ते, तथा 'अहत्ताए' इति अधस्तया, गुरुपरिणामतयेति भावः, नो ऊर्ध्वतया–लघुपरिणामतया, अत एव दुःखतया गुरुपरिणामपरिणतत्वात्, न सुखतया लघुपरिणामपरिणतत्वाभावात्, ते पुद्गलास्तेषां नैरयिकाणां भूयो भूयः परिणमन्ते ! एतान्येव आहारार्थिन इत्यादीनि सप्त द्वाराणि असुरकुमारादिषु भवनपतिषु चिचिन्तयिषुरिदमाह–

'जहा नेरइयाण' मित्यादि, यथा नैरयिकाणां तथा असुरकुमाराणामपि भाणितव्यं, यावत् 'तेसिं भुज्जो २ परिणमन्ती' ति पर्यन्तपदं, तत्र नैरयिकसूत्रादस्य सूत्रस्य विशेषमुपदर्शयति–'तत्थ णं जे से' इत्यादि, एवं चोपदर्शितं सूत्रं न मन्दमतीनां यथास्थितं प्रतीतिमागच्छति ततस्तदनुग्रहाय सूत्रमुपदर्श्यते।

मू. (५५३) *असुरकुमारा णं भंते ! आहारट्ठी !, हंता ! आहारट्ठी, एवं जहा नेरइयाणं तहा असुरकुमारणवि भाणितव्वं, जाव तेसिं भुज्जो २ परिणमंति,*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्थ णं जे से आभोगनिव्वत्तिते से णं जहन्नेणं चउत्थभत्तस्स उक्कोसेणं सातिरेगवाससहस्सस्स आहारट्ठे समुप्पज्जइ, ओसण्णं करणं पडुच्च वण्णतो हालिद्दसुक्किल्लाति गंधतो सुब्भिगंधातिं रसतो अंबिलमहुरातिं फासओ मउयलहुयनिद्धुण्हातिं,

तेसिं पोराणे वण्णगुणे जाव फासिंदियत्ताते जाव मणामत्ताते इच्छियत्ताते भिज्झियत्ताते उद्धत्ताते नो अहत्ताए सुहत्ताए नो दुहत्ताए एतेसिं भुज्जो २ परिणमंति, सेसं जहा नेरइयाणं, एवं जाव थणियकुमाराणं, नवरं आभोगनिव्वत्तिते उक्कोसेणं दिवसपुहुत्तस्स आहारट्ठे समुप्पज्जति

वृ. 'असुरकुमारा णं भंते! आहारट्ठी?, हंता आहारट्ठी, असुरकुमारा णं भंत! केवइकालस्स आहारट्ठे समुप्पज्जइ', अत्र सप्तम्यर्थे षष्ठी, कियति काले अतिक्रान्ते सति भूय आहारार्थः समुत्पद्यते इत्यर्थः, ? 'असुरकुमारा णं दुविहे आहारे पं० तंजहा—आभोगनिव्वत्तिए अनाभोगनिव्वत्तिए य, तत्थ णं जे से अनाभोगनिव्वत्तिए से णं अनुसमयमविरहिए आहारट्ठे समुप्पज्जइ, तत्थ णं जे से आभोगनिव्वत्तिए से णं जहन्नेणं चउत्थभत्तस्स उक्कोसेणं साइरेगस्स वाससहस्सस्स आहारट्ठे समुपज्जइ' तत्र 'चउत्थभत्तस्सेति' सप्तम्यर्थे षष्ठी, चतुर्थभक्ते आगमिकीयं संज्ञा, एकस्मिन् दिवसेऽतिक्रान्ते इत्यर्थः, भूयो जघन्येनाहारार्थः समुत्पद्यते, एतच्च दशवर्षसहस्रायुषां प्रतिपततव्यमुत्कर्षतः सातिरेके—अभ्यधिके वर्षसहस्रेऽतिक्रान्ते, एतच्च सागरोपमायुषामवसेयं,

'असुरकुमाराणं भंते! किमाहारमाहारयन्ति?, गो०! दव्वतोऽनंतप्पएसियाइं खेत्तओ असंखेज्जपएसोगाढाइं कालओ अन्नयरट्ठिइयाइं भावओ वण्णमंताइं गंधमंताइं रसमंताइं फासमंताइं जाव नियमा छद्दिसिं आहारेंति, ओसन्नं कारणं पडुच्च वण्णओ हालिद्दसुक्किल्लाइं, गंधओ सुरभिगंधाइं, रसओ अंबिलमहुराइं फासओ मउयलहुनिद्धुण्हाइं, तेसिं पोराणे वण्णगुणे गंधगुणे रसगुणे फासगुणे जाव इच्छियत्ताए अभिज्झियत्ताए उद्धत्ताए नो अहत्ताए सुखत्ताए नो दुहत्ताए य तेसिं भुज्जो २ परिणमंति', यथा चासुरकुमाराणां सूत्रमुक्तं तथा नागकुमारादीनामपि स्तनितकुमारपर्यवसानानां वक्तव्यं, नवरमाभोगनिर्वर्त्तिताहारार्थचिन्तायामुत्कर्षाभिधानावसरे 'उक्कोसेणं दिवसपुहुत्तस्स आहारट्ठे समुप्पज्जइ' इति वक्तव्यं, एतच्च पल्योपमासङ्ख्येयभागायुषां तजधिकायुषां चावसेयं, शेषं तथैव, तथा चाह०,—'एवं जाव थणियकुमाराण' मित्यादि।

सम्प्रति पृथिवीकायिकानामेतान् सप्ताधिकारान् चिन्तयितुकाम आह—

मू. (५५४) *पुढविकाइया णं भंते! आहारट्ठी?, हंता! आहारट्ठी, पुढविकाइया णं भंते केवतिकालस्स आहारट्ठे समुप्पज्जति?, गो०! अनुसमयमविरहिते आहारट्ठे समुप्पज्जइ,*

पुढविकाइया णं भंते! किमाहारमाहारेंति, एवं जहा नेरइयाणं जाव ताइं कतिदिसि आहारेंति?, गो०! निव्वाघातेणं छद्दिसिं वाघायं पडुच्च सिय तिदिसिं सिय चउदिसिं सिय पंचदिसिं, नवरं ओसन्नकारणं न भण्णति, वण्णओ कालनीललोहितहालिद्दसुक्किल्लाति गंधतो सुब्भिगंध-दुब्भिगंधातिं रसतो तित्तरसकडुयरसकसायरसअंबिलमहुराइं फासतो कक्खडफासमउयगुरुय-लहुयसीतउण्हनिद्धलुक्खातिं तेसिं पोराणे वण्णगुणे सेसं जहा नेरइयाणं जाव आहच्च नीससंति,

पुढविकाइया णं भंते! जे पोग्गले आहारत्ताते गिण्हंति तेसिं भंते! पोग्गलाणं सेयालंसि कतिभागं आहारेंति कतिभागं आसाएंति?, गो०! असंखेज्जतिभागं आहारेंति अनंतभागं आसाएंति, पुढविकाइया णं भंते! जे पोग्गले आहारत्ताते गिण्हंति ते किं सव्वे आहारेंति नोसव्वे आहारेंति जहेव नेरइया तहेव,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पुढविकाइया णं भंते! जे पोग्गले आहारत्ताते गिण्हंति ते णं तेसिं पुग्गला कीसत्ताए भुज्जो २ परिणमंति?, गो० ! फासिंदियवेमायत्ताते भुज्जो २ परिणमंति, एवं जाव वणफ्फइकाइया

वृ. 'पुढविकाइया णं भंते!' इत्यादि सर्वं पूर्ववद् भावनीयं, नवरं 'निव्वाघाएणं छद्दिसि'मित्यादि, व्याघातो नाम अलोकाकाशएन प्रतिस्खलनं, व्याघातस्याभावो निर्व्याघातं 'शब्दे यथावदव्ययं पूर्वपदार्थे नित्यमव्ययीभाव' इत्यव्ययीभावः 'तेन वा तृतीयाया' इति विकल्पेन अम्विधानात् पक्षेऽत्रामभावः, नियमादवश्यंतया षड्दिशि व्यवस्थितानि, षड्भ्यो दिग्भ्य आगतानि द्रव्याण्याहारयन्तीति भावः, व्याघातं पुनःप्रतीत्य लोकनिष्कुटादौ स्यात्–कदाचित्रिदिशि–तिसृभ्यो दिग्भ्य आगतानि कदाचिच्चतुर्दिग्भ्यः कदाचित्पञ्चदिग्भ्यः, काऽत्र भावनेति चेत्, उच्यते,

इह लोकनिष्कुटे पर्यन्ताधस्त्यप्रतराग्नेयकोणावस्थितो यदा पृथिवीकायिको वर्त्तते तदा तस्याधस्तादलोकेन व्याप्तत्वात् अधोदिक्पुद्गलाभावः, आग्नेयकोणावस्थितत्तावत् पूर्वदिक्पुद्गलाभावो दक्षिणदिक्पुद्गलाभावश्च, एवमधःपूर्वदक्षिणरूपाणां तिसृणां दिशामलोकेन व्यापानात् ता अपास्य या परिशिष्टा ऊर्ध्वा अपरा उत्तरा च दिगव्याहता वर्त्तते तत आगतान् पुद्गलान् आहारयति, यदा पुनः स एव पृथिवीकायिकः पश्चिमां दिशं अमुञ्चन् वर्त्तते तदा पूर्वदिगभ्यधिका जाता द्वे च दिशौ दक्षिणाधस्त्यरूपे अलोकेन व्याहते इति स चतुर्दिगागतान् पुद्गलानाहारयति, यदा पुनरूर्ध्व द्वितीयादिप्रतरगतपश्चिमदिशमवलम्ब्य तिष्ठति तदा अधस्त्यापि दिगभ्याधिका लभ्यते केवलदक्षिणैका पर्यन्तवर्त्तिनी अलोकेन व्याहतेति पञ्चदिगागतान् पुद्गलानाहारयतीति, शेषं सूत्रं समस्तमपि पूर्वव् भणनीयं, यस्तु विशेषस्तमुपदर्शयति–नवरं 'उस्सन्नकारणेणं ण हवइ'इत्यादि सुगमं,

'कासिंदियवेमायत्ताए' इति विषमा मात्रा विमात्रा तस्या भावो विमात्रता तया इष्टनिष्टनानभेद- तयेति भावो, न तु नारकाणामेकान्ताशुभतया सुराणांच शुभतयेवेति, एवं 'जाव वणस्सइकाइ- याणं'ति यथा पृथिवीकायिकाना सूत्रमुक्तमेवमप्रेजोवायुवनस्पतीनामपि भणनीयं, सर्वेषामपि सकललोकव्यापितया विशेषाभावात्।

मू. (५५५) *बेइंदिया णं भंते! आहारट्ठी?, हंता! आहारट्ठी, बेइंदियाणं भंते! केवतिकालस्स आहारट्ठे समुप्पज्जति?, जहा नेरइयाणं, नवरं तत्थ णं जे से आभोगनिव्वत्तिते से णं असंखिज्जसमइए अंतोमुहुत्तिए वेमायाए आहारट्ठे समुप्पज्जति, सेसं जहा पुढविकाइयाणं, जाव आहच्च नीससंति, नवरं नियमा छद्दिसिं, बेइंदियाणं भते!० पुच्छा, गो० ! जे पोग्गले आहारत्ताते गिण्हंति ते णं तेसिं पुग्गलाणं सियालंसि कतिभागं आहारेंति कतिभागं आसाएंति, एवं जहा नेरइयाणं,*

बेइंदियाणं भंते! जे पोग्गला आहारत्ताए गिण्हंति ते किं सव्वे आहारेंति नो सव्वे आहारेंति गो० ! बेइंदियाणं दुविधे आहारे पं०, तं०–लोमाहारे य पक्खेवाहारे य, जे पोग्गले लोमाहारत्ताए गिण्हंति ते सव्वे अपरिसेसे आहारेंति, जे पोग्गले पक्खोवाहारत्ताए गेण्हंति तेसिमसंखेज्जतिभागमाहारेंति अनेगाइं च णं भागसहस्साइं अफासाइज्जमाणाणं अनासाइज्जमाणाणं विद्धंसमागच्छंति,

एतेसि णं भंते! पोग्गलाणं अनासाइज्जमाणाणं अफासाइज्जमाणाण य कयरे २ हिंतो अप्पा वा ४, गो० ! सव्वत्थोवा पोग्गला अनासाइज्जमाणा अफासाइज्जमाणा अनंतगुणा, बेइंदियाणं भंते! जे पोग्गला आहारत्ताते पुच्छा, गो० ! जब्भिदिय० फासिंदियवेमायत्ताए तेसिं भुज्जो २

Jain Education International For Private & Personal Use Only www.jainelibrary.org

परिणमंति, एवं जाव चउरिंदिया, नवरं नेगाइं च णं भागसहस्साइं अनाघाइज्जमाणाइं अनासाइज्जमाणाइं अफासाइज्जमाणाइं विद्धंसमागच्छंति,

एतेसि णं भंते! पोग्गलाणं अनाधाइज्जमाणा णं अनासाइज्जमाणाणं अफासाइजजमाणाण य कयरे२ हिंतो अप्पा वा ४ ?, गो० ! सव्वत्थोवा पोग्गला अनाधाइज्जमाणा अनासाइज्जमाणा अनंतगुणा अफासाइज्जमाणा अनंतगुणा,

तेइंदियाणं भंते ! जे पोग्गला पुच्छा, गो० ! ते णं पोग्गला घाणिंदिय० जिब्भिंदिय० फासिंदियवेमायत्ताए तेसिं भुज्जो २ परिणमंति, चउरिंदियाणं चक्खिंदिय० घाणिंदिय० जिब्भिंदिय० फासिंदियवेमायत्ताए तेसिं भुज्जो २ परिणमंति, सेसं जहा तेइंदियाणं, पंचिंदियतिरिक्खजोणिया जहा तेइंदियाणं, नवरं तत्थ णं जे से आभोगनिव्वत्तिते से जहन्नेणं अंतोमुहुत्तस्स उक्को० छट्ठभत्तस्स आहारट्ठ समुप्पज्जति, पंचिंदियतिरिक्खजोणियाणं भंते ! जे पोग्गला आहा० पुच्छा, गो० ! सोतिंदिय० चक्खि-दिय० घाणिंदिय० जिब्भिंदिय० फासिंदियवेमायत्ताए भुज्जो २ परिणमंति, मणूसा एवं चेव, नवरं आभोगनिव्वत्तिते जह० अंतोमुहुत्तस्स उक्को० अट्ठमभत्तस्स आहारट्ठे समुप्पज्जति, वाणमंतरा जहा नागकुमारा, एवं जोतिसियावि, नवरं आभोगनिव्वत्तिते जह० दिवसपुहुत्तस्स उ० दिवस-हुपुत्तस्स आहारट्ठे समुप्पज्जइ, एवं वेमाणियावि, नवरं आभोगनिव्वत्तिए ज० दिवसपुहुत्तस्स उ० तेत्तीसाए वाससहस्साणं आहारट्ठे समुप्पज्जति, सेसं जहा असुरकुमाराणं जाव एतेसिं भुज्जो २ परिणमंति,

सोहम्मे आभोगनिव्वत्तिते ज० दिवसपुहुत्तस्स उक्को० दोण्हं वाससहस्साणं आहारट्ठे सं०, ईसाणेणं पुच्छा, गो० ! ज० दिवसपुहुत्तस्स सातिरेगस्स उ० सातिरेगं दोण्हं वाससहस्साणं, सणं-कुमाराणं पुच्छा, गो० ! ज० दोण्हं वाससहस्साणं उ० सत्तण्हं वाससहस्साणं, माहिंदे पुच्छा, गो० ! जहन्नेणं दोण्हं वाससहस्साणं सातिरेगाणं उक्को० सत्तण्हं वाससहस्साणं सातिरेगाणं, बंभलोए पुच्छा, गो० ! ज० सत्तण्हं वाससहस्साणं उ० दसण्हं वाससह०,

लंतए णं पुच्छा, गो० ! ज० दसण्हं वाससह० उ० चउदसण्हं वाससह०, महासुक्केणं पुच्छा गो० ! ज० चउदसण्हं वासस० उक्को० सत्तरसण्हं वाससह०, सहस्सारे पुच्छा, गो० ! जह० सत्तरसण्हं वासस० उ० अट्ठारसण्हं वाससह०, आणए णं पुच्छा, गो० ! ज० अट्ठारसण्हं वाससह० उ० एगूणवीसाए वाससहस्साणं, पाणए णं पुच्छा, गो० ! ज० एगूणवीसाए वास० उ० वीसाए वाससहस्साणंस आरणे णं पुच्छा, गो० ! ज० वीसाए वाससह० उक्को० एक्कवीसाए वाससह०, अच्चुए णं पुच्छा गो० ! ज० एक्कवीसाए वाससह० उक्को० बावीसाए वा०,

हिट्ठिमहिट्ठिमगेविज्जगाणं पुच्छा, गो० ! ज० बावीसाए वा० उक्को० तेवीसाए वा०, एवं सव्वत्थ सहस्साणि भाणियव्वाणि, जाव सव्वट्ठं, हिट्ठिममज्झिमगाणं पुच्छा, गो० ! ज० तेवीसाए उ० चउवीसाए, हेट्ठिमउवरिमाणं पुच्छा, गो० ! ज० चउवीसाए उ० पणवीसाए, मज्झिमहेट्ठिमाणं पुच्छा, गो० ! ज० पणवीसाए उक्को० छव्वीसाए, मज्झिममज्झिमाणं पुच्छा, गो० ! ज० छव्वीसाए उ० सत्तावीसाए, मज्झिमउंवरिमाणं पुच्छा, गो० ! ज० सत्तावीसाए उ० अट्ठावीसाए, उवरिम-हेट्ठिमाणं पुच्छा, गो० ! ज० अट्ठावीसाए उ० एगूणतीसाएस उवरिमज्झिमाणं पुच्छा, गो० ! ज० एगूणतीसाए उ० तीसाए, उवरिमउवरिमाणं पुच्छा, गो० ! ज० तीसाए उ० एगतीसाए,

विजयवेयजयंतजयंतअपराजियाणं पुच्छा, गो० ! ज० एगतीसाए उक्को० तेत्तीसाए,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सव्वट्ठगसिद्धदेवाणं पुच्छा, गो० ! अजहन्नमणुक्कोसेणं तेत्तीसाए वाससहस्साणं आहारट्ठे समुप्पज्जति

वृ. 'बेइंदिया णं भंते !' इत्यादि सुगमं, नवरं 'लोमाहारे पक्खेवाहारे' इति लोमभिराहारो लोमाहारः प्रक्षिप्यतेऽर्थात् मुखे इति प्रक्षेपः स चासावाहारश्च प्रक्षेपाहारः, तत्र यः स्वल्पोघतो वर्षादिषु पुद्गलप्रवेशो मूत्रादिगम्यः स लोमाहारः, कावलिकस्तु प्रक्षेपाहारः, तत्र यान् पुद्गलान् लोमाहारतया गृहणाति तान् सर्वान्-अपरिशेषानाहारयन्ति, तेषां तथा २ स्वभावत्वात्, यान् पुद्गलान् प्रक्षेपाहारतया गृह्णन्ति तेषामसङ्ख्येयतमं भागमाहारयन्ति, अनेकानि पुनर्भागसहस्राणि– बहवोऽसङ्ख्येया भागा इति अस्पृश्यमानानामनास्वाद्यमानानां विध्वंसमागच्छन्ति, किमुक्तं भवति बहूनि द्रव्याण्यन्तर्बहिश्च अस्पृष्टान्येवानास्वादितान्येव च विध्वंसमायान्ति, नवरं यथायोगं केचिदतिस्थौल्यतः केचिदतिसौक्ष्म्यत इति, सम्प्रत्यस्पृश्यमाननानामनास्वाद्यमानानां च परस्परमल्पबहुत्वमभिधित्सुराह–

'एएसि णं भंते ! पुग्गलाणं अनासाइज्जमाणाण' मित्यादि, इह एकैकस्मिन् स्पर्शयोग्ये भागेऽनन्ततमो भाग आस्वाद्यो भवति, ततो येऽनास्वाद्यमानः पुद्गलास्ते स्तोका एव, अस्पृश्यमानपुद्गलापेक्षया तेषामनंतभागवर्त्तित्वात्, अस्पृश्यमानास्तु पुद्गला अनन्तगुणाः, 'जिब्भिंदिय-फासिंदियवेमायत्ताए' इति विमात्राऽत्रापि प्राग्वद् भावनीया,

'एवं जाव चउरिंदिया' एवं–द्वीन्द्रियोक्तप्रकारेण सूत्रं तावद् वक्तव्यं यावच्चतुरिन्द्रियाः– चतुरिन्द्रियगतं सूत्रं, प्रायः समानवक्तव्यत्वात्, यस्तु विशेषः स उपदर्श्यते–'नवर' मित्यादि, यान् पुद्गलान प्रक्षेपाहारतया गृह्णन्ति तेषां पुद्गलानामेकमसङ्ख्येयतमं भागमाहारयन्ति अनेकानि पुनर्भागसहस्राणि सङ्ख्यातीता असङ्ख्येयभागा इत्यर्थः अनाघ्रायमाणानि अस्पृश्यमाणानि अनास्वाद्यमानानि विध्वंसमागच्छन्ति, तानि च यथायोगमतिस्थौल्यतोऽतिसौक्ष्म्यतश्च वेदितव्यानि,

अत्रैवाल्पबहुत्वामाह– 'एएसि णं भंते !' इत्यादि, इह एकैकस्मिन् भागे स्पर्शयोग्येऽनन्तमो भागः आस्वादयोग्यो भवति, तस्याप्यनन्तमो भाग आघ्राणयोग्यः, ततो यथोक्तमल्पबहुत्वं भवति, शेषं सर्वं सुगमं, पञ्चेन्द्रियसूत्रे–'जहन्नेणं अंतोमुहुत्तस्से' ति षष्ठयाःसप्तम्यर्थत्वादन्तर्मुहूर्त्ते गते सति भूय आहारार्थः समुत्पद्यते, उत्कर्षतः षष्ठभक्तेऽतिक्रान्ते, एतच्च देवकुरूत्तरकुरुतिर्यक्पञ्चेन्द्रियापेक्षया द्रष्टव्यं, मनुष्यसूत्रे 'उक्कोसेणं अट्ठमभत्तस्से' ति उत्कर्षतोऽष्टमभक्तेऽतिक्रान्ते, एतच्च तास्वेव देवकुरुत्तर- कुरुषु द्रष्टव्यं, व्यन्तरसूत्रे नागकुमारसूत्रवत्, ज्योतिष्कतसूत्रमपि तथैव, यस्तु विशेषस्तमुपदर्शयति '–नवलरं जहन्नेणवि दिवसपुहुत्तस्स उक्कोसेणवि दिवसपुहुत्तस्स' त्ति, ज्योतिष्का हि जघन्यतोऽपि पल्योपमाष्टभागप्रमाणायुषस्ततस्तेषां जघन्यपदेऽप्युत्कृष्टपदेऽपि दिवसपृथक्तवेऽतिक्रान्ते भूयआहारार्थः समुत्पद्यते, पल्योपमाष्टभागायुं च स्वरूपत एव दिवसपृथकत्वातिक्रमे भूय आहारार्थः समुत्पद्यते,

वैमानिकसूत्रे 'नवरमाभोगनिव्वत्तिए जहन्नेणं दिवसपुहुत्तस्स' इति, एतत्पल्योपमाद्यायुषामवसेयं, 'उक्कोसेणं तेत्तीसाए वाससहस्साणं' ति एतदनुत्तरसुराणामवसेयं, इह यस्य यावन्ति सागरोपमाणि स्थितिस्तस्य तावत्सु वर्षसहस्रेष्वतिक्रान्तेषु भूय आहारार्थः समुत्पद्यते, ततोऽमुं न्यायमाश्रित्य सौधर्मेशानादिदेवलोकेषु जघन्यत उत्कर्षतश्च स्थितिपरिमाणं परिभाव्य वैमानिकसूत्रं सकलमपि स्वयं विज्ञेयमिति ।

सम्प्रत्येकेन्द्रियशरीरादीनामधिकारमभिधित्सुराह–

Jain Education International   For Private & Personal Use Only   www.jainelibrary.org

मू. (५५६) नेरइयाणं भंते! किं एगिंदियसरीराइं आहारेंति जाव पञ्चिंदियसरीराइं आहारेंति गो० ! पुव्वभावपन्नवणं पडुच्च एगिंदियसरीराइंपि आहारेंति जाव पंचंदिय०, पडुप्पन्न-भावपन्नवणं पडुच्च नियमा पंतिदियसरीराति आ०, एवं जाव थणियकुमारा,

पुढविकाइयाणं पुच्छा, गो० ! पुव्वभावपन्नवणं पडुच्च एवं चेव, पडुप्पण्णभावपन्नवणं पडुच्च नियमा एगिंदियसरीराति, बेइंदिया पुव्वभावपन्नवणं पडुच्च एवं चेव, पडुप्पन्नभावपन्नवणं प० नियमा बेइंदियाणं सरीराति आ०, एवं जाव चउरिंदिया ताव पुव्वभावपन्नवणं पडुच्च, एवं पडुप्पन्नभावपन्नवणं पडुच्च नियमा जस्स जति इंदियाइं तइंदियाइं सरीरइं आहारेंति सेसं जहा नेरइया, जाव वेमाणिता,

नेरइया णं भंते ! किं लोमाहार पक्खेवाहारा !, गो० ! लोमाहारा नो पक्खोवाहारा, एवं एगिंदिया सव्वदेवा य भाणितव्वा, बेइंदि० जाव मणूसा लोभाहाराविं पक्खेवाहाराविं ।

वृ. 'नेरइया णं भंते !' इत्यादि प्रश्नसूत्रं सुगमं, निर्वचनसूत्रामाह–'गोयमे'इत्यादि, पूर्वः–अतीतो भावःपूर्वभावःतस्य प्रत्रापना–प्ररूपणा तां प्रतीत्य एकेन्द्रियशरीराण्यपि यावत्करणात् द्वित्रिचतुरिन्द्रियशरीरपरिग्रहः, पञ्चेन्द्रियशरीराण्यप्याहारयन्ति, इयमत्र भावना–यदा तेषामाहार्यमाणानां पुद्गलानामतीतो भावः परिभाव्यते तदा ते केचित कदाचित् एकेन्द्रियशरीरतया परिणता आसीरन् कदाचित् द्वीन्द्रियशरीरतया कदाचित् त्रीन्द्रियशरीरतया कदाचिच्चतुरिन्द्रियशरीरतया कदाचित् पञ्चेन्द्रियशरीरतया, ततो यदि पूर्वभावं इदानीमध्यारोप्य विवक्ष्यते तदा नैरयिका एकेन्द्रियशरीराण्यपि यावत्पञ्चेन्द्रियशरीराण्यप्याहारयन्तीति भवति,

'पडुप्पन्नभावपन्नवणं पडुच्चे'त्यादि, प्रत्युत्पन्नो–वार्त्तमानिकः स चासौ भावश्च प्रत्युत्पन्नभावस्तस्य प्रज्ञापना तां प्रतीत्य नियमाद्–अवश्यतया पञ्चेन्द्रियशरीराण्याहरयन्ति, कथमिति चेत्, उच्यते, इह प्रत्युपन्नभावप्रज्ञापनां करोति नयः ऋजुसूत्रो न शेषा नैगमादयः, ऋजुसूत्रश्च क्रियमाणं कृतं अभ्यवह्रियमाणमभ्यावहतं परिणम्यमाणं परिणतमभ्युपगच्छति, अभ्यवह्रियमाणाश्च पुद्गलास्ते उच्यन्ते ये स्वशरीरतया परिणम्यमाना वर्त्तन्ते, अभ्यवह्रियमाणं चाभ्यवहृतं परिणम्यमानं च परिणतमिति तन्मतेन स्वशरीरमेवाभ्यवह्रियते स्वशरीरं च तेषां पञ्चेन्द्रियशरीरं पञ्चेन्द्रियशरीरत्वात् तेषामत उक्तं नियमात् पञ्चेन्द्रियशरीराण्याहारयन्तीति, एवमसुरकुमारादयः स्तनितकुमारापर्यवसाना भवनपतयो वक्तव्याः,

पृथिवीकायिकसूत्रे प्रत्युत्पन्नभावप्ररूपणाचिन्तायां नियमादेकेन्द्रियशरीराण्याहारयन्तीति वक्तव्यं, तेषामेकेन्द्रियतया तत्शरीराणामेकेन्द्रियशरीरत्वात्, एवं द्वीन्द्रियसूत्रे नियमात् द्वीन्द्रियशरीराण्याहारयन्तीति वक्तव्यं, त्रीन्द्रियसूत्रे नियमात्स त्रीन्द्रियशरीराणि, चतुरिन्द्रिसूत्रे नियमात् चतुरिन्द्रियशरीराणि, तिर्यक्पञ्चेन्द्रिया मनुष्या व्यन्तरज्योतिष्कवैमानिकाश्च नैरयिकवद् वक्तव्या, तथा चाह–'पुढविकाइयाणं पुच्छा' इत्यादि । अधुना लोमाहाराधिकारं विभावयिषुरिदमाह–

'नेरइया ण'मित्यादि सुगमं, नवरं नैरयिकाणां प्रक्षेपाहारो न भवति, वैक्रियशरीराणां तथा स्वभावत्वात्, लोमाहारोऽपि पर्याप्तानामवसेयो नापर्याप्तानामिति, 'एवं एगिंदिया' इत्यादि, एवं–नैरयिकोक्तप्रकारेण एकेन्द्रियाः–पृथिव्यप्तेजोवायुवनस्पतयः सर्वे देवाश्च–असुरकुमारदयो यावद्वैमानिका भणितव्याः, तत्रैकैन्द्रियाणां प्रक्षेपाहाराभावो मुखाभावात्, असुरकुमारादीनां

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वैक्रियशरीरतया तथा स्वभावात्,

द्वित्रिचतुरिन्द्रियास्तिर्यक्पञ्चेन्द्रियामनुष्याश्च लोमाहार अपि वक्तव्याः प्रक्षेपाहारा अपि, उभयरूपस्याप्याहारस्य तेषां सम्भवात्, चरममर्थादिकारमभिधित्सुराह–

मू. (५५७) *नेरइया णं भंते! किं ओयाहारा मणभक्खी?, गो० ! ओयाहारा नो मणभक्खी, एवं सव्वे ओरालियसरीरावि, देवा सव्वेवि जाव वेमाणिया ओयाहारावि मणभक्खीवि, तत्थ णं जे ते मणभक्खी देवा तेसि णं इच्छामणे समुप्पज्जति इच्छामो णं मणभक्खणं करित्तते, तते णं तेहिं देवेहिं एवं मणसीकते समाणे खिप्पामेव जे पोग्गला इट्ठा कंता जाव मणामा ते तेसिं मणभक्खत्ताए परिणमंति, से जहा नामए सीया पोग्गला सीयं पप्प सीयं चेव अतिवतित्ताणं चिट्ठंति, उसिणा वा पोग्गला उसिणं पप्प उसिणं चेव अइवइत्ताणं चिट्ठंति, एवामेव तेहिं देवेहिं मणभक्खीकए समाणे से इच्छामणे खिप्पामेव अवेति ।*

वृ. 'नेरइया णं भंते !' इत्यादि, ओज–उत्पत्तिदेशे आहारयोग्यपुद्गलसमूहः, ओज आहारो येषां ते ओजआहाराः, मनसा भक्षयन्तीत्येवंशीला मनोभक्षिणः, तत्र नैरयिका ओजआहारा भवन्ति, अपर्याप्तावस्थायामोजस एवाहारस्य सम्भवात्, मनोभक्षिणस्त्वेते न भवन्ति, मनोभक्षण-लक्षणो ह्याहारः स उच्यते ये तथाविधशक्तिवशात् मनसा स्वशरीरपुष्टिजनकाः पुद्गला अभ्य-वहियन्ते, यदभ्यवहरणानन्तरं तृप्तिपूर्वः परमसन्तोष उपजायते, न चैतन्नैरयिकाणामस्ति, प्रतिकूलक- र्मोदयवशतः तथारूपशक्तयभावात्, 'एवं सव्वे ओरालियसरीरावि' इति, एवं–नैरयिकोक्तेन प्रकारेण औदारिकशरीररिणोऽपि सर्वे पृथिवीकायिकादयो मनुष्यपर्यवसाना वक्तव्याः, तद्यथा–'पुढविकाया णं भंते ! किं ओयाहारा मनभक्खी ?, गोयमा ! ओयाहारा नो मणभक्खी' त्यादि, 'देवा' इत्यादि देवाः यावद्वैमानिका ओजअहारा अपि मनोभक्षिणोऽपि वक्तव्याः, तद्यथा–असुरकुमारा णं भंते १ किं ओयाहारा मनोभक्खी ?, गो० ! ओयाहारावि मणभक्खीवि, जाव वेमाणियाणं पुच्छा गो० १ ओयाहारावि मणभक्खीवि' ॥

सम्प्रतिमनोभक्षित्वं देवानां यथा भवति तथोपदर्शयति–'तत्थ ण'मित्यादि, तत्र–तेषु संसारिषु जीवेषु मध्ये, णमिति वाक्यालङ्कारे ये मनोभक्षिणो देवास्तेषां णमिति वाक्यालङ्कारे मनः प्रस्तावादाहारविषयं समुत्पद्यते, केनोल्लेखेन इत्यत आह–इच्छामः–अभिलषामो णमिति वाक्यालङ्कारे, मनोभक्षिणमिति–मनसा भक्षणं मनोरभणं कर्त्तुमिति, तत एवं तैर्मनसि कृते–व्यवस्तापिते मनोभक्षणे सति तथाविधशुभकर्मोदयवशात् क्षिप्रमेव तत्कालमेवेति भावः, ये इष्टाः कान्ताः प्रिया मनोज्ञा मनआपा पुद्गलाः एतेषां व्याख्यानं प्राग्वत् तेषां देवानां मनोभक्षतया परिणमन्ते, कथमित्यत्रैव दृष्टान्तमाह–

'से जहानामए' सेशब्दोऽथशब्दार्थः, स चात्र वाक्योपन्यासे, यथा नामेति विवक्षिता; शीताः पुद्गलाःशीतं–शीतयोनिकं प्राणिनं प्राप्य शीतत्वमेवातिव्रज्य–अतिशयेन गत्वा तिष्ठन्ति, किमुक्तं भवति ?– विशेषतः शीतीभुय शीतयोनिकस्य प्राणिनः सुखित्वायोपकल्पन्त इति, उष्णा वा पुद्गला उष्णं–उष्णयोनिकं प्राप्य उष्णमेव–उष्णत्वमेवातिव्रज्य–अतिशयेन गत्वा तिष्ठन्ति, विशेषतः स्वरूपलाभसम्पत्त्या तस्य सुखित्वायोपतिष्ठन्त इति भावः,

'एवमेव' अनेनैव प्रकारेण तैर्देवैः प्रागुक्तरीत्या मनोभक्षणे कृते सति स तेषां देवाना-मिच्छामनः–आहारविषयेच्छाप्रधानं मनः क्षिप्रमेवापैति–तृप्तिभावान्निवर्त्तते इति भावः, इयमत्र

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भावना–यथा शीतपुद्गलाः शीतयोनिकस्य प्राणिनः सुखित्वायोपकलप्यन्ते उष्णपुद्गला वा उष्णयोनिकस्य तथा देवैरपि मनसाऽभ्यवह्रियमाणाः पुद्गलास्तेषां तृप्तये परमसन्तोषाय चोपकल्पन्ते, तत आहारविषयाभिलाषनिवृत्तिर्भवतीति, अत्र च ओजहाराादिविभागप्रतिपादिका इमाः सूत्रकृताङ्गनिर्युक्तिगाथाः–

॥१॥ "सरीरेणोयाहारो तयाय फासेण लोमआहारो ।
पक्खेवाहारो पुन कावलिओ होइ नायव्वो ॥
॥१॥ ओयाहारा जीवा सव्वे अपज्जत्तया मुनेयव्वा ।
पज्जत्तगा य लोमे पक्खेवे होंति भइयव्वा ॥
॥२॥ एगिंदियदेवाणं नेरइयाणं च नत्थि पक्खेवो ।
सेसाणं जीवाणं संसारत्थाण पक्खेवो ॥
॥३॥ लोमाहारा एगिंदिया उ नेरइयसुरगणा चेव ।
सेसां आहारो लोमे पक्खेवओ चेव ॥
॥४॥ ओयाहारा मनभक्खिणो य सव्वेवि सुरगणा होंति ।
सेसा हवंति जीवा लोमे पक्खेवो चेव ॥"

अथ क आहार आभोगनिर्वर्त्तितः को वाऽनाभोगनिर्वर्त्तित इति चेत्, उच्यते, देवानामाभोगनिर्वर्त्तितः ओजआहारः स चापर्याप्तावस्थायां, लोमाहारोऽप्यनाभोगनिर्वर्त्तिः, स च पर्याप्तवस्थायां आभोगनिर्वर्त्तितो मनोभक्षणलक्षणः, स चपर्याप्तावस्थायां देवानामेव न शेषाणां, सर्वेषामप्यानाभोगनिर्वर्त्तित आहारोऽपर्याप्तावस्थायां लोमाहारः पर्याप्तावस्थायां, नैरयिकवर्ज्जानां लोमाहारो, नैरयिकाणां तु लोमाहार आभोगनिर्वर्त्तितोऽपि, द्वीन्द्रियादीनां मनुष्यपर्यवसानानां यः प्रक्षेपाहारः स आभोगनिर्वर्त्तित एवेति ॥

पदं – २८, उद्देशकः– १ समाप्तः

–ः पदं – २८ – उद्देशकः– २ :–

वृ. व्याख्यात आहारपदस्य प्रथमोद्देशकः, सम्प्रति द्वितीयो व्याख्येयः, तत्र चादावियमधिकारसङ्ग्रहगाथा–

मू. (५५८) *आहार १ भविय २ सण्णी ३ लेसा ४ दिट्ठी ५ य संजत ६ कसाए ७ ।*
नाण ८ जोगु ९ वओगे १० वेदे ११ य सरीर १२ पज्जत्ती १३ ॥

वृ. 'आहारे'त्यादि, प्रथमं सामान्यत आहाराधिकारः, द्वितीयो भव्याधिकारो–भव्यविशेषिताहाराधिकारः, एवं तृतीयः संज्ञ्यधिकारः, चतुर्थो लेश्याधिकारः पञ्चमो दृष्ट्यधिकारः षष्ठःसंयताधिकारः सप्तम; कषायाधिकारः अष्टमो ज्ञानाधिकारः नवमो योगाधिकारःदशम उपयोगाधिकारः एकादशो वेदाधिकारः द्वादशःशरीराधिकारः त्रयोदशः पर्याप्तयधिकारः, इह भव्यादिग्रहणेन तत्प्रतिपक्षभूता अभव्यादयोऽपि सूचिता द्रष्टव्याः, तथैवाग्रे वक्ष्यमाणत्वाद्,

तत्र प्रथमं सामान्यत आहाराधिकारं विभावयिषुरिदमाह–

पदं – २८, उद्देशकः– २ – दारं – १ "आहार"

मू. (५५९) *जीवे णं भंते ! किं आहारए अनाहारए ?, गो० ! सिय आहारए सिय अना-*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

हारए, एवं नेरइए जाव असुरकुमारे जाव वेमाणिए, सिद्धे णं भंते ! किं आहारए अनाहारए ?, गो० ! नो आहारए अनाहारए,

जीवा णं भंते ! किं आहारया अनाहारया ? गो० ! आहारयावि अनाहारयावि, नेरइयाणं ! पुच्छा, गो० ! सव्वेवि ताव होज्ञा आहारया १ अहवा आहारगा य अनाहारए य २ अहवा आहारगा य अनाहारगा य ३, एवं जाव वेमाणिया, नवरं एगिंदिया जहा जीवा,

सिद्धाणं पुच्छा, गो० ! नो आहारगा अनाहारगा

वृ. 'जीवे णं भंते !' इत्यादि प्रश्नसूत्रं सुगमं, भगवानाह-'गौतमे'त्यादि, गौतम ! स्यात-कदाचिदाहारकः कदाचिदनाहारकाः, कथमिति चेत् ?, उच्यते, विग्रहगतौ केवलिसमुद्घाते शैलेश्यवस्थायां सिद्धत्वे चानाहारकाः, शेषास्ववस्थास्वाहारकः, उक्तं च-

॥१॥ "विग्गहगइमावन्ना केवलिणो समोहया अजोगी य ।
सिद्धा य अनाहारा सेसा आहारगा जीवा ॥"

तदेवं समामान्यतो जीवचिन्तां कृत्वेदानीं नैरयिकादिचतुर्विंशतिदण्डकक्रमेणाहारकानाहारकचिन्तां करोति-'नेरइए णं भंते ! किं आहारए' इत्यादि सुगमं, तदेवं सामान्यतो जीवपदे नैरयिकादिषु चैकवचनेन आहारकानाहारकत्वचिन्ता कृता, सम्प्रति बहुवचनेन तां चिकीर्षुराह-

'जीवा णं भंते !' इत्यादि प्रश्नसूत्रं सुगमं, भगवानाह-गौतम ! आहारका अपि अनाहारका अपि, सदैव बहुवचनविशिष्टा उभयेऽपि लभ्यन्ते इति भावः, तथाहि-विग्रहगतिव्यतिरेकेण शेषकालं सर्वेऽपि संसारिणो जीवा आहारकाः", विग्रहगतिस्तु क्वचित् कदाचित् कस्यचित्तु भवतीति सर्वकालमपि लभ्यमाना सा प्रतिनियतानामेव लभ्यते तत आहारकेषु बहुवचनं, अनाहारका अपि सिद्धाः सदैव लभ्यन्ते, ते चाभव्येभ्योऽनन्तगुणाः, अन्यच्च-सर्वकालमेकैकस्य निगोदस्य प्रतिसमयमसङ्ख्येयभागो विग्रहगत्यापन्नो लभ्यते, ततोऽनाहारकेष्वपि बहुवचनं,

नैरयिकसूत्रे सर्वेऽपि तावद्भवेयुराहारकाः १, किमुक्तं भवति ?-कदाचिन्नैरयिकाः सर्वेप्याहारका एव भवन्ति, न त्वेकोऽप्यनाहारकः, कथमिति चेत्, उच्यते, उपपातविरहात्, तथाहि-नैरयिकाणामुपपातविरहो द्वादश मुहूर्त्ताः, एतावति चान्तरे पूर्वोत्पन्नविग्रहगत्यापन्ना अपि आहारका जाताः, अन्यस्त्वनुत्पद्यमानत्वातअनाहारको न सम्भवतीति, अथवा आहारका अनाहारकाश्च २

आहारकपदे बहुवचनं अनाहारकपदे एकवचनमिति भावः, कथमेष भङ्गो घटामियर्त्तीति चेत्, उच्यते, इह नरकेषु जन्तुः कदाचिदेक उत्पद्यते कदाचिदद्वौ कदाचित् त्रयश्चत्वारो यावत्सङ्ख्याता असङ्ख्याता वा, तत्र यदा एक उत्पद्यते सोऽपि च विग्रहगत्यापन्नोऽपि भवति अन्ये च पूर्वोत्पन्नतया आहारका अभवन् तदा एष भङ्गो लभ्यते, तृतीयभङ्गमाह-अहवा आहारगा य अनाहारगा य ३, अत्रोभयत्रापि बहुवचनं, एष च भङ्गो यदा बहवो विग्रहगत्योत्पद्यन्ते तदा द्रष्टव्यः, शेषभङ्गकास्तु न सम्भवन्ति, आहारकपदस्य नैरयिकाणां सर्वदैव बहुवचनविषयतया लभ्यमानत्वात्, एवमसुरकुमारादिषु स्तनितकुमारापर्यवसानेषु द्वीन्द्रियादिषु च वैमानिकपर्यन्तेषु प्रत्येकं भङ्गत्रिकं भावनीयं, उपपातविरहभावतः प्रथमभङ्गस्य एकादिसङ्ख्यतयोत्पत्तेः शेषस्य च भङ्गद्वयस्य सर्वत्रापि लभ्यमा-नत्वात्, एकेन्द्रियेषु पुनःपृथिव्यप्तेजोवायुवनस्पतिरूपेषु प्रत्येकमेष एवैको भङ्गः आहारकाः अनाहारका अपि, पृथिव्यप्तेजोवायुषु प्रत्येक् प्रतिसमयमसङ्खायातानां वनस्पतिषु प्रतिसमयमनन्तानां

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विग्रहगत्योत्पद्यमानानां लभ्यमानतया अनाहारकपदेऽपि सदैव तेषु बहुवचनसम्भवात्, तथा चाह-'एवं जाव वेमाणिया नवरं एगिंदिया जहा जीवा' इति,

एवं-नैरयिकोक्तभङ्गप्रकारेण शेषा अप्यसुरकुमारादयस्तावद्वक्तव्या यावद्वैमानिकाः, नवरमेकेन्द्रियाः पृथिव्यप्तेजोवायुवनस्पतिरूपाः प्रत्येकं यथा उभयत्रापि बहुवचने जीवा उक्तास्तथा वक्तव्याः, सिद्धेष्वेक एव भङ्गोऽनाहारक इति, सकलशरीरप्रहाणतस्तेषामाहारासम्भवात्, बहूनां च सदा भावात् इति, गतं प्रथमं द्वारं ॥

-: पदं-२८-उद्देशकः-२ दारं-२ "भव" :-

मू. (५६०) *भवसिद्धिए णं भंते! जीवे किं आहारते अनाहारते?, गो० ! सिय आहारते सिय अनाहारए, एवं जाव वेमाणिए भवसिद्धिया णं भंते! जीवा किं आहारगा अना० ? गो० ! जीवेगिंदियवज्रो तियभंगो, अभवसिद्धिएवि एवं चेव,*

नोभवसिद्धिएनोअभवसिद्धिए णं भंते ! जीवे किं आहारए अनाहारए ?, गो० ! नो आहारए अनाहारए, एवं सिद्धेवि, नोभवसिद्धियनोअभवसिद्धिया णं भंते ! जीवा किं आहारगा अनाहारगा ?, गो० ! नो आहारगा अनाहारगा, एवं सिद्धेवि।

वृ. द्वितीयं भव्यद्वारभिधित्सुराह-'भवसिद्धिए णं भंते!' इत्यादि, भवैः सङ्ख्यातैरसङ्ख्यातैरनन्तैर्वा सिद्धिर्यस्यासौ भवसिद्धिको भव्य;, स कदाचिदाहारकः कदाचिदनाहारकः, विग्रहगत्याद्यवस्थायां अनाहारकः शेषकालं त्वाहारकः, एवं चतुर्विंशतिदण्डकेऽपि प्रत्येकं वाच्यं, तथा चाह-'एवं जाव वेमाणिए' अत्र च सिद्धविषयं सूत्रं न वक्तव्यं, मोक्षपदप्राप्ततया तस्य भवसिद्धिकत्वायोगात्, अत्रैव बहुवचननेनाहारकानाहारकत्वचिन्तां चिकीर्षुराह-

'भवसिद्धिया णं भंते!' इत्यादि, अत्राप्याहारकद्वार इव जीवपदे एकेन्द्रियेषु च प्रत्येकमुभयत्र बहुवचनेनैक एव भङ्गो, यथा आहारका अपि अनाहारका अपि, शेषेषु नैरयिकादिषु स्थानेषु भङ्गत्रिकं, कदाचित्केवला आहारका एव न त्वेकोऽप्यनाहारकः, अथवा कदाचिदाहारका एकोऽनाहारकः, अथवा आहारका अपि अनाहारका अपि उभयत्रापि बहुवचनं, तथा चाह-'जीवेगिंदियवज्रो तियभंगो' इति, यथा च भवसिद्धिके एकस्मिन् बहुषु चाहारकानाहारकत्वचिन्ता कृत तथा अभवसिद्धिकेऽपि कर्त्तव्या, उभयत्राप्येकवचने बहुवचने च भङ्गसङ्ख्यायाः सर्वत्रापि समानत्वात्, तथा चाह-

'अभवसिद्धिए एवं चेव' अभवसिद्धिकेऽपि भवसिद्धिक इव एकवचने बहुवचने च वक्तव्यमिति, यस्तु न भवसिद्धिको नाप्यभवसिद्धिकः स सिद्धः, स हि भवसिद्धिको न भवति, भवातीतत्वात्, अभवसिद्धिकस्तु रूढ्या यः सिद्धिगमनयोग्यो न भवति स उच्यत, ततोऽभवसिद्धिकोऽपि न भवति, सिद्धिप्राप्तत्वात्, तथा च सति नोभवसिद्धिकनोअभवसिद्धिकत्वचिन्तायां द्वे एव पदे, तद्यथा-जीवपदं सिद्धिपदं च, उभयत्राप्येकवचने एक एव भङ्गोऽनाहारक इति, बहुवचनेऽप्येक एवानाहारका इति।

-: पदं-२८, उद्देशकः-२-दारं-३ "संज्ञी" :-

मू. (५६१) *सण्णी णं भंते! जीवे किं आहारए अनाहारए ?, गो० ! सिय आ० सिय अना०, एवं जाव वेमाणिए, नवरं एगिंदियविगलिंदिया नो पुच्छिज्जंति,*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सण्णी णं भंते ! जीवा किं आहारगा अनाहारगा ?, गो० ! जीवाइओ तियभंगो जाव वेमाणिया, असण्णी णं भंते ! जीवे किं आहारए अनाहारए ?, गो० ! सिय आ० सिय अना० एवं नेरइए जाव वाणमंतरे, जोइसियवेमाणिया न पुच्छिज्ञंति,

असण्णीणं भंते ! जीवा किं आ० अना० ?, गो० ! आहारगावि अनाहारगावि एगो भंगो, असण्णी णं भंते ! नेरइया किं आहारया अना० ?, गो० ! आहारगा वा १ अनाहारगा वा २ अहवा आहारए य अनाहारए य ३ आहारए य अनाहारया य ४ अहवा आहारगा य अनाहारए य ५ अहवा आहारगा य अनाहारगा य ६ एवं एते छब्भंगा, एवं जाव थणियकुमारा, एगिंदिएसु अभंगतं, बेइंदिय जाव पंचिंदियतिरिक्खजोणिएसु तियभंगो, मणूसवाणमंतरेसु छब्भंगा,

नोसण्णीनोअसण्णी णं भंते ! जीवे किं आ० अना० ?, गो० ! सिय आहारए सिय अनाहारए य, एवं मणूसेवि, सिद्धे अनाहारते, पुहुत्तेणं नोसण्णीनोअसण्णी जीवा आहारगावि अनाहारगावि, मणूसेसु तियभंगो, सिद्धा अनाहारगा।

वृ. संज्ञिद्वारे-'सन्नी णं भंते !' इत्यादि प्रश्नसूत्रं सुगमं, निर्वचनसूत्रमाह-'गोयमे'त्यादि, विग्रहगतावनाहारकः शेषकालमाहारकः, ननु संज्ञी समनस्क उच्यते, विग्रहगतौ च मनो नास्ति ततः कथं संज्ञी सन्नाहारको लभ्यते ?, उच्यते, इह विग्रहगत्यापन्नोऽपि संज्ञ्यायुष्कवेदनात् संज्ञी व्यवह्रियते, यथा नारकायुष्कवेदनान्नारकस्ततो न कश्चिद्दोषः,

'एव'मित्यादि, एवमुपदर्शितेन प्रकारेण तावद् वक्तव्यं यावद्वैमानिको-वैमानिकसूत्रं, नवरमेकेन्द्रिया विकलेन्द्रिया न प्रष्टव्याः, किमुक्तं भवति ?-तद्विषयं सूत्रं सर्वथा न वक्तव्यं, तेषाममनस्कतया संज्ञित्वायोगात्,

बहुवचनचिन्तायां जीवपदे नैरयिकादिपदेषु च प्रत्येकं सर्वत्र भङ्गत्रयं, तद्यथा-सर्वेऽपि तावद् भवेयुराहारकाः १ अथवा आहारकाश्च अनाहारकश्च २ अथवा आहारकाश्च अनाहारकाश्च ३, तथा चाह-'जीवातीतो तियभंगो जाव वेमाणिया' इति, तत्र सामान्यतो जीवपदे प्रथमभङ्गः सकललोकापेक्षया संज्ञित्वेनोत्पातविरहाभावातत् द्वितीयभङ्गं एकस्मिन् संज्ञिनि विग्रहगत्यापन्ने तृतीयभङ्गो बहुषु संज्ञिषु विग्रहगत्यापन्नेषु, एवं नैरयिकादिपदेष्वपि भङ्गभावना कार्या,

'असण्णी णं भंते !' इत्यादि, अत्रापि विग्रहगतावनाहारकः शेषकालमाहारकः, 'एवं जाव वाणमंतरे' इति एवं-सामान्यतो जीवपद इव चतुर्विंशतिदण्डकक्रमेण तावत् वक्तव्यं यावद्वानमन्तरो-वानमंतरविषयं सूत्रं, अथ नैरयिका भवनपतयो वानमन्तराश्च कथमसंज्ञिनो येनासंज्ञिसूत्रे तेऽपि पठ्यन्ते इति ?, उच्यते, इह नैरयिका भवनपतयोव्यन्तराश्चासंज्ञिभ्योऽपि उत्पद्यन्ते संज्ञिभ्योऽपि, असंज्ञिभ्यश्च उत्पद्यमाना असंज्ञिन इति व्यवह्रियन्ते संज्ञिभ्य उत्पद्यमानाः संज्ञिनः, ततोऽसंज्ञिसूत्रेऽपि ते उक्तप्रकारेण पठ्यन्ते, ज्योतिष्कवैमानिकास्तु संज्ञिभ्य एवोत्पद्यन्ते नासंज्ञिभ्य इति असंज्ञित्वव्यवहाराभावादिह ते न पठ्यन्ते, तथा चाह-

'जोइसियवेमाणिया न पुच्छिज्ञंति' किमुक्तं भवति ?-तद्विषयं सूत्रं न वक्तव्यं, तेषामसंज्ञित्वाभावादिति, बहुवचनचिन्तायां सामान्यतो जीवपदे एक एव भङ्गः, तद्यथा-आहारका अपि अनाहारका अपि, प्रतिपसमयमेकेन्द्रियाणामनन्तानां विग्रहगत्यापन्नानामत एवानाहारकाणां सदैव लभ्यमानतया अनाहारकपदेऽपि सर्वदा बहुवचनभावात्, नैरयिकपदे षट् भङ्गाः, तत्र

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रथमो भङ्ग आहारका इति, अयं च भङ्गो यदाऽन्योऽसंज्ञिनारकः उत्पद्यमानो विग्रहगत्यापन्नो न लभ्यते पूर्वोत्पन्नास्त्वसंज्ञिनः सर्वेऽप्याहारका जातास्तदा लभ्यते, द्वितीयोऽनाहारका इति, एष यदा पूर्वोत्पन्नोऽसंज्ञी नारक एकोऽपि न विद्यते उत्पद्यमानास्तु विग्रहत्यापन्ना बहवो लभ्यन्ते तदा विज्ञेयः, तृतीय आहारकश्च अनाहारकश्च, द्वित्वेऽपि प्राकृते बहुवनचमिति बहुवचनचिन्तायामेषोऽपि भङ्गः समीचीन इत्युपन्यस्तः, तत्र यदा चिरकालोत्पन्न एकोऽसंज्ञी नारको विद्यते अधुनोत्पद्यमानोऽपि विग्रहगत्यापन्न एकस्तदाऽयं भङ्गः, चतुर्थः आहारकश्च अनाहारकाश्च एष चिरकालोत्पन्ने एकस्मिन्नसंज्ञिनि नारके विद्यमाने अधुनोत्पद्यमानेषु असंज्ञिषु विग्रहत्यापन्नेषु द्रष्टव्य, पञ्चमः-आहारकाश्च अनाहारकश्च, अयं चिरकालोत्पन्नेषु बहुषु असंज्ञिषु नारकेषु सत्सु अधुनोत्पद्यमाने विग्रहगत्यापन्ने एकस्मिन्नसंज्ञिनि विज्ञेयः, षष्ठ आहारकाश्च अनाहारकाश्च, एष बहुषु चिरकालोत्पन्नेषूत्पद्यमानेषु चासंज्ञिषु वेदितव्यः,

'एवमेते छब्भंगा' एवमुपदर्शितप्रकारेण एते षट् भंगाः, तद्यथा-आहारकपदस्य केवलस्य बहुवचनेनैकः १, अनाहारकपदस्य केवलस्य बहुवचनेन द्वितीयः २, आहारकपदस्यानाहारकपदस्य च युगपत् प्रत्येकमेकवचनेन तृतीयः ३, आहारकपदस्यैकवचनेन अनाहारकपदस्य बहुवचनेन चतुर्थः ४, आहारकपदस्य बहुवचनेन अनाहारकपदस्यैकवचनेन पञ्चमः ५, उभयत्रापि बहुवचनेन षष्ठः ६, शेषास्तु भङ्गा न सम्भवन्ति, बहुवचनचिन्तायाः प्रक्रान्तत्वात्, एते च षट् भङ्गा असुरकुमारादिष्वपि स्तनितकुमारपर्यवसानेषु वेदितव्याः, तथा चाह-'एवं जाव थणियकुमारा'

'एगिंदिएसु अभंगय'मिति एकेन्द्रियेषु पृथिव्यपतेजोवायुवनस्पतिरूपेष्वभङ्गकं-भङ्गकाभाव एक एव भङ्ग इत्यर्थः, स चायं-आहारका अपि अनाहारका अपि, तत्राहारका बहवः सुप्रसिद्धाः;, अनाहारका अपि प्रतिसमयं पृथिव्यप्तेजोवायवः प्रत्येकमसङ्ख्येयाः प्रतिसमयं वनस्पतयोऽनन्ताः सर्वकालं लभ्यन्ते इति तेऽपि बहवः सिद्धाः,

'द्वीन्द्रियत्रीन्द्रियचतुरिन्द्रियतिर्यक्पञ्चेन्द्रियेषु प्रत्येकं भङ्गत्रिकं, तद्यथा-आहारका अथवा आहारकाश्च अनाहारकश्च अथवा आहारकाश्च अनाहारकाश्च, तत्र द्वीन्द्रियान् प्रति भावना-यदा द्वीन्द्रिय एकोऽपि विग्रहगत्यापन्नो न लभ्यते तदा पूर्वोत्पन्नाः सर्वेऽप्याहारका इति प्रथमो भङ्गः, यदा पुनरेको विग्रहगत्यापन्नस्तदा पूर्वे सर्वेऽप्याहारका उत्पद्यमानस्त्वेकोऽनाहारक इति, यदा तूत्पद्यमाना अपि बहवो लभ्यन्ते तदा तृतीयः, एवं त्रीन्द्रियचतुरिन्द्रियतिर्यक्पञ्चेन्द्रियेष्वपि भावना कर्त्तव्या, मनुष्यव्यन्तरेषु षट् भङ्गाः ते च नैरयिकेष्विव भावनीयाः, तथा चाह-'बेइंदिय जाव पंचिंदियतिरिक्खजोणिएसु तियभंगो, मणूसवाणमंतरेसु छब्भंगा' इति, नोसंज्ञीनोअसंज्ञी च केवली सिद्धश्च ततो नोसंज्ञिनोअसंज्ञित्वचिन्ताणां त्रीणि पदानि, तद्यथा-जीवपदं मनुष्यपदं सिद्धपदं च, तत्र जीवपदे सूत्रमाह-

'नोसण्णीनोअसण्णी णं भंते! जीवे' इत्यादि, स्यात्-कदाचिदाहारकः केवलिनः समुद्घाताद्यवस्थाविरहे आहारकः (कत्वात्), स्यात्-कदाचिदनाहारकः, समुद्घातावस्थायां अयो गित्वावस्थायां सिद्धावस्थायां वा भावनीयं, 'सिद्धे अनाहारए' इति सिद्धे-सिद्धविषये सूत्रे 'अनाहारए' इति वक्तव्यं, 'पुहुत्तेणं' ति पृथक्त्वेन बहुत्वेन चिन्तायामिति प्रक्रमः, 'आहारगावि अनाहारगावि' तत्राहारका अपि बहूनां केवललिनां समुद्घातद्यवस्थारहितानां सदैव लभ्यमानत्वात्, अनाहारका अपि सिद्धानां सदैव भावात्तेषां चानाहारकत्वादिति,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'मणुस्सेसु तियभंगो' इति मनुष्यविषयं भङ्गत्रिकं, तद्यथा—आहारका एष भङ्गो यदा न कोऽपि केवली समुद्घाताद्यवस्थागतो भवति, अथवा आहारकाश्च अनाहारकश्च एष भङ्ग एकस्मिन् केवलिनि समुद्घाताद्यवस्थागते सति लभ्यते, अथवा आहारकाश्च अनाहारकाश्च एष बहुषु केवलसिसमुद्घातद्यवस्थागतेषु सत्सु वेदितव्यः। लेश्याद्वारे सामान्यतः सलेश्यसूत्रमाह—

—: पदं – २८, उद्देशकः – २ – दारं – ४ – "लेश्या" :—

मू. (५६२) *सलेसे णं भंते! जीवे किं आहारए अनाहारए?, गो०! सिय आहारए सिय अनाहारए, एवं जाव वेमाणिते,*

सलेसा णं भंते! जीवा किं आहारगा अनाहारगा?, गो०! जीवेगिंदियवज्ञो तियभंगो, एवं कण्हलेसावि नीललेसावि काउलेसावि जीवेगिंदियवज्ञो तियभंगो, तेउलेसाए पुढविआउवणस्सइकाइयाणं छब्भंगा, सेसाणं जीवादिओ तियभंगो जेसिं अत्थि तेउलेसा, पम्हलेसाए सुक्कलेसाए य जीवादिओ तिभंगो,

अलेसा जीवा मणुस्सा सिद्धा य एगत्तेणवि पुहुत्तेणवि नो आहारगा अनाहारगा।

वृ. 'सलेसे णं भंते! जीवे' इत्यादि, इदं सामान्यतो जीवसूत्रमिव भावनीयं, अत्रापि सिद्धसूत्रं न वक्तव्यं, सिद्धानामलेश्यत्वात्, बहुवचनचिन्तायां जीवपदे एकेन्द्रियेषु च पृथिव्यादिषु प्रत्येकमेक एव भङ्गस्तद्यथा—आहारका अपि अनाहारका अपि, उभयेषामपि सदा बहुत्वेन लभ्यमानत्वात्, शेषेषु तु नैरयिकादिषु पदेषु तु प्रत्येकं भङ्गत्रिकं, तद्यथा—सर्वेऽपि तावद्भवेयुराहारकाः १, अथवा आहारकाश्च अनाहारकश्च २, अथवा आहारकाश्च अनाहारकाश्च ३, अमीषां च भावना प्राग्वत्, तथा चाह—'जीवेगिंदियवज्ञो तियभंगो' इति, 'एव'मित्यादि, एवं यथा सामान्यतः सलेश्यसूत्रमुक्तं तथा कृष्णलश्याविषयमपि नीललेश्याविषयमपि कापोतलेश्याविषयमपि सूत्रं वक्तव्यं, सर्वत्र सामान्यतो जीवपदे एकेन्द्रियेषु च प्रत्येकमभङ्गकं, शेषपक्षे भङ्गत्रिकं, तेजोलेश्याविषयमपि सूत्रमेकत्वे प्राग्वत्, बहुत्वेन पृथिव्यबवनस्पतिषु षट् भङ्गाः, तेषु कथं तेजोलेश्यासम्भव इति चेत्?, उच्यते, भवनपतिव्यन्तरज्योतिष्कसौधर्मेशानादेवानां तेजोलेश्यावतां तत्रोत्पादभावात्,

उक्तं तचास्या एव भगवत्याः प्रज्ञापनायाश्चूर्णौ० 'जेणेतेसु भवणवइवाणमंतरजोइसियसोहम्मीसाणया देवा उववज्ञंति तेणं तेउलेस्सा लब्भइ'' इति, ते षट् भङ्गा इमे—सर्वे आहारकाः १ अथवा सर्वे अनाहारकाः २ अथवा आहारकश्चानाहारकश्च ३ अथवा आहारकश्च अनाहारकाश्च ४ अथवा आहारकाश्च अनाहारकश्च ५ अथवा आहारकाश्चानाहरकाश्च ६, शेषाणां जीवपदादारभ्य सर्वत्रापि भङ्गत्रिकं, तथा चाह—

'तेउलेस्साए पुढविआउवणस्सइकाइयाणं छब्भंगा, सेसाणं जीवाईओ तियभंगो' इति, आह—किं सर्वेषामविशेषेण जीवपदादारभ्य भङ्गत्रिकमुत केषांचिदत आह—'जेसिं अत्थि तेउलेसा' इति, येषामस्ति तेजोलेश्या तेषामेव भङ्गत्रिकं वक्तव्यं, न शेषाणां, एतेन किमावेदितं भवति नैरयिकविषयं तेजोवायुविषयं द्वित्रिचतुरिन्द्रियविषयं च तेजोलेश्यासूत्रं न वक्तव्यमिति, तथा पद्मलेश्या शुक्ललेश्या च येषां सम्भवति तद्विषयं तयोः सूत्रं वक्तव्यं, तत्र पद्मलेश्या शुक्ललेश्या च तिर्यक्पञ्चेन्द्रियेषु मनुष्यषु वैमानिकेषु च लभ्यते न शेषेष्विति तयोः प्रत्येकं चत्वारि पदानि,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तद्यथा–सामान्यतो जीवपदं तिर्यक्पञ्चेन्द्रियपदं मनुष्यपदं वैमानिकपदं च, सर्वत्राप्येकवचनचिन्तायां स्यादाहारकः स्यादनाहारक इति भङ्गः, बहुवचनचिन्तायां भङ्गत्रिकं, तद्यथा–सर्वेऽपि तावद् भवेयुराहारकाः १ अथवा आहारकाश्च अनाहारकश्च २ अथवा आहारकाश्चानाहारकाश्च ३, तथा चाह–'पम्हलेसाए सुक्कलेसाए जीवाइओ तियभंगो'त्ति,

अलेश्या–लेश्यातीतास्ते चायोगिकेवलिनः सिद्धाश्च, ततोऽत्र त्रीणि पदानि, तद्यथा सामान्यतो जीवपदं मनुष्याः सिद्धाश्च, सर्वत्राप्येकवचनेन बहुवचनेन चानाहारका एव वक्तव्याः, एतदेवाह–'अलेस्सा जीवा मणुस्सा सिद्धा य एगत्तेणवि पुहुत्तेणवि नो आहारगा अनाहारगा' इति, गतं लेश्याद्वारम्।

–: पदं – २८, उद्देशकः– २ दारं – ५ "दृष्टि" :–

मू. (५६३) सम्मद्दिट्ठी णं भंते ! जीवा किं आहा० अना० ?, गो० ! सिय आहा० सिय अना०, बेइंदिया तेइंदिया चउरिंदिया छब्भंगा, सिद्धा अनाहारगा, अवसेसाणं तियभंगो,

मिच्छादिट्ठीसु जीवेगिंदियवज्जो तियभंगो,

सम्मामिच्छादिट्ठी णं भंते ! किं आहा० अना० ?, गो० ! आहारते नो अना०, एवं एगिंदियविगलिंदियवज्जं जाव वेमाणिते, एवं पुहुत्तेणवि।

वृ. सम्प्रति सम्यग्दृष्टिद्वारम्–सम्यग्दृष्टिश्चेहौपशमिकसम्यकत्वेन सास्वादनसम्यकत्वेन क्षायोपशमिकसम्यकत्वेन वेदकसम्यकत्वेन क्षायिकसम्यकत्वेन वा प्रतिपत्तव्यः, सामान्यत उपादानात्, तथैवाग्रे भङ्गचिन्ताया अपि करिष्यमाणत्वात्, तत्रौपशमिकसम्यग्दृष्टादयः सुप्रतीताः, वेदसम्यग्दृष्टिः पुनः क्षायिकसम्यकत्वमुत्पादयन् चरमग्रासमनुभवन्नवसेयः एकत्वे सर्वेष्वपि जीवादिपदेषु प्रत्येकमेष भङ्गः स्यादाहारकः स्यादनाहारक इति, नवरमत्र पृथिव्यादिविषयं सूत्रं न वक्तव्यं, तेषां सम्यग्दृष्टित्वायोगात्, 'उभयाभावो पुढवाइएसु' इति वचनाद्, बहुवचन विषयं सूत्रं, सामान्यतो जीवपदे आहारका अपि अनाहारका अपि इत्येष एव भङ्गः, उभयेषामपि सदा सम्यग्दृष्टीनां बहुत्वेन लभ्यमानत्वात्, नैरयिकभवनपतितिर्यक्पञ्चेन्द्रियमनुष्यव्यन्तर-ज्योतिष्कवैमानिकेषु प्रत्येकं भङ्गत्रिकं, तद्यथा–कदाचित्सर्वेऽप्याहारका एव १ कदाचिदाहारका एकश्चानाहारकः २, कदाचिदाहारकाश्च अनाहारकाश्च ३,

द्वित्रिचतुरिन्द्रियेषु पुनः षड् भङ्गाः, ते च प्राग्वद् भावनीयाः, द्वीन्द्रियादीनां च सम्यग्दृष्टित्व-मपर्याप्तावस्थासम्भविसास्वादनसम्यकत्वापेक्षया द्रष्टव्यं, सिद्धास्त्वनाहारकाः, एतेषां क्षायिकसम्यकत्वयुक्तत्वात्, तथा चाह– 'बेइंदियतेइंदियचउरिंदिएसु छब्भंगा, सिद्धा अनाहारगा, अवसेसाणं तियभंगो' मिथ्यादृष्टिष्वपि एकवचने सर्वत्र स्यादाहारकः स्यादनाहारक इति वक्तव्यं, बहुवचने जीवपदे पृथिव्यादिपदेषु च प्रत्येकमाहारका अपि अनाहारका अपीति, उभयेऽमपि सर्वदैवे तेषु बहुत्वेन लभ्यमानत्वेन, शेषेषु तु सर्वेषु स्थानेषु भङ्गत्रिकं, सिद्धसूत्रं चात्र न वक्तव्यं, सिद्धानां मिथ्यात्वापगमात्, एतदेवाह– 'मिच्छादिट्ठीसु जीवेगिंदियवज्जो तियभंगो,

सम्मामिच्छदिट्ठी णं भंते ! जीवे' इत्यादि प्रश्नसूत्रं सुगमं, भगवानाह–गौतम ! आहारको नो अनाहारकः, कस्मादिति चेत्, उच्यते, इह संसारिणामनाहारकत्वं विग्रगतौ, न च सम्यग्मिथ्या-दृष्टित्वं विग्रहगताववाप्यते, कालकरणायोगात्, 'सम्मामिच्छो न कुणइ कालं' इति वचनात्, ततः सम्यग्मिथ्यादृष्टेर्विग्रहगत्यभावतोऽनाहारकत्वाभावः, एवे चतुर्विंशतिदण्डकक्रमेण सर्वत्रापि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वक्तव्यं, नवरमेकेन्द्रियविकलेन्द्रिया न वक्तव्याः, तेषां सम्यग्मिथ्यादृष्टित्वासम्भवात्, एवं बहुवचनेऽपि वक्तव्यं, तद्यथा– 'सम्मामिच्छदिट्ठी णं भंते ! जीवा किं आहारगा अनाहारगा ?, गो० १ आहारगा नो अनाहारगा, सम्मामिच्छद्दिट्ठी णं भंते ! नेरइया किं आ० अना० ?, गो० ! आहारगा नो अनाहारगा, एवमेगिंदियविगलिंदियवज्ञा जाव वेमाणिया' इति । गतं दृष्टिद्वारं,

–: पदं – २८, उद्देशकः– २ दारं – ६– "संयत" :–

मू. (५६४) *संजए णं भंते ! जीवे किं आहा० अना० ?, गो० ! सिय आहारए सिय अनाहारए, एवं मणूसेवि, पुहुत्तेणं तियभंगो ।*

असंजते पुच्छा, सिय आहारए सिय अनाहारए, पुहुत्तेणं जीवेगिंदियवज्ञो तियभंगो ।

संजतासंजते णं जीवे० पंचिंदियतिरिक्खजोणिते मणूसे य ३ एते एघत्तेणवि पुहुत्तेणवि आहारगा नो अना०, नोसंजतेनोअसंदतेनोसंजतासंजते जीवे सिद्धे य एते एगत्तेण पोहत्तेणवि नो आहा० अना० ।

वृ. सम्प्रति संयतद्वारं–संयतत्वं च मनुष्याणामेव, तत्र द्वे पदे, तद्यथा–जीवपदं मनुष्यपदं च, तत्र जीवपदे सूत्रमाह– 'संजए णं भंते ! जीवे' इत्यादि सुगमं, नवरमनाहारकत्वं केवलिसमुद्घातावस्थायामयोगित्वावस्थायां च वेदितव्यं, शेषकालमाहारकत्वं, 'एवं मणूसेवि' त्ति एवं मनुष्यविषये सूत्रं वक्तव्यं, तद्यथा– 'संजए णं भंते ! मणूसे किं आहारए अनाहारए ?, गो० ! सिय आहारए सिय अनाहारए' भावनाऽनन्तरमेवोक्ता, 'पुहुत्तेणं तियभंगो' त्ति पृथकत्वेन–बहुवचनेन जीवपदे मनुष्यपदे च प्रत्येकं भङ्गत्रिकं, तच्चैवं–सर्वेऽपि तावद्भवेयुराहारकाः, एष भङ्गो यदा न कोऽपि केवली समुद्घात- मयोगित्वं वा प्रतिपन्नो भवति तदा वेदितव्यः, अथवा आहारकाश्चानाहारकश्च, एष एकस्मिन् केवलिनि समवहते शैलेशीं वा गते प्राप्यते, अथवा आहारकाश्चनाहारकाश्च, एष बहुषु केवलिषु समवहतेषु शैलेशीगतेषु वा लभ्यते ।

असंयतसूत्रे एकवचने सर्वत्र स्यादाहाहारकः स्यादनाहारक इति वक्तव्यं, बहुवचने जीवपदे पृथिव्यादिषु च पदेषु प्रत्येकमाहारका अपि अनाहारका अपि इत्येष भङ्गः, शेषेषु तु नैरयिकादिषु स्थानेषु प्रत्येकं भङ्गत्रिकं, संयतासंयता–देशविरताः, ते च तिर्यक्पञ्चेन्द्रिया मनुष्या वा न शेषाः, शेषाणां स्वभावत एव देशविपरतिपरिणामाभावाद्, एवं चैतेषां त्रीणि पदानि, तद्यथा– सामान्यतो जीवपदं तिर्यक्पञ्चेन्द्रियपदं मनुष्यपदं च, एतेषु त्रिष्वपि स्थानेषु एकवचने बहुवचने च आहरका भवन्ति, भवान्तरगतौ केवलिसमुद्घाताद्यवस्थासु च देशविरतिपरिणामा- भावात्, नोसंयतोनोअसंयतोनसंयतासंयतः, तच्चिन्तायां द्वे पदे, तद्यथा–जीवपदं सिद्धपदं च, उभयत्राप्येकवचने बहुवचने चानाहारकत्वमेव वक्तव्यं, न त्वाहारकत्वं, सिद्धानामनाहारकत्वात् गतं संयतद्वारं,

–: पदं – २८ – उद्देशकः– २ दारं – ७ – "कषायः" :–

मू. (५६५) *सकसाइ णं भंते ! जीवे किं आहारए अना० ?, गो० ! सिय आ० सिय अनाहारते, एवं जाव वेमाणिता, पुहुत्तेणं जीवेगिंदियवज्ञो तियभंगो*

कोहकसाईसु जीवादीसु एवं चेव, नवरं देवेसु छब्भंगा, मानकसाईसु मायाकसाईसु य देवनेरइएसु छब्भंगा, अवसेसाणं जीवेगिंदियवज्ञो तियभंगो, लोहकसाईसु नेरइएसु छब्भंगा,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अवसेसेसु जीवेगिंदियवज्जो तियभंगो,

अकसाई जहा नोसण्णीनोअसण्णी, ।

वृ. कषायद्वारं-'सकसाइ णं भंते ! जीवे' इत्यादि, एकवचनविषयं सूत्रं सुगमं, बहुवचने 'जीवेगिंदियवज्जो तियभंगो'त्ति जीवपदे पृथिव्यादिषु च पञ्चसु पदेषु प्रत्येकं आहारका अपि अनाहारका अपि वक्तव्यं, उभयेषामपि सकषायाणां सदैव तेषु स्थानेषु बहुत्वेन लभ्यमानत्वात्, शेषेषु तु स्थानेषु भङ्गत्रिकं,

'कोहकसाई एवं चेव'त्ति क्रोधकषाय्यपि एवमेव-सामान्यतः सकषायवदसेयः, तत्रापि जीवपदे पृथिव्यादिपदेषु चाभङ्गकं, शेषेषु तु स्थानेषु भङ्गत्रिकमिति भावः, किं सर्वेष्वपि शेषेषु स्थानेषु भङ्गत्रिकं ?, नेत्याह-'नवरं' 'देवेसु छब्भंगा' देवा हि स्वभावत एव लोभबहुला भवन्ति न क्रोधादिबहुलाः, ततः क्रोधकषायिण एकादयोऽपि लभ्यन्ते इति षड् भङ्गाः, तद्यथा-कदाचित् सर्वेऽप्याहारका एव क्रोधकषायिणः, एकस्यापि विग्रहत्यापन्नस्यालभ्यमानत्वात् ?, कदाचित्-सर्वेऽप्यनाहारकाः २, एकस्यापि क्रोधकषायिणः सत आहारकस्याप्राप्यमानत्वात्,

क्रोधोदयो हि मानाद्युदयविविक्त एवेए विवक्ष्यते न मानाद्युदयसहितोऽपि, तेन क्रोधकषायिणः सतः कदाचिदाहारकस्य सर्वथाऽप्यभावः, तथा कदाचिदेक आहारक एकोऽनाहारकः ३ कदाचिदेक आहारको बहवोऽनाहारकाः ४, कदाचिद्बहव आहारका एकोऽनाहारकः ५, कदाचिद्बहव आहारकाः बहवश्चानाहारका इति ६, मानकषायसूत्रं मायाकषायसूत्रं चैकवचने प्राग्वत्, बहुवचने विशेषमाह-

'मानकसाईसु' इत्यादि, मानकषायिषु मायाकषायिषु बहुवचनेन चिन्त्यमानेषु देवेषु नैरयिकेषु च प्रत्येकं षड् भङ्गाः, नैरयिका हि भवस्वभावतः क्रोधबहुलाः देवास्तु लोभबहुलास्ततो देवानां नैरयिकाणां च मानकषायो मायाकषायश्च प्रविरल इति प्रागुक्तप्रकारेण षट् भङ्गाः, जीवपदे पृथिव्यादिपदेषु च प्रत्येकमभङ्गकमाहारकाणामनाहारकाणां च मानकषायिणां मायाकषायिणां च प्रत्येकं सदैव तेषु २ स्थानेषु बहुत्वेन लभ्यमानत्वात्, शेषेषु तु स्थानेषु भङ्गत्रिकं, लोभकषायसूत्रमप्येकवचने तथैव, बहुवचने विशेषमाह-

'लोभकसाईसु' इत्यादि, लोभकषायिषु नैरयिकेषु षट् भङ्गास्तेषां लोभकषायस्याल्पत्वात्, शेषेषु तु जीवैकेन्द्रियवर्जेषु स्थानेष्वपि भङ्गत्रिकं, देवेष्वपि भङ्गत्रिकमिति भावः तेषां लोभबहुलतया षड्भङ्गसम्भवात्, जीवेष्वेकेन्द्रियेषु च प्राग्वदेष एव भङ्गः, आहारका अप्यनाहारका अपि इति,

'अकसाई जहा नोसण्णीणोअसण्णी'ति अकषायिणो यथा नोसंज्ञिनोऽसंज्ञिनो उक्तास्था वक्तव्याः, किमुक्तं भवति ? -अकषायिणोऽपि मनुष्याः सिद्धाश्च, मनुष्या उपशान्तकषायाद-योवेदितव्याः, अन्येषां सकषायित्वात्, तत एतेषामपि त्रीणि पदानि, तद्यथा-सामान्यतो जीवपदं मनुष्यपदं सिद्धपदं च, तत्र सामान्यतो जीवपदे मनुष्यपदे च प्रत्येकमेकवचने स्यादाहारकः स्यादना-हारक इति वक्तव्यं, सिद्धपदे त्वनाहारक एवेति, बहुवचने जीवपदे आहारका अपि अनाहारका अपीति, केवलिनामाहारकाणां सिद्धनामनाहारकाणां सदैव बहुत्वेन लभ्यमानत्वात्,

मनुष्यपदे भङ्गत्रिकं, सर्वेऽपि तावद् भवेयुराहारकाः १ अथवा आहारकाश्चनाहारकश्च २ अथवा आहारकाश्चनाहारकाश्च ३ भावना च प्रागेवानेकशः कृता, सिद्धपदे त्वनाहारक एव ।

गतं कषायद्वारं, सम्प्रति ज्ञानद्वारम्, तत्र-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

–: पदं – २८, उद्देशकः– २ – दारं – ८ "ज्ञानं" :–

मू. (५६६) *नाणी जहा सम्मद्दिट्ठी, आभिनिबोहियनाणी सुयनाणी य बेइंदियतेइंदियचउरिंदिएसु छब्भंगा, अवसेसेसु जीवादिओ तियभंगो जेसिं अत्थि, ओहिनाणी पंचिंदियतिरिक्खजोणिया आहारगा नो अनाहारगा,*

अवसेसेसु जीवादिओ तियभंगो जेसिं अत्थि ओहिनाणं, मणपज्रवनाणी जीवा मणूसा य एगत्तेणवि पुहुत्तेणवि आहा० नो अनाहारगा, केवलनाणी जहा नोसण्णीनोअसण्णी,

अन्नाणी मतिअनाणी सुयअन्नाणी जीवेगिंदियवज्रो तियभंगो, विभंगनाणी पंचिंदियतिरिक्खजोणिया मणूसा य आहारगा नो अना०, अवसेसेसु जीवादियो तियभंगो।

वृ. 'नाणी जहा सम्मद्दिट्ठी' त्ति ज्ञानी यथा प्राक् सम्यग्दृष्टिरुक्तस्तथा वक्तव्यः, तद्यथा–नाणी णं भंते ! जीवे किं आहारए अनाहारए ?, गो० ! सिय आहारए सिय अनाहारए, नाणी णं भंते ! नेरइए किं आहारए अनाहारए ?, गो० ! सिय आ० सिय अनाहारए, एवं एगिंदियवज्जं जाव वेमाणिए, नाणी णं भंते ! जीवा किं आहारगा अनाहारगा ?, गो० ! आहारगावि अनाहारगावि,

नाणी णं भंते ! नेरइया किं आहारगा अनाहारगा ?, गो० ! सव्वेवि ताव होज्ञा आहारगा १, अहवा आहारगा य अनाहारगे य २ अहवा आहारगा य अनाहारगा य ३, एवं जाव थणियकुमारा,

बेइंदियाणं पुच्छा, गो० ! सव्वेवि ताव होज्ज आहारगा य १ अहवा अनाहारगा य २ अहवा आहारए य अनाहारए य ३, अहवा आहारगे य अनाहारगा य ४, अहवा आहारगा य अनाहारगे य ५, अहवा आहारगा य अनाहारगा य ६, एवं तेइंदियचउरिंदियावि भाणितव्वा, अवसेसा जाव वेमाणिया जहा नेरइया, सिद्धाणं पुच्छा, गो० ! अनाहारगा य' इति,

आभिनिबोधिकज्ञानिसूत्रे श्रुतज्ञानिसूत्रे चैकवचने प्राग्वदवसेयं, बहुवचने द्वित्रिचतुरिन्द्रियेषु षड् भङ्गाः, अवशेषेषु तु जीवादिषु स्थानेषु एकेन्द्रियवर्जेषु भङ्गत्रिकं, तच्चैवम्–'आभिनिबोहियनाणी णं भंते ! जीवा किं आहारगा अनाहारगा ?, गो० ! सव्वेवि ताव होज्ज आहारगा १ अहवा आहारगा य अनाहारगे य २ अहवा आहारगा य अनाहारगा य ३ इत्यादि, तथा चाह–'आभिनिबोहियनाणी सुयनाणी य बेइंदियतेइंदियचउरिंदिएसु छब्भंगा, अवसेसेसु जीवाइओ तियभंगो, जेसिं अत्थि' इति सुगमं, नवरं 'जेसिं अत्थि' येषां जीवानामाभिनिबोधिकज्ञानश्रुतज्ञाने अतस्तेषु भङ्गत्रिकं वक्तव्यं, न शषेषु पृथिव्यादिष्विति,

अवधिज्ञानसूत्रमेकवचने तथैव, बहुवचनचिन्तायां पञ्चेन्द्रियतिर्यग्योनिका आहारका एव न त्वनाहारकाः, कस्मादिति चेत्, उच्यते, इह पञ्चेन्द्रियतिरश्चामनाहारकत्वं विग्रहगतौ, न च तदानीं तेषां गुणप्रत्ययतोऽवधिसम्भवो, गुणानामेवासम्भवात्, नाप्यप्रतिपतितावधिर्देवो मनुष्यो वा तिर्यक्षूत्पद्यते, ततोऽवधिज्ञानिनः सतः पञ्चेन्द्रियतिरश्चोऽनाहारकत्वायोगः, शेषेषु तु स्थानष्वेकेन्द्रिय विकलेन्द्रियवर्जेषु प्रत्येकं भङ्गत्रिकं, तदेवाह–'ओहिनाणी णं पंचिदियतिरिक्खजोणिया आहारगा अवसेसेसु जीवाइओ तियभगो जेसिं अत्थि ओहिनाण' मिति,

मनःपर्यायज्ञानमं मनुष्याणामेव, तत द्वे पदे, तद्यथा–जीवपदं मनुष्यपदं च, उभयत्रापि चैकवचने बहुवचने च मनःपर्यायज्ञानन आहारका एत्र वक्तव्या;, न त्वनाहारकाः, विग्रहगत्याद्यवस्थायां मनःपर्यायज्ञानासम्भवात्,

केवलज्ञानी यथा प्राग् नोसंज्ञीनोअसंज्ञी उक्तस्तथा वक्तव्यः, किमुक्तं भवति ?–

Jain Education International For Private & Personal Use Only www.jainelibrary.org

केवलज्ञानचिन्तायामपि त्रीणि पदानि, तद्यथा–सामान्यतो जीवपदं मनुष्यपदं सिद्धपदं च, तत्र सामान्यतो जीवपदे मनुष्यपदे चैकवचने स्यादाहारकः स्यादनाहारक इति वक्तव्यं, सिद्धपदे त्वनाहारक इति, बहुवचने सामान्यतो जीवपदे आहारका अपि अनाहारका अपि, मनुष्यपदे भङ्गत्रिकं, तच्च प्रागेवोपदर्शितं, सिद्धपदे त्वनाहारका अपि।

अज्ञानिसूत्रं मत्यज्ञानिसूत्रं श्रुताज्ञानिसूत्रं एकवचने प्रागिव, बहुवचनतचिन्तायां जीवपदे एकेन्द्रियेषु च पृथिव्यादिषु प्रत्येकमाहारका अनाहारका अपि इति वक्तव्यं, शेषषु तु भङ्गत्रिकं, विभङ्गज्ञानिसूत्रमप्येकवचने तथैव, बहुवचनचिन्तायां पञ्चेन्द्रियतिर्यग्योनिका मनुष्याश्चाहारका एव वक्तव्याः, न त्वनाहारकाः, विभङ्गज्ञानसहितस्य विग्रहगत्या तिर्यक्पञ्चेन्द्रियेषु मनुष्येषु चोत्पत्त्यसम्भवात्, अवशेषेषु स्थानेषु एकेन्द्रियविकलेन्द्रियवर्जेषु प्रत्येकं भङ्गत्रिकं।

–: पदं – २८, उद्देशकः– २ – दारं ९ "योगः" :–

मू. (५६७) *सजोगीसु जीवेगिंदियवज्जो तियभंगो, मणजोगी वइजोगी जहा सम्मामिच्छद्दिट्ठी, नवरं वइजोगो विगलिंदियाणवि, कायजोगीसु जीवेगिंदियवज्जो तियभंगो, अजोगी जीवमनूससिद्धा अनाहारगा।*

वृ. गतं ज्ञानद्वारं, सम्प्रति योगद्वारं–तत्र सामान्यतः सयोगिसूत्रमेकवचने तथैव, बहुवचने जीवएकेन्द्रियपदानि वर्जयित्वा शेषेषु स्थानेषु भङ्गत्रिकं, जीवपदे पृथिव्यादिपदेषु च पुनः प्रत्येकमाहारका अपि अनाहारका अपीति भङ्गः, उभयेषामपि सदैव तेषुस्थानेषु बहुत्वेन लभ्यमानत्वात् 'मणजोगी वइजोगी जहा सम्मामिच्छद्दिट्ठी य'त्ति मनोयोगिनो वाग्योगिनश्च यथा प्राक् सम्यग्मिथ्यादृष्टय उक्तास्तथा वक्तव्याः, एकवचने बहुवचने चाहारका एव वक्तव्या न त्वनाहारका इति भावः, नवरं 'वइजोगो विगलिंदियाणवि'त्ति नवरमिति–सम्यग्मिथ्यादृष्टिसूत्रादत्रायं विशेषः, सम्यग्मिथ्यादृष्टित्वं विकलेन्द्रियाणां नास्तीति तत्सूत्रं तत्र नोक्तं, वाग्योगः पुनर्विकलेन्द्रियाणामप्यस्तीति तत्सूत्रमपि वाग्योगे वक्तव्यं, तच्चैवम्–

'मणजोगी णं भंते ! जीवे किं आहारए अनाहारए ?, गो० ! आहारए नो अनाहारएस, एवं एगिंदियविगलिंदियवज्जं जाव वेमाणिए, एवं पुहुत्तेणवि,, वइजोगी णं भंते ! किं आहा० अना० ?, गो० ! आहारए नो अनाहारए, एवं एगिंदियवज्जं जाव वेमाणिए, एवं पुहुत्तेणवि'त्ति, काययोगिसूत्रमप्येकवचने बहुवचने च सामान्यतः सयोगिसूत्रमिव, अयोगिनो मनुष्यः सिद्धाश्च, तेनात्र त्रीणि पदानि, तद्यथा–जीवपदं मनुष्यपदं सिद्धःपदं च, त्रिष्वपि स्थानेष्वेकवचने बहुवचने चानाहारकत्वमेव।

–: पदं – २८, उद्देशकः– २ – दारं – १० "उपयोगः" :–

मू. (५६८) *सागारानागारोवउत्तेसु जीवेगिंदियवज्जो तियभंगो, सिद्धा अनाहारगा।*

वृ. गतं योगद्वारं, अधुनोपयोगद्वारमाह–तत्र साकारोपयोगसूत्रे अनाकारोपयोगसूत्रे च प्रत्येकमेकवचने सर्वत्र स्यादाहारकः स्यादनाहारक इति वक्तव्यं, सिद्धपदे त्वनाहारक इति, बहुवचने जीवपदे पृथिव्यादिपदेषु चाहारका अपि अनाहारका अपि इति भङ्गः, शेषेषु भङ्गत्रिकं, सिद्धास्त्वनाहारका इति, सूत्रोल्लेस्तस्त्वयम्–सागारोवउत्ते णं भंते ! जीवे किं आहारए अनाहारए गो० ! सिय आहारए सिय अनाहारए' इत्यादि।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

-: पदं – २८, उद्देशकः– २ – दारं – ११ "वेद" :-

मू. (५६९) *सवेदे जीवेगिंदियवज्जो तियभंगो, इत्थिवेदपुरिसवेदेसु जीवादिओ तियभंगो, नपुंसगवेदए य जीवेगिंदियवज्जो तियभंगो, अवेदए जहा केवलनाणी ।*

वृ. गतं उपयोगद्वारं, वेदद्वारे सामान्यतः सवेदसूत्रमेकवचने स्यादाहारकः स्यादनाहारक इति, बहुवचने जीव पदमेकेन्द्रियांश्च वर्जयित्वा शेषेषु स्थानेषु भङ्गत्रिकं, जीवपदे एकेन्द्रियेषु च पुनः प्रत्येकमभङ्गकं, आहारका अनाहारका अपीति, स्त्रीवेदसूत्रं पुरुषवेदसूत्रं च एकवचने तथैव, नवरमत्र नैरयिकैकेन्द्रियविकलेन्द्रिया न वक्तव्याः तेषां नपुंसकत्वात्, बहुवचने जीवादिषु पदेषु प्रत्येकं भङ्गत्रिकं,

नपुंसकवेदेऽपि सूत्रमेकवचने तथैव, नवरमत्र भवनपति व्यन्तरज्योतिष्कवैमानिका न वक्तव्यास्तेषामनपुंसकत्वाद्, बहुवचने जीवैकेन्द्रियवर्जेषु भङ्गत्रिकं, जीवपदे एकेन्द्रियपदेषु च पृथिव्यादिषु पुनरभङ्गकं प्रागुक्तस्वरूपमिति, अवेदो यथा केवली तथा एकवचने बहुवचने च वक्तव्यः, जीवपदे मनुष्यपदे च एकवचने स्यादाहारकः स्यादनाहारक इति, बहुवचने जीवपदे आहारका अपि अनाहारका अपि, मनुष्येषु भङ्गत्रिकं, सिद्धत्वेऽनाहारका इति वक्तव्यमिति भावः ।

-: पदं – २८, उद्देशकः– २ – दारं १२ "शरीरं" :-

मू. (५७०) *ससरीरी जीवेगिंदियवज्जो तियभंगो, ओरालियसरीरी जीवमणूसेसु तियभंगो, अवसेसा आहारगा नो अनाहारगा जेसिं अत्थि ओरालियसरीरं, वेउव्वियसरीरी आहारगसरीरी य आहारगा नो अना० जेसिं अत्थिस तेयकम्मसरीरी जीवेगिंदियवज्जो तियभंगो, असरीरी जीवा सिद्धा य नो आहारगा अना० ।*

वृ. गतं वेदद्वारं, शरीरद्वारे सामान्यतः शरीरसूत्रे सर्वत्रैकवचने स्यादाहारकः स्यादनाहारक इति, बहुवचने जीवएकेन्द्रियवर्जेषु शेषेषु स्थानेषु प्रत्येकं भङ्गत्रिकं, जीवपदे पृथिव्यादिपदेषु च प्रत्येकमभङ्गकं प्रागुक्तमिति,

औदारिकशरीरसूत्रमेकवचने तथैव, नवरमत्र नैरयिकभवनपतिव्यन्तरज्योतिष्कवैमानिका न वक्तव्यास्तेषामौदारिकशरीराभावात्, बहुवचने जीवपदे मनुष्यपदेषु च प्रत्येकं भङ्गत्रिकं, तद्यथा-सर्वेऽपि तावद्भवेयुराहारकाः एष भङ्गो यदा न कोऽपि केवली समुद्घातगतोऽयोगी वा, अथवा आहारकाश्चानाहारकश्च, एष एकस्मिन् केवलिनि समुद्घातगते अयोगिनि वा सति प्राप्यते, अथवा आहारकाश्चानाहारकाश्च, एषं भङ्गो बहुषु केवलिसमुद्घातगतेषु अयोगिषु वा सत्सु वेदयितव्यः, शेषास्त्वेकेन्द्रियद्वीन्द्रियत्रीन्द्रिय चतुरिन्द्रियतिर्यक्पञ्चेन्द्रिया आहारका एव वक्तव्याः, न त्वानाहारकाः, विग्रहगत्युत्तीर्णानामेवौदारिकशरीरसम्भवात्,

वैक्रियआहारकशरीरिणश्च सर्वेऽप्येकवचने बहुवचने चाहारका एव न त्वनाहारकाः, नवरं येषां वैक्रियमाहारकं वा सम्भवति त एव वक्तव्या नान्ये, तत्र वैक्रियं नैरयिकभवनपतिवायुकायिकतिर्यक्पञ्चेन्द्रियमनुष्यव्यन्तरज्योतिष्कवैमानिकेषु आहारकं मनुष्यष्वेव, सूत्रोल्लेखश्चायं-'वेउव्वियसरीरी णं भंते ! जीवे किं आहारए अनाहारए ?, गोयमा ! आ० नो अना०, वेउव्वियसरीरे णं भंते ! नेरइए किं आहारए अनाहारए ?, गो० ! आ० नो अना०' इत्यादि, तैजसकार्मणशरीरिसूत्रे चैकवचने सर्वत्र स्यादाहारकः स्यादनाहारक इति, बहुवचने

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जीवैकेन्द्रियवर्जेषु शेषषु स्थानेषु भङ्गत्रिकं, जीवपदे एकेन्द्रियेषु च पुनरभङ्गकं,

अशरीरिणः-सिद्धास्तेन तत्र द्वे एव पदे, तद्यथा-जीवाः सिद्धाश्च, तत्र एकवचने बहुवचने चोभयत्राप्यनाहारका एव ।

-: पदं - २८, उद्देशकः- २ - द्वारं - १३ "पर्याप्तिः" :-

मू. (५७१) *आहारपज्जत्तीए पज्जत्ते सरीरपज्जत्तीए पज्जत्ते इंदियपज्जत्तीए पज्जत्ते आणापाणपज्जत्तीए पज्जत्तए भासामनपज्जत्तीए पज्जत्तते एतासु पंचसुवि पज्जत्तीसु जीवेसु मणूसेसु य तियभंगो, अवसेसा आहारगा नो अनाहारगा, भासामनपज्जत्ती पंचिंदियाणं अवसेसाणं नत्थि,*

आहारपज्जत्तीअपज्जत्तए नो आहारए अना०, एगत्तेणवि पुहुत्तेणवि, सरीरपज्जत्तीअपज्जत्तए सिय आहारए सिय अनाहारए, उवरिल्लियासु चउसु अपज्जत्तीसु नेरइयदेवमणूसेसु छब्भंगा, अवसेसाणं जीवेगिंदियवज्जो तियभंगो, भासामनपज्जत्तएसु जीवेसु पंचिंदियतिरिक्खजोणिएसु य तियभंगो, नेरइयदेवमणुएसु छब्भंगा,

सव्वपदेसु एगत्तपोहत्तेणं जीवादिया दंडगा पुच्छाए भणितव्वा जस्स जं अत्थि तस्स तं पुच्छिज्जति जस्स जं णत्थि तस्स तं न पुच्छिज्जति जाव भासामनपज्जन्तीअपज्जत्तएसु नेरइयदेवमणुएसु छब्भंगा, सेसेसु तियभंगो

वृ. गतं शरीरद्वारं, सम्प्रति पर्याप्तिद्वारम्-तत्रागमे पर्याप्तयः पञ्च, भाषामनःपर्याप्त्योरेकत्वेन विवक्षणात्, तथा चाहारकपर्याप्तया पर्याप्ते शरीरपर्याप्तया पर्याप्ते इन्द्रियपर्याप्तया पर्याप्ते प्राणापानपर्याप्तया पर्याप्ते भाषामःपर्याप्तया पर्याप्ते चिन्त्यमाने, अत्रैव सर्वसङ्कलनामाह-

एतासु पञ्चस्वपि पर्याप्तिषु समर्थिताषु चिन्त्यमानास्विति शेषः प्रत्येकमेकवचने जीवपदे मनुष्यपदे च स्यादाहारकः स्यादनाहारक इति, शेषषु तु स्थानेषु आहारक इति, बहुवचने 'जीवेसु मणुस्सेसु य तियभंगो'त्ति जीवपदे मनुष्यपदे च भङ्गत्रिकं वक्तव्यं, तच्चौदारिकशरीरिसूत्रमिव भावनीयं, अवशेषाः सर्वेऽप्याहारका वक्तव्याः, नवरं भाषामनः पर्याप्तिः पञ्चेन्द्रियाणामेवेति तत्सूत्रे एकेन्द्रियविकलेन्द्रिया न वक्तव्याः, किन्तु शेषाः, एतदेवाए-

'भासामनपज्जत्ती पंचिंदियाणं अवसेसाणं नत्थि' इति, आहारपर्याप्तयपर्याप्तकसूत्रे एकवचने सर्वत्राप्यनाहारको वक्तव्यो, नो आहारकः, आहारपर्याप्तयाऽपर्याप्तो विग्रहगतावेव लभ्यते, उपपातक्षेत्रं प्राप्तस्य प्रथमसमय एवाहारपर्याप्ताय पर्याप्तत्वभावाद् अन्यथा तस्मिन् समये आहारकत्वानुपपत्तेः, बहुवचने त्वनाहारका इति, शरीरपर्याप्तयपर्याप्तसूत्रे एकवचने सर्वत्र स्यादाहारकः-स्यादनाहारक इति, तत्र विग्रहगतावनाहारक उपपातक्षेत्रप्राप्तस्तु शरीरपर्याप्तिपरिसमाप्तिं यावदाहारक इति, एवमिन्द्रियपर्याप्तयपर्याप्तसूत्रे प्राणापानपर्याप्तयपर्याप्तसूत्रे भाषामनःपर्याप्तयपर्याप्तसूत्रे च प्रत्येकं एकवचने स्यादाहारकः स्यादनाहारक इति वक्तव्यं, बहुवचने

'उवरिल्लियासु' इत्यादि, उपरितनीषु शरीरापर्याप्तिप्रभृतिषु चतसृषुअपर्याप्तिषु चिन्त्यमानासु प्रत्येकं नैरयिकदेवमनुष्येषु षड् भङ्गा वक्तव्याः, तद्यथा-कदाचित्सर्वेऽप्यनाहारका एव १ कदाचित्सर्वेऽप्याहारका एव २ कदाचिदेक आहारक एकोऽनाहारकः ३ कदाचिदेक आहारको बहवोऽनाहारकाः ४ कदाचिद्बहव आहारकाः एकश्चानाहारकः ५ कदाचिद्बहव आहारका बहवश्चा-नाहारकाः ६, अवशेषाणां नैरयिकदेवमनुष्यव्यतिरिक्तानां जीवैकेन्द्रियवर्जानां भङ्गत्रिकं वक्तव्यं, तद्यथा- सर्वेऽपि तावद्भवेयुः आहारकाः १ अथवा आहाहरकाश्च अनाहारकश्च २

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथवा आहार- काश्चनाहारकाश्च ३, जीवपदे एकेन्द्रियपदेषु च पुनः शरीरपर्याप्तयपर्याप्तसूतारे इन्द्रियपर्याप्तयपर्याप्त- सूत्रे प्राणापानपर्याप्तयपर्याप्तसूत्रे च प्रत्येकमभङ्गकं आहारका अपि अनाहारका अपि, उभयेषामपि च सदा बहुत्वेन लभ्यमानत्वात्, भाषामनःपर्याप्तयपर्याप्तकास्त्वेकेन्द्रिय- विकलेन्द्रिया न भवन्ति, किन्तु पञ्चेन्द्रिया एव, येषां हि भाषामनः पर्याप्तिसम्भवोऽस्ति त एव तत्पर्याप्तयपर्याप्तकाः प्रोच्यन्ते, न शेषा इति, ततस्तत्सूत्रे बहुवचने जीवपदे पञ्चेन्द्रियतिर्यग्योनिकपदे च भङ्गत्रिकं,

पञ्चेन्द्रियतिर्यञ्चो हि सम्मूर्च्छिमाः सदैव बहवो लभ्यन्ते, ततो यावदद्याप्यन्यो विग्रहगत्यापन्नः पञ्चेन्द्रियतिर्यग् न लभ्यये तावदेष भङ्गः—सर्वेऽपि तावद् भवेयुराहारका इति १, एकस्मिन् तस्मिन् विग्रहगत्यापन्ने लभ्यमाने द्वीतीय भङ्गः—आहारकाश्चानाहारकश्चेति २, यदा तु विग्रहत्यापन्ना अपि बहवो लभ्यन्ते तदा तृतीयो भङ्गः—आहारकाश्चनाहारकाश्चेति ३, जीवपदेऽपि भङ्गत्रिकं एतदपेक्षया प्रत्येयं, नैरयिकदेवमनुष्येषु प्रत्येकं षड् भङ्गाः, ते च प्रागेवोक्ताः, इह भव्यपदादारभ्य प्राय एकत्वेन बहुत्वेन च वैविक्तयेन सूत्राणि जीवादिदण्डकक्रमेण नोकातानि ततो मा भून्मन्दमतीनां सम्मोह इति तद्विषयमतिदेशमाह—

'सव्वपएसु एगत्ते' त्यादि, एते जीवादयो दण्डका; सर्वपदेषु—सर्वेष्वु पदेषु एकत्वेन बहुत्वेन च पृच्छयाउपलक्षणमेतन्निर्वचनेन भणितव्याः किं सर्वत्राप्यनविशेषेण कर्त्तव्याः ?, नेत्याह—'जस्से' त्यादि, यस्य यदस्ति तस्य तत्पृच्छयते—तद्विषयं सूत्रं भण्यते, यस्य पुनः यन्नास्ति न तस्य तत्प्रष्टव्यं—न तद्विषयं तस्य सूत्रं वक्तव्यमिति भावः कियद्दूरं यावदेवं कर्त्तव्यमिति शङ्कायां चरमदण्डकवक्तव्यतामुपदिशति—'जाव भासामनपज्ञत्तीए अपज्ञत्तएसु' इत्यादि, भावितार्थं, इहाधिकृतार्थभावनार्थमिमाः पूर्वाचार्यप्रतिपादिता गाथाः—

॥१॥ "सिद्धेगिंदियसहिया जहिं तु जीवा अभंगयं तत्थ
सिद्धेगिंदियवज्जेहिं होइ जीवेहिं तियभंगो ॥

॥२॥ असण्णीसु य नेरइय देवमणुएसु होंति छब्भंगा ।
पुढविदगतरुगणेसु य छब्भंगा तेउलेसाए ॥

॥३॥ कोहे माणे माया छब्भगा सुरगणेसु सव्वेसुं ।
माणे माया लोभे नेरइएहिंपि छब्भंगा ॥

॥४॥ आभिनिबोहियनाणे सुयनाणे खलु तहेव सम्मत्ते ।
छब्भंगा खलु नियमा बियतियचउरिंदिएसु भवे ॥

॥५॥ उवरिल्लापज्ञत्तीसु चउसु नेरइयदेवमणुएसुं ।
छब्भंगा खलु नियमा वज्ञे पढमा उ अपज्ञत्ती ॥

॥६॥ सण्णी विसुद्धलेसा संजय हिट्ठिल्लि तिसु य नाणेसु ।
थीपुरिसाण य वेदेवि छब्भंग अवेय तियभंगो ॥

॥७॥ सम्मामिच्छामणवइमणनाणे बालपंडियविउव्वी ।
आहारसरीरंमि य नियमा आहारया होंति ॥

॥८॥ ओहिंमि विभंगंमि य नियमा आहारया उ नायव्वा ।
पंचिंदिया तिरिच्छा मणुया पुन होंति विब्भंगे ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

॥९॥ ओरालसरीरंमि य पज्ञत्तीणं च पंच सु तहेव।
तियभंगो जियमणुएसु होंति आहारगा सेसा॥
॥१०॥ नोभवअभविय लेसा अजोगिणो तहय होंति असरीरी।
पढमाए अपज्ञत्तीए ते उ नियमा अनाहारा॥
॥११॥ सन्नासन्नविउत्ता अवेय अकसाइणो य केवलिणो।
तियभंग एक्कवयणे सिद्धाऽनाहारया होंति॥"

एताश्च सर्वा अपि गाथा उक्तार्थप्रतिपादकत्वाद् भावितार्था इति न भूयो भाव्यन्ते ग्रन्थगौरवभयात्, नवरं, 'एक्कवयणे सिद्धानाहारया होंति' इति 'एकवयणे' इत्यत्र तृतीयार्थे सप्तमी एकवचनेन एकार्थेनेति भावः, सर्वत्र सिद्धा अनाहारका भवन्तीति विज्ञेयम्॥

पदं – २८, उद्देशकः – २ समाप्तः

पदं – २८, समाप्तम्

मुनि दीपरत्नसागरेण संशोधिता सम्पादिता प्रज्ञापनाउपाङ्गसूत्रे अष्टाविंशतितमपदस्य मलयगिरिआचार्येण विरचिता टीका परिसमाप्ता।

पदं – २९ – उपयोगः

वृ. तदेवमुक्तमष्टाविंशतितममाहाराख्यं पदे, साम्प्रतमेकोनत्रिंशत्तममारभ्यते–अस्य चायमभिसम्बन्धः–इहानन्तरपदे गतिपरिणामविशेष आहारपरिणाम उक्तः, इह तु ज्ञानपरिणामविशेषः उपयोगः प्रतिपाद्यते, तत्र चेदमादिसूत्रम्–

मू. (५७२) *कइविहे णं भंते! उवओगे पं० ?, गो० ! दुविहे उवओगे पं०, तं०–सागारोवओगे य अनागारोवओगे य,*

सागारोवओगे णं भंते! कतिविधे पं० ?, गो० ! अट्ठविहे पं०, तं०–आभिनिबोहियनाणसागारोवओगे सुयनाणसागारोवओगे ओहिनाणसा० मनपज्ञवनाणसा० केवलनाणसा० मतिअन्नाणसा० सुयअन्नाणसा० विभंगनाणसा०।

अनागारोवओगे णं भंते! कतिविहे पं० ?, गो० ! चउव्विहे, पं०, तं०–चक्खुदंसणअनागारोवओगे अचक्खुदंसणअना० ओहिदंसणनागा० केवलदंसणअनागारोवओगे य। एवं जीवाणं,

नेरइयाणं भंते! कतिविधे उवओगे पं० ?, गो० ! दुविधे उवओगे पं०, तं०–सागारोवओगे य अनागारोवओगे य, नेरइयाणं भंते! सागारोवओगे कइविहे पं० ?, गो० ! छव्विहे पं०, तं०–मतिनाणसागारोवओगे सुयनाणसा० ओहिनाणसा० मतिअन्नाणसा० सुयअन्नाण० विभंगनाणसा०, नेरइया णं भंते ! अनागारोवगे कइविहे पं० तं० ?, गो० ! तिविहे पं०–चक्खुदंसण० अचक्खुदंसण० ओहिदंसणअना०, एवं जाव थणियकुमाराणं।

पुढविकाइयाणं पुच्छा, गो० ! दु० उवओगे पं०, तं०–सागारो० अनागारोव०, पुढवि० सागारोवओगे कतिविधे पं० ?, गो० ! दु० पं०, तं०– मतिअन्नाण० सुयअ०, पुढविका० अनगारोवओगे कतिविधे पं० ?, गो० ! एगे अचक्खुदंसणअनागारोवओगे पं०, एवं जाव वणप्फइकाइयाणं।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बेइंदिगाणं पुच्छा, गो० ! दुविधे उवओगे पं०, तं०—सागारोवओगे अनागारोवओगे य, बेइंदियाणं भंते ! सागारोवओगे कतिविधे पं० ?, गो० ! चउव्विहे पं०, तं०—आभिनि० सुय० मतिअन्नाण० सुतअन्नाणसा०, बेइंदियाणं अना० कइ० पं० ?, गो० ! एगे अचक्खुदंसण० अनागारोवओगे, एवं तेइंदियाणवि, चउरिंदियाणवि एवं चेव, नवरं अनागारोवओगे दुविधे पं० तं०—चक्खुदंसणअना० अचक्खुदंसणअना० । पंचिंदियतिरिक्खजोणियाणं जहा नेरइयाणं मणुस्साणं जहा ओहिए उवओगे भणितं तहेव भाणितव्वं । वाणंतरजोतिसियवेमाणियाणं भंते जहा नेरइयाणं ।

जीवा णं भंते ! किं सागारोवउत्ता अनागारोवउत्ता ?, गो० ! सागारोवउत्तावि अना०, से केणट्ठेणं भंते ! एवं वुच्चइ जीवा सागारोवउत्तावि अना० ?, गो० ! जे णं जीवा आभिनिबोहियनाण० सुय० ओहि० मन० केवल० मइअनाणसुयअन्नाणविभंगनाणोवउत्ता ते णं जीवा सागारोवउत्ता, जे णं जीवा चक्खुदंसणअचक्खुदंसणओहिदंसणकेवलदंसणोवउत्ता ते णं जीवा अनागारोवउत्ता, से तेणट्ठेणं गो० ! एवं वुच्चइ—जीवा सागारोवउत्तावि अनागारो०,

नेरइया णं भंते ! किं सागारोवउत्ता अना० ?, गो० ! नेरइया सागारोवउत्तावि अनागा०, से केणट्ठेणं भंते ! एवं वुच्चति ?, गो० ! जे णं नेरइया आभिनिबोहियनाण सुय० ओहि० मतिअन्नाणसुय० विभंगनाणोवउत्ताते णं नेरइया सागा०, जे णं नेरइया चक्खुदंसणअचक्खुदंसणओहि० ते णं नेरइया अनागारोवउत्ता, से तेणट्ठेणं गो० ! एवं वु० जाव सागारोवउत्तावि अनागारोवउत्तावि, एवं जाव थणियकुमारा ।

पुढविकाइयाणं पुच्छा, गो० ! तहेव जाव जे णं पुढवि० ! मतिअन्नाणसुयअन्नाणोवउत्ता ते णं पुढवि० सागरोव०, जे णं पुढवि० अचक्खुदंसणोवउत्ता ते णं पुढ० अनागारोवउत्ता, से तेणट्ठेणं गो० ! एवं वु० जाव वणप्फइकाइया ।

बेइंदियाणं भंते ! अट्ठसहिया तहेव पुच्छा, गो० ! जाव जे णं बेइंदिया आभिनिबोहिय० सुयनाणमतिअन्नाणसुयअन्नाणोवउत्ता ते णं बेइंदिया सागारोवउत्ता, जे णं बेइंदिया अचक्खुदंसणोवउत्ता ते णं अनागा०, से तेणट्ठेणं, गो० ! एवं वु० एवं जाव चउरिंदिया, नवरं चक्खुदंसणं अब्भहियं चउरिंदियाणंति, पंचिंदियतिरिक्खजोणिया जहा नेरइया, मणूसा जहा जीवा, वामंतरजोतिसियवेमाणिया जहा नेरइया (पन्नवणाए भगवईए एगोणतीसइमं उवओगपयं समत्तं)

वृ. 'कइविहे णं भंते ! उवओगे पं०' कतिविधः—कतिप्रकारः, सूत्रे एकारो मागधभाषालक्षणवशात्, णमिति वाक्यालङ्कृतौ, भदन्त !—परमकल्याणयोगिन् ! 'उपयोगः' उपयोजनमुपयोगः भावे धञ्, यद्वा उपयुज्यते—वस्तुपरिच्छेदं प्रपति व्यापार्यते जीवोऽनेनेत्युपयोगः— 'पुंनाम्नि घ' इति करणे घप्रत्तययो बोधरूपो जीवस्य तत्त्वभूतो व्यापारः प्रज्ञप्तः—प्रतिपादितः ?, भगवानाह— 'गोयमे'त्यादि, आकारः—प्रतिनियतोऽर्थग्रहणपरिणामः,

'आगारो अविसेसो' इति वचनात्, सह आकारेण वर्त्तत इति साकारः स चासावुपयोगश्च साकारोपयोगः, किमुक्तं भवति ? —सचेतने अचेतने वा वस्तुनि उपयुञ्जान आत्मा यदा सपर्यायमेव वस्तु परिच्छिनत्ति तदा स उपयोगः साकार उच्यते इति, स च कालतः छद्मस्थानमन्तर्मुहूर्त्तं कालं केवलिनामेकसामयिकः, तथा न विद्यते यथोक्तरूप आकारो यत्र सोऽनाकारः स चासावुपयोगश्च अनाकारोपयोगः, यस्तु वस्तुनः सामान्यरूपतया परिच्छेदः सोऽनाकारोपयोगः स्कन्धावारोपयोग-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वदित्यर्तः, असावपि : छद्मस्थानामान्तर्मुहूर्त्तिकः परमानाकारोपयोगकालत् साकारोपयोगकालः सङ्ख्येयगुणः प्रतिपत्तव्यः, पर्यापरिच्छेदकतया चिरकाललगनात्, छद्मस्थानां तथास्वाभाव्यात्, केवलिनां त्वनाकारोऽप्युपयोग एकसामयिकः, चशब्दौ स्वगतानेकभेदसूचकौ, तत्र साकारोपयोगभेदानभिधित्सुरिदमाह–

'सागारोवओगे णं भंते!' इति, अर्थाभिमुखो नियतः–प्रतिनियतस्वरूपो बोधो–बोधविशेषो अभिनिबोधः अभिनिबोध एव आभिनिबोधिकं, अभिनिबोधशब्दस्य विनयादिपाठाभ्युपगमात् 'विनयादिभ्य' इत्यनेन स्वार्थे इकण् प्रत्ययः, 'अतिवर्त्तन्ते स्वार्थे प्रत्ययकाः प्रकृतिलिभङ्गवचनानी' तिवचनादत्र नपुंसकता, यथा विनय एव वैनयिकमित्यत्र, अथवा अभिनिबुध्यतेऽस्मादस्मिन्वेति अभिनिबोधः–तदावरणकर्मक्षयोपशमस्तेन निर्वृत्तमाभिनिबोधिकं तच्च तज्ज्ञानं च आभिनिबोधिकज्ञानं, स च इन्द्रियमनोनिमित्तो योग्यदेशावस्थितवस्तुविषयः स्फुटप्रतिभासो बोधविशेष इत्यर्थः,स चासौ साकारोपयोगश्च आभिनिबोधिकज्ञानसाकारोपयोगः, एवं सर्वत्रापि समासः कर्त्तव्यः,

तथा श्रवणं श्रुतं–वाच्यवाचकभावपुरस्सरीकारेण शब्दसंस्पृष्टार्थग्रहणहेतुरुपलब्धिविशेषः, एवमाकारं वस्तु घटशब्दवाच्यं जलधारणाद्यर्थक्रियासमर्थमित्यादिरूपतया प्रधानीकृतः समानपरिणामः शब्दार्थपर्यालोचनानुसारी इन्द्रियमनोनिमित्तोऽवगमविशेष इत्यर्थः, श्रुतं च तत् ज्ञानं च श्रुतज्ञानं, ततो भूय; साकारोपयोगशब्देन विशेषणसमासः, तथाऽवशब्दोऽधःशब्दार्थः, अव–अधो विस्तृतं वस्तु धीयते–परिच्छिद्यतेऽनेनेत्यवधिः, यद्वा अवधिः–मर्यादा रूपिष्वेव द्रव्येषु परिच्छेदकतया प्रवृत्तिरूपा तदुपलक्षितं ज्ञानमप्यवधिः, अवधिश्चासौ ज्ञानं चावधिज्ञानं,

तथा परिः–सर्वतो भावे अवनं अवः, 'तुदादिभ्योऽन्का' वित्यधिकारे 'अकितौ चे' त्यकारप्रत्ययः, अवनं गमनमिति पर्यायाः, परिअवः पर्यवः, मनसि मनसो वा पर्यवः मनःपर्यवः, सर्वतस्परिच्छेद इत्यर्थः, पाठान्तरं पर्यय इति, तत्र पर्ययपं पर्ययः बावेऽल्प्रत्ययः, मनसि मनसो वा पर्ययः मनःपर्ययः, सर्वतस्तत्परिच्छेद इत्यर्थः, स चासौ ज्ञानं च मनःपर्यवज्ञानं मनःपर्ययज्ञानं वा, अथवा मनःपर्ययेति पाठान्तरं, तत्र मनांसि पर्येति–सर्वात्मना परिच्छिनत्ति मनःपर्यायं, 'कर्णोषऽण्' मनःपर्यायं च तत् ज्ञानं च मनःपर्यायज्ञान, यदिवा मनसः पर्यायाः मनःपर्यायाः, पर्याया धर्मा बाह्यवस्त्वालोचनप्रकारा इत्यनर्थान्तरं, तेषु तेषां वा सम्बन्धि ज्ञानं मनःपर्यायज्ञानं, इदं चार्द्धतृतीयद्वीपसमुद्रान्तर्वर्त्तिसंज्ञिमनोगतद्रव्यालम्बनं,

तथा केवलं–एकं मत्यादिज्ञाननिरपेक्षत्वात्, 'नट्ठंमि उ छाउमत्थिए नाणे' इति वचनात् शुद्धं वा केवलं तदावरणमलकलङ्कविगमात् सकलं वा केवलं प्रथमत एवाशेषतदावरणविगतमः सम्पूर्णोत्पत्तेः असाधारणं वा केवलमनन्यसदशत्वात् अनन्तं वा केवलं ज्ञेयानन्तात्वात्, केवलं च तत् ज्ञानं च केवलज्ञानं, तथा मतिश्रुतावधय एव यदा मिथ्यात्वकलुषिता भवन्ति तदा यथाक्रमं मत्यज्ञानश्रुताज्ञानविभङ्गज्ञानव्यपदेशांल्लभन्ते, उक्तं च–"आद्यत्रयमज्ञानपि भवति मिथ्यात्वसंयुक्त"मिति, 'विभङ्ग' इतिविपरतो भङ्गः–परिच्छित्तिप्रकारो यस्य तत् विभङ्गं, तच्च तत् ज्ञानं च विभङ्गज्ञानं, सर्वत्रापि च साकारोपयोगशब्देन विशेषणसमासः।

अनाकारोपयोगभेदानभिधित्सुराह–'अनागारोवओगे णं भंते!' इत्यादि, तत्र चक्षुषा–चक्षुरिन्द्रियेण दर्शनं–रूपसामान्यग्रहणलक्षणं चक्षुर्दर्शनं तच्च तत् अनाकारोपयोगः चक्षुर्दर्शनाना-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कारोपयोगः, अचक्षुषा–चक्षुर्वर्जशेषेन्द्रियमनोभिर्दर्शनं–स्वस्वविषये सामान्यग्रहणमचक्षुर्दर्शनं, ततोऽनाकारोपयोगशब्देन विशेषणसमासः, एवमुत्तरत्रापि, अवधिरेव दर्शनं–सामान्यग्रहणमवधिदर्शनं, केवलमेव सकलजगद्‌भाविसमस्तवस्तुसामान्यपरिच्छेदरूपं दर्शनं केवलदर्शनं, अथ मनःपर्यायदर्शनमपि कस्मान्न भवति येन पञ्चमोऽनाकारोपयोगो न भवतिति चेत् ?, उच्यते, मनःपर्यायविषयं हि ज्ञानं मनसः पर्यायनेव विविक्तान् गृह्णदुपजायते, पर्यायाश्च विशेषाः, विशेषालम्बनं च ज्ञानं ज्ञानमेव न दर्शनमिति मनःपर्यायदर्शनाभावस्तदभावाच्च पञ्चमानाकारोपयोगासम्भव इति । 'एवं जीवाण'मित्यादि, एवं निर्विशेषणोपयोगवत् जीवानामप्युपयोगो द्विविधः प्रज्ञप्तो भणितव्यः, तत्रापि साकारोपयोगोऽष्टविधोऽनाकारोपयोगश्चतुर्विधः, एतदुक्तं भवति–यथा प्राक् जीवपदरहितमुपयोगसूत्रं सामान्यत उक्तं तथा जीवपदसहितमपि भणितव्यं, तद्यथा–'जीवाणं भंते ! कतिविधे उवओगे पं० ?, गो० ! दुविधे उवओगे पं०, तं०–सागारोवओगे य अनागारोवओगे य, जीवाणं भंते ! सागारोवओगे कतिविधे पं० ?, गो० ! अट्ठविधे पं० तं०' इत्यादि, तदेवं सामान्यतो जीवानामुपयोगश्चिन्तितः,

सम्प्रति चतुर्विंशतिदण्डकक्रमेण नैरयिकादीनां चिन्तयन्नाह–'नेरइयाणं भंते !' इत्यादि, नैरयिका हि द्विविधा भवन्ति–सम्यग्दृष्टयो मिथ्यादृष्टयश्च, अवधिरपि तेषां भवप्रत्ययोऽवश्यमुपजायते, 'भवप्रत्ययो नारकदेवाना' मिति वचनात्, तत्र सम्यग्दृष्टीनां मतिज्ञानश्रुतज्ञानावधिज्ञानानि मिथ्यादृष्टीनां मत्यज्ञानश्रुताज्ञानविभङ्गज्ञानानीति सामान्यतो नैरयिकाणां षड्विधः साकारोपयोगः, अनाकारोपयोगस्त्रिविधस्तद्यथा–चक्षुर्दर्शनं अचक्षुर्दर्शनमवधिदर्शन च, एष च त्रिविधोऽप्यनाकारोपयोगः सम्यग्दृशां मिथ्यादृशां चाविशेषेण प्रतिपत्तव्यः, उभयेषामप्यवधिदर्शनस्य सूत्रे प्रतिपादितत्वात्, एवमसुरकुमारादीनां स्तनितकुमारपर्यवसानानां भवनपतीनाम प्यवसेयं, पृथिवीकायिकानां साकारोपयोगो द्विविधस्तद्यथा–मत्यज्ञानं श्रुतज्ञानं च, अनाकारोपयोग एकऽचक्षुर्दर्शनरूपः, शेषोपयोगानां तेषामसम्भवात्, सम्यग्दर्शनादिलब्धिविकलत्वात्, एवमप्तेजोवायुवनस्पतीनामपि वेदितव्य,

द्वीन्द्रियाणां साकारोपयोगश्चतुर्विधः, तद्यथा–मतिज्ञानं श्रुतज्ञानं मत्यज्ञानं श्रुताज्ञानं, तत्रापर्याप्तावस्थायां केषांचित् सासादनभावमासादयतां मतिज्ञानश्रुतज्ञाने शेषाणां तु मत्यज्ञानश्रुताज्ञाने, अनाकारोपयोगस्त्वेकोऽचक्षुर्दर्शनरूपः, शेषोपयोगाणाणं तेषामसम्भवात्, एवं त्रीन्द्रियाणामपि, चतचुरिन्द्रियाणामप्येव, नवरमनाकारोपयोगो द्विविधः चक्षुर्दर्शनमचक्षुर्दर्शनं च, पञ्चेन्द्रियतिरश्चां साकारोपयोगः षड्विधस्तद्यथा–मतिज्ञानं श्रुतज्ञानमवधिज्ञानं मत्यज्ञानं श्रुताज्ञानं विभङ्गज्ञानं, अनाकारोपयोगस्त्रिविधस्तद्यथा–चक्षुदर्शनअचक्षुदर्शनं अवधिदर्शनं च, अवधिद्विकस्यापि केषुचित्तेषु सम्भवात्,

मनुष्याणां यथासम्भवमष्टावपि साकारोपयोगाश्चत्वारोऽप्यनाकारो पयोगा;, मनुष्येषु सर्वज्ञानदर्शनलब्धिसम्भवात्, व्यन्तरज्योतिष्कवैमानिका यथा नैरयिकाः, तदेवं सामान्यतश्चतुर्विंशतिदण्डकक्रमेण च जीवानां उपयोगश्चिन्तितः, सम्प्रति मन्दमतिस्पष्टावबोधाय जीवा एव तत्तदुपयोगोपयुक्ताः, सामान्यतश्चतुर्विंशतिदण्डकक्रमेणचिन्त्यन्ते–'जीवाणंभंते !' इत्यादि सुगमम्

पदं – २९ – समाप्तम्

Jain Education International   For Private & Personal Use Only   www.jainelibrary.org

पदं – ३० – पश्यत्ता

वृ. तदेवमुक्तमेकोनत्रिंशत्तमं पदं, सम्प्रति त्रिंशत्तममारभ्यते, अस्य चायमभिम्बन्धः– इहानन्तरपदे ज्ञानपरिणामविशेष उपयोगोऽभिहितः, इहापि ज्ञानपरिणामविशेषे उपयोगे पश्यत्ता चिन्त्यते इति, तत्र चेदमादिसूत्रम्–

मू. (५७३) *कतिविहा णं भंते ! पासणया पन्नत्ता ?, गो० ! दुविहा पासणया पं० तं०–सागारपासणया अनागारपासणया,*

सागारपासणया णं भंते ! कइविहा पं० ?, गो० ! छव्विहा पन्नत्ता, तं०–सुयनाणपा० ओहिनाणपा० मणपज्ञवनाणपा० केवलनाणपा० सुयअन्नाणसागारपा० विभंगनाणसागार-पासणया, अनागारपासणया णं भंते ! कइविधा० ?, गो० ! तिविहा पं०, तं०–चक्खुदंसणअना-गारपा० ओहिदंसणअना० केवलदंसणअना०, एवं जीवाणंपि,

नेरइयाणं भंते ! कतिविधा पासणया पन्नत्ता ?, गो० ! दुविहा पं०, तं०–सागारपासणया० अनागा०, नेरइयाणं भंते ! सागारपा० कइविहा पं० ?, गो० ! चउव्विहा पं०, तं०–सुयणाण-पा०ओहिनाणपा० सुअअन्नाणपा० विभंगनाण०, नेरइयाणं भंते ! अनागारपा० कतिविहा पं० ?, गो० ! दुविहा, तं०–चक्खुदंसण० ओहिदं०, एवं जाव थणियकुमारा ।

पुढविकाइयाणं भंते ! कतिविहा पासणया पं० गो ?, गो० ! एगा सागारपा०, पुढविका-इयाणं भंते ! सागारपासणया कतिविहा पं० ?, गो० ! एगा सुयअन्नाणसागारपा० पं०, एवं जाव वणप्फइकाइयाणं ।

बेइंदियाणं भंते ! कतिविहा पासणया पं० ?, गो० ! एगा सागारपासणा पं०, बेइंदियाणं भंते ! सागारपा० कइविहा पं० ?, गो० ! दु० पं० तं०–सुयनाणसागारपा० सुयअन्नागसा-गारपा०, एवं तेइंदियाणवि, चउरिंदियाणं पुच्छा, गो० ! दु० पं०, तं०– सागारपा० अनागारपा०, सागारपासणया जहा बेइंदियाणं, चउरिंदियाणं भंते ! अनागारपा० कइविहा पं० ?, गो० ! एगा चक्खुदंसण० अनागारपा० पं०, मणूसाणं जहा जीवाणं, सेसा जहा नेरइया जाव वेमाणियाणं

जीवा णं भंते ! किं सागारपस्सी अनागारपस्सी ?, गो० ! जीवा सागारपस्स अनागारपस्सी गो० ! जीवा सागारपस्सीवि अनागारपस्सीवि, से केणट्ठेणं भंते ! एवं वु० जीवा सागार० अनागार० ?, गो० ! जे णं जीवा सुतनाणी ओहिनाणी मनपज्ञव० केवल० सुअअन्नाणी विभंगनाणी ते णं जीवा सागारपस्सी, जे णं जीवा चक्खुदंसणी ओहिदंसणी केवलदंसणी ते णं जीवा अनागारपस्सी, से एतेणट्ठेणं गोयमा ! एवं वु०–जीवा सागारपस्सीवि अनगा०, नेरइया णं भंते ! किं सागारपस्सी अनागा०, गो० ! एवं चेव, नवरं सागारपासणयाए मणपज्ञवनाणी केवलनाणी न वुच्चति, अनागारपासणयाए केवलदंसणं नत्थि, एवं जाव थणियकुमारा ।

पुढविकाइयाणं पुच्छा, गो० ! पुढविकाइया सागारपस्सी नो अनागारपस्सी, से केणट्ठेणं भंते ! एवं वु०–गो० ! पुढविकाइयाणं एगा सुयअन्नाणसागारपासणैया पं०, से ते० गो० !, एवं जाव वणस्सतिकाइयाणं, बेइंदियाणं पुच्छा, गो० ! सागारपस्सी नो अना०, से केणट्ठेणं भंते एवं वुच्चति ?, गो० ! बेइंदियाणं दुविहा सागारपासणया पं०, तं०–सुयनाणसागारपा– सुअअन्नाणसागारपा०, से एएणट्ठेणं गो० ! एवं वु०, एवं तेइंदियाणवि,

चउरिंदियाणं पुच्छा, गो० ! चउरिंदिया सागारपस्सी, जे णं चउरिंदिया चक्खुदंसणी ते

Jain Education International For Private & Personal Use Only www.jainelibrary.org

णं चउरिंदिया अनागारपस्सी, से एएणट्ठेणं गो० ! एवं वु०, मणूसा जहा जीवास अवसेसा जहा नेरइया जाव वेमाणिया ।

वृ. 'कतिविधा णं भंते' इत्यादि, कतिविधा—कतिप्रकारा, णमिति वाक्यालङ्कारे, भदन्त 'पासणय'त्ति 'दशिर्प्रेक्षणे' पश्यतीति 'सति वानिता'विति अतृङ्प्रत्ययः कर्त्तर्यनदादेशः, 'पाघ्राध्मास्थाम्नादाणुदृश्यर्त्तिश्रौतिकृवुधिवुशदसदः पिबजिघ्रधमतिष्ठमनयच्छपश्यच्छ-श्रृकृधिशीयसीद'मिति दशेः पश्यादेशः पश्यतो भावः पश्यत्ता, 'भावे तत्वला'विति तल्प्रत्ययः, 'आदाप्'सैव पासणयेत्युच्यते, एष च पासणयाशब्दो रूढिवशात् साकारनाकारबोधप्रतिपादकः उपयोगशब्दवत् तथा चोपयोगविषये प्रश्नोत्तरसूत्रे इमे—

'कइविहे णं भंते ! उवओगे पन्नत्ते ?, गोयमा ! दुविहे पन्नत्ते, तं०—'सागारोवओगे य अनागारोवओगे य' पश्यत्ताविषयेऽपि प्रश्नोत्तरसूत्रे इमे—'कइविहा णं भंते ! पासनाय पन्नत्ता गो० ! दुविहा पं०, तं०—सागारपासणया अनागारपासणया' इति, ननु तुल्ये साकारनाकारभदत्वे कोऽनयोः प्रतिविशेषो येन पृथगुच्यते ?, उच्यते साकारानाकारऊभेदगतावान्तरभेदसङ्ख्यारूपः, तथाहि—पञ्च ज्ञानानि त्रीण्याजज्ञानानीत्यष्टविधः साकार उपयोगः, साकारपश्यत्ता तु षड्विधा, मतिज्ञानमत्यज्ञानयोः पश्यत्तयोः अनभ्युपगमात्, कस्मादिति चेत्, उच्यते, इह पश्यत्ता नाम पश्यतो भाव उच्यते, पश्यतो भावश्च 'दशिर् प्रेक्षणे; इति वचनात्, प्रेक्षणमिह रूढिवशात् साकार-पश्यत्तायां चिन्त्यमानायां प्रदीर्घकालं अनाकारपश्यत्तायां चिन्त्यमानायां प्रकृष्टं परिस्फुटरूपमी-क्षणमवसेयं, तथा च सति येन ज्ञानेन त्रैकालिकः परिच्छेदो भवति तदेव ज्ञानं प्रदीर्घकालविषयत्वात् साकारपश्यत्ताशब्दवाच्यं न शेषं, मतिज्ञानमत्यज्ञाने तु उत्पन्नाविनष्टार्थग्राहके साम्प्रतकालविषये, तथा च मतिज्ञानमधिकृत्यान्यत्रोक्तम्—

॥१॥ "जनमवग्गहादिरूवंपच्चुप्पन्नवत्थुगाहगं लोए ।
इंदियमनोनिमित्तं च तमाभिनिबोधिगं बेंति ॥"

तत् द्वे अपि साकारपश्यत्ता शब्दवाच्ये न भवतः, श्रुतज्ञानादीनि तु त्रिकालविषयाणि, तथाहि—श्रुतज्ञानेन अतीता अपि भावा ज्ञायन्ते अनागता अपि, उक्तं च—

॥१॥ "जं पुण तिकालविसयं आगमगंथाणुसारि विन्नाणं ।
इंदियमणोनिमित्तं सुयनाणं तं जिणा बेंति ॥"

अवधिज्ञानमपि सङ्ख्यातीता उत्सर्प्पिण्यवसर्प्पिणीः अतीताः परच्छिनत्ति भाविनीश्च, मनःपर्यज्ञानमपि पल्योपमासङ्ख्येयभागमतीतं जानाति भाविनं च, केवलं सकलकालविषयं सुप्रतीतं, श्रुतज्ञानविभङ्गज्ञाने अपि त्रिकालविषये, ताभ्यामपि यथायोगमतीतानागतभावपरिच्छेदात्, ततः ज्ञानानि साकारपश्यत्ताशब्दवाच्यनि, उपयोगवस्तु यत्राकारो यथोदितस्वरूपः परिस्फुरति स बोधो वर्त्तमानकालविषयो वा यदि भवति त्रिकालिको वा तत्र सर्वत्रापि प्रवर्त्त इति साकारोपयोगोऽष्टविधः ।

तथा चक्षुर्दर्शनमचक्षुर्दर्शनमवधिदर्शनं केवलदर्शनमिति चतुर्विधोऽनाकारोपयोगः, अनाकारपश्यत्ता तु त्रिविधा, अचक्षुर्दर्शनस्यानाकारपश्यत्ताशब्दवाच्यत्वाभावात्, कस्मादिति. चेत्, उच्यते, उक्तमिह पूर्वमनाकारपश्यत्तायां चिन्त्यमानायां प्रकृष्टं परिस्फुटरूपमीक्षण-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मवसेयमिति, तत्राचक्षुर्दर्शने परिस्फुटरूपमीक्षणं न विद्यते, न हि चक्षुषेव शेषेन्द्रियमनोभिः परिस्फुटमीक्षते प्रमाता, ततोऽचक्षुर्दर्शनस्यानाकारपश्यत्ताशब्दवाच्यत्वाभावात्, त्रिविधाऽनाकार-पश्यत्ता, तदेवं साकारभेदेऽनाकारभेदे च प्रत्येकमवान्तरभेदे वैचित्र्यत्यभावान्महानुपयोगपश्य-त्तयोःप्रतिविशेषः, एनमेव प्रतिविशेषं प्रतिपिपादयिषुः प्रथमतः साकारनाकारभेदौ ततस्तद्ग-तावान्तरभेदान् प्रतिपादयति–'गो० ! दुविहा पं० तंजहा०सागारपासणया अनागारपासणया य, सागारपासणया णं भंते ! कतिविहा पं०,' इत्यादि भावितार्थम् । तदेवं सामान्यतो जीवपद-विशेषणरहिता पश्यत्तोक्ता, साम्प्रतं तामेव जीवपदविशेषितामभिधित्सुराह–'एवं जीवाणंपि' एवं– पूर्वोक्तेन प्रकारेण जीवानामपि–जीवपदविशेषणसहितापि पश्यत्ता वक्तव्या, सा चैवम्–

'जीवाणं भंते ! कतिविधा पासणया पं० ?, गो० ! दुविहा पं०, तंजहा–सागारपासणया अनागारपासणया य, जीवाणं भंते ! सागारपासणया कतिविहा पं०' इत्यादि, तदेवं जीवानामपि सामान्यत उक्ता, सम्प्रति चतुर्विंशतिदण्डकक्रमेण वदति–'नेरइयाणं भंते !' इत्यादि, सुगमत्वात्, उपयोगपदे प्रायो भावितत्वात् अनन्तरोक्तभावनानुसारेण स्वयं परिभावनीयं, तदेवं सामान्यतो विशेषतश्च जीवानां पश्यतोक्ता, सम्प्रति जीवानेव पश्यत्ताविशिष्टाना चिचिन्तयिषुराह–'जीवा णं भंते ! किं सागारपस्सी' इत्यादि, जीवाः–जीवनयुक्ताःप्राणधारिण इत्यर्थः, णमिति वाक्यालङ्कारे किमिति प्रश्ने साकारपश्यत्ता विद्यते येषां ते साकारपश्यत्तिनः प्राकृतत्वात् साकारपस्सी इत्युक्तं, 'मनपज्ञवनाणी केवलनाणी न वुच्चइ' इत्यादि, नैरयिकाणां चारित्रप्रतिपत्तेरभावतो मनःपर्यव-ज्ञानकेवलज्ञानकेवलदर्शनानामभावात्, ॥

इह किल छद्मस्थानां साकारोऽनाकारश्चोपयोगः क्रमेणोपजायमानो घटते, सकर्मकत्वात्, सकर्मकाणां ह्यन्ततरस्योपयोगस्य वेलायामन्यतरस्य कर्मणाऽऽवृतत्वान्न घटते एवोपयोग इति, केवली तु घातिचतुष्टयक्षयाद् भवति, ततः संशयः–किं क्षीणज्ञावावरणदर्शनावरणत्वात् यस्मिन्नेव समये रत्नप्रभादिकं जानाति तस्मिन्नेव समये पश्यति उत जीवस्वाभाव्यात् क्रमेणेति ?, ततः पृच्छति–

मू. (५७४) *केवली णं भंते ! इमं रयणप्पभं पुढविं आगारेहिं हेतूहिं उवमाहिं दिट्ठंतेहिं वण्णेहिं संठाणेहिं पमाणेहिं पडोयारेहिं जं समयं जाणति तं समयं पासइ जं समयं पासइ तं समयं जाणइ ?, गो० ! नो तिणट्ठे समट्ठे, से केणट्ठेणं भंते ! एवं वुच्चति केवली णं इमं रयणप्पभं पुढविं आगारेहिं० जं समयं जाणति नो तं समयं पासति जं समयं पा० नो तं समयं जा० ?, गो० ! सागारे से नाणे भवति अनागारे से दंसणे भवति, से तेणट्ठेणं जाव णो तं समयं जाणाति एवं जाव अहे सत्तमं । एवं सोहम्मकप्पं जाव अच्चुयं, गेविज्जगविमाणा अनुत्तरविमाणा, ईसीपब्भारं पुढवीं, परमाणुं पोग्गलं दुपदेसियं खंधं जाव अनंतपदेसियं खंधं,*

केवली णं भंते ! इमं रयणप्पभं पुढविं अनागारेहिं अहेतूहिं अनुवमाहिं अदिट्ठंतेहिं अवण्णेहिं असंठाणेहिं अपमाणेहिं अपडोयारेहिं पासति न जाणति ?, हंता ! गो० ! केवली णं इमं रयणप्पभं पुढविं अनागारेहिं जाव पासति न जाणति, से केणट्ठेणं भंते ! एवं वु० केवली इमं रयणप्पभं पुढविं अनागारेहिं जाव पासति न जाणति, गो० ! अनागारे से दंसणे भवति सागारे से नाणे भवति, से ते० गो० ! एवं वुच्चइ–केवली णं इमं रयणप्पभं पुढविं अनागारे हिं जाव पासति ण जाणति, एवं जाव ईसिप्पभारं पुढविं परमाणुं पोग्गलं अनंतपदेसियं खंधं पासति न जाणति ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ. 'केवली णं भंते!' इत्यादि, केवलं ज्ञानं दर्शनं चास्यास्तीति केवली णमिति वाक्यालङ्कृतौ भदन्त!–परमकल्याणयोगिन्! 'इमां' प्रत्यकक्षत उपलभ्यमानां रत्नप्रभाभिधां पृथिवीं 'आगारेहिं' ति आकारभेदा यथा इयं रत्नप्रभापृथिवी त्रिकाण्डा खरकाण्डपङ्ककाण्डअप्काण्डभेदात् खरकाण्डमपि षोडशभेदं, तद्यथा–प्रथमं योजनसहस्रमानंरत्नकाण्डं तदनन्तरं योजनसहस्रप्रमाणमेव वज्रकाण्डं तस्याप्यधो योजनसहस्रमानं वैडूर्यकाण्डमित्यादि, 'हेऊहिं' ति हेतवः–उपपत्तयः, ताश्चेमाः–

केन कारणेन रत्नप्रभेत्यभिधधीयते?, उच्यते, यस्मादस्याः रत्नमयं काण्डं तस्मात् रत्नप्रभा, रत्नानि प्रभा–स्वरूपं यस्याःसा रत्नप्रभेति व्युत्पत्तेरिति, 'उवमाहि' इति उपमाभिः, 'माङ् माने' अस्मादुपूर्वात् उपमितं उपमा 'उपसर्गादात'; इत्यङ्प्रत्ययः, ताश्चैवं–रत्नप्रभायां रत्नप्रभादीनि काण्डानि वर्णविभागेन कीदृशानि?, पद्मपागेन्दुसदृशानि इत्यादि, 'दिट्ठंतेहिं' ति दृष्टः अन्तः–परिच्छेदो विवक्षितसाध्यसाधनयोःसम्बन्धस्याविनाभावरूपस्य प्रमाणेन यत्र ते दृष्टान्तास्तैर्यथा घटः स्वगतैर्धर्म्मैः पृथुबुध्नोदराद्याकारादिरूपैरनुगतः परधर्मेभ्यश्चपटादिगतेभ्यो व्यतिरिक्त उपलभ्यते इति पटादिभ्यः पृथक् वस्त्वन्तरं तथैवैषाऽपि रत्नप्रभा स्वगतभेदैरनुषक्ता शर्करा-प्रभादिभेदेभ्यश्चत व्यतिरिक्तेति ताभ्यः पृथक् वस्त्वन्तरमित्यादि,

'वण्णेहिं' ति शुक्लादिवर्णविभागेन तेषामेव उत्कर्षापपकर्षसङ्ख्येयासंख्येनन्तगुणविभागेन च, वर्णग्रहणमुपलक्षणं तेन गन्धसस्पर्शविभागेन चेति द्रष्टचव्यं, 'संठाणेहिं' ति यानि तस्यां रत्नप्रभायां भवननारकादीनां संस्थानानि, तद्यथा–'ते णं भवणा बाहिं वट्टा अंतो चउरंसा अहे पुक्खर-कण्णियासंठाणसंठिया' तथा 'ते णं नरया अंतो वट्टा बाहिं चउरंसा अहे खुरप्पसंठाणसंठिया' इत्यादि, तथा 'पमाणेहिं' ति प्रमाणानि, 'अहे' त्यादि परिमाणानि, यथा 'असीउत्तपरजोयणसयस-हस्सबाहल्ला रज्जुप्पमाणमेत्ता आयमविक्खंभेण' मित्यादि, 'पडोयारेहिं' ति प्रति–सर्वतः सामास्त्येन अवतीर्यते–व्याप्यते यैस्ते प्रत्यवताराः ते चात्र धनोदध्यादिवलया वदितव्याः, ते हि सर्वासु दिक्षु विदिक्षु चेमां रत्नप्रभां परिक्षिप्य व्यवस्थितास्तैः, 'जं समय' मिति 'कालध्वनोव्याप्ता' वित्यधिकरण-भावेऽपि द्वितीया, ततोऽयमर्थः–यस्मिन् समये जानाति–आकारादिविशिष्टां परिच्छिनत्ति 'तं समयं' ति तस्मिन् समये पश्यति–केवलदर्शनविषयीकरोति?, भगवानाह–

गौतम! नायमर्थः समर्थो, नायमर्थो युक्तयुपपन्न इति भावः, तत्त्वमजानानः पृच्छति–'से केणट्ठेणं भंते!' इत्यादि, 'से' इति अथशब्दार्थे अथ केनार्थेन–कारणेन भदन्त! एवं–पूर्वोक्तेन प्रकारेणोच्यते, तमेव प्रकारं दर्शयति–'केवली ण' मित्यादि, भगवानाह–'गौतमे' त्यादि, अस्यायं भावार्थः–इह ज्ञानेन परिच्छिदन् जानातीत्युच्यते, दर्शनेन परिच्छन्दन् पश्यतीति, ज्ञानं च 'से' तस्य भगवत;साकारमन्यथा ज्ञानत्वायोगात्, विशेषानभिगृण्हानो हि बोधो ज्ञानं, 'सविशेषं पुनर्ज्ञान' मिति वचनात्,

दर्शनमनाकारं 'निर्विशेषं विशेषाणां, ग्रहो दर्शनमुच्यते' इति वचनात्, तत्पर ज्ञात्रानं च दर्शनं च जीवस्य खण्डशो नोपजायते, यथा कतिपयेषु प्रदेशेषु ज्ञानं कतिपयेषु प्रदेशेषु दर्शनं, तथास्वाभाव्यात्, किन्तु यदा ज्ञानं तदा सामस्त्येन ज्ञानमेव यदा दर्शनं तदा सामस्त्येन दर्श-नमेव, ज्ञानदर्शने च साकारानाकारतया परस्परं विरुद्धे, छथायातपयोरिवेतरेतराभावनान्तरी-यकत्वात्, ततो यस्मिन् समये जानाति तस्मिन् समये न पश्यति, यस्मिन् समये पश्यति तस्मिन् समये न जानाति, एतदेवाह–

Jain Education International   For Private & Personal Use Only   www.jainelibrary.org

'से एएणट्ठेणं' इत्यादि, एतेन यदवादीद् वादी सिद्धसेनदिवाकरो यथा- 'केवली भगवान् युगपत् जानाति पश्यति चे'ति, तदप्यपास्तमवगन्तव्यं, अनेन सूत्रेण साक्षात् युक्तिपूर्वं ज्ञानदर्शन-पयोगस्य क्रमशो व्यवस्थापितत्वात्, एवं शर्कराप्रभावालुकाप्रभापङ्कप्रभाधूमप्रभातमः-प्रभातमस्तमःप्रभासौधर्मेशानसनत्कुमारमाहेन्द्रब्रह्मलोकलान्तकशुक्रसहस्रानतप्राणता-रणाच्युतकल्पग्रैवेयकविमानानुत्तरविमानेषत्प्राग्भराभिधपृथिवीपरमाणुपुद्गलद्विप्रदेशिक स्कन्धयावदनन्तप्रदेशिकस्कन्धविषयणायपि सूत्राणि भावनीयानि, ननु यदि ज्ञानदर्शने साकार नाकारतया पृथगेवं व्यवसअथापियतविषये तत इदमायातं-

यदा भगवान् केवली रत्नप्रभादिकमाकाराद्यभावेन परिच्छिनत्ति तदा स पश्यतीत्येवं वक्तव्यो न जानातीति, सत्यमेतत् तथा चाह- 'केवली णं भंते ! इमं रयणप्पभं पुढविं अनागारेहिं अहेऊहिं' इत्यादि, प्रायो भावितत्वात्, सुगमं ॥

पदं - ३० - समाप्तम्

पदं - ३१ - संज्ञी

वृ. तदेवमुक्तं पश्यत्ताऽऽख्यं त्रिंशत्तमं पदं, साम्प्रतमेकत्रिंशत्तममारभ्यते, अस्य चायमभि-सम्बन्धः-इहानन्तरपदे ज्ञानपरिणामविशेषःप्रतिपादितः, इह तु परिणामसाम्याद् गतिपरिणा-मविशेष एव संज्ञापरिणामः प्रतिपाद्यते, तत्र चेदमादिसूत्रम्-

मू. (५७५) *जीवा णं भंते ! किं सण्णी असण्णी नोसण्णीनोअसण्णी ?, गो० ! जीवा सण्णीवि असण्णीवि नोसण्णीनोअसण्णीवि। नेरइयाणं पुच्छा, गो० ! नेरइया सण्णीवि असण्णीवि नो नोसण्णीनोअसण्णी, एवं असुरकुमारा जाव थणियकुमारा, पुढविकाइयाणं पुच्छा, गो० ! नो सण्णी असण्णी, नो नोसण्णीनोअसण्णी, एवं बेइंदियतेइंदियचउरिंदियावि, मणूसा जहा जीवा, पंचिंदियतिरिक्खजोणिया वाणमंतरा य जहा नेरइया, जोतिसियवेमाणिया सण्णी नो असण्णी नो नोसण्णीनोअसण्णी, सिद्धाणं पुच्छा, गो० ! नो सण्णी नो असण्णी नोसण्णिनोअसण्णी,*

वृ. 'जीवा णं भंते ! किं सण्णी' इत्यादि, संज्ञानं संज्ञा-'उपसर्गादातः' इत्यङ्प्रत्ययः भूतभवद्भाविभावस्वभावपर्यालोचनं सा विद्यते येषां ते संज्ञिनः, विशिष्टस्मरणादिरूपम-नोविज्ञानभाज इत्यर्थः, यथोक्तमनोविज्ञानविकला असंज्ञिनः, ते च एकेन्द्रियविकलेन्द्रिय सम्मूर्च्छिमपञ्चेन्द्रिया वेदितव्याः, अथवा संज्ञायते-सम्यक् परिच्छिद्यते पूर्वोपलब्धो वर्त्तमानो भावी च पदार्थो यया सा संज्ञा, भिदादिपाठाभ्युपगमात् करणे धञ्, विशिष्टा मनोवृत्तिरित्यर्थः, सा विद्यते येषां ते संज्ञिनः समनस्का इत्यर्थः तद्विपरीता असंज्ञिनोऽमनस्का इत्यर्थः,

ते चैकेन्द्रियादय एवानन्तरोदिताः प्रतिपत्तव्याः, एकेन्द्रियाणां प्रायः सर्वथा मनोवृत्तरभावात्, द्वीन्द्रियादीनां तु विशिष्टमनोवृत्तेरभावः, ते हि द्वीन्द्रियादयो वार्त्तमानिकमेवार्थं शब्दादिकं शब्दादिरूपतया संविदन्ति, न भूतं भाविनं चेति, केवली सिद्धश्चोभयप्रतिषेधविषयः, केवली हि यद्यपि मनोद्रव्यसम्बन्धभाक् तथापि न तैरसौ भूतभवद्भाविभावस्वभावपर्यालोचनं करोति, किन्तु क्षीणसकलज्ञानदर्शनावरणत्वात् पर्यालोचनमन्तरेणैव केवलज्ञानेन केवलदर्शनेन च साक्षात्समस्तं जानाति पश्यति च, ततो न संज्ञी नाप्यसंज्ञी, सकलकालकलाकलापव्यवच्छिन्नसमस्त-द्रव्यपर्यायप्रपञ्चसाक्षात्करणप्रवणज्ञानसमन्वितत्वात्, सिद्धोऽपि न संज्ञी, द्रव्यमनसोऽप्यभावात्,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नाप्यसंज्ञी सर्वज्ञत्वात्, तदेवं सामान्यतो जीवपदे संज्ञिनोऽसंभिनो नोसंज्ञिनोअसंज्ञिनश्च लभ्यन्ते इति, भगवान् तथैव प्रतिसमाधानमाह- 'गोतमे'त्यादि, जीवाः संज्ञिनोऽपि नैरयिकादीनां संज्ञिनां भावाद्, असंज्ञिनोऽपि पृथिव्यादीनामसंज्ञिनां भावात्, नोसंज्ञिनोअसंज्ञिनोऽपि सिद्धकेवलिनां नोसंज्ञिनोअसंज्ञिनामपि भावात्, ।

एतानेव चतुर्विंशतिदण्डकक्रमेणं चिन्तयति- 'नेरइया ण' मित्यादि, इह ये नैरयिकाः संज्ञिभ्य उत्पद्यन्ते ते संज्ञिनो व्यवह्रियन्ते इतरे त्वसंज्ञिनः न च नैरयिकाणां केवलिभावो घटते, चारित्रप्रतिपत्तेरभावात्, तत उक्तं नैरयिकाःसंज्ञिनोऽप्यसंज्ञिनोऽपि, नो नोसंज्ञिनोनोअसंज्ञिनः, एवमसुरकुमारादयोऽपि स्तनितकुमारपर्यवसाना भवनपतयो वक्तव्याः, तेषामप्यसंज्ञिनोऽप्युत्पादात् केवलित्वाभावाच्च, 'मणूसा जहा जीव' त्ति मनुष्याः प्राक् यथा जीवा उक्तास्तथा वक्तव्याः, संज्ञिनोऽपि असंज्ञिनोऽपि नोसंज्ञिनोअसंज्ञिनोऽपि वक्तव्या इति भावः, तत्र ये गर्भव्युत्क्रान्तास्ते संज्ञिनः सम्मूर्च्छिमा असंज्ञिनः केवलिनो नोसंज्ञिनोअसंज्ञिनः, 'पञ्चेन्द्रियतिरिक्खजोणियवाणमंतरा जहा नेरइया' इति, पञ्चेन्द्रियातिर्यग्योनिका व्यन्तराश्च यथा नैरयिका उक्तास्तथा वक्तव्याः, संज्ञिनोऽपि असंज्ञिनोऽपि नो नोसंज्ञिनोअसंज्ञिनः वक्तव्या इति भावः तत्र पञ्चेन्द्रियतिर्यग्योनिकाः सम्मूर्च्छिमाः असंज्ञिनः गर्भव्युत्क्रान्ताः संज्ञिनः, व्यन्तरा असंज्ञिभ्य उत्पन्ना असंज्ञिन; संज्ञिभ्य उत्पन्नाः संज्ञिनः, उभयेऽपि चारित्रप्रतिपत्तेरभावात् नो नोसंज्ञिनोअसंज्ञिनः, ज्योतिष्कवैमानिकाः संज्ञिन एव, नो असंज्ञिनः, असंज्ञिभ्य उत्पादाभावात्, नो नोसंज्ञिनोअसंज्ञिनश्चारित्रप्रतिपत्तेरभावात्, सिद्धास्तु प्रागुक्तयुक्तितो नो संज्ञिनो नाप्यसंज्ञिनः किन्तु नोसंज्ञिनोअसंज्ञिनः,

मू. (५७६) *नेरइयतिरियमणुया य नवणयरगसुरा इ सण्णीऽसण्णी य ।*
विगलिंदिया असण्णी जोकतिसवेमाणिया सण्णी ॥

वृ. अत्रैव सुखप्रतिपत्तये सङ्ग्रहणिगाथामाह- 'नेरइय' इत्यादि, नैरयिकाः 'तिरिय' त्ति तिर्यक्पञ्चेन्द्रिया मनुष्या वनचरा-व्यन्तरा असुरादयः-समस्ता भवनपतयः प्रत्येकं संज्ञिनोऽसंज्ञिनश्च वक्तव्याः एतच्चानन्तरमेव भावितं, विकलेन्द्रिया-एकद्वित्रिचतुरिन्द्रिया असंज्ञिनो ज्योतिष्कवैमानिकाः संज्ञिन इति ॥(

पदं - ३१ - समाप्तम्

पदं - ३२ - "संयम्"

वृ. तदेवमुक्तमेकत्रिंशत्तमं पदं, अधुना द्वात्रिंशत्तमं पदमारभ्यते, तस्य चायमभिसम्बन्धः-इहानन्तरपदे संज्ञिपरिणाम उक्तः, इह तु चारित्रपरिणामविशेषः संयमः प्रतिपाद्यते, संयमो नाम निरवद्येतरयोगप्रवृत्तिनिवृत्तिरूपः, तत्र चेदमादिसूत्रम्-

मू. (५७७) *जीवा णं भंते ! किं संजया असंजया संजया २ नोसंजयानोअसंजयानोसंजयासंजया ?, गो० ! जीवा संजयावि १ असंजया वि २ संजयासंजयावि ३ नोसंजयानोअसंजयानोसंजयासंजयावि ४,*

नेरइया णं भंते ! पुच्छा, गो० ! नेरइया नो संजया असंजया नोसंजयासंजया नो नोसंजयनोअसंजयनोसंजयासंजया, एवं जाव चउरिंदि,

पंचिंदियतिरिक्खजोणियाणं पुच्छा, गो० ! पंचिंदियतिरिक्खजोणिता नो संजता असंजतावि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

संजतासंजतावि नो नोसंजतनोअसंजतनोसंजतासंजतावि, मणुस्साणं पुच्छा, गो० ! मणूसा संजतावि असंजतावि संजतासंजतावि नो नोसंजतनोअसंजतनोसंजतासंजता,

वाणमंतरजोतिसियवेमाणिया जहा नेरइया, सिद्धा णं पुच्छा गो० ! सिद्धा नो संजता १ नो असंजता २ नो संजतासंजता ३ नोसंजतनोअसंजतनोसंजतासंजता ४ ॥

वृ. 'जीवा णं भंते !' इत्यादि, संयमच्छन्ति स्म–सर्वसावद्ययोगेभ्यः सम्यगुपरमन्ति स्म अर्थात् निरवद्ययोगेषु चारित्रपरिणामस्फातिहेतुषु वर्त्तन्ते स्म इति संयताः 'गत्यर्थनित्याकर्मका' दिति कर्त्तरि क्तप्रत्ययः हिंसादिपापस्थाननिवृत्ता इत्यर्थः, तद्विपरीता असंयताः हिंसादीनां देशतो निवृत्ताः संयतासंयताः, त्रितयप्रतिषेधविषयाः सिद्धाः, कथमिति चेत्, उच्यते, उक्तमिह संयमो नाम निरवद्येतरयोगप्रवृत्तिनिवृत्तिरूपः ततः संयतादिपर्यायो योगाश्रयः, सिद्धाश्च भगवन्तो योगातीताः शरीरमनसोऽभावादतस्त्रतयप्रतिषेधविषयाः, एवं च सामान्यतो जीवपदे चतुष्टयमपि घटते, तथा चाह–'गोयमे' त्यादि, गौतम !जीवाःसंयता अपि साधूनां संयतत्वात्, असंयता अपि नैरयिका-दीनामसंयतत्वात्, संयतासंयता अपि पञ्चेन्द्रियतिरश्चां मनुष्याणां च देशतःसंयमस्य भावात्, नोसंयतनोअसंयतनोसंयतासंयता अपि सिद्धानां त्रयस्यापि प्रतिषेधात्, चतुर्विंशतिदण्डकसूत्राणि सुगमानि ।

मू. (५७८) *"संजयअसंजय मीसगा य जीवा तहेव मणुया य ।*
संजतरहिया तिरिया सेसा अस्संजता होंति ॥"

वृ. अत्रैवं सङ्ग्रहणिगाथामाह–'संयते' त्यादि, संयता असंयता मिश्रकाश्च–संयतासंयता जीवास्तथैव मनुष्याश्च, किमुक्तं भवति ?–जीवपदम मनुष्यपदे च एतानि त्रीण्यपि पदानि घटन्ते, नतु न घटन्ते इत्येवंपरमेतत् सूत्रं, अन्यथा जीवपदे त्रितयप्रतिषेधरूपं चतुर्थमपि पदं घटत एव, यथोक्तं प्राक्, तथा संयतरहिता उपलणमेतत् त्रितयप्रतिषेधरहिताश्च तिर्यञ्चः–तिर्यक्पञ्चेन्द्रियाः, आह–

कथं संयतपदरहितास्तिर्यक्पञ्चेन्द्रियाः ?, यावता तेषामपि संयतत्वमुपपद्यते एव, तथाहि–संयतत्वं नाम निरवद्येतरयोगप्रवृत्तिनिवृत्त्यात्मकं, ते च निरवद्येतरयोगेषु प्रवृत्तिनिवृत्ती तिरश्चामपि सम्भवतः, यतश्चरमकालेऽपि चतुर्विधस्याप्याहारस्य प्रत्याख्यानं कृत्वा शुभेषु योगेषु वर्त्तमाना दृश्यन्ते, अन्यच्च सिद्धान्ते तत्र तत्र प्रदेशे महाव्रतान्यप्यात्मन्यारोपयन्तः श्रूयन्ते, उक्तं च–

॥ १ ॥ "तिरियाणं चारित्तं निवारितं तह य अह पुणो तेसिं
सुव्वइ बहुयाणं चिय महव्वयारोवणं समए ॥"

तदेतदयुक्तं, सम्यग्वस्तुतत्त्वापरिज्ञानात्, संयतत्वमिह निरवद्येतरयोगप्रवृत्तिनिवृ–त्तिरूपमान्तरचारित्रपरिणामानुषक्तभगवन्तव्यं, न शेष, न च तेषां कृतचतुर्विधाहारप्रत्याख्या-नानामपि महाव्रतान्यारोपयतां भवप्रत्ययादेव चरणपरिणाम उपजायते, स ह्यचिन्त्यचिन्तामणिकल्पे मनुष्यभव एव, यदि परं कर्मक्षयोपशमाद् भवति, नान्यथा, अत एवायमतिदुर्लभो गीयते भगवद्भिः, अथ कथमवसीयते न तिरश्चां तथा चेष्टमानानामप्यान्तरश्चारित्रपरिणामः ?, उच्यते, केवलज्ञानाद्य-श्रवणात्, यदि हि तिरश्चामपि चरणपरिणामस्सम्भवेत् तत् क्वचित् कदाचित् कस्यचिदुत्कर्षतो भावतो मनःपर्यायज्ञानं केवलज्ञानं वा श्रूयेत, तयोश्चारित्रपरिणामनिबन्धनत्वात्, न च श्रूयते, तस्मादवसीयते–न तेषां चारित्रपरिणामः, उक्तं च–

Jain Education International For Private & Personal Use Only www.jainelibrary.org

॥१॥ "न महव्वयसम्भावेवि चरणपरिणामसंभवो तेसिं।
न बहुगुणाणंपि जओ केवलसंभूइ परिणामो ॥"

पदं – ३२ – समाप्तम्

मुनि दीपरत्नसागरेण संशोधिता सम्पादिता प्रज्ञापनाउपाङ्गसूत्रे द्वात्रिंशतमपदस्य मलयगिरिआचार्येण विरचिता टीका परिसमाप्ता।

पदं – ३३ – "अवधिः"

वृ. तदेवमुक्तं द्वात्रिंशत्तमं पदे, सम्प्रति त्रयस्त्रिंशत्तममारभ्यते, अस्य चायमभिसम्बन्धः– इहानन्तरपदे चारित्रपरिणामविशेषः संयमः प्रतिपादितः, इह तु ज्ञानपरिणामविशेषः खल्ववधिःप्रतिपाद्यते, इत्यनेन सम्बन्धेनायातस्यास्यावधिविषयमधिकारद्वारमाह–

मू. (५७९) *भेदविसयसंठाणे अब्भिंतरबाहिरे य देसोही।
ओहिस्स य खयवुड्ढी पडिवाई चेव अपडिवाई॥"*

वृ. 'भेयविसये' त्यादि, अवधेः–अवधिज्ञानस्य प्रागूनिरूपतिशब्दार्थस्य प्रथमं भेदो वक्तव्यः, ततो विषयस्तदनन्तरं संस्थानं–अवधिना द्योतितस्य क्षेत्रस्य यस्तप्रादिरूप आकारविशेषः सोऽवधिनिबन्धन इत्यवधेः संस्थानत्वेन व्यपदिश्यते, तथा द्विविधोऽवधिर्वक्तव्यः, तद्यथा– अभ्यन्तरो बाह्यश्च, तत्र योऽवधिः सर्वासु दिक्षु स्वद्योत्यं क्षेत्रं प्रकाशयति अवधिमता च सह सातत्येन ततः स्वद्योत्यं क्षेत्रं सम्बद्धं सोऽभ्यन्तरावधि, एतद्विपरीतो बाह्यवधिः, स च द्विधा, तद्यथा–अन्तगतो मध्यगतश्च,

अथान्तगत इति कः शब्दार्थः ?, उच्यते, इह पूर्वाचार्यप्रदर्शितमर्थत्रयं अन्ते–आत्मप्रदेशानां पर्यन्ते गतः–स्थितोऽन्तगतः, काऽत्र भावनेति चेतु, उच्यते, इहावधिरुत्पद्यमानः कोऽपि स्पर्द्धक-रूपतयोत्पद्यते, स्पर्द्धकं च नामावधिज्ञानप्रभाया गवाक्षजालादिद्वारविनिर्गतप्रदीपप्रभाया इव प्रतिनियतो विच्छेदविशेषः, तथा चाह जिनभद्रगणिक्षमाश्रमणः स्वोपज्ञाभाष्यटीकायां– "स्पर्द्धकमवधिविच्छेदविशेष" इति, तानि च एकजीवस्यासङ्ख्येयानि संख्येयानि च भवन्ति, यत उक्तं मूलावश्यकप्रथमपीढिकायाम्–'फड्डा य असंखेज्ञा संखिज्ञा यावि एगजीवस्स' इति, तानि च विचित्ररूपाणि कानिचित्पर्यन्तवर्त्तिष्वात्मप्रदेशेषूत्पद्यन्ते, तत्रापि कानिचित्पुरतः कानिचित्पृ-ष्ठतः कानिचिदधोभागे कानिचिदुपरितनभागे कानिचिन्मध्यवर्त्तिष्वात्मप्रदेशेष्वेवं योऽवधिरुपजायते स आत्मनः पर्यन्ते सल्थित इतिकृत्वा अनन्तग इत्यभिधीयते, तैरेवपर्यन्तवर्त्तिभिरात्म- प्रदेशैः साक्षादवबोधात्',

अथवा औदारिकशरीरस्यान्ते गतः–स्थितोऽन्तगतः, औदारिकशरीरमधिकृत्य कदाचि-देकया दिशोपलम्भात्, इदमपि स्पर्द्धकरूपमवधिज्ञानं, अथवा सर्वेषामप्यात्पमर्देशानां क्षयोपश-मभावेऽपि औदारिकशरीरस्यान्ते कयाचिदेकया दिशा यद्वशादुपलभ्यते सोऽप्यन्तगतः आह–यदि सर्वेषामप्यात्मप्रदेशानां क्षयोपशमस्ततः सर्वतः किं न पश्यति ?, उच्यते, एकदिशैव क्षयोपशम-सम्भवात्, विचित्रो हि दशाद्यपेक्षया कर्म्मणां क्षयोपशमः, ततः सर्वेषामप्यात्मप्रदेशानामित्थंभूत एव स्वसामग्रीवशात् क्षयोपशमः संवृत्तो यदौदारिकशरीरमपेक्ष्य कयाचिद्विवक्षितया एकया दिशा पश्यतीति, तथा चोक्तं नन्द्यध्ययनचूर्णो–'ओरालियसरीरंते ठियं गयंति एगट्ठं, तं वा अप्पप्पए-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सफड्डगावहि एगदिसोवलंभाओ अंतगयमोहिनाणं भन्नइ, अहवा सव्वप्पएऐसेसु विसुद्धेसुवि ओरालियसरीरगंतेण एगदिसि पासणा गयंति अंतगयंति भण्णइ' इति, एष द्वितीयः, तृतीयः पुनरयं-एगदिग्भाविना तेनावधिना यदुद्योतितं त्रक्षेत्रं तस्यान्ते वर्त्तते अवधिरवधिज्ञानवतस्तदन्ते वर्त्तमानत्वात्, ततोऽन्ते एकदिग्गतस्यावधिविषयलस्य पर्यन्ते गतः-स्थितोऽन्तगत इति,

अन्तगतश्चावधिः त्रिधा, तद्यथा-पुरतोऽन्तगतः पृष्ठतोऽन्तगतः पार्श्वतोऽन्तगतः, तत्र यथा कश्चित्पुरुषो हस्तगृहीतया दीपिकया पुरतः प्रेर्यमाणया पुरत एव पश्यति, नान्यत्र, एवं येनावधिना तथाविधक्षयोपशमभावतः पुरत एव सङ्ख्येयान्यसङ्ख्येयानि वा योजनानि पश्यति नान्यत्र सोऽवधिः पुरतोऽन्तगत इत्यभिधीयते, तथा स एव पुरुषो यथा पृष्ठतो हस्तेन ध्रियमाणया दीपिकया पृष्ठत एव पश्यतेयंव येनावधिना पृष्ठत एव सङ्ख्येयान्यसङ्ख्येयानि वा योजनानि पश्यति स पृष्ठतोऽन्तगतो, येन तु पार्श्वत एकतो द्वाभ्यां वा सङ्ख्येयान्सङ्ख्येयानि वा योजनानि पश्यति स पार्श्वतोऽन्तगत इति, उक्तं च नन्द्यध्ययनचूर्णौ-"पुरतोऽतगएणं पुरतो चेव संखेज्ज्ञाणि वा असंखेजज्ञाणि वा जोयणाइं जाणइ पासइ,

मग्गतोऽंतगएणं ओहिनाणेणं मग्गतो चेव' इत्यादि, मध्यगत इत्यात्रि त्रिधा व्याख्यानं, इह मध्यं प्रसिद्धं दण्डादिमध्यवत्, तत्रात्मप्रदेशानां मध्ये मध्यवर्त्तिष्वात्मप्रदेशेषु गतः-स्थितो मध्यगतः अयं च स्पर्द्धकरूपः सर्वदिगुपलम्भकारणं, मध्यवर्त्तिनामात्मप्रदे ज्ञानामवधिरवसेयः, अथवा सर्वेषामप्यात्मप्रदशानां क्षयोपशमभावेऽपि औदारिकशरीरमध्यभागेनोपलब्धिः स मध्ये गतो मध्यगतः, उक्तं च नन्द्यध्ययनचूर्णौ-"ओरालियसरीरमज्झे फड्डगविसुद्धीओ सव्वायप्पए-सविसुद्धीओ वा सव्वदिसोवलंभत्तणओ मज्झगतोत्ति भण्णइ' इति, अथवा तेनवधिना यदुद्योतितं क्षेत्रं सर्वासु दिक्षु तस्य मध्ये-मध्य भागे स्थितो मध्यगतः अवधिज्ञानिस्तदुद्योतितक्षेत्रमध्यवर्त्तित्वात्, आह च नंदिचूर्णिकृदेव-"अहवा उवलद्धिखेत्तस्स अवहिपुरिसो मज्झगतोत्ति अतो वा मज्झगतो ओही भण्णइ' इति, इह व्याख्यनत्रेऽपि यदाऽवधिना द्योतितं क्षेत्रमवधिमता सम्बद्धं भवति तदा सोऽभ्यन्तराधिर्मतः, सर्वदिगुपलब्धिक्षेत्रमध्यवर्त्तित्वात्, एष चेह न ग्राह्योऽभ्यन्तराव-धावस्यान्तर्भावात्,

यदा तु तदुद्योतितं क्षेत्रमपान्तराले व्यवच्छिन्नत्वादवधिमता सम्बद्धं न भवति तदा बाह्योऽवधिः एष चेह ग्राह्य;, प्रस्तुतत्वात, तथा 'देसोही' इति देशावधिर्वक्तव्यः, उपलक्षणमेतत्, प्रतिपक्षभूतः सर्वावधिश्च, अथ किंस्वरूपो देशावधिः किंस्वरूपो वा सर्वावधिरिति चेत्, उच्यते, इहावधिस्त्रिविधो भवति, तद्यथा-सर्वजघन्यो मध्यमः सर्वोत्कृष्टश्च, तत्र यः सर्वजघन्यः स द्रव्यतोऽनन्तानि तैजसभाषापा- न्तरालवर्त्तीनि द्रयाणि क्षेत्रतोऽङ्गुलसङ्ख्येयभागं क्षेत्रं कालतोऽतीतमनागतं चावलिकाया असङ्ख्येयभागं, इहावधिः क्षेत्रं कालं च स्वरूपतः साक्षान्न जानाति, तयोरमूर्त्तत्वात्, अवधेश्च रूपिविषयत्वात् 'रूपिष्ववधे' रिति वचनात्,

इह क्षेत्रकालदरअशनमुपचारतो वेदितव्यं, किमुक्तं भवति ?-एतावति क्षेत्रे काले च यानि द्रव्याणि तानि जानातीति, भावोतोऽनन्तान् पर्यायान् जानाति, प्रतिद्रव्यं जघन्यपदेऽपि चतुर्णां रूपरसगन्धस्पर्शरूपाणां पर्यायाणमवगमात्, 'दो पज्ञवे दुगुणिए सव्वजहण्णे उ पिच्छए (ओही)। 'ते उ वन्नाईया चउरो' द्वौ पर्यवौ द्विगुणितौ सर्वजघन्यौ तु प्रेक्षतेऽवधिः। ते तु वर्णादिका-श्चत्वारः इति वचनात्, द्रव्याणां चानन्तत्वात्, अत ऊर्ध्वं तु प्रदेशवृध्या समयवृध्या पर्यायवृध्या

Jain Education International For Private & Personal Use Only www.jainelibrary.org

च प्रवर्द्धमानोऽवधिर्मध्यमो वेदितव्यः स च तावत् यावत्सर्वोत्कृष्टः परमावधिर्न भवति, सर्वोत्कृष्टः परमावधिर्द्रव्यतः सर्वाणि रूपिद्रव्याणि जानाति, क्षेत्रतोऽलोके लोकमात्राणि खण्डानि, कालतोऽतीतानामगताश्चासङ्ख्येया उत्सर्प्पिण्यवसर्प्पिणीर्भावतोऽनन्तान् पर्यायान्, प्रतिद्रव्यं सङ्ख्येयानामसङ्ख्येयानां च पर्यायाणामवगमात्,

॥१॥ "एगं दव्वं पेच्छं खंधमणुं वा स पज्ञवे तस्स ।
उक्कोसमसंखिज्ञे संखेज्ञे पेच्छए कोई ॥"

इति वचनात्, तत्र सर्वजघन्यो मध्यमश्च देशावधिः, सर्वोत्कृष्टस्तु परमावधिः सर्वावधिः तथाऽवधेः क्षयवृद्धी वक्तव्ये, किमुक्तं भवति ?–हीयमानकः प्रवर्द्धमानकश्चावधिर्वक्तव्य इति, तत्र तथाविधसामग्रयभवतः पूर्वावस्थातो हानिमुपगच्छन् हीयमानकः, उक्तं च–"हीयमाणयं पुव्वावत्थातो अहोऽहो हस्समाणं'ति, वर्द्धमानको बहुबहुतरेन्धनप्रक्षेपा- दिभिर्वर्द्धमानज्वाला-कलापइव पूर्वावस्थातो यथायोगं प्रशस्तप्रशस्ततराध्यवसायभावतोऽभिवर्द्धमानः,तथा प्रतिपाती अप्रतिपाती चशब्दस्यानुक्तार्थसमुच्चायकत्वादानुगामिकोऽनानुगामिकश्च वक्तव्यः तत्र प्रतिपतनशीलः प्रतिपाती–य उत्पन्नः सन् क्षयोपशमानुरूपं कियत्कालं स्थित्वा प्रदीप इव सामस्त्येन विध्वंसमुपयाति, अथ हीयमानकप्रतिपातिनोः कः प्रतिविशेषः ?, उच्यते, हीयमानकः पूर्वावस्थातोऽधोऽधो हानिमुपगच्छन्नभिधीयते प्रतिपाती तु निर्मूलमेककालं ध्वंसमुपगच्छन्निति, तथा न प्रतिपाती अप्रतिपाती, यत्केवलत्रानाद्वा मरणादारतो वा न भ्रंशमुप यातीत्यर्थः तथा गच्छन्तं पुरुषं आ–समन्तादनुगच्छतीत्येवंशीलमानुगामि आनुगाम्येवानुगामिकः, स्वार्थे कः प्रत्ययः, अथवा अनुगमः प्रयोजनं यस्य स आनुगामिकः, लोचनवत् गच्छन्तमनुगच्छति सोऽवधिरानुगामिक इति भावः तथा न आनुगामिकोऽनानुगामिकः, श्रृङ्खलाप्रतिबद्धदीप इव यो गच्छन्तं पुरुषं नानुगच्छतीति भावः ॥

मू. (५८०) *कइविहा णं भंते! ओही पन्नत्ता ?, गो० ! दुविहा ओही पन्नत्ता, तं०–भवपच्चइया य खओवसमिया य, दोण्हं भवपच्चइया, तं०–देवाण य नेरइयाण य, दोण्हं खओवसमिया, तं०–मणूसाणं पंचिंदियतिरिक्खजोणियाण य ।*

वृ. तदेवमधिकारप्रतिपादनाय द्वारगाथोपन्यस्ता, सम्प्रति 'यथोद्देशं निर्देश' इति न्यायात् प्रथमतो भेदप्रतिपादनार्थमाह–'कइविहा णं भंते!' इत्यादि, कतिविधो भदन्त! अवधिः प्रज्ञप्तः,सूत्रे स्त्रीत्वनिर्देशःप्राकृतत्वात्, भगवानाह–गौतम ! द्विविधोऽवधिः प्रज्ञप्तः, तद्यथा–'भवपच्चइया य खओवसमिया य' भवप्रत्यकः क्षायोपशमिकश्च, तत्र भवन्ति कर्मवशवर्त्तिनः प्राणिनोऽस्मिन्निति भवो–नारकादिजन्म, 'पुंनाम्नी'ति अधिकरणे घप्रत्ययः, भव एव प्रत्ययः–कारणं यस्य स भवप्रत्ययः, प्रत्ययशब्दश्चेह कारणपर्यायः, वर्त्तते च प्रत्ययशब्दः कारणत्वे "प्रत्ययः शपथज्ञान-हेतुविश्वासनिश्चये" इति, स एव स्वार्थिकप्रत्ययविधानात् भवप्रत्ययकः, तथाऽवधिज्ञानाव-रणीयस्य कर्मण उदयावलिकाप्रविष्टस्यांशस्य वेदनेन योऽपगमः स क्षयोऽनुदयावस्थस्या विपाकोदयविष्कम्भणमुपशमः क्षयश्च उपशमश्च क्षयोपशमौ ताभ्यां निर्वृत्तः क्षायोपशमिकः, चशब्दौ स्वगतानेकभेदसूचकौ, तत्र तु यो येषं भवति तं तेषामुपदर्शयति–'दोण्ह'मित्यादि, द्वयोर्जीव-समूहयोर्भवप्रत्ययकः, तद्यथा–देवानां च नारकाणां च, देवा भवनपतिव्यन्तरज्योतिष्कवैमा-निकभेदाच्चतुर्विधाः,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नारका रत्नप्रभादिपृथिवीभेदात् सप्तविधाः, चशब्दौ प्रत्येकं स्वगतानेकभेदसूचकौ, ते चानेकभेदा विषयसंस्थानचिन्तायामग्रे स्वयमेव सूत्रकृतैवोपदर्शयिष्यन्ते, आह-नन्ववधिज्ञानं क्षायोपशमिके भावे वर्त्तते नारकादिभवस्त्वौदयिके तत्कथं देवादीनामवधिज्ञानं भवप्रत्ययमिति व्यपदिश्यते ?, नैष दोषो, यतस्तदपि परमार्थतः क्षायोपशमिकमेव, केवलं स क्षयोपशमो देवनारकभवेष्ववस्यंभावी पक्षिणां गगनगमनलब्धिरिव ततो भवप्रत्ययमिति व्यपदिश्यते, आह च नन्द्यध्ययनचूर्णिकृते-"ननु ओही खओवसमिओ चेव नारगादिभवो से उदइए भावे तओ कहं भवपच्चइओ भण्णइ ?, उच्यते, सोऽवि खवसमिओ चेव, किंतु सो खओवसमो देवनारगभवेसु अवस्सं भवइ, को दिट्ठंतो ? -पक्खीणं आगासगमणं व, तओ भवपच्चइओ भण्णइ'त्ति,

तथा द्वयोः क्षायोपशमिकस्तद्यथा-मनुष्याणां च पञ्चेन्द्रियतिर्यग्योनिजातानां च, अत्रापि चशब्दौ प्रत्येकं स्वगतानकभेदसूचकौ, मनुष्याणां तिर्यक्पञ्चेन्द्रियतिरश्चां चावधिज्ञानं नावश्यंभावि ततः सामान्येऽपि क्षायोपशमिकत्वे भवप्रत्ययादिदं भद्यते, परमार्थतः पुनः सकलमप्यवधिज्ञानं क्षायोपशमकमेवेति । तदेवमुक्तो भेदः, सम्प्रति विषयप्रतिपादनार्थमाह-

मू. (५८१) *नेरइया णं भंते ! केवइयं खेत्तं ओहिणा जाणंति पासंति ?, गो० ! जह० अद्धगाउयं उक्को० चत्तारि गाउयाइं ओहिणा जाणंति पासंति, रयणप्पभापुढविनेरइया णं भंते ! केवतियं खेत्तं ओहिणा जाणंति पासंति ?, गो० ! ज० अद्धुट्ठाइं गाउयाइं उक्को० चत्तारि गाउयाइं०, सक्करप्पभापुढविनेरइया जह० तिण्णि गा० उक्को० अद्धुट्ठाइं गाउ०, वालुयप्पभापुढविनेरइया ज० अड्ढाइज्जाइं गाउ० उ० तिण्णि गाउयाइं ओहिणा जाणंति पासंति, पंकप्पभापुढविनेरइया ज० दोन्नि गाउ० उ० अड्ढाइज्जाइं गा० ओहिणा जा० पा०, धूमप्पभापु० नेर० जह० दिवड्ढं गा उक्को० दो गाउ० ओहिणा जा० पा०, तमापु० ने० ज० गाउयं उ० दिव्ढं गाउयं ओहिना जा० पा०, अधेसत्तमाए पुच्छा, गो० ! जह० अद्धं गाउयं उ० गाउयं ओहिणा जा० पा० ।*

असुरकुमारा णं भंते ! ओहिणा केवइयं खेत्तं जा० पा० ?, गो० ! ज० पणवीसं जोअनाइं उक्को० असंखेज्ज्रे दीवसमुद्दे ओहिणा जा० पा०, नागकुमारा णं ज० पणवीसं जोअनाइं उ० संखेज्ज्रे दीवसमुद्धे ओहिणा जा० पा०, एवं जाव थणियकुमारा । पंचिंदियतिरिक्खजोणिया णं भंते ! केवइयं खेत्तं ओहिणा जाणंति पासंति ?, गो० ! ज० अंगुलस्स असंखेज्ज्रतिभागं उ० असंखेज्ज्रे दीवसमुद्दे, मणूसा णं भंते ! ओहिणा केवतितं खेत्तं जा० पा० ?, गो० ! ज० अंगुलस्स असंखेज्ज्रितिभागं उक्को० असंखेज्ज्राइं अलोए लोयप्पमाणमेत्ताइं खंडाइं ओहिणा जा० पा० ।

वाणमंतरा जहा नागकुमारा, जोइसिया णं भंते ! केवतितं खेत्तं ओ० जा० पा० ? गो० ज० संखेज्ज्रे दीवसमुद्दे उक्कोसेणवि संखेज्ज्रे दीवसमुद्दे, सोहम्मगदेवा णं भंते ! केव० खेत्तं ओ० जा० पा० ?, गो० ! ज० अंगुलस्स अंसंखेज्ज्रतिभागं उक्को० अहे जाव इमीसे रयणप्पभाए हिट्ठिल्ले चरमंते तिरियं जाव असंखिज्ज्रे दीवसमुद्दे उड्ढं जाव समाइं विमाणाइं ओहिणा जाणंति पासंति, एवे ईसाणगदेवावि,

सणंकुमारदेवावि एवं चेव, नवरं जाव अहे दोच्चाए सक्करप्पभाए पुढवीए हिट्ठिल्ले चरमंते, एवं माहिंददेवावि, बंभलोयलंतगदेवा तच्चाए पुढवीए हिट्ठिल्ले चरमंते, महासुक्कसहस्सारगदेवा चउत्थीए पंकप्पभाए पुढवीए हेट्ठिल्ले चरमंते, आणयपाणयआरणच्चुयदेवा अहे जाव पंचमाए धूमप्पभाए हेट्ठिल्ले चरमंते, हेट्ठिमम्झिमगेवेज्ज्रगदेवा अधे जाव छट्ठाए तमाए पुढवीए हेट्ठिल्ले जाव

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चरमंते, उवरिमगेविज्जगदेवा णं भंते ! केवतियं खेत्तं ओहिणा जा० पा० ?, गो० ! ज० अंगुलस्स असंखेज्जतिभागं उ० अधे सत्तमाह हे० च० तिरियं जाव असंखेज्जे दीवसमुद्दे उड्ढं जाव सयाइं विमाणाइं ओ० जा० पा०, अनुत्तरोववाइयदेवा णं भंते ! के० खेत्तं ओ० जा० पा० ?, गो० ! संभिन्नं लोगनालिं ओ० जा० पा०

वृ. 'नेरइया ण'मित्यादि सुगमं, नवरं जघन्येनार्द्धगव्यूतमिति सप्तमपृथिव्यां जघन्यपदमपेक्ष्य, उत्कर्षतश्चत्वारि गव्यूतानि रत्नप्रभायामुत्कृष्टपदमाश्रित्य, अधुना प्रतिपृथिवीषयं चिन्तयन्नाह–'रयणप्पभे'त्यादि, सुगमं, जघन्यपदोत्कृष्टपदविषयसङ्ग्राहिके इमे गाथे–

"अद्धुट्ठ । तिन्नि अद्धाइयाइं ।। दोन्नि य दिवड्ढ मेगं च ।
अद्धं च गाउ कमसो जहन्नतो रयणमाईसुं ।।
चत्तारि गाउयाइं अद्धुट्ठाइं तिगाउयं चेव ।
अद्धाइज्जा दोन्नि दिवड्ढ ।। मेगं च नरएसुं ।। ।। २ ।।"

भवनपतिव्यन्तराणां जघन्यपदे यानि पञ्चविंशतियोजनानि तानि येषां सर्वजघन्यं दशवर्षसहस्रप्रमाणमायुस्तेषां द्रष्टव्यानि, न शेषाणां, आह च भाष्यकृत्–'पणवीसजोयणाइं दसवाससहस्सिया ठिई जेसि'मिति, मनुष्य चिन्तायामुत्कृष्टपदे यान्यलोके लोकप्रमाणमात्राणि खण्डानि असङ्ख्येयानि तानि परमावधिमपेक्ष्य द्रष्टव्यानि, तस्यैवैतावद्विषयसम्भवात्, एतत्सामर्थ्यमात्रमुपवण्यते, यद्येतावति क्षेत्रे द्रष्टव्यं भवति तर्हि पश्यति यावता तन्न विद्यते, अलोके रूपिद्रव्याणासम्भवात्, रूपिद्रव्यविषयश्चावधिः,

केवलमयं विशेषो–यावदद्यापि परिपूर्णं लोकं पश्यति तावदिह स्कन्धानेव पश्यति, यदा पुनरलोकेऽपि प्रसरमवधिरधिरोहति तदा यता यथाऽभिवृद्धिमासादयति तथा तथा लोके सूक्ष्मान् सूक्ष्मतरान् स्कन्धान् पश्यति यावदन्ते परमाणुमपि, उक्तं च–

॥१॥ "सामत्थमेत्तमुत्तं दड्ढव्वं जइ हवेज्ज पेच्छज्ञा ।
उ तं तत्थत्थि जओ सो रूविनिबंधणो भणिओ ।।
॥२॥ वड्ढंतो पुन बाहिं लोगत्थं चेव पासई दव्वं ।
सुहुमयरं सुहुमयरं परमोही जाव परमाणुं ।।"

इत्थंभूतपरमावधिकलितश्च नियमादन्तर्मुहूर्त्तेन केवलालोकलक्ष्मीमालिङ्गति, यत उक्तं–"परमोहीनाणविऊ केवलमंतोमुहुत्तमेत्तेणं" इति,

वैमानिकानां यज्जधन्यपदे अङ्गुलासङ्ख्येयभागप्रमाणं क्षेत्रं उक्तं तत्र पर आह–नन्वङ्गुलासङ्ख्येयभागमात्रक्षेत्रपरिमितोऽवधिः सर्वजघन्यो भवति, सर्वजघन्यश्चावधिस्तिर्यग्मनुष्येष्वेव न शेषेषु, यत आह भाष्यकृत् स्वकृतटीकायाम्–"उत्कृष्टो मनुष्येष्वेव नान्येषु, मनुष्यतिर्यग्योनिष्वेव जघन्यो नान्येषु, शेषाणां मध्यम एवेति" तत्कथमिह सर्वजघन्य उक्तः ?, उच्यते, सौधर्मादिदेवानां पारभविकोऽप्युपपातकालेऽवधिः सम्भवति, स च कदाचित्सवेजघन्योऽपि, उपपातानन्तरं तु तद्भवभजः, ततो न कश्चिद्दोषः, आह च दुष्ष,मान्धकारनिमग्नजिनप्रवचनप्रदीपो जिनभद्रगणिक्षमाश्रमणः–

॥१॥ "वेमाणियाणमंगुलभागमसंखं जहन्नओ होइ ।
उववाए परभविओ तब्भवजो होइ तो पच्छा ।।"

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

उड्ढं जाव सगाइं विमाणाइं'ति ऊर्ध्वं यावत् स्वकीयानि विमानानि, स्वकीयविमानस्तूपध्वजादिकं यावदित्यर्थः,

'संभिन्नं लोगनालिं'ति परिपूर्णं चतुर्दशरज्वात्मिकां लोकनाडीमिति। संस्थानद्वारमाह–

मू. (५८२) *नेरइयाणं भंते! ओही किंसंठिए पं०?, गो०! तप्पागारसंठिए पं०, असुरकुमाराणं पुच्छा, गो०! पल्लगसंठिते, एवं जाव थणियकुमाराणं, पंचिंदियतिरिक्खजोणियाणं पुच्छा, गो०! णाणासंठेणसं०, एवं मणूसाणवि, वाणमंतराणं पुच्छा, गो०! पडहगसं०, जोतिसियाणं पुच्छा?, गो०! झल्लरिसंठाणसं० पं०,*

सोहम्मगदेवाणं पुच्छा, गो०! उड्ढमुयंगागारसंठिए पं०, एवं जाव अच्चुयदेवाणं, गेवेज्जगदेवाणं पुच्छा, गो०! पुप्फचंगेरिसंठिए पं०, अनुत्तरोववाइयाणं पुच्छा, गो०! जवनालियासंठिते ओही, पं०।

वृ. 'नेरइयाण'मित्यादि, 'तप्पागारसंठिए'त्ति तप्रो नाम काष्ठसमुदायविशेषो यो नदीप्रवाहेण प्लाव्यमानो दूरादानीयते स चायतस्त्र्यस्रश्च भवति, तदाकारसंस्थितोऽवधिर्नाकाणां, असुर कुमादारीनां सर्वेषामपि भवनपतीनां पल्लकसंस्थानसंस्थितः, पल्लको नाम लाटदेशे धान्याधारविशेषः, स चोर्ध्वाध आयत उपरि च किञ्चित्सङ्क्षिप्तः, पञ्चेन्द्रियतिर्यग्योनिकानां मनुष्याणां च नानासंस्थानसंस्थितो, यथा स्वयम्भूरमणोदधौ मत्स्याः, अपि च तत्र मत्स्यानां वलयाकारं संस्थानं निषिद्धं तिर्यग्मनुष्यावधेस्तु तदपि भवति, उक्तं च–

॥१॥ "नाणागारो तिरियमणुएसु मच्छा सयंभूरमणेव्व।
तत्थ वलयं निसिद्धं तस्स पुण तयंपि होज्जाहि॥"

व्यन्तराणां पटहसंस्थानसंस्थितः, पटह आतोद्यविशेषः, स च किञ्चिदायत उपर्यधश्च समप्रमाणः, ज्योतिष्कदेवानां झल्लरीसंस्थानसंस्थितः, झल्लरी–चर्मावनद्धविस्तीर्णवलयाकारा आतोद्यविशेषरूपा देशविशेषे प्रसिद्धा, सौधर्मदेवादीनामच्युतदेवपर्यन्तानां मृदङ्गसंस्थान-संस्थितः, मृदङ्गो वाद्यविशेषः, स चाधस्तात् विस्तीर्णं उपरि च तनुकः सुप्रतीतः, ग्रैवेयकदेवानां ग्रथितपुष्पसशिखाकरूपचङ्गेरीसंस्थानसंस्थितः अनुत्तरोपपातिकदेवानां कन्याचोलकापरपर्यायजनालकसंस्थानसंस्थितः, तथा च तप्राकारादीनां व्याख्यानमिदं भाष्यकृदाह–

॥१॥ "तप्पण समागारो तप्पागारो स चाययत्तंसो।
उद्धायतो उ पल्लो उवरिं च स किंचि संखित्तो॥

॥२॥ "नच्चायतो समोविय पडहो हेट्ठोवरि पईतो सो।
चम्मामणवणद्धविच्छिन्नवलयरूवा उ झल्लरिया॥

॥३॥ उद्धायओ मुइंगो हेट्ठा रुंदो तहोवरिं तणुओ।
पुप्फसिहावलिरइया चंगेरी पुप्फचंगेरी॥
–जीवनालओत्ति भण्णइ उब्भ सिरकंचुओ कुमारीए॥"

इति, अनेन च संस्थानप्रतिपादनेनेदमावेदितं द्रष्टव्यं, भवनुपतिव्यन्तराणामूर्ध्वं प्रभूतोऽवधिर्वैमानिकानामधः ज्योतष्कनारकाणां तिर्यक् विचित्रो नरतिरश्चां, आह च–

॥१॥ "भवणवइवणयराणं उड्ढं बहुगो अहो य सेसाणं।
नारगजोइसियाणं तिरियं ओरालिओ चित्तो॥"

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मू. (५८३) *नेरइयाणं भंते ! ओहिस्स किं अंतो० बाहिं०, गो० ! अंतो नो बाहिं, एवं जाव थणियकुमारा, पंचिंदियतिरिक्खजोणियाणं पुच्छा, गो० ! नो अंतो बाहिं, मणूसाणं पुच्छा, गो० ! अंतोवि बाहिंपि, वाणमंतरजोइसियवेमाणियाणं जहा नेरइयाणं ।*

नेरइयाणं भंते ! किं देसोही सव्वोही ?, गो० ! देसोही नो सव्वोही, एवं जाव थणियकुमारा, पंचिंदियतिरिक्खजोणियाणं पुच्छा, गो० ! देसोही नो सव्वोही, मणूसाणं पुच्छा, गो० ! देसोहीवि सव्वोहीवि, वाणमंतरजोइसियवेमाणियाणं जहा नेरइयाणं ।

नेरइयाणं भंते ! ओहि किं आनुगामिते अनानुगामिते वड्ढमाणते हीयमाणए पडिवाई अप्पडिवाई अवट्ठिए अनवट्ठिए ?, गो० ! आनुगामिए नो अनानुगामिए नो वद्धमाणते नो हीयमाणए नो पडिवाई अप्पडिवाई अवट्ठिए नो अणवट्ठिए, एवं जाव थणियकुमाराणं,

पंचिंदियतिरिक्खजोणियाणं पुच्छा, गो० ! आनुगामितेवि जाव अनवट्ठिएवि, एवं मणूसाणवि, वाणमंतरजोतिसियवेमाणियाणं जहा नेरइयाणं

वृ. तथा नैरयिकभवनपतिव्यन्तरज्योतिष्कवैमानिकाः तथाभवस्वाभाव्यादवधेर्मध्यवर्त्तिनो न पुनर्बहिः, किमुक्तं भवति ? – सर्वतःप्रकाशिखसम्बद्धावधयो भवन्ति, न तु स्पर्द्धकावधयो विच्छिन्नावधयो वा, तिर्यक्पञ्चेन्द्रियास्त्ववधेरन्तर्न विद्यन्ते, किन्तु बहिः, अत्राप्येष भावार्थः –तिर्यक्पञ्चेन्द्रियास्तथाभवस्वाभाव्यात् स्पर्द्धकावधयो विच्छिन्नापान्तरालसर्वतःप्रकाश्यवधयो वा भवन्ति, स्पर्द्धकाद्यवधयो वेति भावः, देशावधिसर्वावधिचिन्त्यां मनुष्यवर्जाः सर्वेऽपि देशावधयः, मनुष्यास्तु देशावधयोऽपि सर्वावधयोऽपि, परमावधेरपि तेषां सम्भवात्, ।

आनुगामिकादिचिन्तायां नैरयिकभवनपति व्यन्तरज्योतिष्कवैमानिका आनुगामिका-प्रतिपात्यवस्थितावधयो नत्वानानुगामिकवर्द्धमा ।हीयमानप्रतिपात्यनवस्थितावधयस्तथाभवस्वा-भाव्यात्, तिर्यक्पढञ्चेन्द्रियमनुष्याणां त्वष्टधाऽवधिरिति ॥

पदं – ३३ – समाप्तम्

पदं – ३४ – प्रविचारणा

वृ. तदेवमुक्तं त्रयस्त्रिंशत्तमं पदं, सम्प्रति चतुस्त्रिंशत्तममारभ्यते, अस्य चामभिसम्बन्धः– इहानन्तरपदे ज्ञानपरिणामविशेषोऽवधिरुक्तः, अत्र तु परिणामसाम्याद्वेदपरिणामविशेषः प्रवीचारः प्रतिपाद्यते इति, तत्र च सकलवक्तव्यतो पसङ्ग्राहिके इमे द्वे गाथे–

मू. (५८४) *अनंतरगयाहारे १, आहारे भोयणाइय २ ।*
पोग्गला नेव जाणंति ३, अज्झवसाणा ४ य आहिया ॥

वृ. 'अनंतराग्गाहारे' इत्यादि, प्रथममन्तरागताहारको नैरयिकादिर्वक्तव्यः, तदनन्तरं 'आहारे भोयणाइय' इति आहाराभोगता आदिशब्दादाहारनाभोगता च वक्तव्या, यथा 'नेरयिकाणं भंते ! आहारे किं आभोगनिव्वत्तिए अनाभोगनिव्वत्तिए' इत्यादि, तथा 'पोग्गला नेव जाणंति' इति, नैरयिका आहारतया गृहीतान् पुद्गलान्नैव जानन्तीत्यादि चतुर्विंशतिदण्डकक्रमेण वक्तव्यं, 'अज्झवसाणा य आहिय' त्ति तदनन्तरं नैरयिकादीनां क्रमेणाध्यवसानानि, सूत्रे पुंलिङ्गनिर्देशः प्राकृतत्वात्, चः पूर्वापेक्षया समुच्चये, आख्यातानि, ।

मू. (५८५) *सम्मत्तस्सा हिमगे ५ तत्तो परियारणा ६ य बोद्धव्वा ।*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

काए फासे रवे सद्दे य मणे य अप्पबहुं ॥

वृ. तदनन्तरं सम्मत्तस्स 'अहिगमे' इति, सम्यकत्वस्याधिगमो नैरयिकादिचतुर्विंशतिदण्डकक्रेमण चिन्तनीयः, 'तत्तो परियारणा य बोद्धव्वा' इति ततः-सम्यकत्वाधिगमप्रतिपादनादूर्ध्वं परिचारणा वक्तव्यताय बोद्धव्या, कस्मिन् विषये इत्याह-काये स्पर्शे रूपे शब्दे मनसि च, ततः कायप्रवीचारादीनामल्पबहुत्वं, भावप्रधानोऽयं निर्द्देशः-अल्पबहुतवं वक्तव्य।

मू. (५८६) *नेरइया णं भंते! अनंतराहारा ततो निव्वत्तणा ततो परियाइणया ततो परिणामया ततो परियारणया तओ पच्छा विउव्वणया ?, हंता! गो० ! नेरइयाणं अनंतराहारा ततो निव्वत्तणया ततो परियादिणया ततो परिणामया तओ परियारणया तओ पच्छा विउव्वणया,*

असुरकुमारा णं भंते! अनंतराहारा ततो निव्वत्तणया ततो परियाइणया ततो परिणामया ततो विउव्वणया तओ पच्छा परियारणया ?, हंता ! गो० ! असुरकुमारा अनंतराहारा ततो निव्वत्तणया जाव ततो पच्छा परिया०, एवं जाव थणियकुमारा,

पुढविकाइया णं भंते! अनंतराहारा ततो निव्वत्तणया ततो परियाइणया ततो परिणामया ततो परिया० ततोविउ० ?, हंता गो० ! तं चेव जाव परियारणया नो चेव णं विउव्वणया, एवं जाव चउरिंदिया, नवरं वाउक्काइया पं-चिंदियतिरिक्खजोणिया मणूसा य जहा नेरइया, वाणमंतरजोइसियवेमाणिया जहा असुरकुमारा

वृ. सम्प्रति 'यथोद्देशंनिर्देश' इति प्रथमतोऽनन्तरागताहारकवक्तव्यतामभिधित्सुरिदमाह-'नेरइया णं भंते !' इत्यादि, नरयिकाः, णमिति वाक्यालङ्कारे, भदन्त !-परमकल्याणयोगिन् ! परमसुखयोगिन् ! वा अनन्तरं-उपपातक्षेत्रप्राप्तिसयमेव आहारयन्तीत्यान्तरागताहाराः, 'ततो निव्वत्तणया' इति ततः-अन्तराहग्रहणादारभ्य क्रमेण शरीरस्येति गम्यते निर्वर्त्तना-निष्पतिर्भवति, 'ततो परियाइणया' इति ततः-शरीरनिष्पत्तेरकारभ्य पर्यादानं-यथायोगमङ्गप्रत्यङ्गैर्लोमाहारादिना समन्ततः पुद्गलादानं 'ततो परिणामणया' इति ततः पुद्गलादानादनन्तरं तेषां पुद्गलानां परिणामनं-इन्द्रियादिरूपतया परिणत्यापादानं 'ततो परियारणया' इति ततः-इन्द्रियादिरूपतया परिणत्यापादानादूर्ध्वं परिचारणा-यथायोगं शब्दादिविषयोपभोगः, ततः पश्चात् विकुर्वणा-वैक्रियलब्धिवशात् विक्रिया नानारूपा ?, एवमुक्ते भगवानाह-'हंता ! गोयमे' त्यादि, हन्तेत्यभ्यनुज्ञार्थं, हंता ! गौतम ! नैरयिका अनन्तराहारा इत्यादि,

तदेवं यथा नैरयिकाणामनन्तराहारादिवक्तव्योतोक्ता तथा असुरकुमारादीनामपि स्तनितकुमारपर्यवसानानां वक्तव्या, नवरं तेषां पूर्वं विकुर्वणं पश्चात् परिचारणा, ते हि विशिष्टशब्दाद्युपभोगवाञ्छायां पूर्वमिष्टं वैक्रियं रूपं कुर्वन्ति पश्चात् शब्दाद्युपभोगमित्येष नियमः, शेषास्तु शब्दाद्युपभोगसम्पत्तौ सत्यां हर्षवशात् विशिष्टतरशब्दाद्युपभोगवाञ्छातः अन्यतो वा कुतश्चित्कारणात् विकुर्वते, ततस्तेषां पूर्वं प्रवीचारणा पश्चाद्विकुर्वणेति, पृथिवीकयविषये प्रश्नसूत्रं तथैव उत्तरसूत्रे तावद् वक्तव्यं यावत् परिचारणा, तेषामपि स्पर्शोपभोगसम्भवात्, 'नो चेव णं विउव्वणय'त्ति न चैव तेषां विकुर्वणा वाच्या, वैक्रियलब्धेरसम्भवात्,

'एव'मित्यादि, एवं-पृथिवीकायिकवत् अप्कायादयो वातकायवर्जास्तावदध्येतव्या यावच्चतुरिन्द्रियाः, सर्वेषामपि वैक्रियलब्धेरसम्भवेन सूत्रस्य समानत्वात्, वातकायान् प्रति विशेषमभिधित्सुः समानगमत्वात् पञ्चेन्द्रियतिर्यग्मनुष्याणामपि वातकायैः सहातिदेशमाह-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'नवर'मित्यादि, 'जहा नेरइया' इति यथा नैरयिकास्तथा वक्तव्याः, किमुक्तं भवति? – 'नैरयिकवत् विकुर्वणाऽप्येतेषां वक्तव्या, वैक्रियलब्धिसम्भवात्, सा च प्रवीचारणायाः पश्चादिति, 'वाणमंतर-जोइसवेमाणिया जहा असुरकुमारा' इति असुरकुमाराणामिव व्यन्तरादीनामपि पूर्वं विकुर्वणा पश्चात् परिचारणा वक्तव्येति भावः, सुरगणानां सर्वेषामपि तथास्वाभाव्यात्, उक्तं च मूलटीकायाम्–

॥१॥ "पुव्वं विउव्वणा खलु पच्छा परियारणा सुरगणाणं।
सेसाण पुव्वपरियारणा उ पच्छा विउव्वणया ॥" इति ॥

सम्प्रति आहारविषयमाभोगं चिचिन्तयिषुरिदमाह–

मू. (५८७) *नेरइया णं भंते! आहारे किं आभोगनिव्वत्तिते अनाभोगनि० ?, गो० ! आभोगनिव्वत्तिएवि अना०, एवं असुरकुमाराणं जाव वेमाणियाणं, नवरं एगिंदियाणं नो आभोगनिव्वत्तिए अनाभोगनिव्वत्तिए।*

नेरइया णं भंते! जे पोग्गले आहारत्ताए गिण्हंति ते किं जाणंति पा० आहारेंति उदाहु न याणंति न पासं० आहारेंति ?, गो० ! न याणंति न पासंति आहारेंति, एवं जाव तेइंदिया, चउरिंदियाणं पुच्छा, गो० ! अत्थेगतिया न याणंति पासंति आहा० अत्थेगइया न याणंति न पासंति आहा०, पंचिंदियतिरिक्खजोणियाणं पुच्छा गो० ! अत्थे० जा० पा० आहा० १ अत्थे० जा० न पा० आहा० अत्थे० न याणंति पासंति आहा० ३ अत्थे० न जा० न पा० आ० ४, एवं जाव मणुस्साणवि, वाणमंतरजोइसिया जहा नेरइया,

वेमाणियाणं पुच्छा, गो० ! अत्थे० जा० पा० आ०, अत्थे० न जा० न पा० आ०, से केणट्ठेणं भंते! एवं वु० वेमाणिया अत्थे० जा० पा० आ० अत्थे० न जा० न पा० आ० ?, गो० वेमाणिया दुविहा पं०, तं०–माईमिच्छद्दिट्ठि उववन्नगा य अमायिसम्मद्दिट्ठिवि०, एवं जहा इंदियउद्देसए पढमे भणितं तहा भाणितव्वं जाव से एएणट्ठेणं गो० ! एवं वुच्चति,

नेरइया णं भंते केवतिया अज्झवसाणा पं० ?, गो० ! असंखेज्जा अज्झवसाणा, ते णं भंते! किं पसत्था अपसत्था ?, गो० ! पसत्थावि अप० एवं जाव वेमाणियाणं।

नेरइया णं भंते! किं सम्मत्ताभिगमी मिच्छत्ताभिगमी सम्मामिच्छत्ताभिगमी ?, गो० ! सम्मत्ताभिगमीवि मिच्छत्ताभिगमीवि सम्मामिच्छताभिगमीवि, एवं जाव वेमाणियावि, नवरं एगिंदियविगलिंदिया नो सम्मत्ताभिगमी मिच्छत्ताभिगमी नो सम्मामिच्छताभिगमी।

वृ. 'नेरइयाण'मित्यादि, आभोगनिर्वर्त्तितो यदा मनःप्रणिधानपूर्वमाहारं गृह्णन्ति, शेषकालमनाभोगनिर्वर्त्तितः, स च लोमाहारोऽवसातव्यः, एवं शेषाणामपि जीवानामभोग-निर्वर्त्तितोऽनाभोगनिर्वर्त्तितश्चाहारो भावनीयः, नवरमेकेन्द्रियाणामतिस्तोकापटुमनोद्रव्य-लब्धिसम्पन्नत्वात्, पटुतर आभोगो नोपजायते इति तेषां सर्वदाऽनाभोगनिर्वर्त्तित एवाहारो न पुनः कदाचिदप्याभोगनिर्वर्त्तितः।

अधुना आहार्यमाणपुद्गलविषये ज्ञानदर्शने चिन्तयति– 'नेरइया णं भंते' इत्यादि, नैरयिका णमिति वाक्यालङ्कारे भदन्त ! यान् पुद्गलान् आहारतया गृह्णन्ति तान् किं जानन्ति पश्यन्ति उत नेति ?, भगवानाह–गौतम ! न जानन्त्यवधिज्ञानेन, लोमाहारतया तेषामतिशूक्ष्मत्वेन नारकाव-धेरविषयत्वात्, न च पश्यन्ति चक्षुरिन्द्रियविषयाभावात्, द्वीन्द्रिया न जानन्ति, मिथ्याज्ञानतया

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तेषां सम्यक् परिज्ञानाभावात्, द्वीन्द्रियाणां हि मत्यज्ञानं तदपि चास्पष्टमतः प्रक्षेपाहारमपि न ते स्वयं गृह्यमाणमपि सम्यक् जानन्ति चक्षुरिन्द्रियाभावात् न च पश्यन्ति, एवं त्रीन्द्रिया अपि ज्ञानदर्शनवलिकला भावनीयाः,

चतुरिन्द्रियाः 'अत्थेगइय' त्ति सन्त्यकके ये स्वयं गृह्यमाणमप्याहारं प्रक्षेपरूपमपि न जानन्ति, मिथ्याज्ञानित्वात्, तेषामपि हि द्वीन्द्रियाणामिव मत्यज्ञानं तदपि चाविश्पष्टमिति, चक्षुषा पुनःपश्यन्ति चक्षुरिन्द्रियसद्भावात्, तथाहि–पश्यन्ति मक्षिकादयो गुडादिकमिति एवमाहारयन्ति, तथा सन्त्येकके चतुरिन्द्रिया ये न जानन्ति, मिथ्याज्ञानित्वात्, न पश्यन्ति च अन्धकारादिना चक्षुर्दर्शनस्य व्याहतत्वात् अनाभोगसम्भवाद्वा,

तिर्यक्पञ्चेन्द्रियतिरस्चां चतुर्भङ्गी प्रक्षेपाहारं लोमाहारं चाधिकृत्य भावनीया, तत्र प्रक्षेपाहारमधिकृत्यैवं भावना–स्न्त्येकके तिर्यक्पञ्चेन्द्रिया ये प्रक्षेपमाहारं जानन्ति, सम्यग्ज्ञानितया तेषां यथावस्थितपरिज्ञानात्, पश्यन्ति चक्षुरिन्द्रियभावात् एवमाहारयन्ति १, तथा सन्त्येकके ये जानन्ति पूर्ववत् न च पश्यन्ति चक्षुर्दर्शनस्यान्धकारादिना अनाभोगेन च व्याहतत्वात् २, तथा सन्त्येकके ये न जानन्ति मिथ्याज्ञानितया सम्यक्परिज्ञानाभावात् पश्यन्ति पुनश्चक्षुरिन्द्रियोपयोगात् ३ तथा सन्त्येकके ये न जानन्तिमिथ्याज्ञानित्वान्न च पश्यन्ति पूर्ववत् एवमाहारयन्ति ४ लोमाहारापेक्षया त्वेवं भावना–सन्त्येकके तिर्यक्पञ्चेन्द्रिया ये लोमाहारमपि जानन्ति, विशिष्टावधिज्ञानपरिकलितत्वात्,

पश्यन्ति तथाविधक्षयोपशमभावत इन्द्रियपाटवस्यातिविशुद्धत्वात् एवमाहारयन्ति १ तथा सन्त्येकके ये न जानन्ति पूर्ववत् न तु पश्यन्ति तथाविधस्येन्द्रियपाटवस्याभावात् २ तथा सन्त्येकके ये न जानन्ति पश्यन्ति पुनस्तद्विषयेन्द्रियपाटवस्य भावात् ३ तथा सन्त्येकके ये न जानन्ति मिथ्याज्ञानित्वात् अवधिविकलत्वात् अवधिविषयातीतत्वाद्वा, न च पशयन्ति तथारूपपाटवाभावात् ४ इति, एवं मनुष्याणामपि लोमाहारप्रक्षेपाहारौ प्रतीत्य चतुर्भङ्गी भावनीया, 'वाणमंतरजोइसिया जहा नेरइया' इति, नैरयिकावधिरिव व्यन्तरज्योतिष्कावधिरपि मनोभक्षित्वेऽप्याहारपुद्गलानामविषयत्वात्,

'वेमाणियाणं पुच्छ' त्ति, वैमानिकानां पृथक् सूत्रं वक्तव्यं, 'वेमाणिया णं भंते !' जे पोग्गले आहारत्ताए गेण्हंति ते किं जाणंति पासंति आहारेंति उदाहु न जाणंति न पासंति आहारेंति' इति, भगवानाह–'गोयमे'त्यादि, माया पूर्वभवकृता विद्यते येषां ते मायिनो, मायया हि यया तया वा बादररूपकृतया कलुषकर्मप्रादुर्भावः, कलुषे च कर्मण्युदयमागते भवप्रत्ययादप्युपजायमानोऽवधिर्नातिसमीचीनो भवति, एते च सम्यग्दशो न वेदितव्याः, तथा मिथ्या–विपर्यास्ता दृष्टिः–जिनप्रणीतवस्तुतत्त्वप्रतिपत्तिर्येषां ते मिथ्यादृष्टयः, मायिनश्च मिथ्यादृष्टश्च मायिमिथ्यादृष्टयस्ते च ते उपपन्नाश्च मायिमिथ्यादृष्टयुपपन्नास्त एव स्वार्थिककप्रत्ययविधानात् मायिमिथ्याद–ष्टयुपपन्नकास्ते चोपरितनोपरितनग्रैवेयकपर्यवसाना विज्ञेयाः, तेषां यथायोगमवश्यं मिथ्यादृष्टित्वस्य मायित्वस्य च भावात्, तद्विपरीता अमायिसम्यग्दृष्टयुपपन्नकाः, ते चानुत्तरविमानवासिनः, तेषामवश्यं सम्यग्दृष्टित्वं, पूर्वानन्तरभवे नितरां प्रतनुक्रोधमानमायालोभत्वस्योपशान्तकषायत्वस्य च भावात्, आह च मूलटीकाकारः–"वेवाणिया मायिमिच्छद्दिट्ठीउववण्णगा जाव उवरिमगेवेज्ञा, अमायिसम्मद्दिट्ठिउववन्नगा अनुत्तरसुरा एव गृह्यन्ते" इति, 'एवं जहे'त्यादि, एवमुक्तेन प्रकारेण

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्राक् यथा इन्द्रिययसत्के प्रथमोद्देशके भणितं तथा भणितव्यं, तच्च तावत् यान्त् सर्वान्तिमं 'से एएण- ट्ठेण' मित्यादिना निगमनवाक्यं, तच्चैवम्—

'तत्थ णं जे ते मायिमिच्छद्दिट्ठिउववन्नगा ते णं न जाणंति न पासंति आहारेंति, तत्थ णं जे ते अमायिसम्मद्दिट्ठिउववण्णगा ते णं दुविहा पन्नत्ता, तंजहा—अनंतरोववण्णगा य परंपरोववण्णगा य, तत्थ णं जे ते अनंतरोववण्णगा ते णं न याणंति न पासंति आहारेंति, तत्थ णं जे ते परंपरोववण्णगा ते णं दुविहा पं०, त०—पज्जत्तगा य अपज्जत्तगा य, तत्थ णं जे त अपज्जत्तगा ते णं न जाणंति न पासंति आहारेंति, तत्थ णं जे ते पज्जत्तगा ते दुविहा पं०, तं०—उवउत्ता य अणुवउत्ता य, तत्थ णं जे ते अनुवउत्ता ते णं न याणंति न पासंति आहारेंति, तत्थ णं जे ते उवउत्ता ते णं जाणंति पासंति आहारेंति, से एएणट्ठेणं गोयमा ! एवं वुच्चति—अत्थेगइया न जाणंति न पासंति आहारेंति अत्थेगइया जाणंति पासंति आहारेंति ?'' इति, अस्यायमर्थः—तत्र ये ते मायिमिथ्यादृष्ट्युपपन्नका उपरितनोपरितनग्रैवेयकपर्यवसाना इत्यर्थः ते मनोभक्ष्याहारयोग्यान् पुद्गलान् न जानन्ति अवधिज्ञानेन, तदवधेस्तेषामविषयत्वात्स, न पश्यन्ति चक्षुषा, तथाविधपाटवाभावात्,

—येऽप्यमायिसम्यग्दृष्ट्युपपन्नका अनुत्तरविमानवासिन इत्यर्थः, ते द्विधा—अनन्तरोपपन्का परम्परोपपन्नकाश्च, प्रथमसमयोत्पन्ना अप्रथमसमयोत्पन्नाश्चेत्यर्तः अत्र ये ते अनन्तरोपपन्नकास्ते न जानमन्ति न पश्यन्ति, प्रथमसमयोत्पन्नतयाऽवधिज्ञानोपयोगस्य चक्षुरिन्द्रियस्य चाभावात्, किन्त्वेवमेहारयन्ति, तत्र ये ते परम्परोपपन्नकास्ते द्विविधाः, तद्यथा—पर्याप्ता अपर्याप्ताश्च, तत्र ये ते अपर्याप्तकास्ते न जानन्ति न च पश्यन्ति, पर्याप्तीनामस्पूर्णत्वेनावध्याद्युपयोगाभावात्, येऽपि पर्याप्तस्तेऽपि द्विविधाः, तद्यथा—उपयुक्ता अनुपयुक्ताश्च, तत्र ये ते उपयुक्तास्ते जानन्ति, अवधानवशतो यथाशक्ति नियमेन ज्ञानस्य स्वविषयपरिच्छेदाय प्रवृत्तिसम्भवात्, पश्यन्ति चक्षुषा इन्द्रियपाटवस्य तेषामतिविशिष्टत्वात्, ये त्वनुपयुक्तास्ते न जानन्ति न च पश्यन्ति अनुपयुक्तत्वादेव, उपयुक्ता अपि कथं मनोभक्ष्याहारयोग्यान् पुद्गलान् जानते इति चेत्, उच्यते,

—इहावश्यकप्रथमपीठिकायामवधिज्ञानाधिकारेऽभिहितम्—''संखेज्ज कम्मदव्वे लोए थोऊणयं पलियं'' अस्यायमर्थः—कार्मणशरीरद्रव्याणि पश्यन् क्षेत्रतो लोकस्य सङ्ख्येयान् भागान् पश्यति कालतः स्तोकोनं पल्योपमं यावत्, अनुत्तरास्तु सम्पूर्णां लोकनाडीं पस्यन्ति, 'सभिन्नलोगनालिं पैसंति अनुत्तरा देवा' इति वचनात्, ततस्ते मनोभक्ष्याहारयोग्यानपि पुद्गलान् जानन्ति, आह च मूलटीकाकारः—'ते जानन्ति पश्यन्ति आहारयन्ति च, विशुद्धत्वादवधेरिन्द्रियविषयस्य चातिविशुद्धत्वात् पश्यन्त्यपि'' इति, अत्र इन्द्रियविषयस्तेति—इन्द्रियपाटवस्येतिभावः, उपसंहारवाक्यं प्रतीतं । अध्यवसायचिन्तायां प्रत्येकं नैरयिकादीनामसङ्ख्येयान्यध्यवसानानि प्रतिसमयं प्रायोऽन्यान्याध्यवसानभावात्, ।

सम्यकत्वाद्यधिगमचिन्तां कुर्वन्नाह—'नेरइया ण' मित्यादि, नैरयिकाः णमिति पूर्ववत् भदन्त किं सम्यकत्वाधिगामिनः—सम्यकत्वप्राप्तिवन्तः, एवं मिथ्यात्वाधिगामिनः सम्यग्मिथ्यात्वाधिगामिनश्च ?, भगवानाह—गौतम ! 'सम्मे' त्यादि सुगमं, त्रिविधाया अपि प्राप्तेर्यथायोगं सम्भवात्, 'एवं जावे' त्यादि, एवं—नैरयिकगतेनाभिलापप्रकारेण निरन्तरं तावद्वक्तवयं यावद्वैमानिकाः, नवरमेकेन्द्रियाणां विकलेन्द्रियाणां केषांचित् सासादनसम्यकत्वमपि लभ्यते तथापि ते

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मिथ्यात्वभिमुखा इति सदपि तन्न विवक्षितं। सम्प्रति परिचारणां प्रतिपिपादयिषुरिदमाह-

मू. (५८८) *देवा णं भंते! किं सदेवीया सपरियारा सदेवीया अपरियारा एदेवीया सपरियारा अदेवीया अपरियारा?, गो० ! अत्थेगतिया देवा सदेवीया सपरियारा अत्थेगतिया देवा अदेवीया सपरियारा अत्थे० देवा अदेविया अपरिचारा नो चेव णं देवा सदेवीया अपरिचारा,*

से केणट्ठेणं भंते! एवं वुच्चति-अत्थे० देवा सदेवीया सपरिचारा तं चेव जाव नो चेव णं देवा सदेवीया अप० ?, गो० ! भवणपतिवाणमंतरजोतिससोहम्मीसाणेसु कप्पेसु देवा सदेवीया सपरियारा, सणंकुमारमाहिंदबंभलोगलंतगमहासुक्कसहस्सारआणयपाणयआरणच्चुएसु कप्पेसु देवा अदेवीया सपरिचारा गेवेज्जअणुत्तरोववाइया देवा अदेवीया अपरियारगा, नो चेव णं देवा सदेवीया अपरिचारा, से तेणट्ठेणं गो० ! एवं वु० अत्थे० देवा सदेवीया सपरिचारा तं चेव नो चेव णं देवा सदेवीया अपरियारा

वृ. 'देवा ण'मित्यादि, सुगमं, नवरं भवनपतिव्यन्तरज्योतिष्कसौधर्मशानकल्पेषु देवा सदेवीकाः, देवीनां तत्रोत्पादात्, अत एवन सपरिचाराः-परिचारणासहिताः, देवीनां तत्परिग्रहे यथायोगं भावतः कायप्रवीचारभावात्, सनत्कुमारमाहेन्द्रयोर्ब्रह्मलोकलान्तकयोर्महाशुक्र सहस्रार-योरानतादिचतुर्षु कल्पेषु देवा अदेवीकाः, तत्र देवीनामुत्पादाभावात्,

अथ च सपरिचाराः-परिचारणासहिताः सौधर्मेशानगतदेवीभिः सह यथाक्रमं स्पर्शरूपशब्दमनःप्रवीचारभावात्, ग्रैवेयकानुत्तरोपपातिनो देवा अदेवीकाः, देवीनां तत्रोत्पा-दाभावात् अपरिचाराः-अप्रवीचाराः, अत्यन्तमन्दपुरुषवेदोदयतया मनसापि प्रवीचारासम्भवात्, न पुनस्ते देवाः सदेवीका अपरीचाराः, तथाभवस्वाभाव्यात्, 'से एएण'मित्यादि निगमनवाक्यं। देवाः सदेवीकाःसपरिचारा इत्युक्तं, तत्र परिचारणामेव जिज्ञासुः पृच्छति-

मू. (५८९) *कतिविहा णं भंते! परियारणा पं० ?, गो० ! पंचविहा परियारणा पं०, तं०-कायपरियारणा फासपरियारणा रूवप० सद्दपरि० मणपरियारणा।,*

से केणट्ठेणं भंते! एवं वु० पंचविहा परि० पं०, तं०-कायप० जाव मणप० ?, गो० ! भवणवइवाणमंतरजोइससोहम्मीसाणेसु कप्पेसु देवा कायपरि० सणंकुमारमाहिंदेसु कप्पेसु देवा फासपरि० बंभलोयलंतगेसु देवा रूवपरिया० महासुक्कसहस्सारेसु देवा सद्दप० आणयपाण-यआरणच्चुएसु कप्पेसु देवा मणप०, गेवेज्जअनुत्तरोववाइया देवा अपरियारगा, से तेणट्ठेणं गो० तं चेव जाव मणपरियारगा,

तत्थ णं जे ते कायपरियारगा देवा तेसि णं इच्छामणे समुप्पज्जति-इच्छामो णं अच्छराहिं सद्धिं कायपरियारं करेत्तए, तए णं तेहिं देवेहिं एवं मणसीकए समाणे खिप्पामेव ताओ अच्छराओ ओरालातिं सिंगारइं मणुण्णाइं मणोहराइं मणोरमाइं उत्तरवेउव्वियरूवाइं विउव्वंति विउव्वित्ता तेसिं देवाणं अंतियं पाउब्भवंति, तते णं ते देवा ताहिं अच्चराहिं सद्धिं कायपरियारणं करेंति

वृ. 'कइविहा ण'मित्यादि, सुगमं, भगवानाह-'गोतमे' त्यादि गतार्थं, नवरं 'कायपरिचारगा' इति कायेन-शरीरेण मनुष्यस्त्रीपुंसानामिव परिचारोमैथुनोपसेवनं येषां ते कायपरिचारकाः किमुक्तं भवति ? -भवनपत्यादय ईशानदेवलोकदेवपर्यन्ताः सङ्क्लिष्टोदयपुरुषवेदकर्मप्रभावतो मनुष्यवत् मैथुनसुखप्रलीयमाना; सर्वाङ्गीणं कायक्लेशजं संस्पर्शसुखमवाप्य प्रीतिमासादयन्ति नान्यथेति, सनत्कुमारमाहेन्द्रयोः कल्पयोर्देवाः स्पर्शपरिचारकाः, स्पर्शेन-स्तनभुजोरुजधनादिगात्रसंस्पर्शेन

Jain Education International For Private & Personal Use Only www.jainelibrary.org

परिचारः—प्रवीचारो येषां ते तथा, ते हि यदा प्रवीचारमभिलषन्ति तदा प्रवीचाराभिलाषुकतया प्रत्यसन्नभूतानां देवीनां स्तनाद्यवयवान् संस्पृशन्ति, तावन्मात्रेणैव तेषां कायप्रवीचारादनन्तगुणं सुखं वेदोपशान्तिश्चोपजायते,

ब्रह्मलोकलान्तकयोः कल्पयोर्देवा 'रूपपरिचारका' रूपेण—रूपमात्रदर्शनेन परिचारो—मैथुनोपसेवनं येषां ते तथा, ते हि सुरसुन्दरीणां मनोभवराजास्थानीयं दिव्यमुन्मादजनकं रूपमुपलभ्य कायप्रवीचारादनन्तगुणं सुरतसुखमासादयन्ति, तावन्मात्रेणैवोपशान्तवेदा उपजायन्ते, महाशुक्रसहस्रारेषु कल्पेषु देवाः 'शब्दपरिचारकाः' शब्देन—शब्दमात्रश्रवणेन परिचारो येषां ते तथा, ते हि इच्छाविषयीकृतदेवीसत्कगीतहसितसविकारभाषितनूपुरादिध्वनिश्रवणमात्रत एव कायप्रवीचारादनन्तगुणसुखं उपभुञ्जते तावन्मात्रेणैव तेषां वेद उपशान्तिमेति,

आनतप्राणतारणाच्युतेषु कल्पेषु देवा 'मनःपरिचारकाः' मनसा मनोभवविकारोपबृंहितपरस्परोच्चावचमनःसङ्कल्पेन परिचारो मैथुनोपसेवनं येषां ते तथा, ते हि परस्परोच्चावचमनः—सङ्कल्पमात्रेणैव कायप्रवीचारादनन्तगुणं सुखमवाप्नुवन्ति, तृप्ताश्च तावन्मात्रेमैवोपजायन्ते,

ग्रैवेयकानुत्तरोपपातदेवा 'अपरिचारका' न विद्यते परिचारो—मैथुनोपसेवनं मनासाऽपि येषां ते तथा, तेषां प्रतनुमोहोदयतया प्रशमसुखांतर्लीनत्वात्, यद्येवं कथं न ते ब्रह्मचारिणः ?, उच्यते, चारित्रपरिणनामाभावात्, 'से तेणट्ठेण' मित्यादि निगमनवाक्यं, तत्र ये कायपरिचारका देवास्तेषां कायप्रविचारं विभावयिषुरिदमाह—

'तत्थ ण' मित्यादि, तत्र—तेषु कायपरिचारकादिषु देवेषु मध्ये ये ते पूर्वमुक्ताः कायपरिचारका भवनपतिव्यन्तरज्योतिष्कसौधर्मेशानदेवास्तेषां णमिति पूर्ववत् इच्छामनः—कायपरिचारेच्छाप्रधानं मनःसमुत्पद्यते, केनोल्लेखेन समुत्पदयते ? —इच्छामः—अभिलषामः णमिति पूर्ववत् अप्सरोभिः सार्द्ध कायपरिचारं कर्त्तुमिति, 'तए ण' मित्यादि, ततस्तैर्देवैरेवमुक्तेन प्रकारेण कायपरिचारे मनसि कृते सति क्षिप्रमेव—शीघ्रमेव ता अप्सरसः स्वस्पभोग्यदेवाभिप्रायमवेत्य परिचाराभिलाषुकतया उत्तरवैक्रियाणि रूपाणि विकुर्वन्तीति सम्बन्धः,

कथंभूतानीत्यत आह—उदाराणि—स्फाराणि न तु हीनावयवानि तानि अपि 'श्रृङ्गाराणि' श्रृङ्गारो—विभूषणादिभिर्मण्डनं स विद्यते येषां तानि श्रृङ्गाराणि, 'अभ्रादिभ्य' इत्यादि अप्रत्ययः, विभूषणादिकृतोदारश्रृङ्गाराणीत्यर्थः, तानि च कदाचित् कस्यचिदमनोज्ञानि भवेयुः अत आह— 'मनोज्ञानि' स्वस्वोपभोग्यदेवमनोविषयभावपेशलानि, तानि लेशतोऽपि सम्भाव्यन्ते तत आह— 'मनोहराणि' स्वस्वोपभोग्यस्य देवस्य मनो हरन्ति—आत्मवशं नयन्तीति मनोहराणि, 'लिहादित्वादच्', तच्च मनोहरत्वं प्रथमसमापातमात्रभाव्यपि भवति तत आह— 'मनोरमाणि' मनः स्वस्वोपभोग्यदेवसम्बन्धि रमयन्ति—क्रीडयन्ति प्रतिक्षणमुत्तरोत्तरानुरागसम्पृक्तं जनयन्तीति मनोसरमाणि, तानि इत्थंभूतानि उत्तरवैक्रियाणि रूपाणि विकुर्वित्वा तेषां देवानामन्तिकं—समीपं प्रादुर्भवन्ति,

'तते ण' मित्यादि, ततः णमिति पूर्ववत्, ते देवास्ताभिरप्सरोभिः सार्द्ध कायपरिचारणं—मनुष्य इव मनुष्यस्त्रभिः सर्वाङ्गीणकायक्लेशपूर्वकं मैथुनोपसेवनं कुर्वन्ति, एवमेव तेषां वेदोपशान्तिभावात् । तथा चामुमेवार्थं दृष्टान्तेन द्रढयति—

मू. (५९०) *से जहानामए सीया पोग्गला सीतं पप्प सीयं चेव अतिवतित्ताणं चिट्ठंति, उसिणा वा पोग्गला उसिणं पप्प उसिणं चेव अतिवतित्ताणं चिट्ठंति, एवमेव तेहिं देवेहिं ताहिं*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अच्छराहिं सद्धिं कायपरियारणं कते समाणे से इच्छमणे खिप्पामेव अवेति ।

वृ. 'से जहानामए'इत्यादि 'से' इति अथशब्दार्थः, स चात्र वाक्योपन्यासे, यथा नाम 'ते' विवक्षिताः शीताः पुद्गलाः शीतं–शीतयोनिकं प्राणिनं प्राप्य 'शीतमेव' शीतत्वमेवातिव्रज्य–अतिशयेन गत्वा तिष्ठन्ति, किमुक्तं भवति ?–विशेषतः शीतीभूतस्य शीतयोनिकस्य प्राणिनः सुखित्वायोपकल्पन्ते, उष्णा वा पुद्गला उष्णयोनिकं प्राणिनं प्राप्य 'उष्णमेव' उष्णत्वमेवातिव्रज्य–अतिशयेन गत्वा तिष्ठन्ति, विशेषतः स्वरूपलाभसम्पत्त्या तस्य सुखित्वायोपतिष्ठन्ते इति भावः,

'एवमेव' अनेनैव प्रकारेण तैर्देवैस्ताभिरप्सरोभिः सार्द्धंयथोक्तरूपे कायपरिचारणे कृतेसति इच्छामनः–कामविषयेच्छाप्रधानं मनः क्षिप्रमेवातितृप्तिभावात् शीतीभवति, इयमत्र भावना–यथा शीतपुद्गलाः शीतयोनिकस्य प्राणिनः संस्पर्शे शीतत्वं विशेषतः आसादयन्तस्तस्य सुखित्वायोपकल्पन्ते उष्णपुद्गला वा उष्णयोनिकस्य प्राणिनः संस्पर्श उष्णत्वमतिप्रभूतमासादयन्तः सुखाय घटन्ते तथा देवीशरीरपुद्गला देवशरीरमवाप्यदेवशरीरपुद्गला अपि देवीशरीरमवाप्य परस्परं तद्गुणतां भजमानाः परस्परं सुखित्वायोपकल्पन्ते ततस्तृप्तिरुपजायते तृप्तिभावाच्चाभिलाषनिवृत्तिर्भवतीति ।

इह मनुष्यस्त्रीणां मनुष्यपुरुषोपभोगे शुक्रपुद्गलसङ्क्रमतः सुखमुपजायमानं लब्धं तत्किं देवीनामप्युपभोग्यदेवसत्कशुक्रपुद्गलसङ्क्रमतः सुखमुपजायते आहोश्विदन्यथेति संशयानो देवानां शुक्रपुद्गलास्तित्वं पृच्छति–

मू. (५९१) *अत्थि णं भंते ! तेसिं देवाणं सुक्कपोग्गला ?, हंता ! अत्थि, ते णं भंते ! तासिं उच्छरकाणं कीसत्ताते भुज्जो २ परिणमंति ?, गो० ! सोतिंदियत्ताते चक्खुइंदि० घाणिंदिय० रसिंदिय० फासिंदियत्ताते इट्ठत्ताते कंतत्ताते मणुन्नत्ताते मणामत्ताते सुभगत्ताते सोहग्गरूवजोव्वणगुणलावन्नत्ताए ते तासिं भुज्जो २ परिणमंति ।*

वृ. 'अत्थि ण'मित्यादि, अस्तीतिनिपातोऽत्र बह्वर्थे, णमिति पूर्ववत्, भदन्त ! तेषां देवानां शुक्रपुद्गलाः यत्सम्पर्कतो देवीनां सुखमुपजायते ?, 'हंता ! अत्थि' भगवानाह–गौतम ! सन्ति, केवलं ते वैक्रियशरीरान्तर्गता इति न गर्ब्भाधानहेतवः,

'तेण भंते !' इत्यादि, ते शुक्रपुद्गलाः, णमिति पूर्ववत् भदन्त ! तासामप्सरासां कीदृक्स्वरूपतया 'भूयो २' यदा २ क्षरन्ति तदा २ इत्यर्थः परिणमन्ति ?, भगवानाह–'गोयमे'त्यादि, श्रोत्रेन्द्रियरूपतया यावत्सप्रशनेन्द्रियतया, तेऽपि कदाचिदनिष्टतया परिणमन्तः सम्भाव्येरन् तत आह–इष्टतया, इष्टमपि किञ्चित्स्वरूपतोऽकान्तं भवति, यथा शूकरादीनामिष्टमपि विष्ठादि, तत आह–'कान्ततया' कमनीयतया, कान्मतपि किञ्चिन्मनःस्पृहणीयं न भवति तत आह–

'मनोज्ञतया' अतिस्पृहणीयतया, तदप्यतिस्पृहणीयत्वं कदाचिदापातकालमात्रभावि सम्भाव्यते तत आह–'मनआपतया' मन आप्नुवन्ति–मनसि सदा रमन्ते इति मनआपास्तद्भावस्तत्ता तया, मनसा सदा स्पृहणीयतयेति भावः, कस्मादिति चेत्, अत आह–'सुभगतया' 'नमित्तकारणहेतुषु सर्वासां विभक्तीनां प्रायो दर्शन'मिति न्यायात् अत्र हेतौ तृतीया, ततोऽयमर्थः–यतः सुभगतया–सर्वजनप्रियतया परिणमन्ति तत उच्यते इष्टतया कान्ततयेत्यादि, सुभगतया परिणमनमपि कथमिति चेत्,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अत आह–'सोहग्गरूवजोव्वणगुणलावन्नत्ताए' इति, अत्र प्राकृततया गुणशब्दस्य लावण्यशब्दात् पूर्वं निपातः परमार्थस्तु परतो द्रष्टव्यः, ततोऽयमर्थः–सौभाग्याय–सौभाग्यहेतवे रूपयौवनलावण्यरूपा गदुणा यस्य तत्सौभाग्यरूपयौवनलावण्यगुणं तद्भावस्तत्ता तया, तत्र रूपं–सौन्द्रयवती आकृतिर्यौवनं–परमस्तरुमिमा लावण्यं–अतिशायी मनोभवविकारहेतुः परिणतिविशेषः, यतः सौभाग्यहेतुरूपादिगुणनिबन्धनतया परिणमन्ति ततः सुभगतया परिणमंतीत्युच्यते, एवं ते शुक्रपुद्गलास्तासामप्सरसां भूयो भूयः परिणमन्ति।

तदेवं कायपरिचार उक्तः, सम्प्रति स्पर्शपरिचारं विभागयिषुराह–

मू. (५१२) *तत्थ णं जे ते फासपरियारगा देवा तेसि णं इच्छमणे समुप्पजजति, एवं जहेव कायपरियारगा तहेव निरवसेसं भाणितव्वं।*

तत्थ णं जे ते रूवपरियारगा देवातेसि णं इच्छामणे समुप्पज्ञति इच्छामो णं अच्छराहिं सद्धिं रूवपरियारणं करेत्तते, ते णं तेहिं दवेहिं एवं मणसीकते समाणे तहेव जाव उत्तरवेउव्वितातिं रूवाइं विउव्वंति विउव्वित्ता जेणामेव ते देवा तेणामेव उवागच्छंति उवागच्छित्ता तेसिं देवाणं अदूरसामंते ठिच्चा तांइ उरालइं जाव मनोरमाइं उत्तरवेउव्विताइं रूवाइं उवदंसेमाणीतो २ चिट्ठंति, तते णं ते देवा ताहिं अच्छराहिं सद्धिं रूवपरियारणं करेंति, सेसं तं चेव जाव भुज्जो २ परिणामंति।

तत्थ णं जे ते सद्दपपियारगा देवा तेसिं णं इच्छामणे समुप्पज्ञति–इच्छामो णं अच्छराहिं सद्धिं सद्दपरियारणं करेत्तए, तते णं तेहिं देवेहिं एवं मणसीकए समाणे तहेव जाव उत्तरवेउव्वियातिं रूवातिं उविउव्वंति विउव्वित्ता जेणामेव ते देवा तेणामेव उवागच्छंति २ त्ता तेसिं देवाणं अदूरसामंते ठिच्चा अनुत्तराइं उच्चावयाइं सद्दाइं समुदीरेमाणीतो २ चिट्ठंति, तते णं ते देवा ताहिं अच्छराहिं सद्धिं सद्दपरियारणं करेंति सेसं तं चेव जाव भुज्जो २ परिणमंति।

तत्थ णं जे ते मनपरियारगा देवा तेसिं इच्छामणे समुप्पज्ञति, इच्छामो णं अच्छराहिं सद्धिं मणपरियारणं करेत्तते, तते णं तेहिं देवेहिं एवं मणसीकए समाणे खिप्पामेव ताओ अच्छराओ तत्थ गयाओ चेव समाणीओ अनुत्तरातिं उच्चावयातिं मणाइं संपहारे माणीतो २ चिट्ठंति, तते णं ते देवा ताहिं अच्छराहिं सद्धिं मणपरियारणं करेंति, सेसं निपवसेसं तं चव जाव भुज्जो २ प०

वृ. 'तत्थ ण'मित्यादि, तत्र–तेषुपरिचारकादिषु मध्ये णमिति पूर्ववत् ये ते स्पर्शपरिचारका देवास्तेषां णमिति पूर्ववत् एवमिच्छामनः–स्पर्शपरिचारविषयेच्छाप्रधानं मनःसमुत्पद्यते, 'एवं जहेवे'त्यादि, एवंउक्तेन प्रकारेण यथैवानन्तरं प्राक् कायपरिचारका उक्ताः" तथैव स्पर्शपरिचारकेष्वपि निरवशेषं भणितव्यं, तच्चैवम्–'इच्छामो णं अच्छाराहि सद्धिं फासपरियारं करेत्तए, तए णं तहिं देवेहिं एवं मणसीकए समाणे खिप्पामेव ताओ अच्छराओ उरालाइं जाव विउव्वित्ता तेसं देवाणं अंतियं पाउब्भवंति, तए णं ते देवा अच्छराहिं सद्धिं फासपरियारं करेंति" स्पर्शपरिचारणं वदनचुम्बनस्तनमर्द्दनबाहुउपगूहनजघनोरुप्रभृतिगात्रसंस्पर्शरूपं,

'से जहानामए सीया पुग्गला सीयं पप्प सीयं चेव अतिवइत्ताणं चिट्ठंति उसिणा वा पोग्गला उसिणं पप्प उसिण चेव अइवइत्ताणं चिट्टंति एवमेव तेहिं देवेहिं ताहिं अच्छराहिं सद्धिं फासपरियारणे कए समाणे इच्छामणे खिप्पामेव अवेइ,' अस्य सपातनिका व्याख्या प्राग्वत्, 'अत्थि णं भंते! तेसिं देवाणं सुक्कपोग्गला ?, हंता ! अत्थि, ते णं भंते ! तासिं अच्छराणं कीसत्ताए भुज्जो २

Jain Education International For Private & Personal Use Only www.jainelibrary.org

परिणमंति ?, गोयमा ! सोतिंदियत्ताए जाव फासिंदियत्ताए इट्ठत्ताए कंतत्ताए जाव भुज्जो २ परिणमंति' अस्यापि सपातनिका व्याख्या प्राग्वत्, नवरमस्मिन् स्पर्शप्रवीचारे शुक्रपुद्गलसङ्क्रमो दिव्यप्रभावादवसेयः, एवं रूपपरिचारादावलपि भावनीयं, तेवमुक्ताः स्पर्शपरिचारकाः,

सम्प्रति रूपपरिचारणां विभावयिषुराह–'तत्थ ण' मित्यादि, सुगमं तावत् यावत् विकुर्वित्वा 'जेणामेव' त्ति यत्रैव देवलोके विमाने प्रदेशे च ते देवाः सन्ति तत्रैव स्थाने ता अप्सरस उपागच्छन्ति, उपागम्य च तेषां देवानां 'अदूरसांते' इति अदूरसमीपे स्थित्वा तानि पूर्वं विकुर्वितानि उदाराणि यावदुत्तरवैक्रियाणि रूपाणि उपदर्शयन्त्यस्तिष्ठन्ति, ततस्ते देवास्ताभिरप्सरोभिः सार्द्धं रूपपरिचारणां–परस्परं सविलासदृष्टिविक्षेपाङ्गप्रत्यङ्गनिरीक्षणनिजनिजानुरागप्रदर्शनपटिष्टचेष्टाप्रकटनादिरूपां कुर्वन्ति, सेसं तं चेव' त्ति शेषं 'से जहा नामए' इत्यादि तदेव यावत् 'भुज्जो २ परिणमन्ती' ति वाक्यम्, तदेवं भाविता रूपपररिचारणा,

सम्प्रति शब्दपरिचारणां भावयितुकाम आह–'तत्थ ण' मित्यादि कण्ठ्यं, नवरमदूरसमीपे स्थित्वा अनुत्तरान्–सर्वमनःप्रल्हादजनकतया अनन्यसदशान् उच्चावचान्–प्रवल२ तरमन्मथोद्दीपकसभ्यासभ्यरूपान् शब्दान्सूत्रे नपुंसकनिर्द्देशःप्राकृतत्वात्, समुदीरयन्त्यस्तिष्ठन्ति, शेषं तथैव,

'एवं तत्थ ण' मित्यादि, मनःपरिचारकसूत्रमपि तथैव यावन्मनःपरिचारे मनसि कृते सति क्षिप्रमेव ता अप्सरसस्तत्र गता एव–सौधर्मेशानदेवलोकान्तर्गतस्वस्वविमानस्थिता एव सन्त्योऽनुत्तराणि–परमसन्तोषजनकतया अनन्यसदृशानि उच्चावचानि–कामानुषक्तसभ्यासभ्यरूपाणि मनांसि प्रचारयन्त्यस्तिष्ठन्ति, इह 'तत्तगया चेव समाणीओ' इति वदता देव्यः सहस्रारं यावद् गत्छन्ति न परत इत्यावेदितं द्रष्टव्यं, तथा चाह सङ्ग्रहणिमूलटीकाकारो हरिभद्रसूरिः– "सनत्कुमारादिदेवानां रताभिलाषे सति देव्यः स्वसल्पपरिगृहीताः सहस्ररं यावद् गच्छन्ती' ति, तथा स एव प्रदेशान्तरे आह–"इह सोहम्मे कप्पे तासिं देवीणं पलिओवममाउगं ताओ तद्देवाणं चेव हवंति, जासिं पुण पलिओवमाइं समयाहिया ठिई दुसमयतिसमयसंखेज्ञासंखेज्ञसमयाहिया जाव दसपलिया सोहम्मगदेवीओ ताओ सणंकुमाराणं गच्छंति, एवं दसपलिओवरि जासिं समयाहिया ठिई जाव वीसं पलिया ताओ बंभलोगदेवाणं गच्छंति, एवं वीसपलिओवरि जासिं समयाहिया ठिई जाव तीसं पलिया ताओ महासुक्कदेवाणं गच्छंति, एवं तीसं पलिओवरि जासिं समयाहिया ठिई जाव चत्तालीसं पलिया ताओ आणयदेवाणं तत्थ ठिया चेव झाणावलंबणं होंति, एवं चत्तालीसं पलिओवरि जासिं समयाहिया ठिई जाव पंचास पलिया ताओ आरणदेवाणं तत्थ ठियाओ चेव झाणावलंबणं होंति"

तथा "ईसाणे जासिं देवीणं पलिओवममहियमाउयं ताओ तद्देवाणं चेव होंति, जासिं पुण अहियपलिओवमाइं समयाहिया ठिई दुसमयतिसमयसंखेज्ञासंखेज्ञसमयाहिया जाव पन्नरसपलिया ताओ माहिंददेवाणं गच्छंति, एवं पन्नरसपलिओवरि समयाहिया ठिई जाव पणवीसं पलिया ताओ लंतगदेवाणं, जासिं पुण पणवीसपलिओवरि समयाहिया ठिई जाव पंचतीसं पलिया ताओ सहस्सारदेवाणं, जासिं पुण पंचत्तीसपलिओवरि समयाहिया ठिई जाव पणयालीसं ताओ पाणयदेवाणं तत्थ ठियाओ चेव झाणावलंबणं होंति, जासिं पुण पणयालीसं पलिओवरि समयाहिया ठिई जाव पणपन्नपलिया ताओ अच्चुयदेवाणं तत्थ ठियाओ चेव झाणावलंबणं हवंति" इति,

'तए ण' मित्यादि, ततो णमिति पूर्ववत्, ते देवाः ताभिरप्सरोभिः सार्द्धमनः–परिचारणं–

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सुरतानुबन्धि परस्परं सभ्यासभ्यमनःसङ्कल्पकरणरूपं कुर्वन्ति, 'सेस'मित्यादि, शेषं 'से जहा नामए सीया पोग्गला' इत्यादि निरवशेषं तावद् वक्तव्यं यावत् 'भुज्जो २ परिणमन्ती'ति सर्वान्तिमं वाक्यं, व्याख्या चास्य प्राग्वत्, तत ऊर्ध्वं तु ग्रैवेयकादयो मनसाऽपि योषितो न प्रार्थयन्ति, प्रतनुवेदोदयत्वात्, यथोत्तरं चैतेऽनन्तगुणसुखभाजः, तथाहि–कायप्रवीचारेभ्यो नन्तगुणसुखाः स्पर्शपरिचारकास्तेभ्योऽप्यनन्तगुणसुखाः रूपपरिचारकास्तेभ्योऽपि अनन्तगुणसुखा; शब्दपरिचारकास्तेभ्योऽप्यनन्तगुणसुखा मनःपरिचारकास्तेभ्योऽपि अपरिचारकाः अनन्तगुणसुखाः। साम्प्रतमेतेषामेव परस्परमल्पबहुत्वमभिधित्सुराह–

मू. (५९३) *एतेसि णं भंते! कायपरियारगाणं जाव मनपरियारगाणं अपरियारगाण य कयरे० अप्पा वा ४?, गो०! सव्वत्थोवा देवा अपरियारगा मनपरियारगा संखे० सद्दपरियारगा असंखे० रूवप० असं०–फासप० असं० कायप० असं० ॥*

वृ. 'एएसि ण'मित्यादि, सर्वस्तोका देवा अपरिचारकाः, ते हि ग्रैवेयकानुत्तरोपपातिन्स्ते च सर्वसङ्ख्यया क्षेत्रपल्योपमासङ्ख्येयभागवर्त्तिनभःप्रदेशराशिप्रमाणा इति, तेभ्योऽपि मनः परिचारका देवाः सङ्ख्येयगुणाः, तेषामानतादिकल्पचतुष्टयवर्त्तित्वात्, तद्वर्त्तिनां च पूर्वदेवापेक्षया सङ्ख्येयगुणक्षेत्रपल्योपमासङ्ख्येयभागगताकाशप्रदेशराशिप्रमाणत्वात्, तेभ्यः शब्दपरिचारका असङ्ख्येयगुणाः, ते हि महाशुक्रसहस्रारकल्पवासिनः, ते च धनीकृतलोकस्य एकप्रादेशिक्याः श्रेणेरसङ्ख्येयतमे भागे यावन्त आकाशप्रदेशास्तावत्प्रामाणाः,

तेभ्योऽपि रूपपिचारका देवा असङ्ख्येयगुणाः, ते हि ब्रह्मलोकलान्तकल्पनिवासिनः, ते च पूर्वदेवानधिकृत्यासङ्ख्येयगुणश्रेण्यसङ्ख्येयभागगतनभःप्रदेशराशिप्रमाणाः, तेभ्योऽपि स्पर्शपरिचारका देवा असङ्ख्येयगुणाः, तेषां सनत्कुमारमाहेन्द्रकल्पवर्त्तित्वात् तद्वर्त्तिनां च ब्रह्मलोक-लान्तकदेवानपेक्ष्यासङ्ख्येयगुणश्रेण्यसङ्ख्येयबागवत्याकाशप्रदेशपरिमाणतयाऽधीतत्वात्, तेभ्यः कायपरिचारका देवा असङ्ख्येयगुणाः भवनपत्यादीनामीशानान्तानां सर्वेषां कायपरिचारकत्वात्, तेषां सर्वसङ्ख्यया प्रतरासङ्ख्येयभागवर्त्तिनभःप्रदेशराशिप्रमाणत्वात् इति ॥

पदं – ३४ – समाप्तम्

पदं – ३५ – "वेदना"

वृ. तदेवमुक्तं चतुस्त्रिंशत्तमं पदं, सम्प्रति पञ्चत्रिंशत्तममारभ्यते, अस्य चायमभिसम्बन्धः– इहानन्तरपदे वेदपरिणामविशेषः प्रवीचारः प्रतिपादितः, अत्र तु गतिपरिणामविशेषा वेदना प्रतिपाद्यते, तत्र आदौ सकलवक्तव्यतासङ्ग्रहपरे इमे द्वे गाथे–

मू. (५९४) *सीता य दव्वसरीरा साता तह वेदणा भवति दुक्खा।*
अब्भुवगमोवक्कमिया निदाय अनिदाय नायव्वा ॥

वृ. 'सीया य दव्वे'त्यादि, वेदना प्रथमतः शीता चशब्दादुष्णा सीतोष्णा च वक्तव्या, तदनन्तरं द्रव्यक्षेत्रकालभावैर्वेदना वक्तव्या, ततः शारीरी उपलक्षणान्मानसी च वेदना वाच्या, ततः साता तथा दुःखा वेदना सभेदा वक्तव्यतया ज्ञातव्या भवति, तदनन्तरमाभ्युपगमिकी औपक्रमिकी च वेदना वक्तव्यतया ज्ञातव्या, ततोऽप्यनन्तरं निदा चानिदा चेति, सातसुखादीनां विशेषमाभ्युपगमिक्यादिशब्दानामर्थं त्वग्रे वक्ष्यामः, सातादिवेदनां अधिकृत्य यो विशेषो वक्ष्यते

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्सङ्ग्राहिका द्वितीया गाथा–

मू. (५९५) *सायमसायं सव्वे सुहं च दुक्खं अदुक्खमसुहं च।*
मानसरहियं विगलिंदिया उ सेसा दुविहमेव ॥

वृ. 'सायमसाय'मित्यादि, सर्वे संसारिणः सातामसातां चशब्दात् सातासातां च वेदनां वेदयन्ते, तथा सुखां दुःखां अदुःखासुखां च, तथा विकलेन्द्रिया–एकद्वित्रिचतुरिन्द्रियाः-तुशब्दस्याधिकारार्थसंसूचनार्थत्वादसंज्ञिपञ्चेन्द्रियाश्च मानसरहितां–मनोविकलां वेदनां वेदयन्ते, शेषास्तु द्विविधामेव शरीरमनोनिबन्धनां, शारीरीं मानसीं तदुभयसमुद्भवां चेति भावः, निदाऽनिदादिगतस्तु विशेषो न सङ्गृहीतो, विचित्रत्वात् सूत्रगतेः। तत्र 'यथोद्देशं निर्देश' इति न्यायात् प्रथमतः शीतादि- वेदनाः प्रतिपादनार्थमाह–

मू. (५९६) *कइविहा णं भंते ! वेदणा पं० ?, गो० ! तिविहा वेदना पं०, तं०–सीता उसिणा सीतोसिणा, नेरइया णं भंते ! किं सीतं वेदनं वेदेंति उसिणं वे० वे० सीतोसिणं वेदनं वेदेंति ?, गो० ! सीतंपि वेदनं वेदेंति उसिणंपि वे० वे० नो सीतोसिणं वे० वे०, केई एक्केक्कपुढवीए वेदनाओ भणंति,*

रयणप्पभापुढविनेरइयाणं भंते ! पुच्छा, गो० ! नो सीतं वेदनं वे० उसिणं वे० वे० नो सीतोसिणं वे० वे०, एवं जाव वालुय्पभापुढविनेरइया, पंकप्पभापुढविनेरइयाणं पुच्छा, गो० ! सीतंपि वे० वे० उसिणंपि वे० वे०, नो सीतोसिणं वे० वे०, ते बहुयतरागा जे उसिणं वेदनं वेदंति, ते थोवतरागा जे सीतं वेदनं वे०, धूमप्पभाए एवं चेव दुविहा, नवरं ते बहुतरागा जे सीतं वे० वे० ते थोवतरागा जे उसिणं वे० वेदेंति, तमाए य तमतमाए य सीयं वे० वे० नो उसिणं वे० वे०, नो सीतोसिणं वे० वेदेंति,

असुरकुमाराणं पुच्छा, गो० ! सीतंपि वे० वे० उसिणंपि वे० वे० सीतोसीणंपि वे० वे०, एवं जाव वेमाणिया। कतिविहा णं भंते ! वेदणा पं० ?, गो० ! चउव्विहा वेदणा पं० तं०–दव्वतो खेत्ततो कालते भावतो, नेरइया णं भंते ! किं दव्वतो वेदनं वे० वे० जाव किं भावतो वे० वे० ?, गो० ! दव्वओवि वे० वे० जाव भावओवि वे– वे०, एवं जाव वेमाणिया।

कतिविहा णं भंते ! वेदना पं० ?, गो० ! तिविहा वेदना, पं०, तं०–सारीरा माणसा सारीरमाणसा, नेरइया णं भंते ! किं सारीरं वे० वे० माणसं वेयणं वे० सारीरमाणसं वे० वे० ?, गो० ! सारीरंपि वे० वे० माणसंपि वे० वे० सारीरमाणसंपि वे० वे०, एवं जाव वेमाणिया, नवरं एगिंदियविगलिंदिया सारीरं वे० वे० नो माणसं वे० वे० नो सारीरमाणसं वे० वे०।

कइविहा णं भंते ! वेयणा पं० ?, गो० ! तिविहा वेदनाा पं०, तं०–साता असाता सातासाता, नेरइया णं भंते ! किं सायं वेदनं वेदंति असातं वे० वे० सायसायं वे० वे० ? गोयमा ! तिविहंपि वे० वे० एवं सव्वजीवा जाव वेमाणिया। कतिविहा णं भंते ! वेदना पं० ?, गो० ! तिविहा पं०, तं०–दुक्खा सुहा अदुक्खसुहा, नेरइया णं भंते ! किं दुक्खं वेदनं वे० वे० पुच्छा, गो० ! दुक्खंपि वे० वे० सुहंपि वे० वे० अदुक्खमसुहंपि वे० वे० एवं जाव वेमाणिया।

वृ. 'कइविहा णं भंते !' इत्यादि, शीता–शीतपुद्गलसम्पर्कसमुत्था, एवमुष्णा, या च अवयवभेदेन शीतोष्णपुद्गलसम्पर्कतः शीता उष्णा च सा शीतोष्णा, एनामेव त्रिविधां वेदनां नैरयिकादिचतुर्विंशतिदण्डकक्रमेण चिन्तयति–

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'नेरइया ण'मित्यादि, तत्राद्यासु तिसृषु पृथिवीषूण्णां वेदनां वेदयन्ते, ते हि शीताः ये नरकावासाश्च तदाश्रयभूताः, सर्वतो जगत्प्रसिद्धस्वादिराङ्गारातिरिक्तबहुप्रतापोष्णपुद्गलसम्भूताः, चतुर्थ्यां तु पङ्कप्रभाभिधानायां पृथिव्यां केचिन्नैरयिका उष्णवेदनां केचिच्च शीतवेदनामनुभवन्ति, तत्रत्यनरकावासानां शीतोष्णभेदतो द्विधा भेदात्, केवलं ये उष्णवेदनां वेदयन्ते ते प्रभूततराः, प्रभूतेषु नरकावासेषूष्णवेदनासद्भावात्, इतरे शीतवेदनामनुभवन्तःस्तोकाः, स्तोकतरेषु नरकावासेषु शीतवेदनासम्भवात्, धूमप्परभायामपि पृथिव्यां केचित् शीतवेदनाकाःकेचिदुष्णवेदनाकाः, नवरं शीतवेदनाकाः प्रभूततराः, प्रभूतेषु नरकावासेषु शीतवेदनासम्भवात्, स्तोका उष्णवेदनाः, कतिपयेष्वेव नरकावासेषूष्णवेदनाभावात्, अधस्तन्योस्तु द्वयोः पृथिव्यशीतवेदनामेव नैरयिका अनुभवन्ति, तत्रत्यनैरयिकाणां सर्वेषामुष्णयोनिकत्वात्, नरकावासानां त्वनुपमहिमानुषक्तत्वात्, एतावत्सूत्रं चिरन्तनेष्वविप्रतिपत्त्या श्रूयते, केचिदाचार्याः पुनरेतद्विषयमधिकमपि सूत्रं पठन्ति, ततस्तन्मतं आह–

'केइ एक्केक्कीए पुढवीए वेयणं भणंति' इति केचिदाचार्या एकैकस्यां पृथिव्यां प्रश्ननिर्वचनरूपतया वेदनां भणंति, यथा भणन्ति तथोपदर्शयन्ति–'रयणप्पभे'त्यादि सुगमं, तदेवं नैरयिकाणां चिन्तिता शीतादिवेदना, सम्प्रत्यसुरकुमाराणां तां चिचिन्तयिषुरिदमाह–'असुरकुमाराणं पुच्छा' असुरकुमाराणां शीतादिवेदनाविषयेत पृच्छासूत्रं च वक्तव्यं, 'असुरकुमारा णं भंते ! किं सीयं वेदणं वेयंति उसिणं वेयणं वेयंति सीओसिणं वेयणं वेयंति ?, इति भगवानाह–'गोयमे'त्यादि, शीतामपि वेदनां वेदयन्ते, यदा शीतलजलसम्पूर्णह्रदादिषु निमज्जनादिकं विदधति, उष्णामपि वेदनां वेदयंते यदा कोऽपि महर्द्धिकस्तज्जातीयोऽन्यज्ञातीयो वा कोपवशात् विरूपतया दृष्टयाऽवलोकमानः शरीरे सन्तापमुत्पादयति, यथा प्रथमोत्पन्नः ईशानेन्द्रो बलिचञ्चाराजधानीवास्तव्यानामसुरकुमाराणामुत्पादितवान् , अन्यथा वा तथाविधोष्णपुद्गलसम्पृक्तावुष्णवेदनामनुभवन्तो वेदितव्याः, यदा त्ववयवभेदेन शीतपुद्गलसम्पर्क उष्णपुद्गलसम्पर्कश्चोपजायते तदा शीतोष्णां वेदनां वेदयन्ते, ननु उपयोगः क्रमेण जीवानां भवति, तथास्वाभाव्यात्, कथमत्र शीतोष्णवेदनानुभवो युगपत् प्रख्याप्यते इति ?, उच्यते, इहापि वेदनानुभवः क्रमेणैव, तथाजीवस्वाभाव्यात्, केवलं शीतोष्णवेदनाहेतुपुद्गलसम्पर्को युगपदुपजायत इति सूक्ष्ममाशुसञ्चारिणमुपयोगक्रममनपेक्ष्य यथैव ते वेदयमाना युगपदभिमन्यन्ते तथैव प्रतिपादितमिति न कश्चिद्दोषः, सामान्यतः सूत्रस्य प्रवृत्तत्वात्,

'एवं जाव वेमाणिय'त्ति एवं–असुरोक्तेन प्रकारेण यावद् वैमानिकास्तावत् सूत्रं वक्तव्यं, तच्चैवम्–'पुढविकाइया णं भंते ! किं सीयं वेयणं वेयंति उसिणं वे० वे० सीओसिणं वेयणं वेयंति गो० ! सीयंपि वे० वे० उसिणंपि वे० वे० सीतोसिणंपि वे० वेयंति' इत्यादि, तत्र पृथिवीकायिकादयो मनुष्यपर्यवसानाः शीतवेदनां हिमादिप्रपातेऽभिवेदयमाना वेदितव्याः उष्णवेदनामग्न्यादिसम्पर्के शीतोष्णवेदनामवयवशः शीतोष्णपुद्गलसम्बन्धे इति, व्यन्तरज्योतिष्कवैमानिकास्त्वसुरकुमारवत् भावनीयाः । उक्ता शीतादिभेदात् त्रिविधा वेदना, सम्प्रति तामेव वेदनां प्रकारान्तरेणाभिधित्सुः प्रश्ननिर्वचनसूत्रे आह–

'कइविहा णं भंते' इत्यादि, इह वेदना द्रव्यक्षेत्रकालभावसामग्रीवशादुत्पद्यते, सर्वस्यापि वस्तुनो द्रव्यादिसामग्रीवशादुत्पद्यमानत्वात्, तत्र यदाऽस्यैव वेदना पुद्गलद्रव्यसम्बन्धमधिकृत्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चिन्त्यते तदा द्रव्यवेदना, द्रव्यतो वेदना द्रव्यवेदना, नारकाद्युपपातक्षेत्रमधिकृत्य चिन्त्यमाना क्षेत्रवेदना, नारकादिभवकालसम्बन्धेन विवक्ष्यमाणा कालवेदना, वेदनीयकर्मोदयादुपजायमानत्वेन परिभाव्यमाना भाववेदना, एतामेव चतुर्विधां वेदनां चतुर्विंशतिदण्डकक्रमेण चिन्तयति–

'नेरइया णं भंते ! किं दव्वतो वेयणं वेदंति' इत्यादि, सकलमपि सुगमं। प्रकारान्तरेण वेदनांपि प्रतिपिपादयिषुः प्रश्ननिर्वचनसूत्रे आह–

'कइविहा णं भंते !' इत्यादि, शरीरे भवा शारीरी मनसि भवा मानसी तदुभयभवा शारीरमानसी, शारीरी च मानसी च शारीरमानसी, 'पुंवत्कर्मधारय' इति पुंवद्भावः, एतामेव चतुर्विंशतिदण्डकक्रमेण चिन्तयति–'नेरइया णं भंते ! किं सारीरं वेयणं वेदेंति' इत्यादि, तत्र यदा परस्परोदीरणतः परमाधार्मिकोदीरणतो वा क्षेत्रानुभावतो वा शरीरे पीडामनुभवन्ति तदा शारीरीं वेदनां वेदयन्ते, यदा तु केवलं मनसि दुःखं परिभावयन्ति पाश्चात्यं वा भवमात्मीयं दुष्कर्मकारिणमनुसृत्य पश्चात्तापमतीव कुर्वते तदा मानसीं वेदनां वेदयन्ते, यदा तु शरीरे मनसि चोक्तप्रकारेण युगपत् पीडां अनुभवन्ति तदा शारीरमानसी, इहापि वेदनानुभावः क्रमेणैव केवलं विवक्षिततावत्कालमध्ये शरीरे च पीडामनुभवन्ति मनसि च एतावन्तं कालं एकं विवक्षित्वा युगपच्छरीरमनःपीडानुभवः प्रतिपादित इत्यदोषः, 'एवं जाव वेमाणिया' इत्यादि, एवं–नैरयिकोक्तेन प्रकारेण सूत्रं तावद् वक्तव्यं यावद्वैमानिकाः, नवरमेकेन्द्रियकलेन्द्रियाः शारीरीं वेदनां वेदयन्ते न मानसीं, तेषां मनोसोऽभावात्, ततस्तदनुसारेण तद्विषयं सूत्रं वक्तव्यं।

प्रकारान्तरेण वेदनामभिधित्सुः प्रश्ननिर्वचनसूत्रे आह–'कइविहा णं भंते !' इत्यादि, तत्र साता–सुखरूपा असाता–दुःखरूपा सातासाता–सुखदुःखात्मिका, एतामेव नैरयिकादिचतुर्विंशतिदण्डकक्रमेण चिन्तयति–'नेरइया ण'मित्यादि, तत्र तीर्थङ्करजन्मादिकाले सातवेदनां वेदयन्ते, शेषकालमसातवेदनां वेदयन्ते, यदा तु पूर्वसङ्गतिको देवो दानवो वा वचनामृतैः सिञ्चति तदा मनसि सातं शरीरे तु क्षेत्रानुभावतोऽसातं यदिवा मनस्येव तद्दर्शनतः तद्वचनश्रवणतश्च सातं पश्चात्तापानुभवनतस्त्वसातमिति तदा सातासातवेदनामनुभवन्ति, अत्रापि तावन्तं विवक्षितकालमेकं विवक्षित्वा सातासातानुभवो युगपत् प्रतिपादितः, परमार्थतस्तु क्रमेणैव च वेदितव्य इति, 'एव' मित्यादि, एवं–नैरयिकोक्तप्रकारेण सर्वे जीवास्तावद्वक्तव्या यावद्वैमानिकाः, तत्र पृथिव्यादयो यावन्नाद्याप्युपद्रवः सन्निपतति तावत् सातवेदनां वेदयन्ते उपद्रवसम्पाते त्वसातवेदनामवयवभेदेनोपद्रवसम्पातभावे सातासातवेदनां, व्यन्तरज्योतिष्कवैमानिका देवाः सुखमनुभवन्तः सातवेदनां च्यवनादिकाले त्वसातवेदनां परविभूतिदर्शनतो मात्सर्याद्यनुभवे स्ववल्लभदेवीपरिष्वङ्गाद्यनुभवे च युगपज्जायमाने सातासातवेदनां वेदयन्ते इति। भूयः प्रकारन्तरेण एतावमेव प्रतिपादयन् प्रश्ननिर्वचनसूत्रे आह–

'कइविहा णं भंते !' इत्यादि, या वेदना नैकान्तेन दुःखा भणितुं शक्यते सुखस्यापि भावात् नापि सुखा दुःखस्यापि भावात् सा अदुःखसुखा सुखदुःखात्मिका इत्यर्थः, अथ सातासातयोः सुखदुःखयोश्च परस्परं कः प्रतिविशेषः ?, उच्यते, ये क्रमेणोदयप्राप्तवेदनीयकर्मपुद्गलानुभवतः सातासाते ते सातासाते उच्यते, ये पुनः परोदीर्यमाणवेदनारूपे सातासाते ते सुखदुःखे इति एतामेव चतुर्विंशतिदण्डकक्रमेण चिन्तयति–'नेरइया ण'मित्यादि ॥

वेदनामेव प्रकारान्तरेण चिन्तयन्नाह–

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मू. (५९७) *कतिविहा णं भंते ! वेदना पं० ?, गो० ! दुविहा वेदना पं०, तं०–अब्भोवगमिया य उवक्कमिया य, नेरइया णं भंते ! अब्भोवगमियं वेदनं वे० वे० उवक्कमियं वेदनं वे० वे० ?, गो० ! नो अब्भोवगमियं वे० वे० उवक्कमियं वे० वे०, एवं जाव चउरिंदिया, पंचिंदियतिरिक्खजोणिया मणूसा य दुविहंपि वे० वे०, वाणमंतरजोतिसियवेमाणिया जहा नेरइया ।*

वृ. 'कतिविहा णं भंते !' इत्यादि, तत्राभ्युपगमिकी नाम या स्वयमभ्युपगम्यते, यथा साधुभिः केशोल्लुञ्चनातापनादिभिः शरीरपीडा, अभ्युपगमेन–स्वयमङ्गीकारेण निर्वृत्ता आभ्युपगमिकीति व्युत्पत्तेः, उपक्रमणमुपक्रमः–स्वयमेव समीपे भवनमुदीरणाकरणेन वा समीपानयनं तेन निर्वृत्ता औपक्रमिकी, स्वयमुदीर्णस्य उदीरणाकरणेन वा उदयमुपनीतस्य वेदनीयकर्मो विपाकानुभवनेन निर्वृत्ता इत्यर्थः,

तत्र पञ्चेन्द्रियतिर्यञ्चो मनुष्याश्च द्विविधामपि वेदनां वेदयन्ते, सम्यग्दृशां पञ्चेन्द्रियतिरश्चां मनुष्याणां च कर्मक्षपणार्थमाभ्युपगमिक्या अपि वेदनायाः सम्भवात्, शेषास्त्वौपक्रमिकीमेव वेदनां वेदयन्ते नाभ्युपगमिकीं, पृथिव्यप्तेजोवायुवनस्पतिद्वित्रिचतुरिन्द्रियाणां मनोविकलतया विवेकाभावतस्तथाप्रतिपत्तेरभावात्, नारकभवनपतिव्यन्तरज्योतिष्कवैमानिकानां च तथाभवस्वाभाव्यादिति, एतदेव सूत्रकृत् प्रतिपादयति–'नेरइया णं भंते !' इत्यादि सुगमं । पुनः प्राकारन्तरेण वेदनामेवाभिधित्सुराह–

मू. (५९८) *कतिविहा णं भंते ! वेदना पं० ?, गो० ! दुविहा वेदना पं०, तं०–निदाय अनिदाय, नेरइया णं भंते ! किं निदायं वेयणं वेदयंते अनिदायं वे० वे० ?, गो० ! निदायंपि वे० वे० अनिदायंपि वेदनं वे०,*

से केणट्ठेणं भंते ! एवं वु०–नेरइया निदायंपि अनिदायंपि वे० वे० ?, गो० ! नेरइया दुविहा पं०, तं०–सण्णीभूया य असण्णीभूया य, तत्थ णं जे ते सण्णिभूया ते णं निदायंपि वे० वे०, तत्थ णं जे ते असण्णीभूता ते णं अनिदायं वेदणं वे०, से तेणट्ठेणं ?, गो० ! एवं नेरइया निदायंपि वेयणं वे० अनिदायंपि वे० वे०, एवं जाव थणियकुमारा,

पुढविकाइयाणं पुच्छा, गो० ! नो निदायं वे० वे० अनिदायं वे० वे०, से केणट्ठेणं भंते ! एवं० पुढविकाइया नो निदायं वे० वे० अनिदायं वे० वे० ?, गो० ! पुढविकाइया सव्वे असण्णी असण्णिभूयं अनिदायं वे० वे०, से तेणट्ठेणं गो० ! एवं० पुढविकाइया नो निदायं वे० वे०, अनिदायं वे० वे०, एवं जाव चउरिंदिया, पंचिंदियतिरिक्खजोणिया मणूसा वाणमंतरा जहा नेरइया,

जोइसियाणं पुच्छा, गो० ! निदायंपि वेयणं वे० वे० अनिदायंपि वेयणं वेद०, से केणट्ठेणं भंते ! एवं वु०–जोइसिया निदायंपि० अनिदायंपि वेयणं वेदंति ?, गो० ! जोइसिया दुविहा पं०, तं०–माइमिच्छद्दिट्ठिउववण्णगा य अमइसम्मद्दिट्ठीउववन्नगा य, तत्थ णं जे ते माइमिच्छद्दिट्ठिउववन्नगा ते णं अनिदायं वेयणं वेयंति, तत्थ णं जे ते अमाईसम्मादिट्ठीउ० ते णं निदायं वे० वे०, से एतेणट्ठेणं गो० ! एवं० जोइसिया दुविहंपि वेदनं वे०, एवं वेमाणियावि

वृ. 'कतिविहा णं भंते !' इत्यादि, च अनिदा च, तत्र नितरां निश्चितं वा सम्यक् दीयते चित्तमस्यामिति निदा, बहुलाधिकाराद् 'उपसर्गादात' इत्यधिकरणे धञ्, सामान्येन चित्तवती सम्यग्विवेकवती वा इत्यर्थः, इतरा त्वनिदा–चित्तविकला सम्यग्विवेकविकला वा, एतामेव

Jain Education International   For Private & Personal Use Only   www.jainelibrary.org

चतुर्विंशतिदण्डकक्रमेण प्रतिपादयति-

'नेरइया ण'मित्यादि, द्विविधा हि नैरयिकाः-संज्ञिभूता असंज्ञिभूताश्च, तत्र ये ते संज्ञिभ्य उत्पन्नास्ते संज्ञिभूताः, ये त्वसंज्ञिभ्यस्तेऽसंज्ञिभूताः असंज्ञिनश्च पाश्चात्यं न किमपि जन्मान्तरकृतं शुभमशुभं वैरादिकं वा स्मरन्ति, स्मरणं हि तत्र प्रवर्तते यत्तीव्रेणाभिसन्धिना कृतं भवति, न चासंज्ञिभवे पाश्चात्ये तेषां तीव्राभिसन्धिरासीत्, मनोविकलत्वात्, ततो यामपि काञ्चिद्वेदनां नैरयिका वेदयन्ते तामनिदां, पाश्चात्यभवानुभूतिविषयस्मरणपटुचित्तासम्भवात्, संज्ञिभूतास्तु सर्वं पाश्चात्यमनुस्मरन्तीति ते निदां वेदनां वेदयन्ते इति,

एवमसुरकुमारादयः स्तनितकुमारपर्यवसाना भवनपतयो वक्तव्याः, तेषामपि संज्ञिभ्योऽसंज्ञिभ्यश्चोत्पादसम्भवात्, पृथिव्यप्तेजोवायुवनस्पतिद्वितिर्चतुरिन्द्रियाः सम्मूर्च्छिमा इति मनोविकलत्वात् अनिदामेव वेदनां वेदयन्ते, 'पंचिंदियतिरिक्खजोणिया मणूसा वाणमंतरा जहा नेरइया' इति, पञ्चेन्द्रियतिर्यग्योनिका मनुष्या व्यनतराश्च यथा नैरयिकास्तथा वक्तव्या इति शेषः, निदामपि वेदनां वेदयन्ति अनिदामपि वेदनां वेदयन्ते इति वक्तव्या इत्यर्थः कस्मादिति चेत्, उच्यते,

इह पञ्चेन्द्रियतिर्यग्योनिका मनुष्याश्च द्विधा भवन्ति, तद्यथा-सम्मूर्च्छिमा गर्भव्युत्क्रान्तिकाश्च, तत्र ये ते सम्मूर्च्छिमास्ते मनोविकलत्वादनिदां वेदनां वेदयन्ते, ये तु गर्भव्युत्क्रान्तास्ते समनस्का इति निदां वेदनामनुभवन्ति, व्यन्तरास्तु संज्ञिभ्योऽपि उत्पद्यन्ते असंज्ञिभ्योऽपि ततस्तेऽपि नैरयिकवत् निदां चानिदां च वेदनां वेदयमाना भावनीयाः,

'जोइसिया ण'मित्यादि, ज्योतिष्कास्तु संज्ञिभ्य एवोत्पद्यन्ते, ततस्तेषु न नैरयिकोक्तेन प्रकारेण निदानिदे वेदने सम्भावनीये, किन्तु प्रकारान्तरेण, ततस्तमेव प्रकारं बुभुत्सुः प्रश्नसूत्रमाह- 'से केणट्ठेणं भंते !' इत्यादि सुगमं, भगवानाह-'गोयमे'त्यादि, ज्योतिष्का हि द्विविधाः- मायिमिथ्यादृष्ट्युपपन्नकाः अमायिसम्यग्दृष्ट्युपपन्नकाश्च,

तत्र मायानिर्वर्त्तितं यत्कर्म मिथ्यात्वादिकं तदपि माया, कार्ये कारणोपचारात्, माया विद्यते येषां ते मायिनः, अत एव मिथ्यात्वोदयात् मिथ्या-विपर्यस्ता दृष्टिः-वस्तुतत्त्वप्रतिपत्तिर्येषां ते मिथ्यादृष्टयो मायिनश्च ते मिथ्यादृष्टयश्च मायिमिथ्यादृष्टयस्ते च ते उपपन्नकाश्च मायमिमिथ्यादृष्ट्युपपन्नकाः तद्विपरीता अमायिसम्यग्दृष्ट्युपपन्नकाः,

तत्र ये ते मायिमिथ्यादृष्ट्युपपन्नकास्तेऽपि मिथ्यादृष्टित्वादेव व्रतविराधनातोऽज्ञानतपोवशाद्वा वयमेवंविधा उत्पन्ना इति न जानते, ततः सम्यग्यथावस्थितपरिज्ञानाभावादनिदां वेदनां वेदयमानास्ते वेदितव्याः, ये त्वमायिसम्यग्दृष्ट्युपपन्नास्त सम्यग्दृष्टित्वात् यथावस्थितं स्वरूपं जानन्ति, ततो यां काञ्चन वेदनां वेदयन्ते तां सर्वामपि निदामिति,

'एवं चेव वेमाणियावि' इति एवं-ज्योतिष्कोक्तेन प्रकारेण वैमानिका अपि निदामनिदां च वेदनां वेदयमाना वेदितव्याः, तेषामपि मिथ्यादृष्टिसम्दृष्टिभेदतो द्विविधत्वात् ॥

पदं - ३५ - समाप्तम्

मुनि दीपरत्नसागरेण संशोधिता सम्पादिता प्रज्ञापनाउपाङ्गसूत्रे पञ्चत्रिंशत्तमपदस्य मलयगिरिआचार्येण विरचिता टीका परिसमाप्ता ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पदं – ३६ – "समुद्घातः"

वृ. तदेवं व्याख्यातं पञ्चत्रिंशत्तमं पदं, सम्प्रति षट्त्रिंशत्तममारभ्यते, तस्य चायमभिसम्बन्धः–इहानन्तरपदे गतिपरिणामविशेषो वेदना प्रतिपादिता, इहापि गतिपरिणामविशेष एव समुद्घातश्चिन्त्यते, तत्र समुद्घातवक्तव्यताविषयए इयमादौ सङ्ग्रहणिगाथा–

मू. (५९९) *वेयणकसायमरणे वेउव्वियतेयए य आहारे ।*
केवलिए चेव भवे जीवमणुस्साण सत्तेव ॥

वृ. 'वेयणे'त्यादि, इह समुद्घाताः सप्त भवन्ति, तद्यथा–'वेयणकसायमरणे'इति, वेदनं कषायाश्च मरणं च वेदनकषायमरणं समाहारो द्वन्द्वस्तस्मिन् विषये त्रयः समुद्घाता भवन्ति, तद्यथा–वेदनासमुद्घाताः कषायसमुद्घातो मरणसमुद्घातश्च, 'वेउव्विय'त्ति वैक्रियविषयश्चतुर्थः समुद्घातः, तैजसः पञ्चमः समुद्घात;, षष्ठ आहार इति–आहारकशरीरविषयः,

–सप्तमः केवलिकः–केवलिषु भवति, 'जीवमणुस्साण सत्तेवि'त्ति सामान्यतो जीवचिन्तायां मनुष्यद्वारचिन्तायां सप्तैव–सप्तपरिमाणाः समुद्घाता वक्तव्याः, न न्यूनाः, सप्तानामपि तत्र सम्भवात्, 'सत्तेव'त्ति एवकारोऽत्र परिमाणे, वर्त्तते च परिमाणे एवशब्दः, यदाह शाकटायनन्यासकृत्–'एवोऽवधारणपृथकत्वपरिमाणेष्वि'ति, शेषद्वारचिन्तायां तु यथासम्भवं वाच्याः,ते चाग्रे स्वयमेव सूत्रकृताऽभिधास्यन्ते इत्येष सङ्ग्रहणिगाथासङ्क्षेपार्थः ।

अथ समुद्घात इति कः शब्दार्थः ?, उच्यते, समित्येकीभावे उद्प्राबल्ये, एकीभावेन प्राबल्येन घातः समुद्घातः, केन सह एकीभावगमनमिति चेत्, उच्यते, अर्थाद्वेदनादिभिः तथाहि–यदाऽऽत्मा वेदनादिसमुद्घात गतो भवति तदा वेदनाद्यनुभवज्ञानपरिणत एव भवति, नान्यज्ञानपरिणतः, प्राबल्येन कथं घात इति चेत्, उच्यते, इह वेदनादिसमुद्घातपरिणतो बहून् वेदनीयादिकर्मप्रदेशान् कालान्तरानुभवयोग्यानुदीरणाकरणेनाकृष्योदयावलिकायां प्रक्षिप्यानुभूय च निर्जरयति, आत्मप्रदेशैस्सह सङ्क्लिष्टान् सातयतीति भावः, 'पुव्वकयकम्मसाडणं तु निज्जरा' इति वचनात्, तथाहि–वेदनासमुद्घातोऽसद्वेद्यकर्माश्रयः,

कषायसमुद्घातः कषायाख्यचारित्रमोहनीयकर्माश्रयः, मारणान्तिकसमुद्घातः अन्तर्मुहूर्त्तशेषायुःकर्माश्रयः, वैक्रिवकतैजसाहारकसमुद्घाता यथाक्रमं वैक्रियशरीरतैजसशरीराहारकशरीरनामकर्माश्रयाः,

केवलिसमुद्घातः सदसद्वेद्यशुभाशुभनामोच्चनीयचैर्गोत्रकर्माश्रय;, तत्र वेदनासमुद्घातगत आत्मा असातवेदनीयकर्मपुद्गलपरिशातं करोति, तथाहिवेदनापीडितो जीवः स्वप्रदेशानन्तान्तकर्मस्कन्धवेष्टितान् शरीराद्वहिरपि विक्षिपति, तैश्च प्रदेशैर्वदनजठरादिरन्ध्राणि कर्णस्कन्धाद्यपान्तरालानि चापूर्यायामतो विस्तरतश्च शरीरमात्रं क्षेत्रमभिव्याप्यान्तर्मुहूर्त्त यावदवतिष्ठते, तस्मिंश्चान्तर्मुहूर्त्ते प्रभूतासातावेदनीयकर्मपुद्गलपरिशातं करोति,

कषायसमुद्घातसमुद्धतः कषायाख्यचारित्रमोहनीयकर्मपुद्गलपरिशातं विधत्ते, तथाहि–कषायोदयसमाकुलो जीवः प्रदेशान् बहिर्विक्षिपति, तैः प्रदेशैर्वदनोदरादिरन्ध्राणि कर्णस्कन्धाद्यन्तरालानि चापूर्यायामतो विस्तरतश्च देहमात्रं क्षेत्रमभिव्याप्य वर्त्तते, तथाभूतश्च प्रभूतान् कषायकर्म्मपुद्गलान् परिशातयति,

एवं मरणसमुद्घातगत आयुःकर्मपुद्गलान् परिशातयति, नवरं मरणसमुद्घातगतो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विक्षिप्तस्वप्रदेशो वदनोदरादिरन्ध्राणि स्कन्धाद्यपान्तरालानि चापूर्य विष्कम्भबाहल्याभ्यां स्वशरीरप्रमाणमायामत; स्वशरीरातिरेकतो जघन्यतोऽङ्गुलासङ्खयेयभागं उत्कर्षतोऽसङ्खयेयानि योजनान्येकदिशि क्षेत्रमभिव्याप्य वर्त्तत इति वक्तव्यं,

वैक्रियसमुद्घातगतः पुनर्जीवः स्वप्रदेशान् शरीराद्बहिर्निष्काश्य शरीरविष्कम्भबाहल्यमानमायामतः सङ्खयेययोजनप्रमाणं दण्डं निसृजति, निसृज्य च यथास्थूलान् वैक्रियशरीरनामकर्मपुद्ग-ान् प्राग्वत् शातयति, तथा चोक्तम्-'वेउव्वियसमुग्घाएणं समोहणइ समोहणित्ता संखिज्जाइं जोयणाइं दंडं निसिरइ, निसिरित्ता अहाबायरे पुग्गले परिसाडेइ' इति,

एवं तैससाहारसमुद्घातावपि भावनीयौ, नवरं तैजसमुद्घातस्तेजोलेश्याविनिर्गमकाले तैजसनामकर्मपुद्गलपरिशातहेतुः, आहारकसमुद्घातगतस्त्वाहारशरीरनामकर्मपुद्गलान् परिशातयतीति,

केवलिसमुद्घातगतः केवली सदसद्वेद्यादिकर्मपुद्गलपरिशातं करोति, स च यथा कुरुते तथा विनेयजनानुग्रहाय भाव्यते इति, केवलिसमुद्घातोऽष्टसामयिकः, तं च कुर्वन् केवली प्रथमसमये बाहल्यतः स्वशरीरप्रमाणमूर्ध्वमधश्च लोकान्तपर्यन्तं आत्मप्रदेशानां दण्डमारचयति, द्वितीयसमये पूर्वापरं दक्षिणोत्तरं वा कपाटं तृतीये मन्थानं चतुर्थेऽवकाशान्तराणां पूरणं पञ्चमेऽवकाशान्तराणां संहारं षष्ठेः मथः सप्तमे कपाटस्य अष्टमे स्वशरीरस्थो भवति, वक्ष्यति च-"पढमे समये दंडं करेई, बीए कवाडं करेइ" इत्यादि, तत्र दण्डसमयात् प्राक् या पल्योपमासङ्खयेयभागमात्रा वेदनीयनामगोत्राणां स्थितिरासीत् तस्या बुद्धया असङ्खयेयभागाः, क्रियन्ते, ततो दण्डसमये दण्डं कुर्वन् असङ्खयेयान् भागान् हन्ति, एकोऽसङ्खयेयो भागोऽवतिष्ठते, यश्च प्राक्कर्मत्रयस्यापि रसस्तस्याप्यनन्ता भागाः क्रियन्ते,

ततस्तस्मिन् दण्डसमये असातवेदनीय १ प्रथमवर्जससंस्थान ६ संहननपञ्चका ११ प्रशस्तवर्णादिचतुष्टयो १५ पघाता १६ प्रशस्तविहायोगति १७ दुःस्वर १८ दुर्भगा १९ स्थिरा २० पर्याप्तका २१ शुभा २२ नादेया २३ यशः कीर्त्ति २४ नीचैर्गोत्ररूपाणां २५ पञ्चविंशतिप्रकृतीनामनन्तान् भागान् हन्ति, एकोऽनन्तभागोऽवशिष्यते,

तस्मिन्नेव च समये सातवेदनीय १ देवगति २ मनुष्यगति ३ देवानुपूर्वी ४ मनुष्यापूर्वी ५ पञ्चेन्द्रियजाति ६ शरीरपञ्चको ११ पाङ्गत्रय १४ प्रथमसंस्थान १५ संहनन १६ प्रशस्तवर्णादिचतुष्टया २० गुरुलघु २१ पराघातो २२ च्छ्वास १३ प्रशस्तविहायोगति २४ त्रस २५ बादर २६ पर्याप्त २७ प्रत्येकातपो २९ द्योत ३० स्थिर ३१ शुभ ३२ सुभग ३३ सुस्वरा ३४ देय ३५ यशःकीर्त्ति ३६ निर्माण ३७ तीर्थकरो ३७ च्चैर्गोत्ररूपाणा ३९ मेकोनचत्वारिंशतः प्रकृतीनामनुभागोऽप्रशस्तप्रकृत्यनुभागमध्यप्रवेशनोनोपहन्यते,

समुद्घातमाहात्म्यमेतत्, तस्य चोद्धरितस्य स्थितेरसङ्खयेयभागस्यानुभागस्य चानन्तभागस्य पुनर्यथाक्रमं असङ्खयेया अनन्ताश्च भागाः क्रियन्ते, द्वितीये कपाटसमये स्थितेरससङ्खयेयान् भागान् हन्ति, एकोऽवशिष्यते, अनुभागस्य चानन्तान् भागान् हन्ति एकं मुञ्चति, अत्राप्यप्रशस्तप्रकृत्यनुभागमध्यप्रवेशनेन प्रशस्तप्रकृत्यनुभागघातो द्रष्टव्यः, पुनरप्येततसमयेऽवशिष्टस्य स्थितेरसङ्खयेयभागस्यानुभागस्य चानन्ततमभागस्य पुनर्बुध्या यथाक्रममसङ्खयेया अनन्ताश्च भागाः क्रियन्ते ततस्तृतीये समये स्थितेरसङ्खयेयान् भागान् हन्ति, एकं मुञ्चति, अनुभागस्य चानन्तान् भागान्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

हन्ति, एकमनन्तभागं मुञ्चति, अत्रापि प्रशस्तप्रकृत्यनुभागधातोऽप्रशस्तप्रकृत्यनुभागमध्य-प्रवेशनेनावसेयः, ततः पुनरपि तृतीयसमयावशिष्टस्य स्थितेरसङ्ख्येयभागस्यानुभागस्य चानन्त-तमभागस्य बुध्ध्या यथाक्रममसङ्ख्येया अनन्ताश्च भागाः क्रियन्ते, ततश्चतुर्थसमये स्थितेरसङ्ख्येयान् भागान् हन्ति, एकस्तिष्ठति, अनुभागस्याप्यनन्तान् भागान् हन्त्येकोऽवशिष्यते, प्रशस्तप्रकृत्यनुभाग- दातश्च पूर्ववदवसेयः,

एवं च स्थितिघातादि कुर्वतश्चतुर्थसमये स्वप्रदेशापूरितसमस्तलोकस्य भगवतः केवलिनो वेदनीयादिकर्मत्रयस्थितिरायुषः सङ्ख्येयगुणा जाता, अनुभागस्त्वद्याप्यनन्तगुणः, चतुर्थसमयाव-शिष्टस्य च स्थितेरसङ्ख्येयभागस्यानुभागस्य चानन्ततमभागस्य भूयोऽपि बुद्धया यथाक्रमं सङ्ख्येया अनन्ताश्च भागाः क्रियन्ते, ततोऽवकाशान्तरसंहारसमये स्थितेः सङ्ख्येयभागान् हन्ति, एकं सङ्ख्येय-भागं शेषीकरोति, अनुभागस्यानन्तान् भागान् हन्ति एकं मुञ्चति, एवमेतेषु पञ्चसु दण्डादिसमयेषु प्रत्येकं सामयिकं कण्डकमुत्कीर्णं, समये २ स्थितिकण्डकानुभागकण्डघातनात्, अतः परं षष्ठसम-यादारभ्य स्थितकण्डकमनुभागकण्डकं चान्तर्मुहूर्तेन कालेन विनाशयति, प्रयत्नमन्दीभावात्, षष्ठादिषु च समयेषु कण्डकस्य प्रतिसमयमेकैकं शकलं तावदुत्किरति यावदन्तर्मुहूर्तचरमसमये सकलमपि तत्कण्डकमुत्कीरणं भवति, एवमान्तर्मौहूर्त्तिकानि स्थितिकण्डककान्यनुभागकण्डकानि च घातयन् तावद्वेदितव्यः यावत् सयोग्यवस्थाचरमसमयः, सर्वाण्यपि चामूनि स्थित्यनुभाग-कण्डकान्यसङ्ख्येयान्यव- गन्तव्यानीति कृतं प्रसङ्गेन, प्रकृतं प्रस्तुमः । तत्र संग्रहणिगाथोक्तमर्थं स्पष्टयन् प्रथमतः समुद्घात- सङ्ख्याविषयं प्रश्नसूत्रमाह–

मू. (६००) *कति णं भंते ! समुग्घाया पं० ?, गो० ! सत्त समुग्घाया पं०, तं०–वेदनास-मुग्घाते १ कसायसमुग्घाते २ मारणंतियसमु० ३ वेउव्वियस० ४ तेयास० ५ आहारस० ६ केवलिसमुग्घाते ७ ।*

वेदनासमुग्घाए णं भंते ! कतिसमइए पं० ?, गो० ! असंखेज्जसमइए अंतोमुहुत्तिते पं०, एवं जाव आहारसमुग्घाते, केवलिसमुग्घाए णं भंते ! कतिसमइए पं० ?, गो० ! अट्ठसमए पं०

नेरइयाणं भंते ! कति समुग्घाया पं० ?, गो० ! चत्तारि समुग्घाया पं०, तं०–वेदनासमुग्घाए कसायस० मारणंतियस० वेउव्वियस०, असुरकुमाराणं भंते ! कति समुग्धाया पं० ?, गो० ! पंच समुग्घाया पं०, तं०–वेदणास० कसायस० मारणंतियस० वेउव्वियस० तेयासमुग्घाए, एवं जाव थणियकुमाराणं,

पुढविकाइयाणं भंते ! कति समुग्घाया पं० ?, गो० ! तिन्नि समुग्घाया पं०, तं०–वेदनास० कसायस० मारणंतियस०, एवं जाव चउरिंदियाणं, नवरं वाउकाइयाणं चत्तारि समुग्घाया पं०, तं०–वेदनास० कसायस० मारणंतियस० वेउव्वियस०, पंचिंदियतिरिक्खजोणियाणं जाव वेमाणियाणं भंते ! कति समुग्घाया पं० ?, गो० ! पंच समुग्घाया पं०, तं०–वेयणास० कसायस० मारणंतियस० वेउव्वियस० तेयास०, नवरं मणूसाणं सत्तविहे समुग्धाए पं०, तं०–वेदनास० कसायस० मारणंतियस० वेउ० तेया० आहार० केवलिसमुग्घाते

वृ. 'कइ ण'मित्यादि, कति–किंतरिमाणा णमिति वाक्यालङ्कारे 'भदन्ते'ति भगवतो वर्द्धमानस्वामिन आमन्त्रणं, भदन्तत्वं च भगवतः परमकल्याणयोगित्वात्, यदिवा भवान्तेति द्रष्टव्यं, सकलसंसारपर्यन्तवर्त्तित्वात्, अथवा भयान्त ! इहपरलोकादिभेदभिन्नसप्तप्रकार-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भयविनाशकत्वात्, समुद्घाताः-उक्तशब्दार्थाः प्रज्ञप्ताः, भगवानाह-'गोयमे'त्यादि, गौतम ! सप्त समुद्घाताः प्रज्ञप्ताः, तद्यथा-वेदनासमुद्घात इत्यादि, वदनायाः समुद्घातो वेदनासमुद्घातः, एवं यावदाहारकसमुद्घात इति, 'केवलिसमुद्घात' इति केवलिनः समुद्घातः केवलिसमुद्घातः सम्प्रति कः समुद्घातः कियन्तं कालं यावद्भवतीत्येतन्निरूपणार्थमाह-

'वेयणे'त्यादि, सुगमं, नवरं 'जावे' त्यादि, एवमुक्तप्रकारेणाभिलापेनान्तर्मुहूर्त्तप्रमाणतया च समुद्घाताः क्रमेण तावद्वाच्याः यावदाहारकसमुद्घातः, एते षडप्याद्या आन्तर्मुहूर्तिका केवलिसमुद्घातस्त्वष्टसायमयिकः, स चानन्तरमेव भावितः, एतानेव समुद्घातान् चतुर्विंशतिदण्डकक्रमेण चिन्तियिषुराह-

'नेरइयाण'मित्यादि, नैरयिकाणामाद्याश्चत्वारः, तेषां तेजोलब्ध्याहारकलब्धिकेवलित्वाभावतः शेषसमुद्घातत्रयासम्भवात्, असुरकुमारादीनां दशानामपि भवनपतीनां तेजोलेश्यालब्धिभावात् आद्याः पञ्चसमुद्घाताः, पृथिवीकायिकाप्कायिकतैजस्कायिकवनस्पतिकायिकद्वित्रिचतुरिन्द्रियाणामाद्यास्त्रयः, तेषां वैक्रियादिलब्ध्यभावतः उत्तरेषां चतुर्णामपि समुद्घातनानामसम्भवात्, वायुकायिकानामाद्याश्चत्वारस्तेषां वैक्रियलब्धिसम्भवेन वैक्रियसमुद्घातस्यापि सम्भवात्, पञ्चेन्द्रियतिर्यग्योनिकानामाद्याः पञ्च, केषांचित्तेषां तेजोलब्धेरपि भावात्, मनुष्याणां सप्त, मनुष्येषु सर्वसम्भवात्, व्यन्तरज्योतिष्कवैमानिकानामाद्याः पञ्च, वैक्रियतेजोलब्धिभावाद्, उत्तरौ तु द्वौ न सम्भवतः, आहारकलब्धिकेवलित्वायोगात् ॥

सम्प्रति चतुर्विंशतिदण्डकमधिकृत्य एकैकस्य जीवस्य कति वेदनादयः समुद्घाता अतीताः कति भाविन इति चिचिन्तयिषुराह-

मू. (६०१) *एगमेगस्स णं भंते ! नेरइयस्स केवइया वेदनासमुग्घाया अतीत ?, गो० ! अनंता, केवइया पुरेक्खडा ?, गो० ! कस्सइ अत्थि कस्सइ नत्थि, जस्सत्थि तस्स जहन्नेणं एक्को वा दो वा तिन्वि उक्कोसेणं संखेज्जा वा असखेज्जा वा अनंता वा, एवमसुरकुमारस्सवि निरंतरं जाव वेमाणियस्स, एवं जाव तेयगसमुग्घाते, एवमेते पंच चउवीसा दंडगा ।*

एगमेगस्स णं भंते ! नेरइयस्स केवइया आहारसमुग्घाया अतीता ?, कस्सइ अत्थि कस्सइ नत्थि, जस्स अत्थि तस्स जह० एक्को वा दो वा उक्को० तिन्नि, केवइया पुरेक्खडा ?, कस्सइ अत्थि कस्सइ नत्थि, जस्सत्थि जह० एक्को वा दो वा तिन्नि वा उक्को० चत्तारि, एवं निरंतरं जाव वेमाणियस्स, नवरं मणूसस्स अतीतावि पुरेक्खडावि जहा नेरइयस्स पुरेक्खडा,

एगमेगस्स णं भंते ! नेरइयस्स केवतिया केवलिसमुग्घाया अतीता ?, गो० ! नत्थि, केवइया पुरेक्खडा ?, गो० ! कस्सइ अत्थि कस्सइ नत्थि, जस्सत्थि एक्को, एवं जाव वेमाणियस्स, नवरं मणूसस्स अतीता कस्सइ अत्थि कस्सइ नत्थि, जस्सत्थि एक्को, एवं पुरेक्खडावि

वृ. 'एगमेगस्स णं भंते !' इत्यादि, एकैकस्य सूत्रे मकारोऽलाक्षणिकः, भदन्त १ नैरयिकस्य सकलमतीतं कालमधिकृत्य 'केवइय'त्ति कियन्तो वेदनासमुद्घाता अतीता-अतिक्रान्ताः ?, भगवानाह-गौतम ! अनन्ताः नारकादिस्थानानामनन्तशः प्राप्तत्वादेकैकस्मिंश्च नारकादिस्थानप्राप्तिकाले प्रायोऽनेकशो वेदनासमुद्घातानां भावात्, एतच्च बाहुल्यापेक्षयोच्यते, बहवो हि जीवा अनन्कालसमसंव्यवहारराशेरुद्व त्ता वर्त्तन्ते, ततस्तदपेक्षया एकैकस्य नैरयिकस्यानन्ता अतीता वेदनासमुद्घाता उपपद्यन्ते, ये तु स्तोककालमसंव्यवहारराशेरुद्वृत्तास्तेषां यथासम्भवं सङ्ख्येया

Jain Education International For Private & Personal Use Only www.jainelibrary.org

असङ्ख्येया वा प्रतिपत्तव्याः केवलं ते कतिपये इति न विवक्षिताः,

'केवइया पुरेक्खड'त्ति इदं सूत्रं पाठसूचामात्रं, सूत्रपाठस्त्वेवम्–'एगमेगस्स णं भंते ! नेरइयस्स केवइया वेयणासमुग्घाया पुरेक्खडा' ? ति, सुगमं, नवरं पुरेअग्रे कृताः–तत्परिणामप्राप्तियोग्यतया व्यवस्थापिताः, सामार्थ्यात् तत्कर्तृजीवेनेति गम्यते, पुरस्कृता–अनागतकालभाविन इति तात्पर्यार्थः, अत्र भगवानाह–कस्यापि सन्ति कस्यापि न सन्ति, यस्यापिसन्ति तस्यापि जघन्यत एको द्वौ वा त्रयो वा, उत्कर्षतः सङ्ख्येया वा असङ्खयेया वा अनन्ता वा, इयमत्र भावना–

यो नाम विवक्षितप्रश्नसमयानन्तरं वेदनासमुद्घातमन्तरेणैव नरकादुद्व त्त्यानन्तरमुष्यभवे वेदनासमुद्घातमप्राप्त एव सेत्स्यति तस्य पुरतो वेदनासमुद्घात एकोऽपि नास्ति, यस्तु विवक्षितप्रश्नसमयानन्तरमायुः शेषे कितत्कालं नरकभवे स्थित्वा तदनन्तरं मनुष्यभवमागत्य सेत्स्यति तस्य एकादिसम्भवः, सङ्ख्यातकालसंसारावस्थायिनः सङ्ख्याता असङ्ख्यातकाल संसारावस्थायिनोऽसङ्ख्याताः अनन्तकालसंसारावस्थायिनोऽनन्ताः, 'एव'मित्यादि, एवं नैरयिकोक्तप्रकारेणासुरकुमारस्यापि यावत् स्तनितकुमारस्य वाच्यं, ततश्चतुर्विंशततिदण्डकक्रमेण निरन्तरं तावद्वाच्यं यावद्वैमानिकस्य, किमुक्तं भवति ? –

सर्वेष्वपि असुरकुमारादिषु स्थानेषु अतीता वेदनासमुद्घाता अनन्ता वाच्याः, पुरस्कृतास्तु कस्यापि सन्ति कस्यापि न सन्ति, यस्यापि सन्ति तस्यापि जघन्यत एको द्वौ वा त्रयो वा उत्कर्षतः सङ्ख्येया असङ्ख्येया अनन्ता वा इति वाच्याः, भावनापि पूर्वोक्तानुसारेण स्वयं परिभावनीया, एवं चतुर्विंशतिदण्डकक्रमेण कषायसमुद्घातो मारणान्तिकसमुद्घातो वैक्रियसमुद्घातस्तैजससमुद्घातश्च प्रत्येकं, तत एव पढश्च चतुर्विंशतिदण्डकसूत्राणि भवन्ति, तथा चाह–'एवं जाव तेयगसमुग्घाए'इत्यादि, एवं वेदनासमुद्घातप्रकारेण शेषसमुद्घाततेष्वपि प्रत्येकं तावद्वक्तव्यं यावत्तैजससमुद्घातः, शेषं सुगमं,

'एगमेगस्स ण'मित्यादि, एकैकस्य भदन्त ! नैरयिकस्य पाश्चात्यं सकलमतीतकालमपक्ष्य कियन्त आहारकसमुद्घाता अतीताः ?, भगवानाह–गौतम ! कस्यापि 'अत्थि'त्ति अस्तीति निपातः सर्वलिङ्गवचनो, यदाह शाकटायनन्यासकृत्–''अस्तीति निपातः सर्वलिङ्गवचनेष्वि''ति, ततोऽयमर्थः–कस्यापि अतीता आहारकसमुद्घाताः सन्ति कस्यापि न सन्ति, येन पूर्वं मानुष्यं प्राप्य तथाविधसामग्रयभावतश्चतुर्दश पूर्वाणि नाधीतानि, चतुर्दशपूर्वाधिगमे वा आहारकलब्ध्यभावतः तथाविधप्रयोजनाभावतो वा आहारकशरीरं न कृतं तस्य न सन्तीति, यस्यापि सन्ति तस्यापि जघन्यतः एको वा द्वौ वा उत्कर्षस्तु त्रयो, न तु चत्वारः, चतुः–कृत्वः कृताहारकशरीरस्य नरकगमनाभावात्, आह च मूलटीकाकारः–''आहारसमुग्घाया उक्कोसेणं तिन्नि, तदुवरि नियमा नरगं न गच्छइ जस्स चत्तारि भवन्ति'' इति, पुरस्कृता अपि कस्यापि सन्ति कस्यापि न सन्ति, तत्र यो मानुष्यं प्राप्य तथाविधसाम्ग्र्यभावतश्चतुर्दशपूर्वाधिगममाहारकसमुद्घातं चान्तरेण सेत्स्यति तस्य न सन्ति, शेषस्य तु यथासम्भवं जघन्यत एको द्वौ वा त्रयो वा उत्कर्षतश्चत्वारः, तत ऊर्ध्वमवश्यं गत्यन्तरासंक्रमेणाहारकसमुद्घातमन्तरेण च सिद्धिगमनभावात्,

'एव'मित्यादि, एवं नैरयिकोक्तेन प्रकारेण चतुर्विंशतिदण्डकक्रमेण निरन्तरं तावद् वाच्यं यावद्वैमानिकसय् सूत्रं, नवरं मनुष्यस्यातीता अपि पुरस्कृता अपि यथा नैरयिकस्य पुरस्कृतास्तथा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वाच्याः, अतीता अपि चत्वारः पुरस्कृता अपि चत्वार उत्कर्षतो वाच्या इत्यर्थः, सूत्रपाठश्चैवम्–'एगमेगस्स णं मणूसस्स भंते ! केवइया आहारसमुग्घाया अतीता ?, गोयमा ! कस्सइ अत्थि कस्सइ नत्थि, जस्स अत्थि जहन्नेणं एक्को वा दो वा तिन्नि वा उक्कोसेणं चत्तारि, केवइया पुरेक्खडा गोयमा ! कस्सइ अत्थि कस्सइ नत्थि, जस्स अत्थि जहन्नेणं एक्को दो वा तिन्नि वा उक्कोसेणं चत्तारि' अत्र भावना–इह यश्चतुर्थवेलमाहारकशरीरंकरोति स नियमात्त तद्भव एव मुक्तिमासा- दयति, न गत्यन्तरं, कथमैतदवसीयते इति चेत् ?, उच्यते, सूत्रपौर्वापर्यपर्या लोचनात्, तथाहि–यदि चतुर्थवेलमप्याहारकशरीरं कृत्वा गत्यन्तरं संक्रामेत ततो नैरयिकादावन्यतरस्यां गतौ उत्कर्षतश्चत्वारोऽप्याहारकस्य समुद्घाता उच्यरेन, न चोच्यन्ते, ततोऽवसीयते–चतुर्थवेलमाहार-कशरीरं कृत्वा नियमात् तद्भव एव मुक्तो भवति न गत्यन्तरगामी,

तत्र यः प्रागाहारकशरीरं कदाचनापि न कृतवान् तस्यातीत आहारकसमुद्घातो नास्ति, ततस्तदपेक्षयोक्तं 'कस्सइ नत्थि'त्ति, यस्यापि सन्ति सोऽपि यदि पूर्वमेकवारमाहारकशरीरं कृतवान् तस्यैकोऽतीत आहारकस्य समुद्घातः द्वौ वारौ कृतवतो द्वौ त्रीन् वारान् कृतवस्त्रयो यश्चतुर्थवेल-माहारकशरीरं कृत्वा आहारकसमुद्घाताच्चतुर्थात्प्रतिनिवृत्तो वर्त्तते न चाद्यापि मनुजभवंविजहाति तस्य चत्वारः, पुरस्कृता अपि समुद्घाताः कस्यापि सन्ति कस्यापि न सन्ति, तत्र यश्चतुर्थवेलमा-हारकशरीरं कृत्वा आहारकसमुद्घातात् प्रतिनिवृत्तो यदिवा पूर्वमकृताहारकशरीरोऽप्यथवा एकावरकृताहारकशरीरोऽपि यदिवा द्विकृत्वः कृताहारकशरीरोऽपि यदिवा त्रिकृत्वः कृताहार-कशरीरोऽपि तथाविधसामग्र्यभावात् उत्तरकालमाहारकशरीरमकृत्वैव मुक्तिमवाप्स्यति तस्य पुरस्कृता आहारकसमुद्घाता न सन्ति, यस्यापि सन्ति तस्यापि जघन्यत एको वा द्वौ वा त्रयो वा उत्कर्षतश्चत्वारः, तत्र एकादिसम्भवः पूर्वोक्तभावनानुसारेण स्वयं भावनीयः यस्तु पूर्वकालमेक-वारमपि आहारकशरीरं न कृतवान् अथ चोत्तरकालं तथाविधसामग्रीभावतो यावत्सम्भवमाहार-कशरीरकर्त्ता तस्य चत्वारो न शेषस्य ।

सम्प्रति केवलिसमुद्घातविषयं दण्डकसूत्रमाह–'एगमेगस्स ण'मित्यादि, एकैकस्य भदन्त नैरयिकस्य निरवधिकमतीतं कालधिकृत्य कियन्तः केवलिसमुद्घाता अतीताः ?, भगवानाह–'नत्थि'त्ति नास्त्यतीत एकोऽपि केवलिसमुद्घातः, केवलिसमुद्घातानन्तरं ह्यन्तर्मुहूर्त्तेन नियमतो जीवाः परमपदमश्नुवते, ततो यद्यभविष्यत्केवलिसमुद्घातस्तर्हि नरकमेव नागमिष्यद्, अथ च सम्प्रति नरकगामिनो वर्त्तन्ते तस्मान्नास्त्येकस्याप्यतीतः केवलिसमुद्घातः 'केवइया पुरेक्खड'त्ति कियन्तः पुरस्कृताः केवलिसमुद्घाता इति प्रश्नः, भगवानाह–'गोतम ! कस्सइ अत्थि कस्सइ नत्थि'त्ति, इह केवलिसमुद्घात एकस्य प्राणिन आकालम क एव भवति, न द्वित्राः, ततोऽस्तीति निपातोऽत्र एकवचनान्तो वेदितव्यः, ततश्चायमर्थः–कस्यापि केवलिस- मुद्घातः पुरस्कृतोऽस्ति, यो दीर्घतरेणापि कालेन मुक्तिपदप्राप्त्यवसरे विषमस्थितिकर्मा इति, कस्यापि नास्ति, यो मुक्तिपदमवाप्युमयोग्यो योग्यो वा केवलिसमुद्घागतमन्तरेणैव मुक्तिपदं गन्ता, तथा च वक्ष्यति–

॥१॥ "अगंतूण समुग्घायमनंता केवलीजिना ।
जरमरणविप्पमुक्का, सिद्धिं वरगइं गया ॥" इति,

इह अस्तीति निपातः सर्वलिङ्गवचन इत्यविदितसिद्धान्तस्य बहुत्वाशङ्कापि कस्यचित्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्यात् ततस्तदपनोदार्थमाह–'जस्स अत्थि' एको यस्यास्ति पुरस्कृतः केवलिसमुद्घातस्तस्य एको, भूयः संसाराभावात्,

'एवं जाव वेमाणियस्स'त्ति एवं–नैरयिकगताभिलापप्रकारेण चतुर्विंशतिदण्डकक्रम-मनुसृत्य तावद् वक्तव्यं यावद्वैमानिकस्य सूत्रं, तच्चैदम्–'एगमेगस्स णं भंते ! वेमाणियस्स केवइया केवलिसमुग्घाया अतीता ?, गोयमा ! नत्थि, केवइया पुरेक्खडा ?, गोयमा ! कस्सइ अत्थि कस्सइ नत्थि, जस्सत्थि एक्को' इति, तत्रैव विशेषमाह–'नवर'मित्यादि, नवरमयं विशेषः–मनुष्यस्य केवलिसमुद्घातस्य चिन्तायामतीताः कस्याप्यस्ति कस्यापि नास्तीति वक्तव्यः, तत्र यः केवलिसमुदअघातात् प्रतिनिवृत्तो वर्त्तते न चाद्यापि मुक्तिपदमवाप्नोति तस्यास्त्यतीतः केवलिस-मुद्घातः, ते च सर्वसङ्ख्यया उत्कर्षपदे शतपृथकत्वप्रमाणा वेदितव्याः, कस्यापि नास्ति अतीतः केवलिसमुद्घातो, यो न समुद्घातं गतवान्, ते च सर्वसङ्ख्यया असङ्ख्येया द्रष्टव्याः शतपृथक-त्वव्यतिरेकेणान्येषां सर्वेषामप्यसम्प्राप्तकेवलिसमुद्घातत्वात्, अत्राप्यस्तीति निपातस्य सर्वलिङ्गवचनत्वात्,

'कस्सइ अत्थि कस्सइ नत्थि' इत्युक्तौ बहुत्वाशङ्का स्यात् ततस्तद्वयवच्छेदार्थमाह–यस्य मनुष्यस्यातीतः केवलिसमुद्घातस्तस्य नियमादेको न द्वित्राः, एकेनैव समुद्घातेन प्रायः समस्तघातिकर्मणां निर्मूलकाषंकषितत्वात्, 'एवं पुरेक्खडावि'त्ति एवं अतीतगतेन प्रकारेण पुरस्कृता अपि केवलिसमुद्घाता वाच्याः, ते चैवम्–'कस्सइ अत्थि कस्सइ नत्थि, जस्सत्थि एक्को' इति, अत्र भावना पूर्वोक्तानुसारण स्वयं भावनीया ।। तदेवमीततमनागतं च कालमधिकृत्य एकैकस्य नैरयिकादेर्वेदनादिसमुद्घातचिन्ता कृता, सम्प्रपति नैरयिकादेः प्रत्येकं समुदायरूपस्य तच्चिन्तां चिकीर्षुराह–

मू. (६०२) *नेरइयाणं भंते ! केवइया वेदणासमुग्घाया अतीता ? गो० ! केवइया पुरेक्खडा गो० ! अनंता, एवं जाव वेमाणियाणं, एवं जाव तेयगसमुद्घायए, एवं एतेवि पंच चउवीसदंडगा,*

नेरइयाणं ! भंते ! केवइया आहारगसमुग्घाया अतीता ?, गो० ! असंखेज्जा, केवइया पु० ?, गो० ! असंखेज्जा, एवं जाव वेमाणियाणं, नवरं वणस्सइकाइयाण मणूसाण य इमं नाणत्तं–वणस्सइकाइयाणं भंते ! केवइया आहारसमुग्घाया अईया ?, गो० ! अनंता, मणूसाणं भंते ! केवइया आहारसमुग्घाया अईया ?, गो० ! सिय संखेज्जा सिय असं०, एवं पुरेक्खडावि ।

नेरइयाणं भंते ! केवइया केवलिसमुग्घाया अतीता ? गो० ! नत्थि, केवइया पुरेक्खडा ?, गो० ! असंखेज्जा, एवं जाव वेमाणियाणं, नवरं वणस्सइमणूसेसु इमं नाणत्तं–वणस्सइकाइयाणं भंते ! केवइया केवलिसमुग्धाया अतीता ?, गो० ! नत्थि, केवइया पुरे० ?, गो० ! अनंता, मणूसाणं भंते ! केवइया केवलिस० अतीता ?, गो० ! सिय अत्थि सिय नत्थि, जइ अत्थि जहन्नेणं एक्को वा दो वा तिन्नि वा, उक्कोसेणं सतपुहुत्तं, केवति० पुरेक्खडा ?, सिय संखेज्जा सिय असं०

वृ. 'नेरइयाण'मित्यादि, नैरयिकाणां विवक्षितप्रश्नसमयभाविनां सर्वेषासमुदायेन भदन्त कियन्तो वेदनासमुद्घाता अतीताः ?, भगवानाह–गौतम ! अनन्ताः, बहूनामन्तकालसंव्य-वहारराशेरुद्व त्तत्वात्, कियन्तःपुरस्कृताः ?, अत्रापि प्रश्नसूत्रपाठः परिपूर्ण एवं द्रष्टव्यः–'नेरइयाणं भंते ! केवइया वेयणासमुग्धाया पुरेक्खडा' इति, भगवानाह–गौतम ! अनन्ताः, बहूनामनन्तकाल-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भाविसंसारावस्थानभावात्, एवं चतुर्विंशतिदण्डकक्रमेण तावद् वक्तव्यं यावद्वैमानिकानां, यथा च वेदनासमुदअघातश्चतुर्विंशतिदण्डकक्रमेण चिन्तितः तथा कषायमरणवैक्रियतजस समुद्घाता अपि चिन्तनीयाः, तथा चाह-

'एवं जाव तेयगसमुग्धाए' एवं च सति एतान्यपि बहुत्वाविषयाणि पञ्च चतुर्विंशतिदण्डकसूत्राणि भवन्ति, एतदेवाह-'एवमेएति य पंच चउव्वीसदंडगा' इति, आहारकसमुद्घातचिन्तां कुर्वन्नाह-'नेरइयाण'मित्यादि, अत्र प्रश्नसूत्रं सुगमं, भगवानाह-गौतम ! असङ्ख्येयाः, इयमत्र भावना- इह नैरयिकाः सर्वदाऽपि प्रश्नसयभाविनः सर्वसङ्ख्ययाऽप्यसङ्ख्येयाः, तेषामपि मध्ये कतिपयाः सङ्ख्यातीताःकृतपूर्वाहारकसमुद्घातास्ततोऽसङ्ख्येया एव तेषामतीताहारसमुद्घाता घटन्ते, नानन्ताव नापि सङ्ख्येयाः, एवं पुरस्कृता अपि भावनीयाः, एवं चतुर्विंशतिदण्डकक्रमेण तावद्वाच्यं यावद्वैमानिकानां, आह च-

'एवं जाव वेमाणियाणं' अत्रैव यो विशेषस्तं दिदर्शयिषुराह-'नवर'मित्यादि, नवरं वनस्पतिकायिकचिन्तायां मनुष्यचिन्तायां च नैरयिकापेक्षया नानात्वमवसेयं, तदेव नानात्वमाह-'वणप्फइकाइयाण'मित्यादि, अत्र प्रश्नसूत्रं सुगमं, भगवानाह-गौतम ! अनन्ताः, अनन्तानामधिगतचतुर्दशपूर्वाणां कृताहारकसमुद्घातानां प्रमादवशतः उपचितसंसाराणां वनस्पतिषु भावात्, पुरस्कृता अनन्ताः, अनन्तानां वनस्पतिकायादुद्धृत्य चतुर्दशपूर्वाधिगमपुरस्सरं कृताहारकसमुद्घातानां भाविसिद्धिगमनभावात्,

'मणुस्साणं भंते !' इत्यादि, अत्रापि प्रश्नसूत्रं प्रतीतं, भगवानाह-गौतम ! स्यादिति निपातोऽनेकान्तद्योती, ततोऽयमर्थः-कदाचित् सङ्ख्येयाः कदाचिदसङ्ख्येयाः, कथमिति चेत्, उच्यते, इह सम्मूर्च्छिमगर्भव्युत्क्रान्तसमुदायचिन्तायां उत्कृतष्टपदे मनुष्या अङ्गुलमात्रक्षेत्रे यावान् प्रदेशराशिस्तस्य यत्प्रथमं वर्गमूलं तत् तृतीयवर्गमूलेन गुणितं सत् यावत्प्रमाणं भवतिएतावत्प्रदेशप्रमाणानि खण्डानि धनीकृतस्य लोकस्य एकपादेशिक्यां श्रेणौ यावन्ति भवन्ति एतावत्प्रमाणा एकहीनाः, ते चातीव शेषनारकादिजीवराश्यपेक्षया स्तोकाः, तत्रापि ये पूर्वमवेषु कृताहारकशरीरास्ते कतिपयाः, ते च कदाचित् विवक्षितप्रश्नसमये सङ्ख्येयाः; कदाचिदसङ्ख्येयाः, तत उक्तम्-'सिय संखेज्ञा सिय असंखेज्ञा' इति, अनागतेऽपि काले विवक्षितप्रश्नसमयभाविनां मध्ये कतिसङ्ख्यावाहारकशरीरमारप्स्यन्ति तेऽपि कदाचित् सङ्ख्येयाः कदाचिदसङ्ख्येयाः, तत आह-

'एवं पुरेक्खडावि'त्ति एवं अतीतगतेन प्रकारेण वनस्पतिकायिकानां मनुष्याणां च पुरस्कृता अपि आहारकसमुद्घाता वेदितव्याः, ते चैवम्-'वणप्फइकाइयाणं भंते ! केवइया आहारगसमुग्घाया पुरेक्खडा ?, गो० ! अनंता, मणुस्साणं भंते ! केवइया आहारगसमुग्घाया पुरेक्खडा ?, गो० ! सिय संखेज्ञा सिय असंखेज्ञा' इति, केवलिसमुद्घातविषयं प्रश्नसूत्रमाह-'नेरइयाणं भंते !' इत्यादि सुगमं, भगवानाह-गौतम ! न सन्ति केचनातीता नैरयिकाणां केवलिसमुद्घाताः, कृतकेवलिसमुद्घातानां नारकादिगमनासम्भवात्, कियन्तः पुरस्कृता इति प्रश्नः, भगवानाह-गौतम ! असंख्येयाः, सर्वदा विवक्षितप्रश्नसमयभाविनां मध्येऽसङ्ख्यातानां माविकेवलिसमुद्घातत्वात्, तथा केवलवेदसोपलब्धेः, एवं चतुर्विंशतिदण्डकक्रमेण निरन्तरं तावद् वाच्यं यावद् वैमानिकानां सूत्रं, तथा चाह-

'एवं जाव वेमाणियाणं' अत्रैव विशेषमाह-'नवर'मित्यादि, नवरं-वनस्पतिकायिकेषु

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मनुष्येषु चेदं वक्ष्यमाणलक्षणं नानात्वं, तदेववाह–'वणप्फइकाइयाण'मित्यादि, अत्र प्रश्नसूत्रं सुप्रतीतं, उत्तरसूत्रे निर्वचनं–अनन्ताः, अनन्तानां भाविकेवलिसमुद्घातानां तत्र भावात्,

'मणुस्साण'मित्यादि, अत्रापि प्रश्नसूत्रं सुगमं, भगवानाह– गौतम ! स्यात् सन्ति स्यान्न सन्ति, किमुक्तं भवति ? –यदा प्रश्नसमये समुद्घातान्निवृत्ताः प्राप्यन्ते सदा सन्ति, शेषकालं न सन्ति, तत्र 'जइ अत्थि'त्ति यदि प्रश्नसयमे कृतकेवलिसमुद्घाता मनुष्यत्वमनुभवन्तः प्राप्यन्ते तदा जघन्यत एकौ द्वौ त्रयो वा उत्कर्षतः शतपृथकत्वं, एतावतामककालमुत्कृष्टपदे केवलिनां केवलिसमुद्घातासादनात् 'केवइया पुरेक्खडा'त्ति कियन्तो मनुष्याणां केवलिसमुद्घाताः पुरस्कृताः भगवानाह–स्यात् सङ्ख्येयाः स्यादसङ्ख्येया, मनुष्या हि सम्मूर्च्छिम गर्भव्युत्क्रान्ताश्च सर्वसमुदिता उच्कृष्टपदे प्रागुक्तप्रमाणास्तत्रापि विवक्षितप्रश्नसमयभाविनां मध्ये कदाचित्केवलिसमुद्घाताः सङ्ख्येयाः, बहूनामभव्यानां भावात्, कदाचिदसङ्ख्येयाः, बहूनां भाविकेवलिसमुद्घातानां भावात्

सम्प्रति एकैकस्य नैरयिकत्वादिभावेषु वर्त्तमानस्य प्रत्येकं कति वेदनासमुद्घाता अतीताः कति भाविन इति निरूपयितुकाम आह–

मू. (६०३) *एगमेगस्स णं भंते ! नेरइयस्स नेरइयत्ते केवइया वेदणास० अतीता ?, गो० अनंता, केवइया पुरेक्खडा ?, गो० ! कस्सइ अत्थि कस्सइ नत्थि, जस्स अत्थि जह० एक्को वा दो वा तिन्नि वा, उक्कोसेणं संखेज्जा वा असंखेज्जा वा अनंता वा, एवं असुरकुमारत्ते जाव वेमाणियत्ते*

एगमेगस्स णं भंते ! असुरकुमारस्स नेरइयत्ते केवइया वेदनासमुग्घाया अतीता ? गो० ! अनंता, केवइया पु० !, गो० ! कस्सइ अत्थि कस्सति नत्थि, जस्सत्थि तस्स सिय सं० सिय अ० सिय अनंता, एगमेगस्स णं भंते ! असुरकुमारस्स असुरकुमारत्ते केवइया वेदनासमुग्घाया अतीता ?, गो० ! अनंता, केवइया पु० ?, गो० ! कस्सइ अत्थि कस्सइ नत्थि, जस्सत्थि जह० एक्को वा दो वा तिन्नि वा उ० संखे० असंखे० अनंता वा, एवं नागकुमारत्तेवि जाव वेमाणियत्ते,

एवं जहा० वेयणासमुग्घातेणं असुरकुमारे नेरइयादिवेमाणियपज्जवसाणेसु भणितो तहा नागकुमारादिया अवसेसेसु सट्ठाणेसु परट्ठाणेसु भाणितव्वा जाव वेमाणियस्स वेमाणियत्ते, एवमेते चउव्वीसा चउव्वीसं दंडगा भवंति ।

वृ. 'एगमेगस्स ण'मित्यादि, एकैकस्य भदन्त ! नैरयिकस्य सकलमतीतं कालमवधीकृत्य तदा तदा नैरयिकत्वे वृत्तस्य सतः सर्वसङ्ख्यया कियन्तः वेदनासमुद्घाता अतीताः ?, भगवानाह–गौतम ! अनन्ताः, नरकस्थानस्यानन्तशःप्राप्तत्वादेकैकस्मिंश्च नरकभवे जघन्यपदेऽपि सङ्ख्येययानां वेदनासमुद्घातानां भावात्, 'केवइया पुरेक्खडा'त्ति कियन्तो भदन्त ! एकैकस्य नैरयिकस्यासंसारमोक्षमनागतं कालमवधीकृत्य नैरयिकत्वे भावनिः सतः सर्वसङ्ख्यया पुरस्कृता वेदनासमुद्घाताः ?, भगवानाह–

'गौतम ! कस्सइ अत्थि'इत्यादि, तत्र य आसन्नमृत्युर्वेदनासमुद्घातमप्राप्यान्तिकमरणेन नरकादुद्धृ त्य सेत्स्यति तस्य नास्ति नैरयिकत्वे भावी एकोऽपि पुरस्कृतो वेदनासमुद्घातः, शेषस्य तु सन्ति, तस्यापि जघन्यत एको द्वौ वा त्रयो वा, एतच्च क्षीणशेषायुषां तद्भवजानामनन्तरं सेत्स्यतां द्रष्टव्यं, न भूयो नरकेषूत्पत्स्यमानानां, भूयो नरकेषूत्पत्तौ जघन्यपदेऽपि सङ्ख्येयानां प्राप्यमाणत्वात्, यदाह मूलटीकाकारः–"नरकेषु जघन्यस्थितिषूत्पन्नस्य नियमतः नियमतः सङ्ख्येया एव वेदनासमुद्घाता भवन्ति,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वेदनासमुद्घातप्रचुरत्वान्नारकाणा''मिति, उत्कर्षतः सङ्ख्येया असङ्ख्येया वा अनन्ता वा, तत्र सकृत नरकेषु जघन्यस्थितिषूत्पत्स्यमानलस्य सङ्ख्येयाः अनेकशो दीर्घस्थितिषु असकृद्वा उत्पत्स्यमानस्य असङ्ख्येयायः अनन्तशः उत्पत्स्यमानस्य अनन्ताः, 'एव'मित्यादि, एवं नैरयिकगतेनभिलापप्रकारेणासुरकुमारत्वेन तदनन्तरं चतुर्विंशतिदण्डकक्रमेण निरन्तरं तावद्वाच्यं यावद्वैमानिकत्वे, तच्चैवम्–'एगमेगस्स णं भंते! नेरइयस्स असुरकुमाराओ केवइया वेदनासमुग्घाया अतीता?, गो०! अनंता, केवइया पुरेक्खडा?, गो०! कस्सइ अत्थि कस्सइ नत्थि, जस्स अत्थि जहन्नेणं एक्को वा दो वा तिन्नि वा उक्कोसेणं सङ्खेज्जा वा असंङ्खेज्जा वा अनंता वा' तत्रातीतसूत्रेऽनन्तशोऽसुरकुमारत्वस्य प्राप्तत्वादुपपद्यते तद्भवमापन्नस्यानन्ता अतीता वेदनासमुद्घाताः, पुरस्कृतचिन्तायां योऽनन्तरभवेन नरकादुद्वृत्तो मानुष्यं प्राप्य सेत्स्यति प्राप्तो वा परम्परया सकृतसुकुमारभवं न वेदनासमुद्घातं गमिष्यति तस्य नास्त्येकोऽपि पुरस्कृतो असुरकुमारत्वे वेदनासमुद्घातः, यस्तु सकृदसुरकुमारत्वं प्राप्तः सन् सकृदेव वेदनासमुद्घातां गन्ता तस्य जघन्यत एको द्वौ वा त्रयो वा, शेषस्य सङ्ख्येयान वारान् असुरकुमारत्वं यास्यतः सङ्ख्येया असङ्ख्येयान् वारान् असङ्ख्येया अनन्तान् वारान् अनन्ताः, एवं चतुर्विंशतिदण्डकक्रमेण नागकुमारत्वादिषु स्थानेषु निरन्तरं सूत्रपाठस्तावद् वक्तव्यो यावद्वैमानिकत्वविषयं सूत्रं,

'एगमेगस्स ण'मित्यादि, एकैकस्य भदन्त ! असुरकुमारस्य पूर्वं नैरयिकत्वेन वृत्तस्य सतः सकलमतीतं कालमपेक्ष्य सर्वसङ्ख्यया कियन्तो वेदनासमुद्घाता अतीताः?, भगवानाह–गौतम ! अनन्ता अतीताः, अनन्तशो नैरयिकत्वस्य प्राप्तत्वात्, एकैकस्मिंश्च नैरयिकस्य भवे जघन्यपदेऽपि सङ्ख्येयानां वेदनासमुद्घातानां भावात्, कियन्तः पुरस्कृताः?, स्यात् सन्ति स्यान्न सन्ति, कस्यचित्सन्ति कस्यचिन्न सन्ति इति भावः, अत्रापीयं भावना–योऽसुरकुमारभवादुद्वृत्तो न नरकं यास्यति किन्त्वनन्तरं परम्परया वा मनुजभवं प्राप्य सेत्स्यति तस्य नरयिकत्वास्थाभाविनः पुरस्कृता वेदनासमुद्घाता न सन्ति, नैरयिकत्वावस्थाया एवासम्भवात्, यस्तु तद्भवादूर्ध्वं पारम्पर्येण नरकं गमिष्यति तस्य सन्ति, तत्रापि कस्यचित्सङ्ख्येयाः कस्यचिदसङ्ख्येया; कस्यचिदनन्ताः, तत्र यः सकृज्जघन्यस्थितिषु मध्ये समुत्पत्स्यते तस्य जघन्यपदेऽपि सङ्ख्येयाः, सर्वजघन्यस्थितावपि नरकेषु सङ्ख्येयानां वेदनासमुद्घातानां भावात्, वेदनाबहुलत्वान्नारकाणां, असकृद् जघन्यस्थितिषु दीर्घस्थितिषु सकृदसकृद्वा गमने असङ्ख्येयाः, अनन्तशो नरकगमने अनन्ताः,

तथा एकैकस्य भदन्त! असुरकुमारस्यासुरकुमारत्वे स्थितस्य सतः सकलमतीकालमधिकृत्य कियन्तो वेदनासमुद्घाता अतीताः?, भगवानाह–गौतम! अनन्ताः, पूर्वमप्यनन्तशस्तद्भावस्य प्राप्तवात्, प्रतिभवं च वेदनासमद्घातस्य प्रायो भावात्, पुरस्कृतचिन्तायां कस्यचित् सन्ति कस्यचिन्न सन्ति, यस्य प्रश्नसमयादूर्ध्वसुरकुमारत्वेऽपि वर्त्तमानस्य न भावी वेदनासमुद्घातो नापि तत उद्वृत्त्य भूयोऽप्यसुरकुमारत्वं प्राप्यस्ति तस्य न सन्ति, यस्तु सकृत् प्राप्स्यति तस्य जघन्यपदे एको द्वौ वा त्रयो वा उत्कर्षतः सङ्ख्येया असङ्ख्येया अनन्ता वा, सङ्ख्येयान् वारान् उत्पत्स्यमानस्य सङ्ख्येयाः असङ्ख्येन् वारान् असङ्खेययाः अनन्तान् वारान् अनन्ताः, एवं चतुर्विंशतिदण्डकक्रमेण नागकुमारत्वादिषु स्वस्थानेष्वसुरकुमारस्य निरन्तरं तावद्वक्तव्यं यावद्वैमानिकत्वे, तथा चाह–

'एवं नागकुमारत्तेवि' इत्यादि, तदेवमसुरकुमाराणां वेदनासमुद्घातश्चिन्तितः, सम्प्रति नागकुमारादिष्वतिदेशमाह–'एव'मित्यादि, उपदर्शिताभिलापेन यथा चतुर्विंशतिदण्डकक्रमेण

Jain Education International For Private & Personal Use Only www.jainelibrary.org

असुरो नैरयिकादिषु वैमानिकपर्यवसानेषु भणितस्तथा नागकुमारादयोऽवशेषेषु समस्तेषु स्वस्थानपरस्थानेषु भणितव्या यावद्वैमानिकस्य वैमानिकत्वे, एवं चैतानि नैरयिक चतुर्विंशतिदण्डकसूत्रादीनि वैमानिकचतुर्विंशतिदण्डकसूत्रपर्यवसानानि चतुर्विंशतिः सूत्राणि भवन्ति, तदेवं चतुर्विंशत्या चतुर्विंशतिदण्डकसूत्रैर्वेदनासमुद्घातश्चिन्तितः, सम्प्रति चतुर्विंशत्यैव चतुर्विंशतिदण्डकसूत्रैः कषायसमुद्घातं चिचिन्तयिषुरिदमाह–

मू. (६०४) *एगमेगस्स णं भंते ! नेरइयस्स नेरइयत्ते केवइया कसायसमुग्घाया अतीता गो० ! अनंता, केवइया पु० ? गो० ! क० अत्थि क० नत्थि, जस्सत्थि एगुत्तरियाते जाव अनंता*

एगमेगस्स णं भंते ! नेरइयस्स असुरकुमारत्ते केवइया कसायमुग्घाया अतीता ?, गोयमा अनंता, केवइया पु० ?, गो० ! कस्सति अत्थि कस्सति नत्थि, जस्सत्थि सिय संखेज्ञा सिय असंखेज्ञा सिय अनंता, एवं जाव नेरइयस्स थणियकुमारत्ते, पुढविकाइयत्ते एगुत्तरियाए नेतव्वं, एवं जाव मणुयत्ते, वाणमंतरत्ते जहा असुरकुमारत्ते,

जोइसियत्ते अतीता अनंता, पुरेक्खडा कस्सति अत्थि कस्सति नत्थि, जस्सत्थि सिय असंखेज्ञा सिय अनंता, एवं वेमाणियत्तेवि सिय असंखेज्ञा सिय अनंता, असुरकुमारस्स नेरइयत्ते अतीता अनंता, पुरेक्खडा कस्सति अत्थि कस्सति नत्थि, जस्सत्थि सिय संखेज्ञा सिय असंखेज्ञा सिय अनंता,

असुरकुमारस्स असुरकुमारत्ते अतीता अनंता पुरेक्खडा एगुत्तरिया, एवं नागकुमारत्ते जाव निरंतरं वेमाणियत्ते जहा नेरइयस्स भणितं तहेव भाणितव्वं, एवं जाव थणियकुमारस्सवि वेमाणियत्ते, नवरं सव्वेसिं सट्ठाणे एगुत्तरियाए परट्ठाणे जहेव असुरकुमारस्स, पुढविकाइयस्स नेरइयत्ते जाव थणियकुमारत्ते अतीता अनंता, पुरेक्खडा कस्सति अत्थि कस्सति नत्थि, जस्सत्थि सिय संखेज्ञा सिय असंखेज्ञा सिय अनंता,

पुढविकाइयस्स पुढविकाइयत्ते जाव मणूसत्ते अतीता अनंते पुरे० क० अत्थि क० नत्थि जस्स अत्थि एगुत्तरिया, वाणमंतरत्ते जहा नेरइयत्ते, जोतिसियवेमाणियत्ते अतीता अनंता, पुरेक्खडा कस्सइ अत्थि कस्सइ नत्थि, जस्स अत्थि सिय असंखेज्ञा सिय अनंता, एवं जाव मणूसत्तेवि नेयव्वं, वाणमंतरजोइसियवेमाणिया जहा असुरकुमारा, नवरं सट्ठाणे एगुत्तरियाए भाणितव्वे जाव वेमाणियस्स वेमाणियत्ते, एवं एते चउव्वीसं चउवीसा दंडगा, ।

वृ. 'एगमेगस्स ण'मित्यादि, तत्र नैरयिकस्य नैरयिकत्वविषयं प्रश्नसूत्रं सुगमं, पुरस्कृतचिन्तायां तु कस्यचित् सन्ति कस्यचिन्न सन्ति, तत्र यः क्षीणशेषायुः प्रश्नसमये भवपर्यन्ते वर्त्तमानः कषायसमुद्घातमप्राप्त एव नरकभावदुद्वृत्त्यानन्तरं पारम्पर्येण वा सेत्स्यति न भूयो नरकवासगामी तस्य न सन्ति पुरस्कृता नैरयिकत्वे कषायसमुद्घाताः, शेषस्य तु सन्ति, तस्यापि जघन्यत एको द्वौ वा त्रयो वा, ते च क्षीणायुःशेषाणां तद्भावभाजामवसेयाः, उत्कर्षतः सङ्ख्येया असङ्ख्येया वा अनन्ता वा, तत्र सङ्ख्येयवर्षायुःशेषाणां सङ्ख्येयाः असङ्ख्येयवर्षायुःशेषाणामसङ्ख्येयाःस यदिवा सकृत् जघन्यस्थितौ उत्पत्स्यमानानां सङ्ख्येयाः असकृत् जघन्यस्थितौ सकृदसकृद्दीर्घस्थितावुत्पत्स्यमानानामसङ्ख्येयाः अनन्तश उत्पत्स्यमानानामनन्ताः,

तथा नैरयिकस्यैवासुरकुमारत्वविषयेऽतीतसूत्रं, तथैव पुरस्कृतसूत्रे 'कस्सइ अत्थि कस्सइ नत्थि'त्ति यो नरकादुद्वृत्तोऽसुरकुमारत्वं न प्राप्स्यति तस्य न सन्ति पुरस्कृता असुरकुमारत्वविषयाः

Jain Education International	For Private & Personal Use Only	www.jainelibrary.org

कषायसमुद्घाताः, यस्तु प्राप्स्यति तस्य सन्ति, ते च जघन्यपदे सङ्ख्येया जघन्यस्थितावप्यसुरकुमाराणां सङ्ख्येयानां कषायसमुद्घातानां भावात्, लोभादिकषायबहुलत्वात् तेषां, उत्कृष्टदेऽसङ्ख्येया अनन्ता वा, तत्र सकृददीर्घस्थितावसकृज्जधन्यस्थितिषु वा उत्पत्स्यमानानामसङ्ख्येयाः, अनन्तश उत्पत्स्यमानानामनन्ताः, एवं नैरयिकस्य नागकुमारत्वादिषु स्थानेषु निरन्तरं तावद्वक्तव्यं यावत् स्तनिककुमारत्वे, तथा चाह-

'एवं जावे'त्यादि, पृथिवीकायिकत्वेऽतीतसूत्रं तथैव, पुरस्कृतचिन्तायां तु कस्यचित् सन्ति कस्यचिन्न सन्ति, तत् यो नरकादुद्वृत्तो न पृथिवीकायभवं गमी तस्य न सन्ति, योऽपि गन्ता तस्यपि जघन्यपदे एको द्वौ वा त्रयो वा उत्कर्षतः सङ्ख्येया असङ्ख्येया वा अनन्ता वा, ते चैवं-तिर्यक्पञ्चेन्द्रियभवनान्मनुष्यभवाद्देवभवाद्वा कषायसमुद्घातसमुद्धतः सन् य एकवारं पृथिवीकायिकेषु गन्ता तस्य एको द्वौ वारौ गन्तुर्द्वौ त्रीन् वारान् त्रयः सङ्ख्येयान वारान् सङ्ख्येया असङ्ख्येयान् वारान् असङ्ख्येयाय अनन्तान् वारान् अनन्ताः,तथा चाह-

'पुढविकाइयत्ते एगुत्तरियाए नेयव्वं'ति तथा 'एवं ताव मणूसत्ते' इति एवं पृथिवीकायिकगतेनाभिलापप्रकारेण तावद् वक्तव्यं यावन्मनुष्यत्वे, तच्चैवम्-'एगमेगस्स णं भंते! नेरइयस्स आउकाइयत्ते केवइया कसायसमुग्घाया अईया ?, गोयमा ! अनंता, केवइया पुरेक्खडा ?, गो० ! कस्सइ अत्थि कस्सइ नत्थि, जस्सत्थि जहण्णेणं एक्को वा दो वा तिन्नि वा उक्कोसेणं सङ्खेज्जा वा असङ्खेज्जा वा अनंता वा' एवं यान्मनुष्यसूत्रं, तत्राप्याकायादिवनस्पतिपर्यन्तसूत्रभावना पृथिवीकायसूत्रवत्, द्वीन्द्रियसूत्रे पुरस्कृतचिन्तायां जघन्येन एको द्वौ वा त्रयो वेति सकृत् जघन्यस्थितिकं द्वीन्द्रियभवं प्राप्तुकामस्य, सङ्ख्येयान् वारान् प्राप्तुकामस्य सङ्ख्येया असङ्ख्येयानसङ्ख्येया अनन्तान् अनन्ताः, एवं त्रीन्द्रियचतुरिन्द्रियसूत्रे अपि भावनीये,

तिर्यक्पञ्चेन्द्रियमनुष्यसूत्रविषया त्वेवं भावना-सकृत्पञ्चेन्द्रियभवं प्राप्तुकामस्य स्वभावत एवाल्पकषायस्य जघन्यत एको द्वौ त्रयो वा शेषस्य सङ्ख्येयान वारान् तिर्यक्पञ्चेन्द्रियभवं प्राप्तुकामस्य सङ्ख्येया असङ्ख्येयान् वारान् असङ्ख्येया अनन्तान् वारान् अनन्ताः, मनुष्यसूत्रे तु पुरस्कृतविषया भावनैवं-यो नरकभावादुद्वृ त्तोऽल्पकषायः सन् मुष्यभवं प्राप्य कषायसमुद्घातमप्राप्त एव सिद्धिपुरं गन्ता तस्य न सन्ति, शेषस्य सन्ति, तस्यापि एकं द्वौ त्रीन् वारान् कषायसमुद्घातान् प्राप्य सेत्स्यत एको द्वौ त्रयो वा सङ्ख्येयान् भवान् यदिवा एकस्मिन्नपि भवे सङ्ख्येयान् कषायसमुद्घातान् गन्तुः सङ्ख्येया असङ्ख्येयान् भवान् प्राप्तुकामस्यासङ्ख्येयाः अनन्तान् अनन्ताः,

'वाणमंतरत्ते जहा असुरकुमारत्ते' प्रागुक्तं, किमुक्तं भवति ?-पुरस्कृतचिन्तायां एवं वक्तव्यं-'जस्सत्थि सिय सङ्खेज्जा सिय असङ्खेज्जा सिय अनंता वा' इति न त्वेकोत्तरिका वक्तव्याः, व्यन्तराणामप्यसुरकुमाराणामिव जघ न्यस्थितावपि सङ्ख्येयानां कषायसमुद्घातानां लभ्यमानत्वात्, असङ्ख्येयानन्तभावनाप्यसुरकुमारवत्,

'जोइसियत्ते' इत्यादि, ज्योतिष्कत्वेऽतीता अनन्ता वक्तव्याः, पुरस्कृतास्तु कस्यापि सन्ति कस्यापि न सन्ति, एतदपि प्राग्वद् भावनीय, यस्यापि सन्ति तस्यापि कस्यचिदसङ्ख्येयाः कस्यचिदनन्ताः, न तु स्यात् सङ्ख्येया इति वक्तव्यं, कुत इति चेत् ?, उच्यते, ज्योतिष्काणां जघन्यपदेऽप्यसङ्ख्येयकालायुष्कतया जघन्यतोऽपि असङ्ख्येयानां कषायसमुद्घातानां लभ्यमानत्वात्, अनन्तशस्तत्र जिगमिषूणामनन्ताः, एवं वैमानिकत्वेऽपि पुरस्कृतचचिन्तायां स्यादसङ्ख्येयाः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्यादनन्ता इति वक्तव्यं, भावना प्राग्वत् ।

तदेवं नैरयिकस्य स्वस्थाने परस्थाने च कषायसमुद्घाताश्चिन्तिताः सम्प्रत्यसुरकुमारेसु तान् चिचिन्तयिषुराह– 'एगमेगस्स ण' मित्यादि, एकैकस्य असुरकुमारस्य नैरयिकत्वे कषाय-समुद्घाता अतीता अनन्ताः, भाविनः "कस्यचित्सन्ति कस्यचिन्न सन्ति, तत्र योऽसुरकुमारभवा-दुद्वृत्तो नरकं न यास्तति तस्य न सन्ति, यस्तु यास्यति तस्य सन्ति, तस्यापि जघन्यतः सङ्ख्येयाः, जघन्यस्थितावपि सङ्ख्येयानां कषायसमुद्घातानां नरकेषु भावात्, उत्कर्षतोऽसङ्ख्येया अनन्ता वा, तत्र जघन्यस्थितिष्वसकृद्दीर्घस्थितिषु सकृदसकृद्वा जिगमिषोरसङ्ख्येया अनन्तशो जिगमिषोरनन्ताः, असुरकुमारस्यासुरकुमारत्वे अतीता अनन्ताः, 'पुरेक्खडा एगुत्तरिया' इत्यादि, पुरस्कृतास्तु कस्यापि सन्ति कस्यापि न सन्ति, तत्र योऽसुरकुमारभवे पर्यन्तवर्त्ती न च कषायसमुद्घातं याता नापि तत्र प्रभ्रष्टो भूयोऽसुरकुमारभवं लब्धा किन्त्वनन्तरं पारम्पर्येण वा सेत्स्यति तस्य सन्ति, शेषस्य तु न सन्ति, यस्यापि सन्ति तस्यापि जघन्यत एको द्वौ वा त्रयो वा उत्कर्षतःसङ्ख्येया असङ्ख्येया अनन्ता वा, तत्र एकादयः क्षीणायुःशेषाणां तद्भव भाजां भूयस्तत्रैवानुत्पत्स्य-मानानामवगन्तव्याः, सङ्ख्येयादयो नैरयिकत्वे इव भावनीयाः,

'एव' मित्यादि, एवं– उक्तेन प्रकारेण नागकुमारत्वे तत ऊर्ध्वं चतुर्विंशतिदण्डकक्रमेण निरन्तरं यावद्वैमानिकत्वे–वैमानिकत्वविषयं सूत्रं, यथा नैरयिकस्य भणितं तथैव भणितव्यं, किमुक्तं भवति ?–नागकुमारत्वादिषु स्तनिककुमारपर्यवसानेषु पुरस्कृतचिन्तायां 'कस्सइ अत्थि कस्सइ नत्थि, जस्स अत्थि सिय संखेज्ञा सिय असंखेज्ञा सिय अनंता' पृथिवीकायिकत्वादिषु मनुष्यत्वपर्यवसानेषु 'जस्स अत्थि जहन्नेणं एक्को वा दो वा तिन्नि वा उक्कोसेणं संखेज्ञा वा असंखेज्ञा वा अनंता वा' व्यन्तरत्वे 'जस्स अत्थि सिय संखेज्ञा सिय असंखेज्ञा सिय अनंता' ज्योतिष्कत्वे 'जस्स अत्थि सिय असंखेज्ञा सिय अनंता' वैमानिकत्वेऽप्येवमेवेति वक्तव्यमिति,

'एवं जावे' त्यादि, एवं–उक्तेन प्रकारेण असुरकुमारवन्नागकुमारस्य यावत् स्तनितकुमारस्य प्रत्येकं यावद् वैमानिकत्वे–वैमानिकत्वविषयं सूत्रं तावद्वक्तव्यं, अत्रैव विशेषमाह–नवरं सर्वेषां नागकुमारादीनां स्तनिककुमारपर्यवसानानां स्वस्थाने नियमतः पुरस्कृता एकोत्तरिकाः, परस्थाने यथैवासुरकुमारस्य तथैव वक्तव्याः,

'पुढविकाइयस्स नेरइयत्ते' इत्यादि, पृथिवीकायिकस्य नैरयिकत्वे यावत् स्तनिककुमारत्वे अतीता अनन्ताः, अत्र भावना प्रागिव, पुरस्कृताः कस्यापि सन्ति कस्यापि न सन्ति, तत्र यः पृथिवीकायभवादुद्वृत्तो नरकेष्वसुरकुमारेषु यावत् स्तनितकुमारेषु न गमिष्यति किन्तु मनुष्यभवं प्राप्य सिद्धिं गन्ता तस्य न सन्ति, शेषस्य तु सन्ति, यस्यापि सन्ति तस्यापि जघन्यतः सङ्ख्येयाः, जघन्यस्थितावपि नरकादिषु सङ्ख्येयानां कषायसमुद्घातानां भावात्, उत्कर्षतोऽसङ्ख्येया अनन्ता वा, ते च प्राग्वद् भावयितव्याः, पृथिवीकायिकत्वे यावन्मनुष्यत्वेऽतीतास्ते तथैव, भाविन एकोत्तरिकया वक्तव्याः, ते चैवम्– 'कस्सइ अत्थि कस्सइ नत्थि, जस्स अत्थि जहन्नेणं एक्को वा दो वा तिण्णि वा उक्कोसेणं संखेज्ञा वा असंखेज्ञा वा अनंता वा' ते च नैरयिकस्य पृथिवीकायिकत्व इव भावनीयाः,

'वाणमंतरत्ते जहा नेरइयत्ते' इति व्यन्तरत्वे यथा नैरयिकत्वे तथा वक्तव्यं, किमुक्तं भवति ?–एकोत्तरिका न वक्तव्याः, किन्तु 'सिय संखेज्ञा सिय असंखेज्ञा सिय अनंता' इति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वक्तव्यं, 'जोइसिय' इत्यादि, ज्योतिष्कत्वे वैमानिकत्वे चातीतास्तथैव, पुरस्कृता यदि सन्ति ततो जघन्यपदे असङ्ख्येयाः उत्कृष्टपदे अनन्ताः, एवमप्कायिकस्य यावन्मनुष्यत्वे नेतव्यं, परस्थाने यथा असुरकुमारस्य सूत्र, सूत्रपर्यन्तं दर्शयति-'जाव वेमाणियस्स वेमाणियत्ते' इति यावद्वैमानिकस्य वैमनिकत्वे-वैमानिकत्वविषयं सूत्रं, एवमेते कषायसमुद्घातगतश्चतुर्विंशतिः-चतुर्विंशति-सङ्ख्याश्चतुर्विंशतिदण्डकाः भणितव्याः २४।

तदेवमुक्तश्चतुर्विंशत्या चतुर्विंशतिदण्डकसूत्रैः कषायसमुद्घातः, सम्प्रति चतुर्विंशत्यैव चतुर्विंशतिदण्डकसूत्रैर्मारणान्तिकसमुद्घातमाह-

मू. (६०५) *मारणंतियसमुग्घातो सट्ठाणेवि परट्ठाणेवि एगुत्तरियाए नेयव्वो जाव वेमाणियस्स वेमाणियत्ते, एवमेते चउवीसं चउवीसदंडगा भाणियव्वा वेउव्वियसमुग्घातो जहा कसायस० तहा निरवसेसो भाणितव्वो, नवरं जस्स नत्थि तस्स न वुच्चति, एत्थवि चउवीसं चउवीसा दडंगा भाणियव्वा। तेयगसमु० जहा मारणंतियस०, नवरं जस्सऽत्थि, एवं एतेवि चउव्वीसं चउव्वीसा दंडगा भाणितव्वा।*

एगमेगस्स णं भंते! नेरइयस्स नेरइयत्ते केवइया आहारसमुग्घाया अतीता?, गो०! नत्थि, केवइया पु०?, गो०! नत्थि, एवं जाव वेमाणियत्ते, नवरं मणूसत्ते अतीता कस्सइ अत्थि कस्सइ नत्थि, जस्सत्थि जह० एक्को वा दो वा उ० तिन्नि, केवइया पु०?, गो०! कस्सति अत्थि क० नत्थि, जस्सत्थि जह० एक्को वा दो वा तिन्नि वा उ० चत्तारि, एवं सव्वजीवाणं मणुस्साणं भाणियव्वं, मणूसस्स मणूसत्ते अतीता कस्सति अत्थि कस्सति नत्थि, जस्सत्थि जह० एक्को वा दो वा तिन्नि वा उ० चत्तारि, एवं पुरेक्खडावि, एवमेते चउवीसं चउवीसा दंडगा जाव वेमाणियत्ते

एगमेगस्स णं भंते! नेरइयस्स नेरइयत्ते के० केवलिसमुग्घाया अतीता?, गो०! नत्थि, केवइया पुरेक्खडा?, गो०! नत्थि, एवं जाव वेमाणियत्ते, नवरं मणूसत्ते अतीता नत्थि, पुरेक्खडा क० अत्थि क० नत्थि, जस्सत्थि इक्को, मणूसस्स मणूसत्ते अतीता कस्सति अत्थि क० नत्थि, जस्सत्थि एक्को, एवं पुरेक्खडावि, एवमेते चउव्वीसं चउव्वीसा दंडगा

वृ. 'मारणंतिए'त्ति मारणान्तिकसमुद्घातः पुरस्कृतचिन्तायां स्वस्थाने परस्थाने वा एकोत्तरिकया नेतव्यो यावद्वैमानिकस्य वैमानिकत्वे-वैमानिकत्वविषयं सूत्रं, तच्चैवम्-

'एगमेगस्स णं भंते! नेरइयस्स नेरयत्ते केवइया मारणंतियसमुग्घाया अतीता?, गोयमा अनंता, केवइया पुरेक्खडा?, गोयमा! कस्सइ अत्थि कस्सइ नत्थि, जस्सत्थि जहन्नेणं एक्को वा दो वा तिन्नि वा उक्कोसेणं संखेज्ञा वा असंखेज्ञा वा अनंता वा' तत्र यो मारणान्तिकसमुद्घातमन्तरेण कालं कृत्वा नरकादुद्वृत्तः अनन्तरं पारम्पर्येण वा मनुष्यभवं प्राप्य सेत्स्यति न भूयो नरकगामी तस्य न सन्ति पुरस्कृता मारणान्तिकसमुद्घाताः, यः पुनस्तद्भवे वर्त्तमानो मारणान्तिकसमुद्घातेन कालं कृत्वा नरकादुद्वृ त्तःसेत्स्यति तस्यैकः पुरस्कृतो मारणान्तिकसमुद्घातो, यः पुनर्भूयोऽपि नरकमागत्य सर्वसङ्ख्यया द्वौ मारणान्तिकसमुद्घातौ गन्ता तस्य द्वौ, एवं त्रिप्रभृतयोऽपि भावनीयाः, सङ्ख्येयान् वारान् नरकमागन्तुः सङ्ख्येयाः असङ्ख्येयान् वारान् असङ्ख्येयाः अनन्तान् वारान् अनन्ताः एवमसुरकुमारत्वे आलापको वाच्यः, नवरमत्रैवं भावनायो नरकादुद्व त्तो मनुष्यभवं प्राप्य सेत्स्यति यदिवा तस्मिन् भवे मारणान्तिकसमुद्घातमगत्वा मृत्युमासाद्य ततोऽयभवे सिद्धि गन्ता तस्यैव न सन्ति, शेषस्य त्वेकादिभावना प्रागिव व्यन्तरज्योतिष्कवैमानिकेषु यथा नैरयिकस्य,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नैरयिकादिषु चतुर्विंशतिस्थानेषु चिन्ता कृता तथाऽसुरकुमारादीनां वैमानिकपर्यवसानानां चतुर्विंशतिदण्डकक्रमेण कर्त्तव्या, तदेवमन्यान्यपि चतुर्विंशतिर्दण्डकसूत्राणि भवन्ति, तथा चाह–

'एवं एए चउवीसं चउवीसा दंडगा भाणियव्वा' इति, उक्तो मारणान्तिकसमुद्घातश्चतुर्विंशत्या चतुर्विंशतिदण्डकसूत्रैः, साम्प्रतमेतावत्सङ्ख्यायकैरेव सूत्रैर्वैक्रियसमुद्घातं विवक्षुराह–

'वेउव्विए'इत्यादि, वैक्रियसमुद्घातो यथा कषायसमुद्घातः प्राक् प्रतिपादित; तथा निरवशेषो भणितव्यः, केवलं यस्य वैक्रियसमुद्घातो नास्ति वैक्रियलब्धेरेवासम्भवात् तस्य नोच्यते, शेषस्य उच्यते, स चैवं–

'एगमेगस्स णं भंते ! नेरइयस्स नेरइयत्ते केवइया वेउव्वियसमुग्घाया अतीता ?, गो० ! अनंता, केवइया पुरेक्खडा ?, गो० ! कस्सइ अत्थि कस्सइ नत्थि, जस्स अत्थि जहन्नेणं एक्को वा दो वा तिन्नि वा उक्कोसेणं सिय संखेज्ञा वा सिय असंखेज्ञा वा सिय अनंता वा । एगमेगस्स णं भंते नेरइयस्स असुरकुमारत्ते केवइया वेउव्वियसमुग्घाया अतीता ?, गो० ! अनंता, केवइया पुरेक्खडा ?, गो० ! कस्सइ अत्थि कस्सइ नत्थि, जस्सत्थि सिय संखिज्ञा सिय असंखिज्ञा सिय अनंता वा, एवं नेरइयस्स जाव थणियकुमारत्ते ।

एगमेगस्स णं भंते ! नेरइयस्स पुढविकाइयत्ते केवइया वेउव्वियसमुग्घाया अतीता ?, गो० ! नत्थि, केवइया पुरेक्खडा ?, गो० ! नत्थि, एवं जाव तेउक्काइयत्ते, एगमेगस्स णं भंते ! नेरइयस्स वाउकाइयपत्ते केवइया वेउव्वियसमुग्धाया अतीता ?, गो० !, अनंता, केवइया पुरेक्खडा गो० ! कस्सइ अत्थि कस्सइ नत्थि, जस्सत्थि जहन्नेणं एक्को वा दो वा तिन्नि वा उक्को० संखेज्ञा वा असं० अनंता वा, वणस्सइकाइयत्ते जाव चउरिंदियत्ते जहा पुढविकाइत्ते, तिरिक्खपंचिंदियत्ते मणुसत्ते जहा वाउकाइयत्ते, वाणमंतरजोइसियवेमाणियत्तेसु जहा असुरकुमारत्ते' इह यत्र वैक्रियमसमुद्घातसम्भवस्तत्र भावना कषायसमुद्घातवद् भावनीया, अन्यत्र तु प्रतिषेधः सुप्रतीतो, वैक्रियलब्धिरेवासम्भवात्,

यथा च नैरयिकस्य चतुर्विंशदण्डकक्रमेण सूत्रमुपदर्शितमेवमसुरकुमारादीनामपि चतुर्विंशतिदण्डकक्रमेण प्रत्येकं सूत्रमवगन्तव्यं, नवरमसुरकुमारादिषु स्तनितकुमारपर्यवसानेषु व्यन्तरादिषु च परस्परं स्वस्थाने एकोत्तरिका परस्थाने सङ्ख्येयादयो वक्तव्याः, वायुकायिकतिर्यक्पञ्चेन्द्रियमनुष्येषु तु परस्परं स्वस्थाने परस्थानवा एकोत्तरिकाः, शेषं तथैव, एवमेतान्यपि चतुर्विंशतिश्चतुर्विंशतिदण्डकसूत्राणि भवन्ति, तथा चाह–'एवमेते चउवीसं चउवीसगा दंडगा भाणितव्वा'

एवं–उपदर्शितेन प्रकारेण अत्रापि–वैक्रियसमुद्घातविषयेऽपि चतुर्विंशतिः–चतुर्विंशतिसङ्ख्ययाः 'चउवीसा' इति चतुर्विंशतिः–चतुर्विंशतिस्थानपरिमाणा दंडका–दण्डकसूत्राणि भणितव्यः । सम्प्रति तैजसमुद्घातमतिदेशत आह–'तेयगे'त्यादि, तैजसमुद्घातो यथा मारणान्तिकसमुद्घातस्तथा वक्तव्यः, किमुक्तं भवति ?–स्वस्थाने परस्थाने च एकोत्तरिकया स वक्तव्या इति, नवरं यस्य नास्ति–न सम्भवति तैजसमुद्घातस्तस्य न वक्तव्यः, तत्र नैरयिकपृथिव्यप्तेजोवायुवनस्पतिद्वित्रिचतुरिन्द्रिययेषु न सम्भवतीति न वक्तव्यः, शेषेषु तु वक्तव्यः, स चैवम्–

'एगमेगस्स णं भंते ! नेरइयस्स नेरइयत्ते केवइया तेउसमुग्धाया अतीता ?, गो० !

Jain Education International   For Private & Personal Use Only   www.jainelibrary.org

नत्थि, केवइया पुरेक्खडा ?, गो० ! नत्थि, एगमेगस्स णं भंते ! नेरइयस्स असुरकुमारत्ते केवइया तेयगसमुग्घाया अतीता ?, गो० ! अनंता, केवइया पुरेक्खडा ?, गो० ! कस्सइ अत्थि कस्सइ नत्थि, जस्सत्थि जहन्नेणं एक्को वा दो वा तिन्नि वा उक्कोसेणं संखेज्जा वा असंखेज्जा वा अनंता वा' इत्यादि सूत्रोक्तं विशेषमुपजीव्य स्वयं परि भावनीयं, अत्रापि सूत्रसङ्ख्यामाह–'एव'मित्यादि, एवं–मारणान्तिकसमुद्घातगतेन क्वचित् सर्वथा निषेधरूपेण च प्रकारेण एतेऽपि–तैजसमुद्घातगता अपि चतुर्विंशतिः चतुर्विंशतिका–दण्डका भणितव्याः । सम्प्रत्याहारकसमुद्घातं चिन्तयन्नाह–'एगमेगस्स ण'मित्यादि, इह सर्वेष्वपि स्थानेषु मनुष्यत्वचिन्तायामतीता जघन्यत एको द्वौ वा उत्कर्षतस्त्रयश्च, पुरस्कृता जघन्यत एको वा द्वौ वा त्रयो वा उत्कर्षतश्चत्वारः, शेषेषु स्थानेषु अतीताः पुरस्कृताश्च प्रतिषेद्धव्याः मनुष्य स्य मनुष्यत्वचिन्तायामतीताः पुरस्कृताश्च जघन्यत एको वा द्वौ वा त्रयो वा उत्कर्षतश्चत्वारः,अत्रार्थे च कारणं प्रागेवोक्तं, अत्रापि सूत्रसङ्ख्यामाह–

'एव'मित्यादि, एवम्–उपदर्शितेन प्रकारेण एते आहारकमुद्घातविषयाश्चतुर्विंशतिसङ्ख्याकाः दण्डका वक्तव्याः, कियद्दूरं यावदित्याह–यावद्वैमानिकस्य वैमानिकत्वे–वैमानिकत्वविषयं सूत्रं, तच्चैवम्–'एगमेगस्स णं भंते ! वेमाणियस्स वेमाणियत्ते केवइया आहारगसमुग्घाया अतीता ?, गो० ! नत्थि, केवइया पुरेक्खडा ?, गो० ! नत्थि' इति । अधुना केवलिसमुद्घातमभिधित्सुराह–'एगमेगस्स णं भंते !इत्यादि, अत्राप्ययं तात्पर्यार्थः–सर्वेष्वपि स्थानेषु मनुष्यत्वचिन्ताव्यतिरेकेणातीताः पुरस्कृताश्च प्रतिषेद्धव्याः, मनुष्यवर्जेषु मनुष्यत्वचिन्तायामतीताः प्रतिषेद्धव्याः, पुरस्कृतस्तु कस्याप्यस्ति कस्यापि नास्ति, यस्याप्यस्ति तस्याप्येक एवेति वक्तव्यः, मनुष्यस्य मनुष्यत्वचिन्तायामतीतः कस्यापि अस्ति कस्यापि नास्ति, यस्याप्यस्ति तस्याप्येक एव, एतच्च प्रश्नसमये केवलिसमुद्घातादुत्तीर्णं केवलिनमधिकृत्य, पुरस्कृतोऽपि कस्यापि अस्ति कस्यापि नास्ति, यस्याप्यस्ति तस्याप्येक इति वक्तव्यं, अत्रापि सूत्रसङ्ख्यायमाह–

'एव'मित्यादि एवम्–उपदर्शितेन प्रकारेण एते केवलिसमुद्घातविषयाश्चतुर्विंशतिश्चतुरिवंशतिसङ्ख्याका दण्डका भवन्ति, तदेवं सर्वसङ्ख्यया एकत्वविषयाणां चतुर्विंशतिदण्डकसूत्राणामष्टषष्ट्यधिकं शतं जातं, एतावत्सङ्ख्याकान्येव बहुत्वविषयाण्यपि सूत्राणि भवन्ति, तानुयपदिदर्शयिषुराह–

मू. (६०६) *नेरइयाणं भंते ! नेरइयत्ते० के० वेदनास० अतीता ?, गो० ! अनंता, के० पुरे० ?, गो० ! अनंता, एवं जाव वेमाणियत्ते, एवं सव्वजीवाणं भाणितव्वं जाव वेमाणियाणं वेमाणियत्ते, एवं जाव तेयगस० नवरं उवउज्जिऊण नेयव्वं जस्सत्थि वेउव्वियतेयगा ।*

नेरइयाणं भंते ! नेरइयत्ते केवतिता आहारगस० अतीता ?, गो० ! नत्थि, केवतिता पु० गो० ! नत्थि एवं जाव वेमाणियत्ते, नवरं मणूसत्ते अतीता असं० पुरेक्खडा असंखेज्जा एवं जाव वेमाणियाणं, नवरं वणस्सइकाइयाणं मणूसत्ते अतीता अनंता पुरेक्खडा अनंता, मणूसाणं मणूसत्ते अतीता सिय संखेज्जा सिय असंखेज्जा, एवं पुरेक्खडावि, सेसा सव्वे जहा नेरइया, एवं एते चउवीसं चउवीसा दंडगा ।

नेरइयाणं भंते ! नेरइयत्ते केव० केवलिसमुग्घाया अतीता ?, गो० ! नत्थि, के० पु० ?, गो० ! नत्थि, एवं जाव वेमाणियत्ते, नवरं मणूसत्ते अतीता णत्थि, पुरे० असंखेज्जा, एवं जाव

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वेमाणिया, नवरं वणस्सइकाइयाणं मणूसत्ते अतीता नत्थि, पु० अनंता, मणूसाणं मणूसत्ते अतीता सिय अत्थि सिय नत्थि, जइ अत्थि जह० एक्को वा दो वा तिन्नि वा उक्को० सतपुहुत्तं, केवइया पुरे० ?, गो० ! सिय संखेज्ञा सिय असंखेज्ञा, एवं एते चउव्वीसं चउव्वीसा दंडगा सव्वे पुच्छाए भाणितव्वा जाव वेमाणाणं वेमाणियत्ते ।

वृ. 'नेरइयाण'मित्यादि, नैरयिकाणां विवक्षितप्रश्नसमयभाविनां सर्वेषां भदन्त ! पूर्वं सकलमतीतं कालमवधीकृत्य यथासम्भवं नैरयिकत्वे वृत्तानां सतां मसुदायेन सर्वसङ्घयया कियन्तो वेदनासमुद्‌घाता अतीताः ?, भगवानाह– गौतम ! अनन्ताः, बहूनामनन्तकालमसंव्यवहार-राशेरुद्वृत्तत्वात्, कियन्तः पुरस्कृताः ?, एतच्च सूत्रं सूचामात्रं, परिपूर्णस्तु पाठ एवं–

'नेरइयाणं भंते ! नेरइयत्ते केवइया वेयणासमुग्घाया पुरेक्खडा ?' इति भगवानाह–गौतम अनन्ताः, बहूनामनन्तशो भूयोऽपि नरकेष्वागमनसम्भवात्, 'एव'मित्यादि, एवमुक्तेन प्रकारेणासुरकुमारत्वादिषु स्थानेषु क्रमेण तावद् वक्तव्यं यावद्वैमानिकत्वे–वैमानिकत्वविषयं सूत्रं, तच्चेदं– 'नेरइयाणं भंते ! वेमाणियत्ते केवइया वेयणासमुग्घाया अतीता ?, गो० ! अनंता, केवइया पुरेक्खडा ?, गो० ! अनंता' इति, अत्र अतीता अनन्ताः सुप्रतीताः, सर्वसांव्यवहारिकजीवैः प्रायोऽनन्तशो वैमानिकत्वस्य प्राप्तत्वात्, पुरस्कृतास्त्वनन्ताः, प्रश्नसमयभाविनां नैरयिकाणां मध्ये बहुभिरनन्तशो वैमानिकत्वस्य प्राप्स्यमानत्वात्, एवमपान्तरालवर्त्तिष्वपि असुरकुमारत्वादिषु स्थानेषु भावना भावनीया, यथा च नैरयिकाणां नैरयिकत्वादिषु चतुर्विंशतिदण्डकक्रमेणातीताः पुरस्कृताश्च वेदनासमुद्‌घाता भणिता एवं सर्वजीवनामसुरकुमारादीनां भणितव्याः, कियद्दूरं यावदित्याह–यावद्वैमानिकानां वमानिकत्वे–वैमानिकत्वविषयाः, ते चैवं–

'वेमाणियाणं भंते ! वेमाणियत्ते केवइया वेयणासमुग्घाया अतीता ?, गो० ! अनंता, केवइया पुरे० ?, गो० ! अनंता' इति, एवं कषायमरणवैक्रियतैजससमुद्‌घाता अपि नैरयिकादीनां वैमानिकपर्यवसानानां सर्वेषु नैरयिकत्वादिषु स्थानेषु चतुर्विंशतिदण्डकक्रमेण वक्तव्याः, तथा चाह–'एवं जावे'त्यादि, एवं–वेदनासमुद्‌घातगतेन प्रकारेण कषायादिसमुद्‌घाता अपि तावद्व-क्तव्याः यावतैजससमुद्‌घातः किमविशेषेण वक्तव्याः ?, नेत्याह–'नवर'मित्यादि, नवर-मुपयुज्य–उपयोगं कृत्वा सर्वं सूत्रं बुद्धया नेतव्यं, किमुक्तं भवति ? –ये यत्र समुद्‌घाता घटन्ते ते तत्रातीताः पुरस्कृताश्चानन्ता वक्तव्याः, शेषेषु च स्थानेषु प्रतिषेद्धव्याः एतदेव वैविक्त्येनाह–'जस्स अत्थी'त्यादि, यस्य जीवराशेर्नैरयिकादेरसुरकुमारादेश्च सन्ति वैक्रियतैससससमुद्‌घातास्ते तस्य वक्तव्याः, शेषेषु पृथिव्यादिषु स्थानेषु प्रतिषेद्धव्या इति सामथ्यलभ्यं, कषायमारणान्तिकसमुद्‌घाताः पुनः सर्वत्रापि वेदनासमुद्‌घातवदविशेषेणातीताः पुरस्कृताश्चानन्ता वक्तव्याः न तु क्वपि निषेद्धव्याः

सम्प्रति आहारसमुद्‌घातविषयं सूत्रमाह–'नेरइयाण' मित्यादि आहारकसमुद्‌घातो ह्याहारकलब्धौ सत्यामाहारकशरीरप्रारकम्भकाले भवति, नान्यथा, आहारकलब्धिश्चोपजायते चतुर्द्दशपूर्वाधिगमे, तेषां चतुर्द्दशनानां पूर्वाणामधिगमो मनुष्यत्वावस्थायां न शेषायामवस्थायामति मनुष्यत्ववर्जासु शेषास्ववस्थास्वतीतानां पुरस्कृतानां चाहारकसमुद्‌घातानां प्रतिषेधः, मनुष्यत्वावस्थायामपि पूर्वमतीता असङ्खयेयाः, प्रश्नसमयभाविनां नारकाणां मध्ये बहूनामसङ्खये-यानां नरकाणां पूर्वं तदा २ मनुष्यत्वमवाप्य अधिगतचतुर्द्दशपूर्वाणां प्रत्येकं सकृद् द्विःत्रिर्वा कृताहारकसमुद्‌घातत्वात्, पुरस्कृता अपि असङ्खयेयाः, प्रश्नसमयभाविनां नारकाणां मध्ये बहुभिर-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सङ्ख्येयैर्नारकैर्नरकादुद्वृ त्यानन्तर्येण पारम्पर्येण वा तदा तदा मनुष्यत्वावाप्तौ चतुर्दश पूर्वाण्यधीत्य प्रत्येकमाहारकसमुद्घातानामे कशो द्विः त्रिश्चतुर्वा करिष्यमाणत्वात्,

'एवं जाव वेमाणियाण'मिति नैरयिकाणां चतुर्विंशतिदण्डकक्रमेण चिन्ता कृता एवमसुरकुमारादीनामपि प्रत्येकं चतुर्विंशति- दण्डकक्रमेण तावद्वक्तव्या यावद्वैमानिकानां, केवलं यत्रास्ति विशेषस्तं दर्शयति–'नवर'मित्यादि, नवरं वनस्पतिकायिकानां मनुष्यत्वचिन्तायामतीताः पुरस्कृताश्च प्रत्येकमनन्ता वक्तव्याः, अनन्तानां पूर्वमधिगतचतुर्दशपूर्वाणां यथायोगमेकशो द्विः त्रिर्वा कृताहारकसमुद्घातानां वनस्पतिष्ववस्थानात् अनन्तरमेव वनस्पतिकायादुद्वृ त्यानन्तर्येण पारम्पर्येण वा मानुषत्वमवाप्य यथायोग्यमेकसो द्विः त्रिश्चतुर्वाऽऽहारकसमुद्घातानां निर्वर्त्तयिष्यमाणत्वात, मनुष्याणां मनुष्यत्वावस्थायामतीताः, पुरस्कृताश्च स्यात्सङ्ख्येयाः स्यादसङ्ख्येयाः, कथमिति चेत्, उच्यते, ते हि प्रश्नसमयभाविनः उत्कर्षपदेऽपि सर्वस्तोकाः, श्रेण्यसङ्ख्येयाभागगतप्रदेशराशिप्रमाणत्वात्, ततो विवक्षितप्रश्नसमयभाविनां मध्ये कदाचिदसङ्ख्येयाः–यथायोगं प्रत्येकमेकशो द्विः त्रिश्चतुर्वा कृतकरिष्यमाणा- हारकसमुद्घाताः प्राप्यन्ते, उपसंहारमाह–

'एव'मित्यादि, एवमुक्तेन प्रकारेण एते आहारकसमुद्घातविषयाश्चतुर्विंशतिश्चतुर्विंशतिसङ्ख्याका दण्डका वक्तव्याः, सम्प्रति केवलिसमुद्घातं चिन्तयति–'नेरइयाण'मित्यादि, केवलिसमुद्घातोऽपि मनुष्यत्वावस्थायां भवति, न शेषास्ववस्थासु, न च कृतकेवलिसमुद्घातः संसारं पर्यटति, केवलिसमुद्घातानन्तरमन्तर्मुहूर्त्तेनावश्यं निःश्रेयसपदाधिगमात्, ततो नारकाणां मनुष्यत्ववर्ज्जासु शेषास्ववस्थास्वतीताः पुरस्कृताश्च केवलिसमुद्घाताः प्रतिषेद्धव्याः, मनुष्यत्वावस्थायामप्यतीताः प्रतिषेद्धव्याः, कृतकेवलिसमुद्घातानां नरके गमनाभावात्, भाविनश्च भविष्यन्ति, प्रश्नसमयभाविनां मध्ये बहूनामसङ्ख्येयानां नारकाणां मुक्तिपदगमनयोग्यत्वात्, ततः पुरस्कृता असङ्ख्येया इत्युक्तं, 'एव'मित्यादि, यथा नैरयिकाणां केवलिसमुद्घातचिन्ता कृता एवमसुरकुमारादीनामपि कर्त्तव्या, सा च तावत् यावत् वैमानिकानां, अत्रैव विशेषमाह–

'नवर'मित्यादि, नवरं वनस्पतिकायिकानां मनुष्यत्वावस्थाचिन्तायामतीताः प्रतिषेद्धव्याः, कृतकेवलिसमुद्घातानां संसाराभावात्, पुरस्कृतास्त्वनन्ता वाच्याः, प्रश्नसमयभाविनां वनस्पतिकायिकानां मध्ये बहूनामनन्तानां वनस्पतिकायिकानां वनस्पतिकायादुद्धृ त्यानन्तर्येण पारम्पर्येण वा कृतकेवलिसमुद्घातानां सेत्स्यमानत्वात्, मनुष्याणां मुष्यात्वावस्थाचिन्तायामतीताः कदाचित्सन्ति कदाचिन्न सन्ति, कृतकेवलिसमुद्घातानां सिद्धत्वभावादन्येषां चाद्यपि केवलिसमुद्घाताप्रतिपत्तेः, यदापि सन्ति तदाऽपि जघन्यत एको द्वौ वा त्रयो वा उत्कर्षतः शतपृथक्तवं, पुरस्कृताः स्यात्सङ्ख्येयाः स्यादसङ्ख्येया;, प्रश्नसमयभाविनां मनुष्याणां मध्ये कदाचित्सङ्ख्येयानां कदाचिदसङ्ख्येयानां यथायोगमानन्तर्येण पारम्पर्येण कृतकेवलिसमुद्घातानां सेत्स्यमानत्वात्,

सूत्रसर्वसङ्ख्यामाह–एवमुक्तेन प्रकारेण एते केवलिसमुद्घातविषयाश्चतुर्विंशतिश्चतुर्विंशतिदण्डकाः ते च सर्वेऽपि पृच्छायां–पृच्छापुरस्सरं भणितव्याः कियद्दूरं यावदित्याह– वैमानिकानां वैमानिकत्वविषयं सूत्रं, तच्चेदं–'वेमाणियाणं भंते ! वेमाणियत्ते केवइया केवलिसमुग्घाया अतीता ?, गो० १ नत्थि, के० पु० ?, गो० ! नत्थि' इति ।। तदेवमुक्ता नैरयिकादिषु वैमानिकपर्यवसानेष्वेकत्वविशिष्टेषु बहुत्वेविशिष्टेषु च भूतभाविवेदनादिसमुद्घात-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सम्भवासम्भवपुरस्सरं सङ्ख्याप्रमाणप्ररूपणा,

सम्प्रति तेन तेन समुद्घातेन यावत् केवलिसमुद्घातेन समुद्घातनामसुद्घातानां च परस्परमल्पबहुत्वमिभिधित्सुराह–

मू. (६०७) *एतेसि णं भंते ! जीवणं वेदणासमुग्घातेणं कसायस० मारणंतिय० वेउव्वियस० तेयस० आहारगस० केवलिस० समोहयाणं असमोहयाण य कयरे२ हिंतो अ० ब० तु० वि० ?,*

गो० ! सव्वत्थोवा जीवा आहारगसमुग्घाएणं समोहया केवलिसमुग्घाएणं संमोहता संखे० कतेयगसमुद्घाएणं समोहया असं० वेउव्वियसमुग्घाएणं समो० असं० मारणंतियसमु० समो० अनंतगुणा कसायस० स० असं० वेदनास० विसेसाहिया असंमोहया असंखिज्जगुणा

वृ. 'एएसि ण' मित्यादि, एतेषां–यथायोगं प्राक् समवहतासमहतत्वेन निरूपितानां भदन्त सामान्यतो जीवानां वेदनासमुद्घातेन यावत् केवलिसमद्घातेन समवहतानासमवहतानां च मध्ये कतरे कतरेभ्योऽल्पाः कतरे कतरेभ्यो बहुकाः–सङ्ख्येयासङ्ख्येयादिगुणतया प्रभूताः कतरे कतरैस्तुल्याः–समसङ्ख्याकाः, अत्रार्थे सूत्रे विभक्तिपरिणामः स्वयं योजनीयः, कतरे कतरेभ्यो विशेषाधिकाः–मनागधिकाः, वाशब्दाः सर्वेऽपि विकल्पार्थाः, भगवानाह–गौतम ! सर्वस्तोका जीवा आहारकसमुद्घातेन समुद्घाताः, आहारकशरीरिणो हि कदाचिदिह लोके षण्मासान् यावन्न भवन्त्यपि, यदापि भवन्ति तदापि जघन्यत एको द्वौ त्रयो वा उत्कर्षतः सहस्रपृथकत्वं,

केवलमाहारकसमुद्घात आहारकशरीरप्राम्भकालेन शेषकालं ततः स्तोका एव युगपदाहारकसमुद्घाताः प्राप्यन्ते इति सर्वस्तोका आहारकसमुद्घोतन समुद्घाताः, तेभ्यः केवलिसमुद्घातेन समुद्घताः सङ्ख्येयगुणाः, तेषामेककालंशतपृथक्तेवन प्राप्यमाणत्वात्, यद्यप्याहारकशरीरिणः सत्तया समकालं एको द्वौ वा त्रयो वा उत्कर्षतः सहस्रपृथकत्वमानाः प्राप्यन्ते तथाप्या (पि स्तोकानामा) हारकसमुद्घातसम्भवात् एककालमतिस्तोकाः प्राप्यन्ते इति न तेभ्यः केवलिसमुद्घातसमुद्घातानां सङ्ख्येयगुणत्वविरोधः, केवलिसमुद्घातसमुद्घतेभ्यः तैजससमुद्घातेन समवहताः असङ्ख्येयगुणाः,

पञ्चेन्द्रियतिर्यग्योनिकानां मनुष्याणां देवानामपि च तैजससमुद्घातसम्भवात्, तेभ्योऽपि वैक्रियसमुद्घातेन समुद्घताः असङ्ख्येयगुणाः, नारकवातकायिकानामपि वैक्रियसमुद्घातसम्भवात्, वातकायिकाश्च वैक्रियलब्धिमन्तो न स्तोकाः, किन्तु देवेभ्योऽप्यसङ्ख्येयगुणाः, कथमेतदिति चेत्, उच्यते, इह बादरपर्याप्तवायुकायिकाःस्थलचरपञ्चेन्द्रियेभ्योऽसङ्ख्येयगुणाः, महादण्डके तथा पठितत्वात्,

स्थलचरपञ्चेन्द्रियाश्च देवेभ्योऽप्यसङ्ख्येयगुणाः, ततो यद्यपि बादरपर्याप्तवायुकायिकानां सङ्ख्येयाभागमात्रस्य वैक्रियलब्धिसम्भवो, यत उक्तम्–"तिण्हं ताव रासीणं वेउव्वियलद्धी चेव नत्थि, बायरपज्जत्ताणंपि संखेज्जइभागमेत्ताणं" ति, तथापि सङ्ख्येयभागमात्रा वैक्रियलब्धिमन्तो देवेभ्योऽप्यसङ्ख्येयगुणा भवन्ति, ततो नैरयिकाणां वायुकायिकानां च वैक्रियसमुद्घातसम्भवादुपपद्यन्ते तैजससमुद्घातसमुद्घतेभ्यो वैक्रियसमुद्घातेन समुद्धताः असङ्ख्येयगुणाः, तेभ्योऽपि मारणान्तिकसमुद्घातन समुद्घता अनन्तगुणाः, कथं ?, उच्यते, इह निगोदजीवानामनन्तानामसङ्ख्येयो भागः सदा विग्रहगतौ वर्त्तमानः प्राप्यते, ते च प्रायो मारणान्तिकसमुद्घातसमुद्घता इति पूर्वेभ्योऽनन्तगुणाः, तेभ्योऽपि कषायसमुद्घातसमुद्घता असङ्ख्येयगुणाः, निगोजदीवाना-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मेवानन्तानां विग्रहगत्यापन्नेभ्योऽसङ्ख्येयगुणानां कषायसमुद्घातसमुद्घतानां सदा प्राप्यमाणत्वात्, तेभ्योऽपि वेदनासमुद्घातेन समुद्घता विशेषाधिकाः तेषामेव निदोगजीवानामनन्तानां कषायसमुद्घातसमुद्घतेभ्यो मनाक् विशेषाधिकानां सदा वेदनासमुद्घातेन समुद्घाततयऽवाप्यमानत्वात्, तेभ्योऽपि एकेनापि समुद्घातेनासमुद्घाता असङ्ख्येयगुणाः, वेदनाकषायमरणसमुद्घातसमुद्घतेभ्यो निगोदजीवानामेवासङ्ख्येयगुणानामसमवहतानां सदा लभ्यमानत्वात् ।

मू. (६०८) *एतेसि णं भंते ! नेरइयाणं वेदनासमुग्घाएणं कसायस० मारणंतियस० वेउव्वियस० समोहयाणं असमोहयाण य कतरे२ हिंतो अप्पा वा ४, गो० ! सव्वत्थोवा नेरइया मारणंतियसमुग्घातेणं समोहया वेउव्वियसमुग्घातेणं समोहया असं० कसायसमुग्घाएणं समोहता संखे० वेदणासमुग्घा० समो० संखे० असमोहया० संखे० ।*

एतेसि णं भंते ! असुरकुमाराणं वेदनासमुग्घातेणं कसायस० मारणंतियस० वेउव्वियस० तेयगस० समोहताणं असमोहताण य कयरे२ हिंतो अप्पा वा ४ ?, गो० ! सव्वत्थोवा असुरकुमारा तेयगसमुग्घाएणं समोहया मारणंतियस० सं० असं० वेदणास० सं० असं० कसायसमु० स० सं० वेउव्वियमु० स० संखे० असमोहयाअसंखेज्जगुणा एवं जाव थणियकुमारा ।

एएसि णं भंते ! पुढविकाइयाणं वेदणास० ३ ?, गो० ! सव्वत्थोवा पुढविकाइया मारणंतियसमुग्घाएणं समोहया कसायसमुग्घाएणं समोहया सं०, वेदनासमु० सं० विसेसाहिया असमोहया असं०, एवं जाव वणस्सइकाइया, नवरं सव्वत्थोवा वाउक्काइया वेउव्वियसमुग्घाएणं समोहया मारणंतियसमु० समो० असंखेज्जगुणा कसायसमुग्घा० स० सं० वेदनास० स० विसेसाहिया असमोहया असंखेज्जगुणा ।

बेइंदियाणं भंते ! वेदनासमुग्घायएणं कसायस० मारणंतियस० समोहयाणं असमोहयाण य कतरे २ हिंतो अप्पा वा ४ ?, गो० ! सव्वत्थोवा बेइंदिया मारणंतियसमुग्घाएणं समोहया वेदनासमुग्धातेणं समोहया असंखे० कसायस० समो० असंखे० असमोहया संखे०, एवं जाव चउरिंदिया । पंचिंदियतिरिक्खजोणियाणं भंते ! वेदनास० समो० कसायसमुग्घातेणं मारणंतियस० वेउव्वियस० तेयासमु० समोहयाणं असंमोहयाण य कतरे२ हिंतो अप्पा वा ४ ?, गो० ! सव्वत्थोवा पंचिंदियतिरि० तेयासमु० समोहया वेउ० समु० समो० असं० मारणंतियस० समो० असं० वेदनास० समो० असं० कसायस० समो० संखे० असमवहता संखे० ।

मणुस्साणं भंते ! वेदनासमुग्घातेणं समोहयाणं कसायसमु० मारणंतियस० वेउव्वियस० तेयगस० आहारगसमुग्घाएणं केवलिस० समोहयाणं असमोहयाण य कयरे २ हिंतो अप्पा वा ४ ?, गो० ! सव्वत्थोवा मणुस्सा आहारगस० समोहया केवलिस० स० संखे० तेयगस० समो० संखे० वेउव्वियस० समो० संखे० मारणंतियस० समो० असं० वेदनास० स० असं० कसायस० स० संखे० असमोहया असं० । वाणमंतरजोइसियवेमाणियाणं जहा असुरकुमाराणं

वृ. सम्प्रत्येतदेवाल्पबहुत्वं जीवविशेषेषु नैरयिकादिषु चतुर्विंशतिदण्डकक्रमेण यथायोगं चिचिन्तयिषुराह– 'नेरइयाण' मित्यादि प्रश्नसूत्रं, भगवानाह–सर्वस्तोका नैरयिका मारणान्तिकसमुद्घातेन समुद्घताः, मारणान्तिको हि समुद्घातो मरणकाले भवति, मरणं च शेषजीवनन्नारकराशयपेक्षयाऽतिस्तोकानां, न च सर्वेषां म्रियमाणानामविशेषेण माराणान्तिकसमुद्घातः, किन्तु कतिपयानां, 'समोहयावि मरंति असमोहयावि मरंति' ति वचनात्, अतः सर्वस्तोका मारणान्तिक-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

समुद्घातसमुद्घताः, तेभ्योऽपि वैक्रियसमुद्घातेन समुद्घाता; असङ्ख्येयगुणाः, सप्तस्वपि पृथिवीषु प्रत्येकं बहूनां परस्परवेदनो दीरणाय निरन्तरमुत्तरवैक्रियसमारम्भसम्भवात्, तेभ्योऽपि कषायसमुद्घातेन समुद्धताः सङ्ख्येयगुणाः, कृतोत्तरवैक्रियाणामकृतोत्तरवैक्रियाणां तच सर्वसङ्ख्येयोतत्रवैक्रियारम्भकेभ्योऽसङ्ख्येयगुणानां कषायसमुद्घातसमुद्धतत्वेन प्राप्यमाणत्वात्, तेभ्योऽपि वेदनासमुद्घातेन समुद्धताः सङ्ख्येयगुणाः, यथायोगं क्षेत्रजपरमाधार्मिकोदीरितपरस्परोदीरितवेदनाभिः प्रायो बहूनां सदा समुद्धतत्वेन प्राप्यमाणत्वात्, तेभ्योऽप्येकेनापि समुद्घातेनासमवहताः सङ्ख्येयगुणाः, वेदमनासमुद्घातमन्तरेणाप्यतिबहूनां सामान्यतो वेदनामनुभवतां सम्भवात्।

सम्प्रत्यसुरकुमाराणामल्पबहुत्वमाह–'एएसि ण'मित्यादिप्रश्नसूत्रं सुगमं, भगवानाह–गौतम ! सर्वस्तोकाः असुरकुमारास्तैजससमुद्घातेन समुद्धताः, तैजसो हि समुद्घातो महति कोपावेशे क्वचित् कदाचित्केषाञ्चिद्भवति, ततस्तेन समुद्घातेन समुद्धताः सर्वस्तोकाः, तेभ्यो मारणान्तिकसमुद्घातेन समुद्धताः असङ्ख्येयगुणाः, तेभ्यो वेदनासमुद्घातेन समुद्धताः असङ्ख्येयगुणाः, परस्परं युद्धादौ बहूनांवेदनासमुद्घातेन समुद्घतानां प्राप्यमाणत्वात्, तेभ्योऽपि कषायसमुद्घातेन समुद्घाताः सङ्ख्येयगुणाः, येन तेन वा कारणेन बहूनां कषायसमुद्घातगमनसम्भवात्, तेभ्योऽपि वैक्रियसमुद्घातेन समुद्धताः सङ्ख्येयगुणाः, परिचारणाद्यनेकनिमित्तमतिबहूनामुत्तरवैक्रियकरणारम्भसम्भवात्, तेभ्योऽप्यसमवहता असङ्ख्येयगुणाः, बहूनामुत्तमजातीनां सुखसागरावगाढानां पूर्वोक्तेभ्योऽसङ्ख्येयगुणानां केनापि समुद्घातेनासमवहतानां सदा लभ्यमानत्वात्, 'एव'मित्यादि, यथा असुरकुमाराणामल्पबहुत्वमुक्तमेवं सर्वेषां भवनपतीनां द्रष्टव्यं यावत् स्तनितकुमाराणामिति।

सम्प्रति पृथिवीकायिकगतमल्पबहुत्वमाह–'एएसि ण'मित्यादि, अत्र कषायसमुद्घातसमुद्धतानां वेदनासमुद्घातसमुद्धतानां च सङ्ख्येयगुणत्वे असमवहतानां चासङ्ख्येयगुणत्वे भावना स्वयं भावनीया, सुगमत्वात्, 'एव'मित्यादि, पृथिवीकायिकगतेन प्रकारेणाल्पबहुत्वं तावद्वक्तव्यं वयावद्वनस्पतिकायिकाः, वायुकायिकान् प्रति विशेषमभिधित्सुराह–'नवर'मित्यादि, नवरं वातकायिकानामल्पबहुत्वचिन्तायामेवं वक्तव्यं–सर्वस्तोका वातकायिका वैक्रियसमुद्घातेन समुद्धताः, बादरपर्याप्तसङ्ख्येयभागस्य वैक्रियलब्धेःसम्भवात्, तेभ्योऽपि मारणान्तिकसमुद्घातेन समुद्धता असङ्ख्येयगुणाः, पर्याप्तपर्याप्तसूक्ष्मबादरभेदभिन्नानां सर्वेषामपि वातकायिकानां मरणसमुद्घातसम्भवात्, तेभ्योऽपि कषायसमुद्घातेन समुद्धताः सङ्ख्येयगुणाः, तेभ्योऽपि वेदनासमुद्घातेन समुद्धता विशेषाधिकाः, तेभ्योऽसमवहता असङ्ख्येयगुणाः, सकलसमुद्घातगतवातकायिकापक्षया स्वभावस्थानां वातकायिकानां स्वभावत एवासङ्ख्येयगुणतया प्राप्यमाणत्वात्

द्वीन्द्रियसूत्रे सर्वस्तोकाः द्वीन्द्रिया मारणान्तिकसमुद्घातेन समुद्धताः, प्रतिनियतानामेव प्रश्नसमये मरणसद्भावात्, तेभ्यो वेदनासमद्घातेन समुद्धता असङ्ख्येयगुणाः, शीतातपादिसम्पर्कतोऽतिप्रभूतानां वेदनासमुद्घातभावात्, तेभ्यः कषायसमुद्घातेन समुद्धता असङ्ख्येयगुणाः, अतिप्रभूततारणां लोभादिकषायसमुद्घातभावात्, तेभ्योऽप्यसमवहताः सङ्ख्येयगुणाः, 'एव'मित्यादि, एवं द्वीन्द्रियगतेन प्रकारेण तावद् वक्तव्यं यावच्चतुरिन्द्रियाः।

तिर्यक्पञ्चेन्द्रियसूत्रे सर्वस्तोकास्तैजससमुद्घातेन समुद्धताः, कतिपयानामेव तेजोलब्धि-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भावात्, तेभ्यो वेदनासमुद्घातेनासमवहताः असङ्ख्येयगुणाः, तेभ्योऽपि वैक्रियसमुद्घातेन समवहताः असङ्ख्येयगुणाः, प्रभूतानां वैक्रियलब्धेर्भावात्, तेभ्योऽपि मारणान्तिकसमुद्घातेन समवहता असङ्ख्येयगुणाः, सम्मूर्च्छिमजलचरस्थलचरखचराणामपि सर्वेषां वैक्रियलब्धिरहितानां प्रत्येकं पूर्वोक्तेभ्योऽसङ्ख्येयगुणानां केषाञ्चित् गर्भजानामपि वैक्रियलब्धिरहितानां वैक्रियलब्धिमतां च मरणसमुद्घातसम्भवात्, तेभ्योऽपि वेदनासमुद्घातेन समुद्धताः असङ्ख्येयगुणाः, म्रियमाण-जीवराश्यपेक्षया अपि अम्रियमाणानामसङ्ख्येयगुणानां वेदनासमुद्घातभावात्, तेभ्यः कषायस-मुद्घातेन समुद्धताः सङ्ख्येयगुणाः, तेभ्योऽप्यसमवहताः सङ्ख्येयगुणाः, अत्र भावना प्रागिव।

मनुष्यसूत्रे सर्वस्तोका आहारकसमुद्घातेन समुद्धताः, अतिस्तोकानामेककालमाहार-कशरीरप्रारम्भसंभवात्, तेभ्यः केवलिसमुद्घातेन समुद्धताः सङ्ख्येयगुणाः, शतपृथकत्वसङ्ख्यया प्राप्यमाणत्वात्, तेभ्यस्तैजससमुद्घातेन समवहताः सङ्ख्येयगुणाः, शतसहस्रसङ्ख्यया तेषां प्राप्य--माणत्वात्, तेभ्योऽपि वैक्रियसमुद्घातेन समुद्धताः सङ्ख्येयगुणाः कोटीसङ्ख्ययालभ्यमानत्वात, तेभ्योऽपि मारणान्तिकसमुद्घातेन समवहता असङ्ख्येयगुणाः सम्मूर्च्छिममनुष्याणामपि तद्भावात्, तेषां चासङ्ख्येयत्वात्, तेभ्योऽपि वेदनासमुद्घातेन समुद्धता असङ्ख्येयगुणाः, म्रियमाणराश्यपेक्षया असङ्ख्येयगुणानामम्रियमाणानां तद्भावसम्भवात्, तेभ्यः कषायसमुद्घातेन समुद्धताः सङ्ख्येयगुणाः, प्रभूततया तेषां प्राप्यमाणत्वात्, तेभ्योऽप्यसमवहता असङ्ख्येयगुणाः, सम्मूर्च्छिममनुष्याणामल्पकषायाणामुत्कटषायिभ्योऽसङ्ख्येयगुणानां सदा लभ्यमानत्वात्। व्यन्तरज्योतिष्कवैमानिका यथा असुरकुमारास्तथा वक्तव्याः। तदेवमुक्तं समुद्धतासमुद्धतविषय-मल्पबहुत्वं, अधुना कषायसमुद्घातगतां विशेषवक्- तव्यतामभिधित्सुराह-

मू. (६०९) *कति णं भंते! कसायसमुग्घाया पन्नत्ता?, गो० ! चत्तारि कसायसमुग्घाया पं० तं०-कोहसमुग्घाते माणस० मायास० लोहसमुग्घाते!,*

नेरइयाणं भंते! कतिकसायसमुग्घाया पं० ?, गो० ! चत्तारि कसायसमुग्घाता पं० एवं जाव वेमाणियाणं, एगमेगस्स णं भंते! नेरइयस्स केवतिता कोहसमुग्घाता अतीता ?, गो० ! अनंता, केवतिता पुरे० ?, गो० ! कस्सइ अत्थि कस्सइ नत्थि, जस्सत्थि जहन्नेणं एक्को वा दो वा तिन्नि वा उक्को० संखेज्ञा वा असंखेज्ञा वा अनंता वा, एवं जाव वेमाणियस्स, एवं जाव लोभसमुग्घाते एते चत्तारि दंडगा।

नेरइयाणं भंते! केवइया कोहसमु० अतीता ?, गो० ! अनंता, के० पु० ?, गो० ! अनंता, एवं जाव वेमाणियाणं, एवं जाव लोभसमुग्घाए, एवं एएवि चत्तारि दंडगा।

एगमेगस्स णं भंते! नेरइयस्स नेरइयत्ते केवइया कोहस० अतीता ?, गो० ! अनंता, एवं जहा वेदनासमुग्दायतो भणितो तहा कोहसमुग्घातोवि निरवसेसं जाव वेमाणियत्ते, माणसमुग्घाए मायासमुग्घातेवि निरवसेसं जहा मारणंतियसमुग्घाते लोहसमुग्घातो जहा कसायसमुग्घातो नवरं सव्वजीवा असुरिदिनेरइएसु मोहकसाएणं एगुत्तरियाते नेतव्वा।

नेरइयाणं भंते! नेरइयत्ते केवइया कोहसमु० अतीता ?, अनंता, के० पु० ?, गो० ! अनंता, एवं जाव वेमाणियत्ते, एवं सट्ठाणपरट्ठाणेसु सव्वत्थ भाणियव्वा, सव्वजीवाणं चत्तारिवि समुग्घाया जाव लोभसमुग्घातो जाव वेमाणियाणं वेमाणियत्ते।

वृ. 'कइ ण'मित्यादि, इदं सामान्यतः कषायसमुद्घातविषयं चतुर्विंशतिदण्डकक्रमगतं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

च सूत्रं सुप्रतीतं, सम्प्रत्येकैकस्य नैरयिकादेश्चतुर्विंशतिदण्डकक्रमेण वैमानिकपर्यवसानस्य तद्वक्तव्यतामाह–'एगमेगस्स णं भंते !' इत्यादि, अत्रातीतसूत्रं सुप्रतीतं, पुरस्कृतसूत्रे 'कस्सइ अत्थि कस्सइ नत्थि'त्ति यो नरकभवप्रान्ते वर्त्तमानः स्वभावत एवाल्पकषायः कषायसमुद्घातमन्तरेण कालं कृत्वा नरकादुद्वृत्तो मनुष्यभवं प्राप्य कषायसमुद्घातमगत एव सेत्स्यति तस्य नास्ति पुरस्कृत एकोऽपि कषायसमुद्घातो, यस्यापि सन्ति तस्यापि जघन्यत एको द्वौ त्रयो वा, ते च प्रागुक्तस्वरूपस्य सकृत्कषायसमुद्घातगामिनो वेदितव्याः, उत्कर्षतः सङ्ख्येया असङ्ख्येया अनन्ता वा, तत्र सङ्ख्येयं कालं संसारावस्थायिनः सङ्ख्येयाः असङ्ख्येयं कालमसङ्ख्येयाः अनन्तकालमनन्ताः, एवमसुर- कुमारादिक्रमेण तावद् वाच्यं यावद्वैमानिकस्य,

'एव'मित्यादि, एवं–चतुर्विंशतिदण्डकक्रमेण मानादिकषायसमुद्घातसमुद्धतास्तावद्वक्तव्याः यावल्लोभसमुद्घातः, एवमेते चत्वारः चतुर्विंशतिदण्डका भवन्ति, एते चैकैकनैरयिकादिविषया उक्ताः, सम्प्रत्येतानेव चतुश्चतुर्विंशतिदण्डकान् सकलनारकादिविषयानाह–'नेरइयाण'मित्यादि, अतीतसूत्रं सुप्रतीतं, पुरस्कृता अनन्ताः, प्रश्नसमयभाविनां नारकाणां मध्ये बहूनामनन्तकालमवस्थायित्वात्, एवं–नैरयिकोक्तेन प्रकारेण तावद् वक्तव्यं यावद्वैमानिकानां

यथा चैषः क्रोधसमुद्घातश्चतुर्विंशतिदण्डकक्रमेणोक्तः एवं मानादिसमुद्घाता अपि तावद् वक्तव्यायावल्लोभसमुद्घातः। एवमेतेऽपि सकलनारकादिविषयाश्चत्वारश्चतुर्विंशतिदण्डका भवन्ति, साम्प्रतमेकैकस्यनैरयिकादेर्नैरयिकादिषु भावेषु वर्त्तमानस्य कति क्रोधसमुद्घाता अतीताः कति भाविन इति निरूपयितुकाम आह– 'एगमेगस्स ण'मित्यादि, एकैकस्य भदन्त ! नैरयिकस्य विवक्षितप्रश्नसमयकालात् पूर्वं सकलमतीतं कालमवधीकृत्य तदा तदाऽस्य नैरयिकत्वं प्राप्तस्य सतः सर्वसङ्ख्यया कियन्तः क्रोधसमुद्घाता अतीताः ?, भगवानाह–गौतम ! अनन्ताः नरकगतेरनन्तशः प्राप्तत्वात्, एकैकस्मिंश्च नरकभवे जघन्यपदेऽपि सङ्ख्येयानां क्रोधसमुद्घातानां भावात्,

'एवं जहे'त्यादि, एवमुपर्शितेन प्रकारेण यथा वेदनासमुद्घातः प्राग् भणितः तथा क्रोधसमुद्घातोऽपि भणितव्यः, कथं भणितव्य इत्याह–निरवशेषंक्रियविशेषणमेतत्, सामस्त्येनेत्यर्थः, कियद्दूरं यावत् भणितव्यमित्याह–यावद् वैमानिकत्वे, वैमानिकस्य वैमानिकत्व इत्यालापकं यावदित्यर्थः, स चैवं–'केवइया पुरेक्खडा ?, गोयमा ! कस्सइ अत्थि कस्सइ नत्थि, जस्सत्थि जहन्नेणं एक्को वा दो वा तिन्नि वा उक्कोसेणं संखेज्जा वा असंखेज्जा वा अनंता वा, एवमसुरकुमारत्ते जाव वेमाणियत्ते,' 'एगमेगस्स णं भंते ! असुरकुमारस्स नेरइयत्ते केवइया कोहसमुग्घाया अईया ?, गो० ! अनंता, केवइया पुरेक्खडा ?, गो० ! कस्सइ अत्थि कस्सइ नत्थि, जस्सत्थि तस्स सिय संखेज्जा सिय असं० सिय अनंता, एगमेगस्स णं भंते ! असुरकुमारस्स असुरकुमारत्ते केवइया कोहसमुग्धाया अतीता ?, गो० ! अनंता, केव० पुरे० ?, गो० ! क० अत्थि क० नत्थि, जस्सत्थि जह० एक्को वा दो वा तिन्नि वा उक्को० संखेज्जा वा असंखेज्जा वा अनंता वा, एवं नागकुमारत्ते जाव वेमाणियत्ते, एवं जहा असुरकुमारेसु नेरइया वेमाणियपज्जवसाणेसु भणिया तहा नागकुमारादिया सट्ठाणपरट्ठाणेसु भणियव्वा जाव वेमाणियत्ते' इति,

अस्यार्थः–कियन्तो भदन्त ! एकैकस्य नारकस्यासंसारमोक्षमनन्तं कालं मर्यादीकृत्य नैरयिकत्वे भाविनः सतः सर्वसङ्ख्यया पुरस्कृताः क्रोधसमुद्घाताः ?, भगवानाह–'कस्सइ अत्थि' इत्यादि, य आसन्नमरणः क्रोसमुद्घातमनासाद्यात्यन्तिकमरणेन नरकादुद्वृत्तः सेत्स्यति तस्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नास्ति नैरयिकत्वभाविन एकोऽपि पुरस्कृतः क्रोधसमुद्घातः, शेषस्य तु सन्ति, यस्यापि सन्ति तस्यापि जघन्यत एको द्वौ त्रयो वा, एतच्च क्षीणशेषायुषां तद्भावस्थानां भूयो नरकेषु उत्पद्यमानानां वेदितव्यं, भूयो नपरकेषूत्पत्तौ हि जघन्यपदेऽपि सङ्ख्येयाः प्राप्यन्ते, नैरयिकाणां क्रोधसमुद्घातप्रचुरत्वात्, उत्कर्षतः सङ्ख्येया वा असङ्ख्येया वा अनन्ता वा, तत्र सकृन्नरकेषु जघन्यस्थितिकेषूत्पत्स्यमानस्य सङ्ख्येया अनेकशो यदिवा दीर्घस्थितिकेषु सकृदपि उत्पत्स्यमानस्यासङ्ख्येयाः अनन्तश उत्पत्स्यमानस्यानन्ताः,

'एव'मित्यादि, एवं-नैरयिकोक्तप्रकारेणासुरकुमारत्वे तदनन्तरं चतुर्विंशतिदण्डकक्रमेण तावद् वक्तव्यं यावद्वैमानिकत्वविषयं सूत्रं, तच्चैवं-'एगमेगस्स णं भंते ! नेरइयस्स वेमाणियत्ते केवइया कोहसमुग्घाया अईया ?, गो० ! अनंता, केवइया पुरे० ?, गो० ! कस्सइ अत्थि क० नत्थि, जस्सत्थि जह० एक्को वा दो वा तिन्नि वा उक्को० संखेज्जा वा असं० अनंता वा,' अत्राप्ययं भावार्थः-अतीतचिन्तायामनन्ताः, अनन्तशो वैमानिकत्वस्य प्राप्तत्वात्, पुरस्कृतचिन्तायां योऽनन्तरभवे नरकादुद्वृत्तो मानुषत्वमवाप्य सेत्स्यति प्राप्तो वा परम्परया सकृद्वैमानिकभवं न क्रोधसमुद्घातं गन्ता तस्यैकोऽपि पुरस्कृतः क्रोधसमुद्घातो वैमानिकत्वे न विद्यते, यस्त्वसकृद्वैमानिकत्वं प्राप्तः सन् सकृदेव क्रोधसमुद्घातं याता तस्य जघन्यत एको द्वौ वा त्रयो वा, शेषस्य सङ्ख्यातान् वारान् वैमानिकत्वं प्राप्स्यतः सङ्ख्येयाः असङ्ख्येयान् वारान् असङ्ख्येयाः अनन्तान् वारान् अनन्ताः,

'एगमेगस्स ण'मित्यादि प्रश्नसूत्रं सुगमं, 'गो० ! अनंता' इति, अनन्तशो नैरयिकत्वं प्राप्तस्य, एककैस्मिंश्च नैरयिकभवे जघन्यपदेऽपि सङ्ख्येयानां क्रोधसमुद्घातानां भावात्, पुरस्कृताः कस्यचित्सन्ति कस्यचिन्न सन्ति, किमुक्तं भवति ? -योऽसुरकुमारभवादुद्वृत्तो न नरकं यास्यति किन्त्वनन्तरं परम्परया वा मनुष्यभनवमवाप्य सेत्स्सयति तस्य नैरयिकावस्थाभाविनः पुरस्कृताः क्रोधसमुद्घाता न सन्ति, नैरयिकत्वावस्थाया एवासम्भवात्, यस्तु तद्भवादूर्ध्वं पारम्पर्येण नरकगामी तस्य सन्ति, तस्यापि कस्यचित् सङ्ख्येयाः कस्यचिदसङ्ख्येयाः कस्यचिदनन्ताः, तत्र यः सकृज्जघन्यस्थितिकेषु नरकमध्येषु समुत्पत्स्यते तस्य जघन्यपदेऽपि सङ्ख्येयाः दशवर्षसहस्रप्रमाणायामपि स्थितौ सङ्ख्येयानां क्रोधसमुद्घातानां भावात्, क्रोधबहुलत्वान्नारकाणां, असकृत् दीर्घस्थितिषु सकृद्वा गमनेऽसङ्ख्येयाः अनन्तशो नरकगमनेऽननताः,

तथा एकैकस्य भदन् ! असुरकुमारस्य असुरकुमारत्वे स्थितस्य सतः सकलमतीतकालमधिकृत्य कियन्तः क्रोधसमुद्घाता अतीताः ?, भगवानाह-अनन्ताः अनन्तशोऽसुरकुमारभावस्य प्राप्तत्वात्, प्रतिभवं च क्रोधसमुद्घातस्य प्रायो भावात्, पुरस्कृतचिन्तायां कस्यापि सन्ति, यस्य प्रश्नकालादूध्व असुरकुमारत्वेऽपि वर्त्तमानस्य न भावी क्रोधसमुद्घातो नापि तत उद्वृत्तो भूयोऽप्यसुरकुमारत्वं याता तस्य न सन्ति, यस्तु सकृदसुरकुमारत्वमागामी तस्य जघन्यपदे एको वा द्वौ वा त्रयो वा उत्कर्षतः सङ्ख्येया असङ्ख्येया अनन्ता वा, सङ्ख्येयान् वारान् आगामिनः सङ्ख्येया असङ्ख्येयान् वारान् असङ्ख्येयाः अनन्तान् वारान् अनन्ताः, एवं चतुर्विंशतिदण्डकक्रमेण नागकुमारत्वादिषु स्थानेषु असुरकुमारस्य निरन्तरं तावद्वक्तव्यं यावद्वैमानिकत्वे, तथा चाह-

'एवं नागकुमारत्तेऽवी'त्यादि, तदेवमसुरकुमारेषु क्रोधसमुद्घातश्चिन्तितः, सम्प्रति नागकुमारादिष्वतिदेशमाह-'एव'मित्यादि, एवमुक्तेनाभिलापगतेन प्रकारेण यथा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चतुर्विंशतिदण्डकक्रमेण असुरकुमारो नैरयिकादिषु वैमानिकपर्यवसानेषु भणित; तथा नागकुमारादयः समस्तेषु स्वस्थानपरस्थानेषु भणितव्याः यावद्वैमानिकस्य वैमानिकत्वे आलापकः, एवमेतानि नैरयिकचतुर्विंशतिदण्डकादिसूत्राणि वैमानिकचतुर्विंशतिदण्डकपर्यवसानानि चतुर्विंशतिःसूत्राणि वेदितव्यानि।

तदेवं चतुर्विंशतिदण्डसूत्रैः क्रोधसमुद्घातश्चिन्तितः, सम्प्रति चतुर्विंशत्यैव चतुर्विंशतिदण्डकसूत्रैर्मानसमुद्घातं मायासमुद्घातं चाभिधित्सुरतिदेशमाह—'मानसमुग्घाए मायासमुग्घाए निरवसेसं जहा मारणंतियसमुग्धाए' इति, यथा—प्राक् मारणान्तिकसमुद्घातेऽभिहितं सूत्रं तथा मानसमुद्घाते मायासमुद्घाते च निरवशेषमभिधातव्यं, तच्चैवं—

'एगमेगस्स णं भंते ! नेरइयस्स नेरइयत्त केवइया मानसमुग्धाया अईया ? गोयमा ! अनंता, केवइया पुरेक्खडा ?, गो० ! कस्सइ अत्थि कस्सइ नत्थि, जस्स अत्थि जहन्नेणं एक्को वा दो वा तिन्नि वा उक्कोसेणं संखेज्ज्ञा वा असंखेज्ज्ञा वा अनंता वा, एवमसुरकुमारत्ते जाव वेमाणियत्ते,

एगमेगस्स णं भंते ! असुरकुमारस्स नेरइयत्ते केवइया मानसमुग्धाया अतीता ? गोयमा अनंता, केवइया पुरेक्खडा ?, गो० ! कस्सइ अत्थि कस्सइ नत्थि, जस्सत्थि जहन्नेणं एक्को वा दो वा तिन्नि वा उक्को० संखेज्ज्ञा वा असंखेज्ज्ञा वा अनंता वा, एवं नागकुमारत्ते जाव वेमाणियत्ते, एवं जहा असुरकुमारे नेरइया वेमाणियपज्ञवसाणेसु भणिया तहा नागकुमाराइया सट्ठाणपरट्ठाणेसु भाणियव्वा जाव वेमाणियस्स वेमाणियत्ते' अस्यायमर्थः— अतीतेषु सूत्रेषु सर्वत्राप्यनन्तत्वं सुप्रतीतं, नैरयिककत्वादिस्थानानि प्रत्येकमनन्तशः, प्राप्तत्वात्, पुरस्कृतचिन्तायां त्वेवं नैरयिकस्य नैरयिकत्वे भावना—यो नैरयिकः प्रश्नकालादूर्ध्वं मानसमुद्गातमन्तरेण कालं कृत्वा नरकादुद्वृत्तोऽनन्तरं पारम्पर्येण वा मनुष्यभवमवाप्य सेत्स्यति न भूयो नरकमागन्ता तस्य न सन्ति पुरस्कृता मानसमुद्घाताः, यः पुनस्तद्भवे वर्त्तमानो भूयो वा नरकमागत्यैकं वारं मानसमुद्घातं गत्वा कालकरणेन नरकादुद्वृत्तः सेत्स्यति तस्यैकः पुरस्कृतो मानसमुद्घातः, एवमेव कस्यापि द्वौ कस्यापि त्रयः सङ्ख्येयान् वारान् नरकमागन्तुः सङ्ख्येयाः असङ्ख्येयान् वारान् असङ्ख्येयाः अनन्तान् वारान् अनन्ताः, नैरयिकस्यैवासुरकुमारत्वे पुरस्कृतचिन्तायामियं भावना—

यो नरकादुद्वृत्तो असुरकुमारत्वं न यास्यति तस्य न सन्ति पुरस्कृता मानसमुद्घाताः, यस्त्वेकं वारं गन्ता तस्य एको द्वौ त्र्यादयो वा सङ्ख्येयान् वारान् गन्तुः सङ्ख्येयाः असङ्ख्येयान् वारान् असङ्ख्येयाः अनन्तान् वारान् अनन्ता, एवं तावद् भणनीयं यावत् तिर्यक्पञ्चेन्द्रियत्वे पुरस्कृतचिन्ता,

मनुष्यचिन्तायां चैवं भावना—यो नरकादुद्वृत्तो मनुष्यभवं प्राप्य मानसमुद्घातगत्वा सेत्स्यति तस्य नास्त्येकोऽपि पुरस्कृतो मानसमुद्घातो, यस्तु मनुष्यत्वं गतः सन्नेकं वारं मानसमुद्घातं गन्ता तस्यैकोऽपरस्य द्वावन्यस्य त्र्यादयः सङ्ख्येयान् वारान् गन्तुः सङ्ख्येयाः असङ्ख्येयान् वारान् असङ्ख्येयाः अनन्तान् वारान् अनन्ताः, व्यन्तरज्योतिष्कवैमानिकत्वेषु भावना यथा असुरकुमारत्वे यथा च नैरयिकस्य नैरयिकत्वादिषु चतुर्विंशतिस्थानेषु भावना कृता तथा असरुकुमारादीनामपि वैमानिकपर्यवसानानां चतुर्विंशतिदण्डकक्रमेण कर्त्वया, यथा च मानसमुद्घातस्य चतुर्विंशतिः सूत्राणि चतुर्विंशतिदण्डकक्रमेणोक्तानि तथा मायासमुद्घातस्यापि चतुर्विंशतिसूत्राणि चतुर्विंशतिदण्डकक्रमेण वक्तव्यानि, तुल्यगमकत्वात्,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अधुना लोभसमुद्घातमतिदेशत आह-'लोभसमुग्घातो जहा कसायसमुग्घातो, नवरं सव्वजीवा असुराई नेरइएसु लोभकसाएणं एगुत्तरियाए नेतव्वा' इति, यथा प्राक् कषायसमुद्घात उक्तस्तथा लोभकषायोऽपि वक्तव्यः, नवरं तत्रासुरकुमारादीनं नैरयिकत्वे पुरस्कृतचिन्तायां स्यात् सङ्ख्येयाः स्यादसङ्ख्येया स्यादनन्ता इत्युक्तं अत्र तु सर्वे जीवा असुरुकमारादयो नैरयिकेषु पुरस्कृतचिन्तायां चिन्त्यमाना एकोत्तरिकया ज्ञातव्याः, एकोत्तरस्य भाव एकोत्तरिका 'द्वन्द्वचुरादिभ्यो वु' ञिति चौरादेराकृतिगणतया वुञिति, एको द्वौ त्रय इत्यादिरूपा तया, एकोत्तरतया इत्यर्थः, नैरयिकाणां निरतिशयदुःखवेदनाभिभूततया नित्यमुद्विग्नानां प्रायो लोभसमुद्घातासम्भवात्, सूत्रालापकश्चैवम्-

'एगमेगस्स णं भंते ! नेरइयस्स नेरइयत्ते केव० लोभसमु० अतीता ?, गो० ! अनंता, के० पु० !, गो० ! कस्सइ अत्थि कस्सइ नत्थि, जस्स अत्थि एगो वा दो वा तिन्नि वा उक्कोसेणं संखेज्ञा वा, असं० अनंता वा, एगमेगस्स णं भंते ! नेरइयस्स असुरकुमारत्ते केव० लोभस० अतीता ?, गो० ! अनंता, ते० पु० ?, गो० ! क० अत्थि क० नत्थि, जस्सत्थि सिय संखेज्ञा सिय असं० सिय अनंता, एवं जाव नेरइयस्स थणियकुमारत्ते,

एगमेगस्स णं भंते ! नेरइयस्स पुढविकाइयत्ते के० लोभस० अतीता ?, गो० ! अनंता, के० पुरे० ?, गो० ! क० अत्थि क० नत्थि, जस्स अत्थि जह० एक्को वा दो वा तिन्नि वा उक्को० संखे० असं० अनंता वा, एवं जाव मणूसत्त, वाणमंतरत्ते जहा असुरकुमारत्ते, एगमेगस्स णं भंते नेरइयस्स जोइसियत्ते के० लोभस० अतीता ?, गो० ! अनंता, केवइया पुरे० ?, गो० ! कस्सइ अत्थि कस्सइ नत्थि जस्सत्थि जह- एक्को वा दो वा तिन्नि वा उक्कोसेणं सिय संखेज्ञा सिय असंखेज्ञा सिय अनंता, एवं जाव वेमाणियत्तेऽवि भामियव्वं, एगमेगस्स णं भंते ! असुरकुमारस्स नेरइयत्ते के० लोभस० अतीता ?, गो० ! अनंता, केवइया पुरे० ?, गो० ! कस्सइ अत्थि कस्सइ नत्थि, जस्सत्थि जह० एक्को वा दो वा तिन्नि वा उक्को० सं० असं० अनंता वा,

एगमेगस्स णं भंते ! असुरकुमारस्स असुरकुमारत्ते के० लोभस० अतीता ?, गो० ! अनंता, के० पु० ?, गो० ! क० अ० क० नत्थि, जस्सत्थि जह० एक्को वा दो वा तिन्नि वा उक्को० सं० असं० अनंता वा, एगमेगस्स णं भंते ! असुरकुमारस्स नागकुमारत्ते पुच्छा, गो० ! अनंता, के० पु० ?, गो० ! क० अत्थि कस्सइ नत्थि, जस्सत्थि सिय सं० सिय असं० सिय अनंता, एवं जाव थणियकुमारत्ते। पुढविकाइयत्ते जाव वेमाणियत्ते जहा नेरइयस्स भणितं तहेव भाणियव्वं, एवं जाव थणियकुमारस्स वेमाणियत्ते।

एगमेगस्स णं भंते ! पुढविकाइयस्स नेरइयत्ते केव० लोभस० अतीता ?, गो० ! अनंता, केवइ० पु० ?, गो० ! क० अत्थि क० नत्थि, जस्सत्थि जह० एक्को वा दो वा तिन्नि वा उक्को० संखेज्ञा वा असं० अणं०, पुढवि० असुरकुमारत्ते अतीता अनंता, केव० पु० ?, गो० ! कस्सइ अत्थि क० नत्थि, जस्स अत्थि सिय सं० सिय असं० सिय अनंता, एवं जाव थणियकुमारत्ते, पुढविकाइयत्ते अतीता अनंता, पुरेक्खडा कस्सइ अत्थि क० नत्थि, जस्सत्थि जह० एक्को वा दो वा तिन्नि वा उक्को० सं० असं० अनंता वा, एवं जाव मणूसत्ते, वाणमंतरत्ते जहा असुरकुमारत्ते, जोइसियत्ते वेमाणियत्ते अतीता अनंता, पुरेक्खडा० क० अत्थि क० नत्थि, जस्सत्थि सिय संखे० सिय असं० सिय अनंता, एवं जाव मणूसस्स वेमाणियत्ते,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वाणमंतरस्स जहा असुरकुमारस्स एवं जोइसियवेमाणियाणंपि' अस्यामर्थः—नैरयिकस्य नैरयिकत्वे अतीता लोभसमुद्घाता अनन्ताः, अनन्तशो नैरयिकत्वस्य प्राप्तत्वात्, पुरस्कृतचिन्तायां कस्यचित् सन्ति कस्यचिन्न सन्ति, तत्र यः प्रश्नसमयादूर्द्धं लोभसमुद्घातमप्राप्त एव नरकभवादुद्वृत्त्यानन्तरं पारम्पर्येण वा सेत्स्यति न च भूयो नरकमागामी न चागतऽपि लोभसमुद्घातं गन्ता तस्य नेकोऽपि पुरस्कृतो लोभसमुद्घातः, शेषस्य तु भावी, तस्यापि कस्यचिदेकः कस्यचित् द्वौ कस्यचित् त्रयः, एतच्च प्रश्नसमयादूर्ध्वमपि तद्भवभाजां सकृन्नारकभवगामिनां वा वेदितव्यं, उत्कर्षतः सङ्ख्येया वा असङ्ख्येया वा अनन्ता वा, तत्र सङ्ख्येयान् वारान् नरकभवमागामिनः सङ्ख्येयाः असङ्ख्येयान् वारान् असङ्ख्येयाः अनन्तान् वारान् अनन्ताः, तथा नैरयिकत्व-स्यासुरकुमारत्वविषयेऽतीतसूत्रं तथैव भावनीयं, पुरस्कृतसूत्रे 'कस्सइ अत्थि क० नत्थि'त्ति यो नरकभवादुद्वृत्तो नासुरकुमारत्वं प्राप्स्यति तस्य न सन्त्यसुरकुमारत्वविषयाः पुरस्कृताः लोभ-समुद्घाताः, यस्तु प्राप्स्यति तस्य सन्ति, ते च जघन्यपदे सङ्ख्येयाः, जघन्यस्थितावप्यसुरकुमाराणां सङ्ख्येयानां लोभसमुद्घातानां भावात्, लोभबहुलत्वात् तेषां, उत्कृष्टपदेऽसङ्ख्येया अनन्ता वा, तत्र सकृद्दीर्घस्थितावसकृज्जधन्यस्थितिषु दीर्घस्थितिषु वा उत्पत्स्यमानानामवसेयं, अनन्तश उत्पत्स्यमानानामनन्ताः, एवं नैरयिकस्य नागकुमारत्वादिषु स्थानेषु निरन्तरं तावद्वक्तव्यं यावत्स्तनितकुमारत्वे, तथा चाह—

'एवं जाव थणियकुमारत्ते' पृथिवीकायिकत्वेऽतीतसूत्रं तथैव, पुरस्कृतचिन्तायां तु कस्यापि सन्ति कस्यापि न सन्ति, तत्र नरकादुद्वृत्तो यो न पृथिवीकायिकत्वं प्राप्स्यति तस्य न सन्ति, योऽपि गन्ता तस्य जघन्यपदे एको द्वौ वा त्रयो वा उत्कर्षतः सङ्ख्येया असङ्ख्येया अनन्ता वा, ते चैवम्—तिर्यक्पञ्चेन्द्रियभवात् मनुष्यभवाद्वा लोभसमुद्घातेन समुद्धतः सन् य एकं वारं पृथिवीं गन्ती तस्य एको द्वौ वारौ गन्तुर्द्वौ त्रीन् वारान् गन्तुस्त्रयः सङ्ख्येयान् वारान् सङ्ख्येयाः असङ्ख्येयान् वारान् असङ्ख्येयाः अनन्तान् वारान् अनन्ताः, 'एवं जाव मणूसत्ते' इति एवं—पृथिवी-कायिकगतेनाभिलापप्रकारेण तावद्वक्तव्यं यावन्मनुष्यत्वे, तच्चैवं—

'एगमेगस्स णं भंते ! नेरइयस्स आउकाइयत्ते' इत्यादि, यावन्मनुष्यसूत्रं, तत्राप्कायिका-दिवनस्पतिपर्यन्तसूत्रभावना पृथिवीकायसूत्रवत्, द्वीन्द्रियसूत्रे पुरस्कृतचिन्तायां जघन्येन एको द्वौ वा त्रयो वेति एतत् सकृत् द्वीन्द्रियभवं प्राप्तुकामस्य वेदितव्यं, उत्कर्षेणं सङ्ख्येया असङ्ख्येया अनन्ता वा, तत्र सङ्ख्येयान् वारान् द्वीन्द्रियभवं प्राप्तुकामस्य सङ्ख्येया असङ्ख्येयान् वारान् असङ्ख्येयाः अनन्तान् वारान् अनन्ताः, एवं त्रीन्द्रियचतुरिन्द्रियसूत्रे अपि भावनीये, तिर्यक्पञ्चेन्द्रियसूत्रविषया त्वेवं भावना—सकृत् पञ्चेन्द्रियभवं गन्तुकामस्य स्वभावत एवाल्पलोभस्य जघन्यतः एको द्वौ त्रयो वा, शेषस्य तूत्कर्षतः सङ्ख्येयान् वारान् तिर्यक्पञ्चेन्द्रियभवं गन्तुः सङ्ख्येयाः असङ्ख्येयान् वारान् असङ्ख्येयाः अनन्तान् वारान् अनन्ताः, मनुष्यसूत्रे तु पुरस्कृतविषया भावना मूलत एवं—यो नरकभवादुद्वृत्तोऽल्पलोभकषायः सन् मनुष्यभवं प्राप्य लोभसमुद्घातमगत्वा सिद्धिपुरं यास्यति तस्य न सन्ति पुरस्कृता लोभसमुद्घाताः शेषस्य तु सन्ति, यस्य सन्ति तस्यापि जघन्यत एको द्वौ वा त्रयो वा, ते च एकं द्वौ त्रीन् वा लोभसमुद्घातान् प्राप्य सेत्स्यतो वदितव्याः, सङ्ख्येयादयः प्राग्वद् भावनीयाः,

'वाणमंतरत्ते जहा असुरकुमारा' इति यथा नैरयिकस्यासुरकुमारत्वे पुरस्कृतविषये सूत्रमुक्तं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तथा व्यन्तरेष्वपि वक्तव्यं, किमुक्तं भवति ? –पुरस्कृतचिन्तायमेवं वक्तव्यं–'कस्सइ अत्थि क० नत्थि, जस्स अत्थि सिय संखेज्जा सिय असं० सिय अनंता' इति, नत्वेकोत्तरिका वक्तव्या, व्यन्तराणामप्यसुरकुमाराणामवि जघन्यस्थितावपि सङ्खयेयानां लोभसमुद्घातानां भावात्, 'जोइसियत्ते' इत्यादि, ज्योतिष्कत्वे अतीता अनन्ताः, अनन्तशो ज्योतिष्कत्वस्य प्राप्तत्वात्, पुरस्कृताः कस्यापि सन्ति कस्यापि न सन्ति, एतत् प्राग्वद् भावनीयं, यस्यापि सन्ति तस्यापि कस्यचिदसङ्खयेयाः कस्यचिदनन्ताः, न तु जातुचित् सङ्खयेयाः, ज्योतिष्काणां जघन्यपदेऽप्यसङ्खयेयवर्षायुष्कतया जघन्यतोऽप्यसङ्खयेयानां लोभसमुद्घातानां भावात्, लोभबहुलत्वात्तज्जातेः, एवं वैमानिकत्वेऽपि पुरस्कृतचिन्तायां वक्तव्यं। तदेवं स्वस्थाने परस्थाने च लोभसमुद्घातश्चिन्तितः, सम्प्रत्यसुरकुमारस्य तं चिचिन्तयिषुरिदमाह–

'एगमेगस्स ण'मित्यादि, एकैकस्य असुरकुमारस्य नैरयिकत्वे लोभसमुद्घाता अतीता अनन्ताः, नैरयिकत्वस्यानन्तशः प्राप्तत्वात्, पुरस्कृता; कस्यचित् सन्ति कस्यचिन्न सन्ति, तत्र योऽसुरकुमारभवादुद्वृत्तो न नरकं याता नापि सकृद् गतोऽपि लोभसमुद्घातं गन्ता तस्य न सन्ति, यस्तु यास्यति तस्य जघन्यत एको द्वौ त्रयो वा उत्कर्षतः सङ्खयेया असङ्खयेया अनन्ताः, तत्र सकृन्नरकगामिनः एकादयो नैरयिकाणामिष्टद्रव्यसंयोगाभावतः प्रायो लोभसमुद्घातस्यासम्भवात्, उक्तं च मूलटीकायाम्–

"नेरइयाणं लोभसमुग्घाया थोवा चेव भवन्ति, तेसिमिट्ठदव्वसंजोगाभावातो एगादिसंभव" इति, सङ्खयेयान् वारान् नरकं गन्तुः सङ्खयेयाः असङ्खयेयान् वारान् असङ्खयेया अनन्तान् वारान् अनन्ताः, असुरकुमारस्यासुरकुमारत्वे अतीता अनन्ताः सुप्रतीताः, पुरस्कृताः कस्यापि सन्ति कस्यापि न सन्ति, तत्र योऽसुरकुमारभवे पर्यन्तवर्ती न च लोभसमुद्घातं याता नापि तत उद्वृत्तो भूयोऽप्यसुरकुमारत्वं याता किन्त्वनन्तरं पारम्पर्येण वा सेत्स्यति न सन्ति, यस्य तु सन्ति तस्यापि जघन्यत एको द्वौ वा त्रयो वा उत्कर्षतः सङ्खयेया असङ्खयेया अनन्ताः, तत्र एकादयः क्षीणायुःशेषाणां तद्भवभाजां भूयस्तथैवानुत्पद्यमानानामवगन्तव्याः, सङ्खयेयादयो नैरयिकस्येव भावनीयाः, असुरकुमारस्य नागकुमारत्वेऽतीताः प्राग्वत्, पुरस्कृताः कस्यापि सन्ति कस्यापि न सन्ति, तत्र योऽसुरकुमारभवादुद्वृत्तो न नागकुमारभवं गन्ता तस्य न सन्ति, शेषस्य तु सन्ति, यस्यापि सन्ति तस्यापि स्यात् सङ्खयेयाः स्यादसङ्खयेयाः स्यादनन्ताः, तत्र सकृन्नागकुमारभवं प्राप्तुकामस्य सङ्खयेयाः, जघन्यस्थितावपि सङ्खयेयानां लोभसमुद्घातानां भावात्, असङ्खयेयान् वारान् प्राप्तुकामस्य असङ्खयेयाः अनन्तान् वारान् अनन्ताः, एवं यावत् स्तनितकुमारत्वे, पृथिवीकायिकत्वे यावद्वैमानिकत्वे यथा नैरयिकस्य भणितं तथैव भणितव्यं, एवमसुरकुमारस्येव नागकुमारादेरपि तावद्वक्तव्यं यावत्स्तनितकुमारस्य वैमानिकत्वे–वैमानिकत्वविषयं सूत्रं, तच्चैवं– 'एगमेगस्स णं भंते ! थणियकुमारस्य वेमाणियत्ते केवइया लोभसमुग्घाया अतीता ?' इत्यादि, एवं

–'एगमेगस्स णं भंते ! पुढविकाइयस्स नेरइयत्ते' इत्याद्यपि सूत्रं पूर्वोक्तभावनानुसारेण स्वयं भावनीयं, तदेवं नैरयिकादेरेकत्वविषयाः क्रोधादिसमुद्घाताः प्रत्येकं चतुर्विंशत्या चतुर्विंशतिदण्डकसूत्रैर्विचिन्तिताः, सम्प्रति तानेव नैरयिकादिबहुत्वविषयान् चिचिन्तयिषुरिदमाह–'नेरइयाणं भंते' इत्यादि, नैरयिकाणां भदन्त ! नैरयिकत्वे कियन्तः क्रोधसमुद्घाता अतीताः ?, भगवानाह–गौतम ! अनन्ताः, अनन्तशो नैरयिकत्वस्य सर्वजीवैः प्राप्तत्वात्, कियन्तः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पुरस्कृताः ?, गौतम ! अनन्ताः, प्रश्नसमयभाविनां मध्ये बहूनामनन्तशो नैरयिकत्वं प्राप्तुकामत्वात् 'एव'मित्यादि,

एवं--नैरयिकगतेनाभिलापप्रकाकेण चतुर्विंशत्या चतुर्विंशतिदण्डकसूत्रैर्निरन्तरं तावद्वक्तव्यं यावद्वैमानिकस्य वैमानिकत्वे—वैमानिकविषयं सूत्र, तच्चैवं—'वेमाणियाणं भंते ! वेमाणियत्ते केवइया कोहसमुग्घाया अतीता ?, गो० ! अनंता, केवइया पुरेक्खडा ?, गो० ! अनंता' भावना प्राग्वत्, यथा च क्रोधसमुद्घाताः सर्वेषु जीवेषु स्वस्थाने परस्थाने चातीताः पुरस्कृताश्चानन्तत्वेनाभिहिताः तथा मानादिसमुद्घाता अपि वाच्याः, तथा चाह—'एव'मित्यादि, एवं—क्रोधसमुद्घातगतेन प्रकारेण चत्वारोऽपि समुद्घाताः सर्वत्रापि स्वस्थानपरस्थानेषु वाच्याः, यावल्लोभसमुद्घातो वैमानिकत्वविषय उक्तो भवति, स चैवं—'वेमाणियाणं भंते ! वेमाणियत्ते केवइया लोभसमुग्घाया अतीता ?, गो० ! अनंता, केवइया पुरेक्खडा ?, गो० ! अनंता' सुगमं।

तदेवं नैरयिकादिबहुत्वविषया अपि क्रोधादिसमुद्घाताः प्रत्येकं चुतर्विंशत्या चतुर्विंशतिदण्डकसूत्रैश्चिन्तिताः, सम्प्रति क्रोधादिसमुद्घातैः शेषसमुद्घातैश्च समवहतानामसमवहतानां च परस्परमल्पबहुत्वभिधित्सुः प्रथमतः समामान्यतो जीवविषयं तावदाह—

मू. (६१०) *एतेसि णं भंते ! जीवाणं कोहसमुग्घातेणं माणसमुग्घातेणं मायासमुग्घातेणं लोभसमुग्घातेण य समोहयाणं अकसायसमुग्घातेणं समोहयाणं असमोहयाण य कयरे२ हिंतो अप्पा वा ४ ?, गो० ! सव्वत्थोवा जीवा अकसायसमुग्घाएणं समो०, माणसमुग्घाएणं समोहया अनंत०, कोहस० समो० विसेसाहिया मायासमुग्घाएणं स० विसे० लोभसमु० स० वि० असमोहया संखेज्जगुणा,*

एतेसि णं भंते ! नेरइयाणं कोहस० मानस० मायास० लोभस० समोहयाणं असभोहयाण य कयरे२ हिंतो अप्पा वा ४ ?, गो० ! सव्वत्थोवा नेरइया लोभसमुग्घाएणं समोहया मायास० स० संखेज्ज० माणस० स० संखे० कोहस० संखे० असमोहया संखे०, असुरकुमाराणं पुच्छा, गो० ! सव्वत्थोवा असुरकुमाराणं कोहस० समो० मानसमुग्धाएणं स० संखे० मायास० स० सं० लोभस० समो० संखे० असमोहया सखेज्जगुणा,

एवं सव्वदेवा जाव वेमाणिया, पुढविकाइयाणं पुच्छा, गो० ! सव्वत्थोवा पुढविकाइया मानसमुग्धाएणं समोहया कोहसमु० स० विसे० मायासमु० स० विसे० लोभस० स० विसे० असमो० संखे, एवं जाव पंचिंदियतिरिक्खजोणिया, मणुस्सा जहा जीवा, नवरं मानसमु० स० असं०

वृ. 'एएसि ण'मित्यादि, एतेषां भदन्त ! जीवानां क्रोधसमुद्घातेन मानसमुद्घातेन मायासमुद्घातेन लोभसमुद्घातेन च समवहतानां

'अकषायेणे'ति कषायव्यतिरेकेण शेषेण समुद्घातेन समवहतानामसमवहतानां च कतरे कतरेभ्यः अल्प वा बहवो वा 'अर्थवशाद्विभक्तिपरिणाम' इति न्यायात् पञ्चम्याः स्थाने तृतीया-परिणामनात्तु कतरैः कतरैस्तुल्या वा, तथा कतरे२भ्यो विशेषाधिकाः, एवं गौतमेन पृष्टे भगवानाह—गौतम ! सर्वस्तोका जीवा अकषायसमुद्घातेन—कषायव्यतिरिक्तेन शेषवेदनादिवसमुद्घातषट्केन समवहताः, कषायव्यतिरिक्तसमुद्घातसमुद्घता हि क्वचित् कदाचित् केचिदेव प्रतिनियता लभ्यन्ते, ते चोत्कर्षपदेऽपि कषायसमुद्घातसमवहतापेक्षया अनन्तभागे वर्त्तन्ते, ततःस्तोकाः, तेभ्यो मानसमुद्घातसमवहता अनन्तगुणाः, अनन्तानां वनस्पतिजीवानां पूर्वभवसंस्कारानुवृत्तितो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मानसमुद्घाते वर्त्तमानानां प्राप्यमाणत्वात्, तेभ्यः क्रोधसमुद्घातेन समवहता विशेषाधिकाः, मानापेक्षया क्रोधिनां प्रचुरत्वात्, तेभ्यो मायासमुद्घातेन समवहता विशेषाधिकाः, क्रोध्यपेक्षया मायाविनां प्रचुरत्वात्, तेभ्योऽपि लोभसमुद्घातेन समवहता विशेषाधिकाः, मायाविभ्यो लोभवता-मतिप्रभूतत्वात्, तेभ्योऽपि केनाप्यसमवहता सङ्खयेयगुणाः, चतसृष्वपि गतिषु प्रत्येकं समवहतेभ्योऽसमवहतानां सदा सङ्खयेयगुणतया प्राप्यमाणत्वात्, सिद्धास्त्वेकेन्द्रिययापेक्षया-नन्तभागवर्त्तिन इति ते सन्तोऽपि न विवश्रिताः, एतदेवाल्पबहुत्वं चतुर्विंशतिदण्डकक्रमेण चिन्तयन्नाह–

'एएसि ण'मित्यादि सुगमं, नवरं सर्वस्तोका नैरयिका लोभसमुद्घातेन समवहता इति, नैरयिकाणामिष्टद्रव्यसंयोगाभावात् प्रायो लोभसमुद्गातस्तावन्नोपपद्यते, येषामपि च केषाञ्चिद्भवति ते कतिपया इति शेषसमुद्घातसमवहतापेक्षया सर्वस्तोकाः, असुरकुमारविषयाल्पबहुत्वचिन्तायां सर्वस्तोकाः क्रोधसमुद्घातसमुद्धता इति, देवा हि स्वभावतो लोभबहुलास्ततोऽल्पतरा मानादिम-न्तःततोऽपि सकदाचित्कतिपये क्रोधवन्त इति शेषसमुद्घातसमवहतापेक्षया सर्वस्तोकाः,

'एवं सव्वदेवा जाव वेमाणिया' इति एवं–असुरकुमारगतेनाल्पबहुत्वप्रकारेण सर्वे देवा नागकुमारादयस्तावद्वक्तव्याः यावद्वैमानिकाः, पृथिवीकायिकचिन्तायां सामान्यतो जीवपदे इव भावना भावनीया, समानत्वात्, 'एवं जावे'त्यादि, एवं–पृथिवीकायिकक्तेन प्रकारेण तावद्वक्तव्यं यावत् तिर्यक्पञ्चेन्द्रियाः, मनुष्या यथा जीवाः नमवरमकषायसमुद्घातसमवहतापेक्षया मानस-मुद्घातेन समवहता असङ्खयेयगुणा वक्तव्याः । सम्प्रति कति छाद्मस्थिकाः समुद्घाता इति निरूप-णार्थमाह–

मू. (६११) *कइ णं भंते ! छाउमत्थिया समुग्घाया पं० ?, गो० ! छ छाउमत्थिया स० पं०, तं०–वेदनास० कसायस० मारणंतियस० वेउव्वियस० तेयास० आहारगसमुद्ग्घाते, नेरइयाणं भंते ! कति छाउमत्थिया स० पं० ?, गो० चत्तारि छाउमत्थिया स० पं०, तं०–वेदनास० कसायस० मारणंतियस० वउव्वियस०,*

असुरकुमाराणं पुच्छा, गो० ! पंच छाउ० समु० पं०, तं०–वेदनासमु० कसायसमु० मारणंतियस० वेउव्वियस० तेयगसमु०, एगिंदियविगलिंदियाणं पुच्छा, गो० ! तिन्नि छाउ० समु० पं०, तं०–वेदनासमु० कसायस० मारणंतियस०, नवरं वाउकाइयाणं चत्तारि स० पं०, तं०–वेदनास० कसायस० मारणंतियस० वेउव्वियस०,

पंचिंदियतिरिक्खजोणियाणं पुच्छा, गो० ! पंच० स० पं०, तं०–वेदनास० कसायस० मारणंतियस० वेउव्वियस० तेयगस०, मणूसाणं कति छाउमत्थिया समु० पं० ?, गो० ! छाउमत्थिया सं० पं०, तं०–वेदनास० कसायस० मारणंतियस० वेउव्वियस० तेयगस० आहारगस०

वृ. 'कइ णं भंते !' इत्यादि सुगमं, अथ कति केषां छाद्मस्थिकाः समुद्घाता इति चतुर्विंशति-दण्डकक्रमेण निरूपयति–'नेरइयाण'मित्यादि, नैरयिकाणामाद्याश्चत्वारो वेदनादिसमुद्घाताः, तेषां तेजोलब्ध्याहारकलब्ध्यभावतस्तैजससमुद्घाताहारकसमुद्घातासम्भवात्,

असुरकुमारादीनां सर्वेषामपि देवानामाहारकसमुद्घातवर्जाः शेषाः पञ्च समुद्घाताः, तेषां तेजोलब्धिसम्भवात् तैजससमुद्घातस्यापि सम्भवात्, यस्त्वाहारकसमुद्घातः स तेषां न

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सम्भवति, चतुर्दशपूर्वाधिगमाभावोत भवप्रत्ययाच्च तेषामाहारकलब्ध्यभावात्, वायुकायवर्जै-केन्द्रियविकलेन्द्रियाणामाद्या वेदनाकषायमरणलक्षणास्त्रयः समुद्घाताः, तेषां वैक्रियहारकते-जोलब्ध्यभावतस्तत्समुद्घातासम्भवात्, वायुकायिकानां पूर्वे त्रयो वैक्रियसमुद्घातसहिताश्चत्वारः समुद्घाताः, तेषां बादरकपर्याप्तानां वैक्रियलब्धिसम्भवतो वैक्रियसमुद्घातस्यापि सम्भवात्,

पञ्चेन्द्रियतिर्यग्योनिकानामाहारकसमुद्घातवर्जाः शेषाः पञ्च छाद्मस्थिकाः समुद्घाताः, यस्त्वाहारकसमुद्घातः स तेषां न सम्भवति, चतुर्दशपूर्वाधिगमाभावतस्तेषामाहारकलब्ध्यसम्भवात्, मनुष्याणां षडपि, मनुष्येषु सर्वभावसम्भवात् । तदेवं यति येषां छाद्मस्थिकाः समुद्घातास्तति तेषां निरूपिताः सम्प्रति यस्मिन् समुद्घातेन वर्त्तमानो यावत् क्षेत्रं समुद्घातवशतस्तैस्तैः पुद्गलैर्व्याप्नोति तदेतन्निरूपयति—

मू. (६१२) *जीवे णं भंते ! वेदनासमुग्घाएणं समोहते समोहणित्ता जे पोग्गले निच्छुभति तेहि णं भंते ! पोग्गलेहिं केवइते खेत्ते अफुण्णे केवतिते खेत्ते फुडे ?, गो० ! सरीरप्पमाणमेत्ते विक्खंभबाहल्लेणं नियमा छद्दिसिं एवतिते खेत्ते अफुण्णे एवतिते खेत्ते फुडे, से णं भंते ! खित्ते केवतिकालस्स अप्फुडे केव० फुडे ?, गो० ! एगसमइएण वा दुसमइएण वा तिसमइएण वा विग्गहेणं एवतिकालस्स अफुण्णे एवइयकालस्स फुडे, ते णं भंते ! पोग्गले केवतिकालस्स निच्छुभति गो० ! जहन्नेणं अंतोमुहुत्तस्स उक्को० वि० अंतो०,*

ते णं भंते ! पोग्गला निच्छूढा समाणा जातिं तत्थ पाणातिं भूयातिं जीवातिं सत्तातिं अभिहणंति वत्तेंति लेसेंति संघाएंति संघट्टेंति परितावेंति किलामेंति उद्दवेंति तेहिंतो णं भंते ! से जीवे कतिकिरिए ?, गो० ! सिय तिकिरिए सिय चउकिरिए सिय पंचकिरिए,

ते णं भंते ! जीवा तातो जीवाओ कतिकिरिया ?, गो० ! सिय तिकिरिया सिय चउकिरिया सिय पंचकिरिया, से णं भंते ! जीवे ते य जीवा अन्नेसिं जीवाणं परंपराधाएणं कतिकिरिया ?, गो० ! तिकिरियावि चउकिरियावि पंचकिरियावि, नेरइए णं भंते ! वेदनासमुग्घाएणं समोहते, एवं जहेव जीवे, नवरं नेरइयाभिलावो, एवं निरवसेसं जाव वेमाणिते । एवं कसायसमुग्घातोवि भाणितव्वो ।

जीवे णं भंते ! मारणंतियसमुग्घातेणं समोहणइ समोहणित्ता जे पोग्गले निच्छुभति तेहिं णं भंते ! पोग्गलेहिं केवतिते खेत्ते अप्फुण्णे केवतिते खेत्ते फुडे ?, गो० ! सरीरप्पमाणमेत्ते विक्खंभबाहल्लेणं आयामेणं जहन्नेणं अंगुलस्स असखेज्जतिभागं उक्कोसेणं असंखेज्जातिं जोयणातिं एगदिसिं एवतिते खेत्ते अफुण्णे एवतिए खेत्ते फुडे,

से णं भंते ! खेत्ते केवतिकालस्स अफुण्णे केवतिकालस्स फुडे ?, गो० ! एगसमइएण वा दुसमइएण वा तिसमइएण वा चउसमइएण वा विग्गहेणं एवतिकालस्स अफुण्णे एवतिकालस्स फुडे, सेसं तं चेव जाव पंचकि०, एवं नेरइएवि, नवरं आयामेणं जहन्नेणं साइरेगं जोयणसहस्सं उक्को० असंखेज्जातिं जोअनातिं एगदिसिं एवतिते खेत्ते अप्फुण्णे एवतिते खित्ते फुडे, विग्गहेणं एगसमइएण वा दुसमइएण वा तसमइएण वा चउसमतिएण वा भन्नति, सेसं तं चेव जाव पंचकिरियावि,

असुरकुमारस्स जहा जीवपदे, नवरं विग्गहो तिसमइओ जहा नेरइयस्स, सेसं तं चेव जाव पंचकिरियावि,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

असुरकुमारस्स जहा जीवपदे, नवरं विग्गहो तिसमइओ जहा नेरइयस्स, सेसं तं चेव जहा असुरकुमारे, एवं जाव वेमाणिते, नवरं एगिंदिये जहा जीवे निरवसेसं।

वृ. 'जीवे णं भंते !' इत्यादि, जीवो णमिति वाक्यालङ्कारे-वेदनासमुद्घाते वर्त्तमानः तस्मिन् समवहतो भवति समवहत्य च यान् पुद्गलान् वेदनायोग्यान् स्वशरीरान्तर्गतान् 'निच्छुभइ'इति विक्षिपति आत्मविश्लिष्टान् करोतीत्यर्थः, 'तेहि ण'मिति तैः पुद्गलैः कियत् क्षेत्रमापूर्णं, आपूर्णत्वमान्तराले कियदाकाशप्रदेशासंस्पर्शनेऽपि व्यवहारत उच्यते तत आह-कियत् क्षेत्रं स्पृष्टं-प्रतिप्रदेशापूरणेन व्याप्तं, एवं गौतमेन प्रश्ने कृते सति भगवानाह- 'सरीरे'त्यादि नियमात्-नियमेन 'छद्दिसिं'ति षड् दिशो यत्रापूरणे स्पर्शने वा षड्दिक् तद्यथा भवति एवं विष्कम्भतो-विस्तरेण बाहल्यतः-पिण्डतः शरीरप्रमाणमात्रं, यावत्प्रमाणः स्वशरीरस्य विष्कम्भो यावत्प्रमाणं च बाहल्यं एतावन्मात्रमापूर्णं स्पृष्टं चेति वाक्यशेषः, तदेव निगमनद्वारेणाह-

'एवइए खेत्ते अफुण्णे एवइए खेत्ते फुडे' इति, इह वेदनासमुद्घातो वेदनातिशयात्, वेदनातिशयश्च लोकनिष्कुटेषु जीवानां न भवति, निरुपद्रवस्थानवर्त्तित्वात् तेषां, किन्तु त्रसनाड्या अन्तः, तत्र परोदीरणसम्भवात्, तत्र च षड्दिक्सम्भव इति नियमाच्छद्दिशिमित्युक्तं, अन्यथा 'सिय तिदिसिं सिय चउदिसिं सिय पंचदिसि'मित्याद्युच्येत, अथ स्वशरीरप्रमाणविष्कम्भबाहल्यमेव क्षेत्रमापूर्णं स्पृष्टं च विग्रहगतौ जीवस्य गतिमधिकृत्य कियद्दूरं यावद्भवति कियन्तं च काल-मित्येतन्निरूपणार्थमाह-

'से णं भंते !' इत्यादि, नपुंसकत्वे पुंस्त्वं प्राकृतत्वात्, तत्-अनन्तरोक्तप्रमाणं णमिति प्राग्वत् भदन्त ! क्षेत्रं कालस्स इति-प्राकृतत्वात् तृतीयार्थे षष्ठी कियता कालेन पूर्णं कियता कालेन स्पृष्टं, किमुक्तं भवति ?- कियन्तं कालं यावत् स्वशरीरप्रमाणविष्कम्भाबाहल्यं क्षेत्रं निरन्तरं विग्रहगतौ जीवस्य गतिमधिकृत्यापूर्णं स्पृष्टं च लभ्यते इति ?, भगवानाह-गौतम ! एकसमयेन वा द्विसमयेन वा त्रिसमयेन वा विग्रहेण, किमुक्तं भवति ? -एकसमयेन वा द्विसमयेन वा त्रिसमयेन वा विग्रहेण यावन्मात्रं क्षेत्रं व्याप्यते इयद्दूरं यावत् स्वशरीरप्रमाणविष्कम्भबाहल्यं क्षेत्रं वेदनाजननयोग्यैः पुद्गलैरापूर्णं-भृतं जीवस्य गतिमधिकृत्यावाप्यते, तत एतद्गतमुत्कर्षत-स्त्रिसामयिकेन विग्रहेण यावन्मात्रं क्षेत्रमभिव्याप्यते एतावदात्मविश्लिष्टैर्वेदनाजननयोग्यैः पुद्गलैरापूर्णं लभ्यते, इह चतुःसामयिकः पञ्चसामयिकश्च विग्रहो यद्यपि सम्भवति तथापि वेदनासमुद्घातः प्रायः परोदीरितवेदनावशत उपजायते, परोदीरिता च वेदना त्रसनाड्यां व्यवस्थि-तस्य न बहिः, त्रनसाडीव्यवस्थितस्य च विग्रह उत्कर्षतोऽपि त्रिसामयिक इति उत्कर्षतोऽपि त्रिसामयिकेन विग्रहेणेत्युक्तं, न चतुःसामयिकेन पञ्चसामयिकेन चेति, उपसंहारवाक्यमाह-

'एवइयकालस्स अफुण्णे एवइयकालस्स फुडे' एतावता उत्कर्षतोऽपि त्रिसमयप्रमा-णेनेत्यर्थः कालेनापूर्णमेतावता कालेन स्पृष्टं, किमुक्तं भवति ? -विग्रहगतावुत्कर्षतः त्रीन् समयान् यावत् त्रिभिश्च समयैर्यावन्मात्रं व्याप्यते इयन्तीं सीमाभिव्याप्य स्वशरीरप्रमाणविष्कम्भहबाहल्यं क्षेत्रं वेदनाजननयोग्यैः पुद्गलैरापूर्णं भृतं च जीवस्य गतिमधिकृत्य व्याप्यते, अथवा 'केवइय कालस्स'त्ति षष्ठयेव व्याख्येया, ततः स्वशरीरप्रमाणविष्कम्भबाहल्यं क्षेत्रं वेदनाजननयोग्यैः पुद्गलैरापूर्णं भृतं च जीवस्य विग्रहगतिमधिकृत्य कियतः कालस्य सम्बन्धि, कियन्तं कालं यावद-वाप्यते इत्यर्थः, भगवानाह-एकसमयेन द्विसमयेन त्रिसमयेन वा विग्रहेणापूर्णं स्पृष्टं च लभ्यते

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इति वाक्यशेषः, तत एतावता उत्कर्षतः त्रिसमयप्रमाणस्य कालस्य सम्बन्धि यशोक्तप्रमाणं क्षेत्रं वेदनाजननयोग्यैः पुद्गलैरापूर्णतावता कालस्य सम्बन्धि स्पृष्टमिति।

सम्प्रति यावन्तं कालं वेदनाजननयोग्यान् पुद्गलान् विक्षिपति तावत्कालप्रमामं प्रतिपादनार्थमाह–'ते णं भंते!' इत्यादि, तान् वेदनाजननयोग्यान् पुद्गलान् णमिति वाक्यालङ्कारे भदन्त! परमकल्याणयोगिन् पररमसुखयोगिन् वा पुद्गलान् कियतः कालस्य सम्बन्धिनो विक्षिपति कियत्कालं वेदनाजननयोग्यान् विक्षिपतीति भावः, भगवानाह–जघन्येनाप्यन्तर्मुहूर्त्तस्य सम्बन्धिन उत्कर्षतोऽप्यन्तपर्मुहूर्त्तस्य, केवलं मनाक् बृहत्तरस्य सम्बन्धिनः विक्षिपति, किमुक्तं भवति?–ये पुद्गला जघन्यत उत्कर्षतश्चान्तर्मुहूर्त्तं यावत् वेदनाजननसमर्थाः तान् तथा २ वेदनार्त्तः सन् स्वशरीरगतान् स्वशरीराद्बहिरात्मप्रदेशेभ्योऽपि विप्लिष्टान् विक्षिपति, यथाऽत्यन्तदाहज्वरपीडितः सन् सूक्ष्मपुद्गलान्, प्रत्यक्षसिद्धं चैतदिति,

'ते णं भंते!' इत्यादि, ते णमिति पूर्ववत् भदन्त! पुद्गला विक्षिप्ताःसन्तः शरीरसम्बद्धा असम्बद्धा वा 'जाइं तत्थे'त्यादि प्राकृतत्वात् पुंस्त्वेऽपि नपुंसकता यान् तत्र वेदनासमुद्घातगतपुरुषसंस्पृष्टे क्षेत्रे प्राणान्–द्वित्रिचतुरिन्द्रियान् शङ्खकीटिकामक्षिकादीन् भूतान्–वनस्पतीन् जीवान्–पञ्चेन्द्रियान् गृहगोधिकासर्प्पादीन् सत्त्वान्–शेषपृथिवीकायिकादीन् अभिध्नन्ति–अभिमुखमागच्छन्तो घ्नन्ति वर्त्तयन्ति–आवर्त्तपतितान् कुर्वन्ति लेशयन्ति–मनाक् स्पृशन्ति सङ्घातयन्ति–परस्परं तान् सङ्घातमापन्नान् कुर्वन्ति–अतीव सङ्घातविशेषमाषादितान् कुर्वन्ति परितापयन्ति–पीडयन्ति क्लमयन्ति–मूर्च्छापन्नान् कुर्वन्ति अपद्रावयन्ति–जीवितात् व्यपोरपयन्ति, तेभ्यः पुद्गलेभ्यः तेषां प्राणादीनां विषये भदन्त! सः–अधिकृतो वेदनासमुद्घातगतो जीवः कतिक्रियः प्रज्ञप्तः?, भगवानाह–

गौतम! 'सिय तिकिरिए' इति, स्याच्छब्दः कथञ्चित्पर्यायः, कथञ्चित् कदाचित् कांश्चिच्च जीवानधिकृत्येत्यर्थः त्रिक्रियः, किमुक्तं भवति?–यदा न केषाञ्चित् सर्वथा परितापनं जीविताद् व्यपरोपणं वा करोति तदा सर्वथा त्रिक्रिया एव, यदाषि केषाञ्चित्परितापं मरणं वाऽऽपादयति तदापि येषां नाबाधामुत्पादयति तदपेक्षया त्रिक्रियाः, 'सिय चउकिरिए' इति केषाञ्चित्परितापकरणे तदपेक्षया चतुष्क्रिय इति, केषाञ्चिदपद्रावणे तदपेक्षया पञ्चक्रिया इति, सम्प्रति तमेवाधिकृतं वेदनासमुद्घातगतं जीवमधिकृत्य तेषां वेदनासमुद्घातगतपुरुषपुद्गलस्पृष्टानां जीवानां क्रिया निरूपयति–

'ते णं भंते!' इत्यादि, ते–वेदनासमुद्घातगतपुद्गलस्पृष्टा णमिति पूर्ववत् भदन्त! जीवास्ततो–वेदनासमुद्घातपरिगतान् जीवान् अत्र 'स्थानियपः कर्माधारयोः' इति स्थानिनं यवमधिकृत्य पञ्चमीयं, अयमर्थः–तं वेदनासमुद्घातपरिगतं जीवमधिकृत्य कतिक्रियाः प्रज्ञप्ताः?, भगवानाह –गौतम! स्यात्त्रिक्रियाः यदा न काञ्चित्तस्याबाधामाषादयितुं प्रभविष्णवः स्याच्चतुष्क्रिया यदा तं परितापयन्ति, दृश्यन्ते शरीरेण स्पृश्यमानाः परितापयन्तो वृश्चिकादयः, स्यात् पञ्चक्रियाःये तं जीवितादपि व्यपरोपयन्ति, सिद्धाश्च प्रत्यक्षतः शरीरेण स्पृश्यमाना जीविताव्यावयन्तः सर्पादय इति, सम्प्रति तेन वेदनासमुद्घातगतेन जीवेन व्यापाद्यमानैर्जीवैर्येऽन्ये जीवा व्यापाद्यन्ते ये चान्यैर्जीवैर्व्यापाद्यमान् वेदनासमुद्घातगतेन जीवेन व्यापाद्यन्ते तानधिकृत्य तस्य वेदनासमुद्घातपरिगतस्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तेषां च समुद्घातगतजीवसम्बन्धिपुद्गलस्पृष्टानां जीवानां क्रियानिरूपणार्थमाह–

'से णं भंते ! जीवे ते य जीवा' इत्यादि, सः–अधिकृतो वेदनासमुद्घातगतो जीवः ते च वेदनासमुद्घातपरिगतजीवसम्बन्धिपुद्गलस्पृष्टाः अन्येषां जीवानामुपदर्शितेन प्रकारेण यः परम्पराधातस्तेन परम्पराघातेन कतिक्रियाः प्रज्ञप्ताः ?, भगवानाह–गौतम ! स्यात् त्रिक्रिया इत्यादि पूर्ववत् भावयितव्यः, एनमेव वेदनासमुद्घातमुक्तेन प्रकारेण नैरयिकादिषु चतुर्विंशतिस्थानेषु चिन्तयन्नाह–

'नेरइए णं भंते !' इत्यादि, एवं–उक्तेन प्रकारेण यथैव प्राक् सामान्यतो जीवो वेदनासमुद्घातमधिकृत्य चिन्तितः तथा नैरयिकोऽपि चिन्तयितव्यः, नवरं जीवाभिलापस्थाने नैरयिकाभिलापः कर्त्तव्यो, यथा 'नेरइए णं भंते ! वेदनासमुग्घाएणं समोहए समोहणित्ता जे पोग्गले निच्छुभइ' इत्या, 'एवं निरवसेसं जाव वेमाणिए' इति एवं–नैरयिकोक्तेन प्रकारेण शेषेष्वपि स्थानेषु स्वस्वाभिलापपूर्वकं निरवशेषं तावद्वक्तव्यं यावद्वैमानिकाः–वैमानिकाभिलापः ।

तदेवमुक्तो वेदनासमुद्घातः, सम्प्रति कषायसमुद्घातं समानवक्तव्यत्वादतिदेशतोऽभिधित्सुराह–'एवं कसायसमुग्घाओऽवि भाणियव्वो' इति, एवं–वेदनासमुद्घातगतेन प्रकारेण सामान्यतो जीवपदे चतुर्विंशतिदण्डकक्रमेण च कषायसमुद्घातोऽपि वक्तव्य; स चैवम्– 'जीवे णं भंते ! कसायसमुग्गाएणं समोहए समोहणित्ता जे पोग्गले निच्छुभइ' यान् पुद्गलान् शरीरान्तर्गतान् कषायसमुद्घातवशसमुत्थप्रयत्नविशेषतः स्वशरीराद्बहिरात्मप्रदेशेभ्योऽपि विश्लिष्टान् करोति,

'तेहि णं भंते ! पोग्गलेहिं केवइए खेत्ते अप्फुण्णे केवइए खित्ते फुडे ?, गो० ! सरीरप्पमाणमेत्ते विक्खंभहाहल्लेणं नियमा छद्दिसिं एवइए खेत्ते अफुण्णे एवइए खेत्ते फुडे' कषायसमुद्घातो हि प्रथमं उद्भवति त्रसजीवानां, तेषामेव तीव्रतराध्यवसायसम्भवाद्, एकेन्द्रियाणां तु पूर्वभवानुवृत्तितः, त्रसजीवाश्च त्रसनाड्यां न ततो बहिः, त्रसनाड्यां च व्यवस्थितः स्वशरीरप्रमाणं विष्कम्भबाहल्यं क्षेत्रमात्मविश्लेष्टैः पुद्गलैः भृतं षड्दिकत्वमवश्यमुपपद्यते इति 'नियमा छद्दिसि' मित्युक्तम्, 'एवइए खेत्ते अफुण्णे एवइए खेत्ते फुडे' इत्यादि सर्वं समानं । सम्प्रति मरणसमुद्घातमभिधित्सुराह–

'जीवे णं भंते ! मारणंतियसमुग्घाएण' मित्यादि, इति पूर्ववत्, भदन्त ! कश्चिन्मारणान्तिकसमुद्घातेन समवहतः समवहत्य च यान् पुद्गलान् तैजसादिशरीरान्तर्गतान् 'निच्छुभइ' इति विक्षिपति, आत्मप्रदेशेभ्यो विश्लिष्टान् करोति तैर्भदन्त ! पुद्गलैः कियत् क्षेत्रमापूर्णं कियत् क्षेत्रं भृतम् ?, भगवानाह–गौतम ! विष्कम्भबाहल्यतः शरीरप्रमाणमायामतो जघन्यतः स्वशरीरातिरेकाङ्गुलासङ्खयेयभाग मात्रं यदा तावन्मात्रे क्षेत्रे उत्पद्यते उत्कर्षतोऽसङ्खयेयानि योजनानि एतच्च यदा तावति क्षेत्रे अन्यथा वा द्रष्टव्यम्, एकदिशि–एकस्यां दिशि न तु विदिशि स्वभावतो जीवप्रदेशानां दिशि गमनसम्भवात्, एतावत् क्षेत्रमापूर्णमेतावत् क्षेत्रं स्पृष्टं, जघन्यतः उत्कर्षतो वा आत्मप्रदेशैरपि एतावत् क्षेत्रस्य पूरणसम्भवात्, सम्प्रति विग्रहगतिमधिकृत्यापूरणविषयं स्पर्शनविषयं च कालप्रमाणमाह–

'से णं भंते !' इत्यादि, तत् उत्कर्षेणायामतोऽनन्तरोक्तप्रमाणं भदन्त ! क्षेत्रं विग्रहगतिमधिकृत्य 'केवइयकालस्स' त्ति तृतीयार्थे षष्ठया भावात् कियता कालेनापूर्णा कियता कालेन

स्पृष्टं किमुक्तं भवति ? –विग्रहगतिमधिकृत्य कियता कालेनोत्कर्षतोऽसङ्ख्येययोजनप्रमाणं क्षेत्रमायामतः पुद्गलैरापूर्णं स्पृष्टं भवतीति, भगवानाह–गौतम ! एकसमयेन वा द्विसमयेन वा त्रिसमयेन वा चतुःसमयेन वा विग्रहेणापूर्णं स्पृष्टं, इह पञ्चसामयिकोऽपि विग्रहः सम्भवति परं स कादाचित्क एव इति न विवक्षितः, इयमत्र भावना–उत्कृष्टपदे आयामपतोऽसङ्ख्येयोजनप्रमाणं क्षेत्रं विग्रहगतिमधिकृत्योत्कर्षतः चतुर्भिः समयैरापूर्णं स्पृष्टं वा भवतीति, अथ कथं चतुःसामयिकः पञ्चसामयिको वा विग्रहः सम्भवति ?, उच्यते, त्रसनाड्या बहिरधस्तनभागादुपरितने भागे यद्वोपरितनभागादधस्तने भागे समुत्पद्यमानो जीवो विदिशो वा दिशि दिशो वा विदिशि यदोत्पद्यते तदा एकेन समयेन त्रसनाडीं प्रविशति द्वितीयेनोपरि अधो वा गमनं तृतीयेन बहिर्नन्थ्सरणं चतुर्थेन दिशि उत्पत्तिदेशप्राप्तिः, अयं चतुःसामयिको विग्रहः, एवं पञ्चसामयिकस्तु त्रसनाड्या बहिरेव विदिशो विदिशि उत्पत्तौ लभ्यते, तद्यथा–प्रथमसमये त्रनाड्या बहिरेव विदिशो दिशि गमनं द्वितीये त्रसनाड्या मध्ये प्रवेशः तृतीये उपर्यधो वा गमनं चतुर्थे बहिर्निस्सरणं पञ्चमे विदिश्युत्पत्तिदेशगमनमिति, उपसंहारमाह–'एवंइयकालस्स अप्फुण्णे एवइकालस्स फुडे' इति एतावता कालेनापूर्णमेतावताकालेन स्पृष्टमिति, 'सेसं तं चेव जाव पंचकिरिए' इति अत ऊर्द्ध शेषं तदेव सूत्रं–'ते णं भंते ! पुग्गला निच्छूढा समाणा जाइं तत्थ पाणाइं इत्यादि यावत् पंचकिरिया' इति पदं, तदेवं सामान्यतो जीवपदे मारणान्तिकसमुद्घातश्चिन्तितः, सम्प्रति एनमेव चतुर्विंशतिदण्डकक्रमेण चिन्तयन् प्रथमो नैरयिकातिदेशमाह–

'एव'मित्यादि, एवं–सामान्यतो जीवपद इव नैरयिकेऽपि वक्तव्यं, नवरमयं विशेषः–सामान्यतो जीवपदे क्षेत्रमायामतो जघन्येनाङ्गुलासङ्ख्येयभागमात्रमुक्तं इह तु जघन्यतः सातिरेकं योजनसहस्र, किमत्र कालणमिति चेत् ?, उच्यते, इह नैरयिकाः नरकादुद्वॉत्ताः स्वभावत एव पञ्चेन्द्रियतिर्यक्षु मध्ये उत्पद्यन्ते मनुष्येषु वा नान्यत्र, सर्वजधन्यचिन्ता चात्र क्रियते, ततो यदा पातालकलशसमीपवर्त्ती नैरयिकः पातालकलशमध्ये द्वितीये वा त्रिभागे मत्स्यतयोत्पद्यते तदा पातालकलशठिक्करिकाया योजनसहस्रमानत्वत् यथोक्तं जघन्यमानं नातोऽपि न्यूनतरं कथंचनेति, उत्कर्षतोऽसङ्ख्येयानि योजनानि, तानि सप्तमपृथिवीगतनारकापेक्षया भावनीयानि, अत्रैवोपसंहारमाह–

'एगदिसिं एवइए' इत्यादि, एकस्यां दिशि जघन्यत उत्कर्षतश्च एतावत्–अनन्तरोक्तप्रमाणं क्षेत्रमापूर्णमेतावत् क्षेत्रं स्पृष्टं, विग्रहगतिमधिकृत्य विशेषमाह–'विग्गहे णे'त्यादि, विग्रहेणापूर्णं स्पॉष्टं वा वक्तव्येकसामयिकेन द्विसामयिकेन त्रिसामयिकेन वा, नन्वेतत् सामान्यतो जीवपदेऽप्युक्तं तत्कोऽत्र विशेषस्तत आह–'नवरं चउसमइएण वा ण भन्नइ' इति नवरमत्र सामान्यजीवपद इव चतुःसामयिकेनेति न भण्यते, नैरयिकाणामुत्कर्षतोऽवि विग्रहस्य त्रिसामयिकत्वात्, ते च त्रयः समया एवं भवन्ति–इह कश्चिन्नैरयिको वायव्यां दिशि वर्त्तमानो भरतक्षेत्रे पूर्वस्यां दिशि तीर्यक्पञ्चेन्द्रियतया मनुष्यतया वोत्पित्सुः प्रथमसमये ऊर्द्धमागच्छति द्वितीयसमये वायव्या दिशः पश्चिमदिशं तृतीये ततः पूर्वदिशमितिस, एवमसुरकुमारादिष्वपि यथायोगं त्रिसमयविग्रहभावना कार्या, 'सेसं तं चेव जाव पंचकिरियावि' इति शेषं सूत्रं तदेव वेदनासमुद्घातगतं,

'ते णं भंते ! पोग्गला केवइया कालस्स निच्छुभंति ?, गो० ! जहन्नेणवि अंतो० उक्को०

अंतोमुहुत्तस्से'त्यादि तावद्वक्तव्यं यावदन्तिमं पदं 'पंचकिरियावि' इति, असुरकुमारविषये अतिदेशमाह–'असुरकुमारस्स जहा जीवपदे' इति यथा सामान्यतो जीवपदेऽभिहितं तथा असुरकुमारस्याप्यभिधातव्यं, एतावता किमुक्तं भवति ?–यथा जीवपदे आयामतः क्षेत्रं जघन्यतोऽङ्गुलालसङ्ख्येयभागमात्रं उत्कर्षतोऽसङ्ख्येयानि योजनानि तथाऽत्रापि वक्तव्यं, कथं जघन्यतोऽङ्गुलासङ्ख्येयभागमात्रमिति चेत्, उच्यते, इहासुरकुमारादय ईशानदेवपर्यन्ताः पृथिव्यम्बुवनस्पतिष्वप्युत्पद्यन्ते, ततो यदा कोऽप्यसुरकुमारःसङ्क्लिष्टाध्यवसायी स्वकुण्डालाद्येकदेशे पृथिवीकायिकत्वेनोत्पित्सुर्मरणसमुद्घातमादधाति तदा जघन्येनायामतः क्षेत्रमङ्गुलासङ्ख्येयभागप्रमाणमवाप्यते इति यथा जीवपदे इत्युक्तं, ततोऽत्रावि विग्रहगतिश्चतुःसामायिकी प्राप्नोति तत आह–नवरं विग्रहस्त्रिसामयिको यथा नैरयिकस्य, शेषं सूत्रं तदेव यत् सामान्यतो जीवपदे, नागकुमारादिष्वतिदेशमाह–

'जहा असुरकुमारे' इत्यादि, यथा असुरकुमारेऽभिहितमेवं नागकुमारादिषु तावद् वक्तव्यं यावद्वैमानिकविषयं सूत्रं, नवरमेकेन्द्रिये पृथिव्यादिरूपे यथा जीवे–सामान्यतो जीवपदे तथा निरवशेषं वक्तव्यं, किमुक्तं भवति ?–यथा जीवपदे चतुःसामयिकोऽपि विग्रह उक्तः तथा पृथिव्यादिष्वपि पञ्चसु स्थानेषु वक्तव्यः । शेषं तथवेति, तदेवमुक्तो मारणान्तिकसमुद्घातः,

साम्प्रतं वैक्रियसमुद्घातमभिधित्सुराह–

मू. (६१३) जीवे णं भंते ! वेउव्वियसमुग्घाएणं समोहते समोहणित्ता जे पुग्गले निच्छुभति तेहि णं भंते ! पोग्गलेहिं केवतिते खेत्ते अफुण्णे केवतिए खित्ते फुडे ?, गो० ! सरीरप्पमाणमेत्ते विक्खंभबाहल्लेणं आयामेणं जह० अंगुलस्स संखेज्जतिभागं उक्को० संखिज्जातिं जोअनातिं एगदिसिं विदिसिं वा एवइए खित्ते अफुण्णे एवतिते खेत्ते फुडे,

से णं भंते ! केवतिकालस्स अफुण्णे केवतिकालस्स फुडे ?, गो० ! एगसमइएण वा दुसमइएण वा तिसमइएण वा विग्गहेणं एवतिकालस्स अफुण्णे एवतिकालसस फुडे, सेसं तं चेव जाव पंचकिरियावि, एवं नेरइएवि, नवरं आयामेणं जह० अंगुलस्स असंखेज्जतिभागं उक्को० संखिज्जाइं जोअनाइं एगिदिसिं, एवतिते खेत्ते, केवतिकालस्स ?, तं चेव जहा जीवपदे, एवं जहा नेरइयस्स तहा असुरकुमारस्स, नवरं एगदिसिं विदिसिं वा, एवं जाव थणियकुमारस्स, वाउकाइयस्स जहा जीवपदे, नवरं एगदिसिं, पंचिंदियतिरिक्खजोणियस्स निरवसेसं जहा नेरइयस्स, मणूसवाणमंतरजोइसियवेमाणियस्स निरवसेसं जहा असुरकुमारस्स ।

जीवे णं भंते ! तेयगसमुग्घाएणं समोहते समोहणित्ता जे पोग्गले निच्छुब्भति तेहि णं भंते पोग्गलेहिं केवतिते खेत्ते अफुण्णे केवइए खित्ते फुडे, एवं जहेव वेउव्विते समुग्घाते तहेव, नवरं आयामेणंजह० अंगुलस्स असंखेज्जतिभागं सेसं तं चेव एवं जाव वेमाणियस्स, नवरं पंचिंदियतिरिक्खजोणियस्स एगदिसिं एवतिते खेत्ते अफुण्णे एवइखित्तस्स फुडे ।

जीवे णं भंते ! आहारगसमुग्घातेणं समोहते समोहणित्ता जे पोग्गले निच्छुब्भति तेहि णं भंते ! पोग्गलेहिं केवइए खित्ते अफुण्णे केवइए खेत्ते फुडे ?, गो० ! सरीरप्पमाणमेत्ते विक्खंभबाहल्लेणं आयामेणं जहन्नेणं अंगुलस्स असंखेज्जतिभागं उक्को० संखेज्जाइं जोयणाइं एगदिसिंएवतिते खेत्ते एगसमतिएण वा दुसम०, तिसम० विग्गहेणं एवतिकालस्स अफुण्णे एवतिकालस्स फुडे,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ते णं भंते ! पोग्गला केवतिकालस्स निच्छुब्भति ?, गो० ! जह० अंतो० उक्को० अंतोमुहुत्तस्स, ते णं भंते ! पोग्गला निच्छूढा समाणा जातिं तत्थ पाणातिं भूयातिं जीवातिं सत्तातिं अभिहणंति जाव उद्दवेंति, ते णं भंते ! जीवे कतिकिरिए ?, गो० ! सिय तिकि० सिय चउ० सिय पंचकिरिए,

ते णं भंते ! जीवाओ कतिकिरिया ?, गो० ! एवं चेव, से णं भंते ! ते य जीवा अन्नेसिं जीवाणं परंपराघातेणं कतिकिरिया ?, गो० ! तिकिरियावि चउकिरियावि पंचकि०, एवं मणूसेवि

वृ. 'जीवे णं भंते ! वेउव्विए' इत्यादि प्राग्वत्, नवरमायामत उत्कर्षतः सङ्ख्येयानि योजनानि, एतच्च वायुकायिकवर्ज्जनैरयिकाद्यपेक्षया द्रष्टव्यं, ते हि वैक्रियसमुद्घातमारभमाणास्तथाविधप्रयत्नविशेषभावतः सङ्ख्येयान्येव योजनान्युत्कर्षतोऽप्यात्मप्रदेशानां दण्डमारचयन्ति, नासङ्ख्येयानि योजनानि, वायुकायिकास्तु जघन्यतो वा उत्कर्षतो वा अङ्गुलासङ्ख्येयभागं, तावत्प्रमाणं चोत्कर्षतो दण्डमारचयन्तस्तावति प्रदेशे तैजसादिशरीरपुद्गलान् आत्मप्रदेशेभ्यो विक्षिपन्ति, ततस्तैः पुद्गलैर्भृतं क्षेत्रमायामत उत्कर्षतोऽपि सङ्ख्येयान्येव योजनान्यवाप्यन्ते, एतच्चैवं क्षेत्रप्रमाणं केवलं वैक्रियसमुद्घातसमुद्भवं प्रयत्नमधिकृत्योक्तं, यदा तु कोऽपि वैक्रियसमुद्घातमधिरूढो मरणमुपश्लिष्टः कथमप्युत्कृष्टदेशेन त्रिसामायिकेन विग्रहेणोत्पत्तिदेशमभिगच्छति तदा सङ्ख्यातीतान्यपि योजनानि यावदायामक्षेत्रमवसेयं, तावत्प्रमाणं क्षेत्रापूरणं मरणसमुद्घातप्रयत्नसमुद्भवमिति सदपि न विवक्षितं,

'एकदिसिं विदिसिं वा' इति, तत् जघन्यत उत्कर्षतो वा यथोक्तप्रमाणमायामक्षेत्रमेकस्यां दिशि विदिशि वा द्रष्टव्यं, तत्र नैरयिकाणां पञ्चेन्द्रियतिरश्चां वायुकायिकानां च नियमादेकदिशि, नैरयिका हि परवशा अल्पर्द्धयश्च तिर्यक्पञ्चेन्द्रियाश्चाल्पर्द्धय एव वायुकायिका विशिष्टचेतनाविकलास्ततस्तेषां वैक्रियसमुद्घातमारभमाणानां यदि परं तथास्वाभाव्यादेवात्मप्रदेशदण्डविनिर्गमस्तेभ्यश्चात्मप्रदेशेभ्यो विश्लिष्य पुद्गलानां च स्वभावतोऽनुश्रेणिगमनं न तु विश्रेणितः ततो दिश्येव नैरयिकतिर्यक्पञ्चेन्द्रियवायुकायिकानामायामतः क्षेत्रं द्रष्टव्यं, नतु विदिशि, ये तु भुवनपतिव्यन्तरज्योतिष्कवैमानिका मनुष्याश्च ते स्वेच्छाचारिणो विशिष्टलब्धिसम्पन्नाश्च भवन्ति ततस्ते कदाचित्प्रयलविशेषतो विदिश्यप्यात्मप्रदेशानां दण्डं विक्षिपन्तस्तत्र तेभ्य आत्मप्रदेशेभ्यः पुद्गलान् विक्षिपन्तीति तेषामेकस्यां दिशि विदिशि वा प्रत्येतव्यं ।

वैक्रियसमुद्घातगतश्च कोऽपि कालमपि करोति विग्रहेण चोत्पत्तिदेशप्रभिसर्प्पति ततो विग्रहगतिमधिकृत्य कालनिरूपणार्थमाह-'से णं भंते !' इत्यादि, तत् भदन्त ! क्षेत्रं विग्रहतिमधिकृत्योत्पत्तिदेशं यावत् 'केवइकालस्स' त्ति तृतीयार्थे षष्ठी कियता कालेनापूर्णं कियता कालेन स्पृष्टं ?, भगवानाह-गौतम ! एकसामयिकेन वा द्विसामयिकेन वा त्रिसामयिकेन वा विग्रहेण आपूर्णं स्पृष्टमिति गम्यते, किमुक्तं भवति ? -विग्रहगतिमधिकृत्य मरणदशादारभ्य उत्पत्तिदेशं यावत् क्षेत्रस्यापूरणमुत्कर्षतः त्रिभिः समयैरवाप्यते न चतुर्थेनापि समयेन, वैक्रियसमुद्घातगतो हि वायुकायिकोऽपि प्रायस्त्रसनाड्यामेवोत्पद्यते, त्रसनाड्यां च विग्रह उत्कर्षतोऽपि त्रिसामयिक इति, उपसंहारमाह-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'एवइकालस्स' इत्यादि सुगमं, 'सेसं तं चेवे'त्यादि अत ऊर्द्ध शेषं सूत्रं तदेव-यत्प्राक् वेदनासमुद्घाते उक्तं, तच्च तावत् यावदन्तिमपदं 'पंचकिरियावि' इति, एवं 'नेरइएणवि' इत्यादि सूत्रं तु स्वयं भावनीयं, यस्तु दिग्विदिगपेक्षया विशेषः स प्रागेव दर्शितः।

सम्प्रति तैजससमुद्घातमभिधित्सुराह-'जीवे णं भंते! तेयगसमुग्घाएण'मित्यादि, सुगमं, नवरमयं तैजसमुद्घातश्चतुर्देवनिकायतिर्यक्पञ्चेन्द्रियमनुष्याणां सम्भवति न शेषाणां, ते च महाप्रयत्नवन्त इति तेषां तैजससमुद्घातमारभमाणानां जघन्यतोऽपि क्षेत्रमायामतोऽङ्गुलासङ्ख्येयभागप्रमाणं भवति, न तु सङ्ख्येयभागमानं, उत्कर्षतः सङ्ख्येययोजनप्रमाणं, तच्च जघन्यत उत्कर्षतो वा यथोक्तप्रमाणं क्षेत्रं तिर्यक्पञ्चेन्द्रिययवर्जानामेकस्यां दिशि विदिशि वा वक्तव्यं, तिर्यक्पञ्चेन्द्रियाणां तु दिश्येव, अत्र युक्तिः प्रागुक्तैवानुसर्त्तव्या, तथा चाह-'एवं जहा वेउव्वियसमुग्घाए' इत्यादि। तदेवमुक्तस्तैजससमुद्घातः, साम्प्रतमाहारकसमुद्घातं प्रतिपिपादयिषुराह-

'जीवे णं भंते!' इत्यादि, एतच्च सूत्रं तैजससमुद्घातवद्भावनीयं, नवरमयमाहारकसमुद्घातो मनुष्याणां तत्राप्यघीतचतुर्दशपूर्वाणं तत्रापि केषाञ्चिदेवाहारकलब्धिमतां न शेषाणां, ते चाहारकसमुद्घातमारभमाणा जघन्यत उत्कर्षतो वा यथोक्तप्रमाणमायामतः क्षेत्रमात्मप्रदेशविश्लिष्टैः पुद्गलैरापूरयन्त्येकस्यां दिशि, न तु विदिशि, विदिशि तु प्रयत्नान्तरविशेषादात्मप्रदेशदण्डविक्षेपः पुद्गलैरापूरणं च, न च ते प्रयत्नान्तरमारभते प्रयोजनाभावात् गम्भीरत्वाच्चेति, आहारकसमुद्घातगतोऽपि च कोऽपि कालं करोति विग्रहेण चोत्पद्यते विग्रहश्चोत्कर्षतस्त्रिसामयिक इति

'एगदिसिं एवइए खेत्ते पुडे' तथा 'एगसमइएण वा दुसमइएण वा' इत्याद्युक्तं, तथा मनुष्याणामेवायमाहारकसमुद्घात इति चतुर्विंशतिदण्डकचिन्तोपक्रमे 'एवं मणूसेवि' इत्युक्तं, अस्यायमर्थः-एवं सामान्यतो जीवपदे इव मनुष्येऽपि-मनुष्यचिन्तायामपि सूत्रं वक्तव्यं, जीपदे मनुष्यानेवाधिकृत्य सूत्रस्य प्रवृत्तत्वाद्, अन्येषामाहारकसमुद्घातासम्भवात्॥

तदेवं षण्णामपि छाद्मस्थिकानां समुद्घातनामारम्भे जघन्यतः उत्कर्षतो वा यावत्प्रमाणं क्षेत्रमात्मविश्लिष्टैः पुद्गलैर्यथायोगमौदारिकादिशरीराद्यन्तर्गतैरापूरितं भवित तावत्प्रमाणमावेदितं, सम्प्रति केवलिसमुद्घातविधौ यथास्वरूपैः पुद्गलैर्यावत्प्रमाणसत्य क्षेत्रस्यापूरणमुपजायते तथास्वरूपैः पुद्गलैस्तावत्प्रमाणस्य क्षेत्रस्यापूरणमभिधित्सुराह-

मू. (६१४) *अनगारस्स णं भंते! भावियप्पणो केवलिसमुग्घातेणं समोहयस्स जे चरमा निज्जरापोग्गला सुहुमा णं ते पोग्गला पं० ? समणाउसो!, सव्वलोगंपिय णं ते फुसित्ताणं चिट्ठंति हंता! गो० ! अनगारस्स भावियप्पणो केवलिसमुग्घाएणं समोहयस्स जे चरमा निज्जरापोग्गला सुहुमा णं ते पोग्गला पं० समणाउसो!, सव्वलोगंपिय णं फुसित्ताणं चिट्ठंति।*

छउमत्थे णं भंते! मणूसे तेसिं निज्जरापोग्गलाणं किंचि वण्णेणं वण्णं गंधेणं गंधं रसेण वा रसं फासेण वा फासं जाणति पासति ?, गो० ! नो इणट्ठे समट्ठे, से केणट्ठेण भंते! एवं वुच्चति छउमत्थे णं मणूसे तेसिं निज्जरापोग्गलाणं नो किंचि वण्णेणं २ गंधेणं २ रसेणं २ फासेणं २ नो जाणति पासति ?, गो० ! अयण्णं जंबूद्दीवे दीवे सव्वदीवसमुद्दाणं सव्वब्भंतराए सव्वखुड्डाए वट्टे तेल्लापूयसंठाणसंठिते वट्टे रहचक्कवालसंठाणसंठिए वट्टे पुक्खरकन्नियासंठाणसंठिए वट्टे पडिपुण्णचंदसंठाणसंठिए एगं जोअणसयसहस्सं आयामविक्खंभेणं तिन्नि जोयणसयसहस्साइं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सोलस सहस्साइं दोन्नि सत्तावीसे जोयणसते तिन्नि य कोसे अट्ठावीसं च धनुसतं तेरस य अंगुलाइं अद्धंगुलं च किंचिविसेसाहिते परिक्खेवेणं पं०,

देवे णं महिड्डीते जाव महासोक्खे एगं महं सविलेवणं गंधसमुग्गतं गहाय तं अवदालेति तं महं एगं सविलेवणं गंधसमुग्गतं अवदालइत्ता इणामेव कट्टु केवलकप्पं जंबुद्दीवं दीवं तिहिं अच्छराणिवातेहिं तिसत्तखुत्तो अणुपरियट्टित्ताणं हव्वमागच्छेज्जा, से नूनं गो०! से केवलकप्पे जंबुद्दीवे दीवे तेहिं घाणपोग्गलेहिं फुडे ?, हंता ! फुडे, छउमत्थे णं गोतमा ! मणूसे तेसिं घाणपुग्गलाणं किंचि वण्णेणं वण्णं गंधेणं गंधं रसेणं रसं फासेणं फासं जाणति पासति ?, भगवं ! नो इणट्ठे समट्ठे,

से एएणट्ठेणं गोयमा ! एवं वुच्चइ–छउमत्थे णं मणूसे तेसिं निज्जरापोग्गलाणं नो किंचि वण्णेणं वण्णं गंधेणं गंधं रसेणं रसं फासेणं फासं जाणति पासति, सुहुमा णं ते पोग्गला पं० समणाउसो !, सव्वलोगंपिय णं फुसित्ताणं चिट्ठंति

वृ. 'अनगारस्स णं भंते !' इत्यादि, इह केवलिसमुद्घातः केवलिनो भवति, न छद्मस्थस्य, केवली निश्चयनयमतेनानगारो न गृहस्थो नापि पाखण्डी, स च नियमाद् भावितात्मा विशिष्ट-शुभाध्यवसाययकलितत्वात्, अन्यथा केवलित्वानुपपत्तेः, तत उक्तमनगारस्य भावितात्मन इति, केवलिसमुद्घातेन–उक्तस्वरूपेण समवहतस्य ये चरमाः–चरमसमयभाविनश्चतुर्थसमयमाविन इत्यर्थः, तैरेव सकललोकापूरणात्, 'निर्जरापुद्गला' इति निर्जरागुणयोगात् निर्जराः–निर्जीर्णा इत्यर्थः ते च ते पुद्गलाश्चेति विशेषणसमासः, किमुक्तं भवति ?–ये लोकापूरणसमये पुद्ला आत्मप्रदेशेभ्यो विश्लिष्टाः परित्यक्तकर्मत्वपरिणामा इति,

'सुहुमा णं ते पुग्गला' इति णमिति निश्चये नियतमेतत् सूक्ष्माः–चक्षुरादीन्द्रिय-पथमतिक्रान्तास्ते पुद्गलाः प्रज्ञप्ताः भगवद्भिर्हे श्रमण हे आयुष्मन् ।, गौतमकृतं भगवतः सम्बोध-नमेतत्, तथा ण मिति निश्चितमेतत् सर्वलोकमपि ते पुद्गलाः स्पृष्टा णमिति वाक्यालङ्कारे तिष्ठन्ति इति गौतमेन प्रश्ने कृते भगवानाह–'हंता गोयमा !' इत्यादि, हन्तेति प्रीतौ, यदाह शाकटायनः–'हन्तेति सम्प्रदानप्रीतिविषादादिष्वि'ति, प्रीतिश्चात्र यथावस्थितस्वरूपप्रतिपादकत्वात् प्रश्नसूत्रस्य साम्मत्यलक्षणा वेदितव्या, न तु हर्षरूपा, क्षीणमोहत्वेन भगवतो हर्षविषादातीतत्वात्, साम्मत्यमेव ख्यापयति, यदुक्तं गौतमेन तदेवानुवदति–

'अनगारस्से'त्यादि भावितार्थं । सूक्ष्माः पुद्गला इत्युक्तं, तच्च सूक्ष्मत्वमापेक्षिकमपि भवति यथा बदरादीनामामलकाद्यपेक्षया, ततश्चक्षुरादीन्द्रियगोचरातिक्रान्तरूपं तत्प्रतिपिपाद-यिषुरिदमाह–'छउमत्थे णं भंते !' इत्यादि, छद्मस्थो भदन्त ! मनुष्यः तेषां–अनन्तरोद्दिष्टानां निर्जरापुद्गलानां किञ्चिदिति प्रथमतः सामान्येन प्रयुक्तं जानाति पश्यतीति सम्बध्यते,

एतदेव विशेषतो व्याचष्टे–'वर्णेन' वर्गग्राहकेण चक्षुरिन्द्रियेण वर्ण्यते–यथावस्थितं वस्तुस्वरूपं निर्णीयते अनेनेति वर्णं इति व्युत्पत्तेः वर्णं–कृष्णादिरूपं 'गन्धेन' गन्धग्राहकेण नासिकेनद्रियेण 'गन्ध आघ्राणे' 'चुरादिभ्यो णिच्' गन्ध्यते–आघ्रायते शुभोऽशुभो वा गन्धोऽनेनेति गन्ध इति व्युत्पादनात् गन्धं शुभमशुभं वा 'रसेन' रसग्राहकेण रसेन्द्रियेण रस्यते–आस्वाद्यतेऽनेनेति शब्दार्थत्वात् रसं–तिक्तादिरूपं, 'स्पर्शेन' स्पर्शग्राहकेण स्पर्शनन्द्रियेण स्पृश्यते कर्कशादिरूपः परिच्छेद्यवस्तुगतः स्पर्शोऽनेनेति स्पर्श इति व्युत्पादनात् 'स्पर्श' कर्कशादिरूपं जानाति पश्यतीति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भगवानाह-गौतम ! नायमर्थः समर्थः उपपन्न इत्यर्थः, पुनर्गौतम : प्रश्नयति-

'से केणट्ठेणं भंते !' इत्यादि, उत्तानार्थ, भगवानाह-गौतम ! 'अयण्ण'मित्यादि, अयं-प्रत्यक्षत उपलभ्यमानः, णमिति वाक्यालङ्कारे, अष्टयोजनोच्छ्रितया रत्नमय्या जम्ब्वा उपलक्षितो द्वीपो जम्बूद्वीपो द्वीपः, 'सर्वाभ्यन्तरक' इति सर्वेषामभ्यन्तरो-मध्यवर्तती सर्वाभ्यन्तरःसर्वाभ्यन्तर एव सर्वाभ्यन्तरकः "जातौ वा स्वार्थे क" इति प्राकृतलक्षणवशात् स्वार्थे कप्रत्ययः, केषां सर्वेषा-मभ्यन्तर इत्याह-सर्वद्वीपसमुद्राणां, तथाहि-सर्वे-अशषा द्वीपसमुद्रा जम्बूद्वीपादारभ्याग-माभिहितेन क्रमेण द्विगुणद्विगणविस्तारा व्यवस्थिताः ततो भवति द्वीपसमुद्राणामेव जम्बूद्वीपोऽ-भ्यन्तरः, तथा 'सव्वखुड्डागे' इति सर्वेभ्यो द्वीपसमुद्रेभ्यः क्षुल्लको-ह्रस्वः सर्वक्षुल्लकः, तथाहि-सर्वे लवणादयः समुद्राः सर्वे च धातकीखण्डादयो द्वीपाः अस्माज्जम्बूद्वीपादारभ्य प्रवचनोक्तेन क्रमेण द्विगुणद्विगुणचक्रवालवितताः ततः शेष द्वीपसमुद्रापेक्षयाऽयं सर्वलघुरिति, तथा वृत्तो-वर्त्तुलो, यतस्तैलापूपसंस्थानसंस्थितः, तैलेन हि पक्वोऽपूपः प्रायः परिपूर्णवृत्तो भवति न घृतपक्व इति तैलविशेषणं, तस्येव संस्थानसंस्थितः, तथा वृत्तो जम्बूद्वीपो द्वीपो यतो रथचक्रवालसंस्थानसंस्थितः, रथस्य-रथाङ्गस्य चक्रस्य चक्रवालं-मण्डलं तस्येव यत् संस्थान तेन संस्थितः, एवं सूत्रोक्तमन्यदपि पदद्वयं भावनीयं, 'आयामविक्खंभेणं'ति आयामश्च विष्यकम्भश्चेति समाहारो द्वन्द्वः तेन आयामेन विष्कम्भेन च प्रत्येकमेकं योजनशतसहस्रमित्यर्थः, परिधिपरिमाणानयनगणितं च जम्बूद्वीपप्रज्ञप्त्-यादावनेकशो भावितमिति ततोऽवधार्यं

'देवे ण'मित्यादि, देवश्च णमिति वाक्यालङ्कारे 'महर्द्धिक' इति महती ऋद्धीः-विमानपरि-वारादिका यस्या सौ महर्द्धिकः 'जाव महासोक्खे' इति यावत्शब्दकरणात् 'महज्जुइए महाबले महायसे' इति द्रष्टव्यं, तत्र महती द्युतिः-शरीराभरणविषया यस्य स महाद्युतिः, महद्बदबां-शारीरः प्राणो यस्य स महाबलः महत् यशः-ख्यातिर्यस्य स महायशाः, तथा महत्-प्रभूतं सौख्यं यस्य प्रभूतसद्वेद्यकर्मोदयभावादिति महासौख्यः, क्वचित्-'महेसक्खे' इति पाठः, तत्र महान् ईश-ईश्वर इत्याख्या-शब्दप्रथा यस्य लोके स महेशाख्यः, अथवा ईशनमीशो, भावे धञ्प्रत्ययः, ऐश्वर्यमित्यर्थः ईश ऐश्वर्ये' इति वचनात्, तत ईशं-ऐश्वर्यमात्मनः ख्याति-अन्तर्भूतण्यर्थतया ख्यापयति प्रकाशयति तथा परिवारादिस्फीत्या वर्त्तते इति ईशाख्यः महांश्चासावीशाख्यश्च महेशाख्यः अन्यत्र 'महासक्खे' इति वा पाठः, तत्रैवं वृद्धव्यख्या-आशुगमनादश्वं-मनः अक्षाणि-इन्द्रियाणि स्वस्व-विषयव्यापकत्वात्, अक्षशब्दो हि प्रायेणाशुङ् व्याप्तावित्यस्य वातोर्निष्पाद्यते, अश्वश्चाक्षाणि च अश्वाक्षाणि, महान्ति-स्फीतिमन्ति अश्वाक्षाणि यस्यासौ महाश्वाक्षः, स्फीतमनाः स्फूर्त्तिम-च्चक्षुरादीन्द्रियश्चेत्यर्थः, एकं महान्तं-अतिगुरुकमन्यथा स्तोकतया तद्वतैर्गन्धपुद्गलैः सकलस्य जम्बूद्वीपस्य व्याप्तुमशक्यत्वात्,

'सविलेवण'मिति सह विशष्टं-अतिसूक्ष्मरंध्राणामपि स्थमनात् लेपनं लेपो-जत्वादिकृतं पिधानमुपरि वर्त्तते येन स तथा तं, विशिष्टलेषप्रदानाबावे हि बहवः सूक्ष्मरन्त्रैर्गन्धपुद्गला निर्गच्छन्ति तत उद्घाटनवेलायां तेषां स्तोकीभावेन सकलजम्बूद्वीपापूरणं नोपपद्यते, 'गंधसमुग्गयं'-तिगन्धद्रव्यैरतिविशिष्टैः परिपूर्णं भृतः समुद्गको गन्धसमुद्गकस्तं 'अवदालेइ'त्ति अवदालयति उत्पाटतीत्यर्थः, 'इणामे वे'ति एवमेवेत्यर्थः 'केवलकप्पं'ति केवलं-केवलज्ञानं तत्कल्पं परिपूर्णतया

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्सदशं परिपूर्णमित्यर्थः, जम्बूद्वीपं द्वीषं त्रिभिः अप्सरोनिपातो नाम–चप्पुटिका ततस्तिसृभिः चप्पुटिकाभिरिति द्रष्टव्यं, चप्पुटिकाश्च कालोपलक्षणं, ततोऽयमर्थः–यावता कालेन तिस्रश्चप्पुटिकाः पूर्यन्ते तावत्कालमध्ये इति, त्रिसप्तकृत्वः–एकविंशतिवारान् अतिपरिवत्त्य– सामस्त्येन परिभ्रम्य 'हव्वं' शीघ्रमागच्छेतः–समागच्छेत्

'से नूनं'इत्यादि, सेशब्दो मगधदेशप्रसिद्धया अथशब्दार्थे, अथशब्दस्य चार्यो वाक्योपन्यासादयः उक्तं च–'अथ प्रक्रियाप्रश्नानन्तर्यमङ्गलाधिकारवाक्योपन्यासेषु'तत्राय वाक्योपन्यासे, तद्भावना च एवं–उक्तस्तावत् विवक्षितार्थप्रतिपत्तिहेतोर्द्दष्टान्तस्य पीठिकाबन्धः, सम्प्रति विवक्षितार्थप्रतिपत्तिहेतुष्टद्दष्टान्तवाक्यमुपन्यस्यते, नूनं–निश्चितं, गौतम ! स केवलकल्पो जम्बूद्वीपस्तैर्गन्धसमुद्रकाद्विनिर्गतैः घ्राणपुद्गलैः–गन्धपुद्गलैः स्पृष्टो–व्याप्तः, काक्वाा चेदं सूत्रमधीयते ततः प्रश्नोऽवगम्यते, अथवा प्रश्नार्थः सेशब्दस्ततोऽअसा प्रश्नयतीति, गौतम ! आह–हंत ! स्पृष्टो गन्धपुद्गलानां सर्वतोऽगिसर्प्पणशीलत्वात्, पुनरपि भगवानाह–

'छउमत्थे ण'मित्यादि सुगमम् एष चात्र भावार्थः–यथा ते सकलजम्बूद्वीपव्यापिनो गन्धपुद्गलाः सूक्ष्मत्वात् न छद्मस्थानां चक्षुरादीन्द्रियगम्यास्तथा सकललोकव्यापिनो निर्जरापुद्गला अपीति, उपसंहारमाह–'एसुहुमाणं'ति एतावत्सूक्ष्माः अथ यन्निमित्तं केवली समुद्घातमारभते तत्पिपृच्छिषुरिदं प्रश्नसूत्रमाह–

मू. (६१५) *कम्हा णं भंते ! केवली समुग्घायां गच्छति ?, गो० ! केवलिस्स चत्तारि कम्मंसा अक्खीणा अवेदिया अनिज्जिण्णा भवंति, तं०–वेदणिज्जे आउए नामे गोए, सनव्वबहुप्पएसे से वेदणिज्जे कम्मे हवति सव्वत्थोवे आउए कम्मे हवइ, विसमं समं करेति बंधणेहिं ठितीहि य, विसमसमीकरणयाए बंधणेहिं ठितीहि य एवं खलु केवली समोहणति,*

एवं खलु समुग्घायं गच्छति, सव्वेवि णं भंते ! केवली समोहणंति सव्वेवि णं भंते ! केवली समुग्घातं गच्छंति ?, गो० ! नो इणट्ठे समट्ठे,

वृ. 'कम्हा ण'मित्यादि, कस्मात् कारणात् णमिति वाक्यालङ्कारे भदन्त ! 'केवली' केवलज्ञानोपेतः समुद्घातं गच्छति–आरभते, कृतकृत्यत्वात् किल तस्येति भावः, भगवानाह– 'गोयमे'त्यादि, गौतम ! केवलिनश्चत्वारः 'कर्मांशाः' कर्मभेदाः 'अक्षीणाः' क्षयमनुपगताः, कुत इत्याह–अवेदिताः, अत्र 'निमित्तकारणहेतुषु सर्वासां विभक्तीनां प्रायो दर्शन'मिति न्यायात् हेतौ प्रथमा, ततोऽयमर्थः–यतोऽवेदिताः ततोऽक्षीणाः, कर्मणां हि क्षयो नियमतः प्रदेशतो विपाकतो वा वेदनाद् भवति, 'सव्वं च पएसतया भुञ्जइ कम्ममणुभावतो भइय' मित्यादि वचनात्, ते चत्वारः कर्मांशा अपि अवेदिता अतोऽक्षीणाः, एतदेव पर्यायेण व्याचष्टे–'अनिर्जीर्णाः' सामस्त्येनात्मप्रदेशेभ्योऽपरिशाटिताः 'भवन्ति' तिष्ठन्ति, तानेव नामग्राहमभिधित्सुराह–

'तंजहे'त्यादि सुगमं, तत्र यदा 'से' तस्य केवलिनः सर्वबहुप्रदेशं वेदनीयमुपलक्षणमेतत् नामगोत्रे च तथा सर्वस्तोकप्रदेशमायुःकर्म तदा स 'बंधणेहिं ठिइहिं'न्ति बध्यते–भवचारकांत् विनिर्गच्छन् प्रतिबध्यते यैस्ते बन्धनाः, 'करणाधारे' इति करणेऽनट्प्रत्ययः, अथवा बध्यन्ते– आत्मप्रदेशैः सह लोलीभावेन संश्लिष्टाः क्रियन्ते योगवशात् ये त बन्धनाः 'कृद्बहुल'मिति वचनात् कर्मणि अनट्, उभयत्रापि करर्मपरमाणवो वाच्याः, स्थितयो–वेदनाकालाः, तथा चोक्तं भाष्यकृता–

Jain Education International For Private & Personal Use Only www.jainelibrary.org

॥१॥ "विसमं स करेइ समं समोहओ बंधणेहि ठिइए य।
कम्मद्दव्वाइं बंधणातिं कालो ठिई तेसिं ॥"

ततश्च तैर्बन्धनैः स्थितिभिश्च विषमं सत् वेदनीयादिकं समुद्घातविधिना सममायुषा सह करोति, स एवं खलु केवली बन्धनैः स्थितिभिश्च विषमस्य सतो वेदनीयादिकस्य कर्मणः 'समीकरणयाए' इति अत्र ताप्रत्ययः स्वार्थिकः, ततोऽयमर्थः-समकरणाय 'समोहन्नइ' इति समवहन्ति-समुद्घातय प्रयतते, एवं खलु समुद्घातं गच्छति, उक्तं च-

॥१॥ "आयुषि समाप्यमाने शेषाणं कर्म्मणां च यदि समाप्तिः।
न स्यात् स्थितिवैषम्यात् गच्छति स ततः समुद्घातम् ॥

॥२॥ स्थित्या च बन्धनेन च समीक्रियार्थ हि कर्मणां तैषाम्।
अन्तर्मुहूर्त्तशेषे तदायुषि समुज्झिघांसति सः ॥"

ननु प्रभूतस्थितिकस्य वेदनीयादेरायुषा सह समीकरणार्थं समुद्घातभारभते इति यदुक्तं तन्नोपपन्नं, कृतनाशादिदोषप्रसङ्गात्, तथाहि-प्रभूतकालोपभोग्यस्य वेदनीयादेरारत एवापगमसम्भवात् कृतनाशः, वेदनीयादिवच्च कृतस्यापि कर्मक्षयस्य पुनर्नाशसम्भवान्मोक्षेऽप्यनाश्वसप्रसङ्गः, तदसत्, कृतनाशादिदोषाप्रसङ्गात्, तथाहि-इह यथा प्रतिदिवसं सेतिकापरिभोगेन वर्षशतोपभोग्यस्य कल्पितस्याहारस्य भस्मकव्याधिना तत्सामर्थ्यात् स्तोकजिवसैर्निःशेषतः परिभोगान्न कृतनाशोपगमः तथा कर्म्मणोऽपि वेदनीयादेः तथाविधशुभागध्यवसायानुबन्धादुक्रमेण साकल्यतो भोगान्न कृतनाशरूपदोषप्रसङ्गः, द्विविधो हि कर्म्मणोऽनुभवः-प्रदेशतो विपाकतश्च, तत्र प्रदेशतः सकलमपि कर्मानुभूयते, न तदस्ति किञ्चित् कर्म यत्प्रदेशतोऽप्यननुभूतं सत् क्षयमुपयाति, ततः कथं कृतनाशदोषापत्तिः ?,

विपाकतस्तु किञ्चिदनुभूयते किञ्चिन्न, अन्यथा मोक्षाभावप्रसङ्गात्, तथाहि-यदि विपाकानुभूतित एव सर्वं कर्म क्षपणीयमिति नियमः तर्ह्यसङ्ख्यातेषु भवेषु तथाविधविचित्राध्यवसायविशेषैर्यन्नरकगत्यादिकं कर्मोपार्जितं तस्य नैरस्मिन् मनुष्यादावेव भवेऽनुभवः, स्वस्वभवनिबन्धनत्वात् तथाविधविपाकानुभवस्य, क्रमेण च स्वस्वभवानुघमनेन वेदने नारकादिभवेषु चारित्राभावन प्रभूततरकर्मसन्तानोपचयात् तस्यापि स्वस्वभवानुगमनेनानुभवोपगमात् कुतो मोक्षः ?,

तस्मात् सर्वं कर्म विपाकतो भाज्यं प्रदेशतोऽवश्यमनुभवनीयमिति प्रतिपत्तव्यं, एवं च न कश्चिद्दोषः, नन्वेवमपि दीर्घकालभोग्यतया तद्वेदनीयादिकं कर्मोपचितं अथ च परिणामविशेषादुपक्रमेणारादेव तदनुभवति ततः कथं न कृतनाशदोषापत्तिः ?, तदप्यसम्यक्, बन्धकाले तथाविधाध्यवसायवशादादावुपक्रमयोग्यस्यैव तेन बन्धनात्, अपिच-जिनवचनप्रामाण्यादपि वेदनीयादिकर्मणामुपक्रमो मन्तव्यः, यदाह भाष्यकृत्-

॥१॥ "उदयक्खयक्खओवसमोवसमा जं च कम्मुणो भणिया।
दव्वाइं पंचगं पइ जुत्तमुवक्कमणमेत्तोवि ॥"

न चैवं मोक्षोपक्रमहेतुः कश्चिदस्ति येन तत्रानाश्वासप्रसङ्गः, यथा च न मोक्षोपक्रमहेतुः कश्चिदस्ति तथाऽन्तिमसूत्रे भावयिष्यते, ततो यदुक्तं 'वेदनीयादिवच्च कृतस्यापि कर्मक्षयस्ये'त्यादि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न तत्सम्यगुपपन्नमित स्थितं, अपर आह–ननु यदा वेदनीयादिकमतिप्रभूतं सर्वस्तोकं चायुस्तदा समधिकवेदनीयादिसमुद्घातार्थं समुद्घातमारभतां, वेदनीयादेः सोपक्रमत्वात्, यदा त्वधिकमायुः सर्वस्तोकं च वेदनीयादिकं तदा का वार्ताता ?, न खल्वायुषः समधिकस्य समुद्घाताय समुद्घातः कल्प्यते, चरमशरीरिणामायुषो निरुपक्रमत्वात् 'चरमसरीरा य निरुवक्कमा' इति वचनात्, तदयुक्तं, एवंविधभावस्य कदाचनाप्यभावात्, तथाहि–

सर्वदैव वेदनीयाद्येवायुषः सकाशादधिकस्थितिकं भवति, न तु कदाचिदपि वेदनीयादेरायुः, अथैवंविधो नियमः कुतो लभ्यते ?, उच्यते, परिणामस्वभाव्यात्, तथाहि–इत्थंभूत एवात्मनः परिणामो येनास्यायुर्वेदनीयादेः समं भवति न्यूनं वा न तु कदाचनाप्यधिकं, यथैतस्यैवायुषः खल्वध्रुवबन्धः, तथाहि–ज्ञानावरणादीनि कर्माणि आयुर्वर्जानि सप्तापि सदैव बध्यन्ते, आयुस्तु प्रतिनियत एव काले स्वभवत्रिभागादिशेषरूपे, तत्र चैवंविधवैचित्र्यनियमे न स्वभावादतेऽपरः कश्चिदस्ति हेतुरेवमिहापि स्वभावविशेष एव नियामको द्रष्टव्यः, आह च भाष्यकृत्–

॥१॥ "असमठिईणं नियमो को थेवं आउयं न सेसंति ।
परिणामसहावाओ अद्धुवबंधोवि तस्सेव ॥"

अथ विशेषपरिज्ञानाय गौतमो भगवन्तं पृच्छति–'सव्वेवि ण'मित्यादि, णमिति निश्चये सर्वेऽपि खलु केवलिनः समवध्नन्ति–समुद्घाताय प्रयतन्ते, प्रयत्नानन्तरं च सर्वेऽपि खलु केवलिनः समुद्घातं गच्छन्त ?, इति गौतमेन प्रश्ने कृते सति भगवान्निर्वचनमाह–'गोयमे'त्यादि, गौतम ! नायमर्थः समर्थः–नायमर्थः उपपन्नः, किमुक्तं भवति ?–सर्वेऽपि केवलिनः समुद्घाताय न प्रयतन्ते नापि समुद्घातं गच्छन्ति, किन्तु येषामायुषः समधिकं वेदनीयादिकं, यस्य पुनःस्वभावत एवायुषा सह समस्थितिकानि वेदनीयादीनि कर्माणि सोऽकृतसमुद्घात एव तानि क्षपयित्वा सिध्यति, तथा चाह–

मू. (६१६) *"जस्साउएण तुल्लाति, बंधणेहिं ठितीहि य ।*
भवोवग्गहकम्माइं, समुघातं से णं गच्छति ॥

वृ. 'जस्से'त्यादि, यस्य केवलिन आयुषा सह भवे–मनुष्यभवे उप–समीपेन गृह्यते–अवष्टभ्यते यैस्तानि भवोपग्रहाणि तानि च तानि कर्माणि च भवोपग्राहकर्माणि–वेदनीयनामगोत्राणि बन्धनैः–प्रदेशैः स्थितिभिश्च तुल्यानि–समानि भवन्ति स समुद्घातं न गच्छति, अकृतसमुद्घात एव तानि क्षपयित्वा स सिद्धिसौधमध्यास्ते इति भावः, उक्तं च–

॥१॥ "जस्स उ तुल्लं भवइ य कम्मचउक्कं सभावतो जो य ।
सो अकयसमुग्घाओ सिज्झइ जुगवं खेवऊणं ॥"

अथायं कदाचित्को भाव उत बाहुल्यभावः ?, तत आह–

मू. (६१७) *अगंतूणं समुग्घातं, अनंता केवली जिना ।*
जरामरणविप्पमुक्का, सिद्धिं वरगतिं गता ॥

वृ. 'अगंतूण समुग्घाय'मित्यादि, अगत्वा समुद्घातं–केवलिसमुद्घातं 'सिद्धिं' चरमगतिं गता इति सम्बन्धः, कियत्सङ्ख्याका इत्याह–अनन्ताः–अनन्तसङ्ख्याकाः 'केवलिनः' केवलज्ञानदर्शनोपेताः, अनेन ये नवानामात्मगुणानामत्यन्तोच्छेदो मोक्ष इति प्रतिपन्नास्तेऽपास्ता द्रष्टव्याः,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ज्ञानस्य निरुपचरितात्मस्वभावत्वात्, तस्य च विनाशायोगाद्, अन्यथाऽऽत्मन एवाभावापत्तेः, न चात्मनो निरन्वयो विनाशः, सतःसर्वथा विनाशायोगात्, 'नासतो विद्यते भावो, नाभावो विद्यते सत' इति न्यायात्, तथा जिना–जितरागादिशत्रवः, अनेन गोशालकमतापाकरणमाह, ते हि मुक्तिपदमध्यासीनमपि न तत्त्व तो वीतरागमपि मन्यन्ते, 'अवाप्तमुक्तिपदा अपि तीर्थनिकार-दर्शनादिहागच्छन्ती'ति वचनात्, तत्त्वतो वीतरागस्य च पराभवबुद्धेरिहागमनस्य चासम्भवात्, पुनः कथंभूता इत्याह–

'जरामरणविप्रमुक्ता' जरा च मरणं च जरामरणे ताभ्यां विप्रमुक्ता जरामरणविप्रमुक्ताः, जरामरणग्रहणमुपलक्षणं तेन समस्तरोगशोकादिसांसारिकक्लेशविमुक्ता इति द्रष्टव्यं, एतेन एकान्ततो मोक्षसौख्यस्योपादेयतामाह, अन्यस्यैवंविधस्वरूपस्य स्थानस्यासम्भवात्, नहि संसारे प्रकर्षसुखप्राप्तमपि स्थानमेवंविधमस्ति, सर्वस्यापि मरणपर्यवसानत्वात्, सेधनं सिद्धिः–अशेषक-र्मांशापगमेनात्मनः स्वरूपेऽवस्थानता वरा–सर्वगतीनामुत्तमा गम्यते इति गतिर्वरगतिस्तां वरगतिरूपामित्यर्थःगताः–प्राप्ताः,

मू. (६१८) *कतिसमतिए णं भंते! आउज्जीकरणे पं० ?, गो० ! असंखेज्जसमतिए अंतो-मुहुत्तिए आउजीकरणे पं० ।*

वृ. इह सर्वोऽपि केवली केवलिसमुद्घातं गच्छन् प्रथमत आवर्जीकरणमुपगच्छति, तथा च केवलिसमुद्घातप्रक्रियां बिभणिषुः समुद्घातशब्दव्याख्यानपुरस्सरमाह भाष्यकारः–

॥ १ ॥ "तत्थाउयअसंसाहियकम्मसमुग्घायणं समुग्घाओ ।
तं गमंतुमणा पुव्वं आउज्जीकरणं उवेइ ॥"

अथावर्जीकरणमिति कः शब्दार्थः ?, उच्यते, आवर्जनमावर्जः–आत्मानं प्रति मोक्षस्या-भिमुखीकरणं आत्मनो मोक्षं प्रत्युपयोजनमिति तात्पर्यार्थः, अथवा आवर्ज्यते–अभिमुखीक्रियते मोक्षोऽनेनेति आवर्जः–शुभमनोवाक्कायव्यापारविशेषः, उक्तं च–'आवज्जणमुवओगो वावारो वा' इति, तत उभयत्रापि अतस्य तस्य करणमिति विवक्षायां च्विप्रत्ययः आवर्जीकरणं, अपरे आवर्जितकरणमित्याहुः, तत्रायं शब्दार्थः–आवर्जितो नाम अभिमुखीकृतः तथा च लोके वक्तारः "आवर्जितोऽयं मया, सम्मुखीकृत' इत्यर्थः ततश्च तथाभव्यत्वेनावर्जितस्य–मोक्षगमनं प्रत्यभि-मुखीकृतस्य करणं–क्रिया शुभयोगव्यापारणं आवर्जितकरणं,

अपरे 'आउज्जियाकरण'मिति पठन्ति, तत्रैवं शब्दसंस्कारमाचक्षते–आयोजिकाकरणमिति, अयं चात्रान्वयार्थः–आङ् मर्यादायं आ–मर्यादया केवलिदृष्ट्या योजनं–शुभानां योगानां व्यापारक-णमायोजिका, भावे वुञ्, तस्याःकरणमायोजिकाकरणः, अन्ये 'आउस्सियकरण'मिति ब्रुवते, तत्राप्यमन्वर्थः–आवश्यकेन–अवश्यंभावेन करणमावश्यककरणं, तथाहि–समुद्घातं केचित्कुर्वन्ति केचिच्च न कुर्वन्ति इदं त्वावश्यककरणं सर्वेऽपि केवलिनः कुर्वन्तीति, सम्प्रतय-स्यैवावर्जीकरणस्य कालप्रमाणनिरूपणार्थं प्रश्ननिर्वचनसूत्रे आह–

मू. (६१९) *कतिसमतिए णं भंते! केवलिसमुग्घाए पं० ?, गो० ! अट्ठसमतिते पं०, तं०–पढमे समए दंडं करेति बीए समए कवाडं करेति ततिए समए मंथं करेति चउत्थे समए लोगं पूरेति पंचमे समए लोयं पडिसाहरति छट्ठे समए मंथं पडिसाहरति सत्तमए समए कवाडं पडिसाहरति*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अट्ठमे समए दंडं पडिसाहरति, दंडं पडिसाहरेत्ता तओ पच्छा सरीरत्थे भवति।

से णं भंते! तहा समुग्घायगते किं मनजोगं जुंजति वइजोगं जुंजति कायजोगं जुंजति?, गो० ! नो मनजोगं जुंजति नो वइजोगं जुंजति कायजोगं जुंजति,

कायजोगे णं भंते! जुंजमाणे किं ओरालियकायजोगं जुंजति ओरालियमीसासरीकायजो० किं वेउव्वियसरीरकाययोगं वेउव्वियमीसासरीरकायजोगं० किं आहरगसरीरका० आहारगमीसासरीका० किं कम्मगसरीरका०?,

